६१४-सम्पूर्वक इण् धातु और निपूर्वक कष् धातुके उत्तर आ प्रत्यय हो, स्वरादित्वके कारण यह अव्यय संज्ञक हुआ । समया । निकषा (समीप) ॥

६१५ 'चितेः कणः कश्च' ॥ ॥ बाहुलकादगुणः । 'चिक्कणं मसृणं स्निग्धम्' ॥

६१५-चित् धातुके उत्तर कण प्रत्यय हो, और क आदेश हो, बाहुलकबलसे गुण न होकर- "चिक्कणं मसृणं स्निग्धम्" (चिकना) ॥

६१६ 'सूचेः स्मन्' ॥ ॥ सूक्ष्मम् ॥

६१६-सूच् धातुके उत्तर स्मन् प्रत्यय हो, सूक्ष्मम् ॥

६१७ 'पातेर्डुम्सुन्' ॥ ॥ पुमान् ॥

६१७-पा धातुके उत्तर डुम्सुन् प्रत्यय हो, पुमान् ॥

६१८ 'रुचिभुजिभ्यां किष्यन्' ॥ ॥ रुचिष्यमिष्टम् । भुजिष्यो दासः ॥

६१८-रुच् और भुज् धातुके उत्तर किष्यन् प्रत्यय हो, रुचिष्यम्-इष्टम् । भुजिष्यो दासः ॥

६१९ 'वसेस्तिः' ॥ ॥ 'वस्तिर्नाभेरधो द्वयोः'। 'वस्तयः स्युर्दशासूत्रे' । बाहुलकात् शासः । शास्तिः राजदण्डः । विन्ध्याख्यमगमस्यतीत्यगस्तिः । शकन्ध्वादिः ॥

६१९-वस् धातुके उत्तर ति प्रत्यय हो, "वस्तिर्नाभेरधो द्वयोः" " वस्तयः स्युर्दशासूत्रे" बाहुलकबलसे शास धातुके उत्तर भी ति प्रत्यय होकर-शास्तिः-राजदण्डः । विंध्याख्यमगमस्यति इति=अगस्तिः, यह शकन्ध्वादि है ॥

६२० 'सावसेः' ॥ ॥ स्वस्ति । स्वरादिपाठादव्ययत्वम् ॥

६२०-सुपूर्वक अस् धातुके उत्तर ति प्रत्यय हो, स्वस्ति (कल्याण) स्वरादिमें पाठ होनेसे यह अव्यय है ॥

६२१ 'वौ तसेः' ॥ ॥ वितस्तिः ॥

६२१-विपूर्वक तस् धातुके उत्तर ति प्रत्यय हो, वितस्तिः (बालिस्त) ॥ (वौ शसेः) ऐसा मूलपाठ होनेपर विपूर्वक शस् धातुके उत्तर ति प्रत्यय हो, विशस्तिः ॥

६२२ 'पदिप्रथिभ्यां नित्' ॥ ॥ पत्तिः । प्रथितिः । तितुत्रेष्वग्रहादीनामितीट् ॥

६२२-पद् और प्रथ् धातुके उत्तर ति प्रत्यय हो, और वह नित् हो, पत्तिः । प्रथितिः, यहां " तितुत्रेष्वग्रहादीनाम्" इस वार्तिकसे इट् हुआ ॥

६२३ 'दृणातेर्ह्रस्वश्च' ॥ ॥ दृतिः ॥

६२३-दॄ धातुके उत्तर ति प्रत्यय हो, और ऋकारको ह्रस्व हो, दृतिः ॥

६२४ 'कॄतॄकृपिभ्यः कीटन्' ॥ ॥ किरीटं शिरोवेष्टनम् । तिरीटं सुवर्णम् । 'कृपीटं कुक्षिवारिणोः' ॥

६२४-कॄ, तॄ, और कृप् धातुके उत्तर कीटन् प्रत्यय हो, किरीटम्-शिरोवेष्टनम् । तिरीटं-सुवर्णम् । "कृपीटं कुक्षि वारिणोः" ॥

६२५ 'रुचिवचिकुचिकुटिभ्यः कितच्' ॥ ॥ रुचितमिष्टम् । उचितम् । कुचितं परिमितम् । कुटितं कुटिलम् ॥

६२५-रुच्, वच्, कुच् और कुट् धातुके उत्तर कितच् प्रत्यय हो, रुचितमिष्टम् । उचितम् । कुचितं-परिमितम् । कुटितं-कुटिलम् ॥

६२६ 'कुटिकुषिभ्यां क्मलन्' ॥ ॥ कुट्मलम् । कुष्मलम् ॥

६२६-कुट् और कुष् धातुके उत्तर क्मलन् प्रत्यय हो, कुट्मलम् । कुष्मलम् ॥

६२७ 'कुषेर्लश्च' ॥ ॥ कुल्मलं पापम् ॥

६२७-कुष् धातुके उत्तर क्मलन् प्रत्यय है, और धातुके षके स्थानमें लकार हो, कुल्मलम्-पापम् ॥

६२८ 'सर्वधातुभ्योऽसुन्' ॥ ॥ चेतः । सरः । पयः । सदः ॥

६२८-सब धातुओंके उत्तर असुन् प्रत्यय हो चेतः । सरः । पयः । सदः ॥

६२९ 'रपेरत एच्च' ॥ ॥ रेपोऽवद्यम् ॥

६२९-रप् धातुके उत्तर असुन् प्रत्यय और अकारके स्थानमें एकार हो, रेपोऽवद्यम् ॥

६३० 'अशेर्देवने युट् च' ॥ ॥ देवने स्तुतौ । यशः ॥

६३०-अश् धातुके उत्तर देवन (स्तुति) अर्थमें असुन् प्रत्यय हो, और युट्का आगम हो, यशः ॥

६३१ 'उब्जेर्बले बलोपश्च' ॥ ॥ ओजः ॥

६३१-बलार्थमे उब्ज् धातुके उत्तर असुन् प्रत्यय हो, और बकारका लोप हो, ओजः ॥

६३२ 'श्वेः संप्रसारणं च' ॥ ॥ शवः । शवसी । बलपर्यायोऽयम् ॥

६३२-श्वि धातुके उत्तर असुन् प्रत्यय हो, और धातुको सम्प्रसारण हो, शवः । शवसी । यह शब्द बलपर्याय है ॥

६३३ 'श्रयतेः स्वाङ्गे शिरः किच्च' ॥ ॥ श्रयतेः शिर आदेशोऽसुन् किच्च । शिरः । शिरसी ॥

६३३-श्रि धातुको शिर् आदेश हो, और असुन् प्रत्यय हो, और वह कित् हो, शिरः । शिरसी ॥

६३४ 'अर्तेरुच्च' ॥ ॥ उरः ॥

६३४-ऋ धातुके उत्तर असुन् प्रत्यय हो, और अकारके स्थानमें उकार हो, उरः ॥

६३५ 'व्याधौ शुट् च' ॥ ॥ अर्शो गुदव्याधिः ॥

६३५-व्याधि अर्थमें ऋ धातुके उत्तर असुन् प्रत्यय और शुट्का आगम हो, अर्शो गुदव्याधिः (बवासीर) ॥

६३६ 'उदके नुट् च' ॥ ॥ अर्तेरसुन् स्यात्तस्य च नुट् । अर्णः । अर्णसी ॥

६३६-उदकार्थमें ऋ धातुके उत्तर असुन् प्रत्यय और नुट्का आगम हो, अर्णः । अर्णसी ॥

६३७ 'इण आगसि' ॥ ॥ एनः ॥

६३७-आगः, अर्थात् अपराधार्थमें इण् धातुसे असुन् प्रत्यय हो, और नुट्का आगम हो, एनः (अपराध) ॥

६३८ 'रिचेर्धने चिच्च' ॥ ॥ चात्प्रत्ययस्य नुट् । चित्त्वात्कुत्वम् । रेक्णः सुवर्णम् ॥

६३८-धनार्थमें रिच् धातुके उत्तर असुन् प्रत्यय हो, और वह चित् हो, और चकारसे प्रत्ययको नुट्का आगम हो, चित्त्वके कारण चके स्थानमें क होगा, रेक्णः-सुवर्णम् ॥

६३९ 'चायतेरन्ने ह्रस्वश्च' ॥ ॥ चनो भक्तम्॥

६३९-चाय् धातुके उत्तर अन्नार्थमें असुन् प्रत्यय हो, और नुट्का आगम और धातुको ह्रस्व हो, चनः-भक्तम् ॥

६४० 'वृङ्शीङ्भ्यां रूपस्वांगयोः पुट् च' ॥ वर्पो रूपम् । शेपो गुह्यम् ॥

६४०-वृङ् और शीङ् धातुके उत्तर रूप और स्वाङ्ग अर्थमें असुन् प्रत्यय और पुट्का आगम हो, वर्पो रूपम् । शेपो गुह्यम् ॥

६४१ 'स्रुरीभ्यां तुट् च' ॥ ॥ स्रोतः। रेतः॥

६४१-स्रु और री धातुके उत्तर असुन् प्रत्यय और तुट्का आगम हो, स्रोतः । रेतः । (वीर्य) ॥

६४२ 'पातेर्बले जुट् च' ॥ ॥ पाजः । पाजसी ॥

६४२-पा धातुके उत्तर बलार्थमें असुन् प्रत्यय और जुट्का आगम हो, पाजः । पाजसी (बल) ॥

६४३ 'उदके थुट् च' ॥ ॥ पाथः ॥

६४३-उदकार्थमें पा धातुके उत्तर असुन् प्रत्यय और थुट्का आगम हो, पाथः (जल) ॥

६४४ 'अन्ने च' ॥ पाथो भक्तम् ॥

६४४-अन्नार्थमें पा धातुके उत्तर असुन् प्रत्यय और थुट्का आगम हो, पाथः-भक्तम् ॥

६४५ 'अदेर्नुम धौ च' ॥ ॥ अदेर्भक्ते वाच्येऽसुन् नुमागमो धादेशश्च । अन्धोऽन्नम् ॥

६४५-भक्त अर्थमें अद् धातुके उत्तर असुन् प्रत्यय और नुम्का आगम और दकारको धकार आदेश हो, अन्धः-अन्नम् ॥

६४६ 'स्कन्देश्च स्वांगे' ॥ ॥ स्कन्धः । स्कन्धसी ॥

६४६-स्वाङ्गार्थमें स्कन्द् धातुके उत्तर असुन् प्रत्यय और ध आदेश हो, स्कन्धः । स्कन्धसी ॥

६४७ 'आपः कर्माख्यायाम्' ॥ ॥ कर्माख्यायां ह्रस्वो नुट् च वा । अप्नः । अपः । बाहुलकात् । आपः । आपसी ॥

६४७-आप् धातुके उत्तर कर्माख्यामें असुन् प्रत्यय हो, और ह्रस्व और नुट्का आगम हो, विकल्प करके, अप्नः, अपः । बाहुलक बलसे-आपः । आपसी ॥

६४८ 'रूपे जुट् च' ॥ ॥ अब्जो रूपम् ॥

६४८-रूप अर्थमें आप् धातुके उत्तर असुन् प्रत्यय, धातुको ह्रस्व और जुट्का आगम हो, अब्जो रूपम् ॥

६४९ 'उदके नुम्भौ च' ॥ ॥ अम्भः ॥

६४९-उदकार्थमें आप् धातुके उत्तर असुन् प्रत्यय, नुम् का आगम और भ आदेश हो, अम्भः (जल) ॥

६५० 'नहेर्दिवि भश्च' ॥ ॥ नभः ॥

६५०-नह् धातुके उत्तर आकाश वाच्यमें असुन् प्रत्यय और हको भ आदेश हो, नभः (आकाश) ॥

६५१ 'इण आगोऽपराधे च' ॥ ॥ 'आगः पापापराधयोः' ॥

६५१-अपराधार्थमें इण् धातुको आग आदेश, और असुन् प्रत्यय हो, "आगः पापापराधयोः" अर्थात् पाप और अपराध ॥

६५२ 'अमेर्हुक् च' ॥ ॥ अंहः ॥

६५२-अम् धातुके उत्तर असुन् प्रत्यय और हुक्का आगम हो, अंहः ॥

६५३ 'रमेश्च' ॥ ॥ रंहः ॥

६५३-रम् धातुके उत्तर असुन् प्रत्यय और हुक् आगम हो, रंहः (वेग) ॥

६५४ 'देशे ह च' ॥ ॥ रमन्तेऽस्मिन् रहः ॥

६५४-देशार्थमें रम् धातुके उत्तर असुन् प्रत्यय और ह आदेश हो, रमन्ते अस्मिन्=रहः ॥

६५५ 'अञ्च्यञ्जियुजिभृजिभ्यः कुश्च' ॥ ॥ एभ्योऽसुन् कवर्गश्चान्तादेशः । 'अङ्गश्चिह्नशरीरयोः' । अंगः पक्षी । योगः समाधिः । भर्गस्तेजः ॥

६५५-अञ्च्, अञ्ज्, युज् और भृज् धातुके उत्तर असुन् प्रत्यय और कवर्ग अन्तादेश हो "अङ्गश्चिह्नशरीरयोः" । अङ्गः-पक्षी । योगः-समाधिः । भर्गः-तेजः ॥

६५६ 'भूरञ्जिभ्यां कित्' ॥ ॥ भुवः रजः ॥

६५६-भू और रञ्ज् धातुके उत्तर असुन् प्रत्यय हो, और वह कित् हो, भुवः । रजः ॥

६५७ 'वसेर्णित्' ॥ ॥ वासो वस्त्रम् ॥

६५७-वस् धातुके उत्तर असुन् प्रत्यय हो, और वह णित् हो, वासो वस्त्रम् ॥

६५८ 'चन्देरादेश्च छः' ॥ ॥ छन्दः ॥

६५८-चन्द् धातुके उत्तर असुन् प्रत्यय और आदि वर्णको छ आदेश हो, छन्दः ॥

६५९ 'पचिवचिभ्यां सुट् च'॥ ॥ 'पक्षसी तु स्मृतौ पक्षौ' । वक्षो हृदयम् ॥

६५९–पच् और वच् धातुके उत्तर असुन् प्रत्यय हो, और सुट्का आगम हो, "पक्षसी तु स्मृतौ पक्षौ" वक्षो हृदयम् ॥

६६० 'वहिहाधाञ्भ्यश्छन्दसि' ॥ ॥ वक्षाः अनड्वान् । हासाश्चन्द्रः । धासाः पर्वत इति प्राञ्चः । वस्तुतस्तु णिदित्यनुवर्तते न तु सुट् । तेन वहेरुपधावृद्धिः । इतरयोरातो युगिति युक् । 'शोणा धृष्णू नृवाहसा' । 'श्रोता हवं गृणतः स्तोमवाहाः' । 'विश्वो विहायाः' । 'वाजम्भरो विहायाः' । 'देवो नयः पृथिवीं विश्वधायाः' । 'अधारयत् पृथिवीं विश्वधायसम्' । 'धर्णसं भूरिधायसम्' इत्यादि ॥

६६०–वेदमें वह् हा और धाञ् धातुके उत्तर असुन् प्रत्यय हो, वक्षाः–अनड्वान् । हासाश्चन्द्रः । धासाः–पर्वतः। ऐसे प्राचीन कहतेहैं। वास्तविक तो णित् इसकीही अनुवृत्ति होतीहै सुट्की नहीं इस कारण वहि धातुकी उपधाको वृद्धि होगी, और अपर धातुओं को "आतो युक्(१७६१)" इस सूत्रसे युक्का आगम होगा, यथा "शोणा धृष्णू नृवाहसा" । "श्रोता हवं गृणतः स्तोमवाहाः" । "विश्वो विहायाः" । "वाजम्भरो विहायाः" । "देवो नयः पृथिवीं विश्वधायाः" । "अधारयत् पृथिवीं विश्वधायसम्" । "धर्णसं भूरिधायसम्" इत्यादि ॥

६६१ 'इण आसिः' ॥ ॥ अयाः वह्निः । स्वरादिपाठादव्ययत्वम् ॥

६६१–इण् धातुके उत्तर आसि प्रत्यय हो, अयाः–वह्नि। स्वरादिगणमें पाठके कारण यह अव्ययसंज्ञक है ॥

६६२ 'मिथुनेऽसिः पूर्ववच्च सर्वम्' ॥ ॥ उपसर्गविशिष्टो धातुर्मिथुनं तत्रासुनोपवादोऽसिः स्वरार्थः सुयशाः ॥

६६२–मिथुनमें धातुके उत्तर असि प्रत्यय हो, और पूर्ववत् आगमादि समस्त कार्य्य हों, अर्थात् जिस धातुको जो जो कार्य्य असुन् प्रत्ययमें कहे गयेहैं वह सब कार्य उस२ धातुको असि प्रत्ययमें भी हों । उपसर्गविशिष्ट जो धातु उसको मिथुन कहतेहैं, उसमें असुन् प्रत्ययका विशेषक जो असि प्रत्यय वह स्वरार्थ है, यथा–सुयशाः॥

६६३ 'नञि हन एह च' ॥ ॥ अनेहाः । अनेहसौ ॥

६६३–नञ् पूर्वक हन् धातुके उत्तर असुन् प्रत्यय हो, और धातुको एह आदेश हो, अनेहाः । अनेहसौ ॥

६६४ 'विधाञो वेध च' ॥ ॥ विदधातीति वेधाः ॥

६६४–विपूर्वक धाञ् धातुके उत्तर असुन् प्रत्यय हो, और धाके स्थानमें वेध आदेश हो, विदधाति इति=वेधाः ॥

६६५ 'नुवो धुट् च' ॥ ॥ नोधाः ॥

६६५–नु धातुके उत्तर असुन् प्रत्यय हो, और धुट्का आगम हो, नोधाः ॥

६६६ 'गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च' ॥ ॥ असिः स्यात् । सुतपाः । जातवेदाः । गतिकारकोपपदात् कृदित्युत्तरपदप्रकृतिस्वरत्वे सति शेषस्यानुदात्तत्वे प्राप्ते तदपवादार्थमिदम् ॥

६६६–गति और कारक उपपद होनेपर धातुके उत्तर असि प्रत्यय हो, और पूर्वपदका प्रकृतिस्वर हो, सुतपाः । जातवेदाः । "गतिकारकोपपदात्कृत्०" इस सूत्रसे उत्तर पदको प्रकृतिस्वर विहित होनेसे अवशिष्टको अनुदात्तत्व प्राप्त होनेपर उसके अपवादके निमित्त यह सूत्र किया है ॥

६६७ 'चन्द्रे मो डित्' ॥ ॥ चन्द्रोपपदान्माङोऽसिः स्यात्स च डित् । चन्द्रमाः ॥

६६७–चन्द्र शब्द उपपद होनेपर माङ् धातुके उत्तर असि प्रत्यय हो, और वह डित् हो, चन्द्रमाः ॥

६६८ 'वयसि धाञः' ॥ ॥ वयोधास्तरुणः ॥

६६८–वयस् शब्द पूर्वक धाञ् धातुके उत्तर असि प्रत्यय हो, वयोधाः–तरुणः ॥

६६९ 'पयसि च' ॥ ॥ पयोधाः समुद्रो मेघश्च ॥

६६९–पयस् शब्दपूर्वक धाञ् धातुके उत्तर असि प्रत्यय हो, पयोधाः समुद्रो मेघः ॥

६७० 'पुरसि च' ॥ ॥ पुरोधाः ॥

६७०–पुरस् शब्दपूर्वक धाञ् धातुके उत्तर असि प्रत्यय हो, पुरोधाः (पुरोहित)॥

६७१ 'पुरूरवाः' ॥ ॥ पुरुशब्दस्य दीर्घो रौतेरसिश्च निपात्यते ॥

६७१–पुरुशब्द पूर्वक रु धातुके उत्तर निपातनसे असि प्रत्यय और पुरु शब्दको दीर्घ हो, पुरूरवाः (राजाका नाम)॥

६७२ 'चक्षेर्बहुलं शिच्च' ॥ ॥ नृचक्षाः ॥

६७२–चक्ष् धातुके उत्तर असि प्रत्यय हो, और वह बहुल करके शित् हो, नृचक्षाः ॥

६७३ 'उषः कित्' ॥ ॥ उषः ॥

६७३–उष् धातुके उत्तर असि प्रत्यय हो, और वह कित् हो, उषः ॥

६७४ 'दमेरुनसिः' ॥ ॥ 'सप्तार्चिर्दमुनाः' ॥

६७४–दम् धातुके उत्तर उनसि प्रत्यय हो, "सप्तार्चिर्दमुनाः" (अग्निः) ॥

६७५ 'अंगतेरसिरिरुडागमश्च' ॥ ॥अंगिराः॥

६७५–अङ्ग धातुके उत्तर असि प्रत्यय और, इरुट्का आगम हो, अङ्गिराः ॥

६७६ 'सर्तेरप्पूर्वादसिः' ॥ ॥ अप्सराः । प्रायेणायं भूम्नि । अप्सरसः ॥

६७६–अप् शब्दपूर्वक सृ धातुके उत्तर असि प्रत्यय हो, अप्सराः । यह शब्द प्रायः बहुवचनान्त है, अप्सरसः ॥

६७७ 'विदिभुजिभ्यां विश्वे'॥ ॥ विश्ववेदाः। विश्वभोजाः ॥

६७७–विश्व शब्दपूर्वक विद् और भुज् धातुके उत्तर असि प्रत्यय हो, विश्ववेदाः । विश्वभोजाः ॥

६७८ 'वशेः कनसिः' ॥ ॥ संप्रसारणम् । उशनाः ॥

॥ इत्युणादिषु चतुर्थः पादः ॥

६७८–वश् धातुके उत्तर कनसि प्रत्यय हो, धातुको सम्प्रसारण होकर–उशनाः (शुक्र) ॥

॥ इत्युणादिषु चतुर्थपादः ॥

---

६७९ 'अदिभुवो डुतच्' ॥ ॥ अद्भुतम् ॥

६७९–अद् उपपद होनेपर भू धातुके उत्तर डुतच् प्रत्यय हो, अद्भुतम् ॥

६८० 'गुधेरूमः' ॥ ॥ गोधूमः ॥

६८०–गुध् धातुके उत्तर ऊम प्रत्यय हो, गोधूमः (गेहूं)

६८१ 'मसेरूरन्' ॥ ॥ मसूरः । प्रथमे पादे असेरुरन्मसेश्चेत्यत्र व्याख्यातः ॥

६८१–मस् धातुके उत्तर ऊरन् प्रत्यय हो, मसूरः । प्रथम पादमें "असेरुरन्मसेश्च" इस सूत्रमें यह व्याख्यात है ॥

६८२ 'स्थः किच्च' ॥ ॥ स्थूरो मनुष्यः ॥

६८२–स्था धातुके उत्तर ऊरन् प्रत्यय हो, और वह कित् हो, स्थूरो मनुष्यः ॥

६८३ 'पातेरतिः' ॥ ॥ पातिः स्वामी । सम्पातिः पक्षिराजः ॥

६८३–पा धातुके उत्तर अति प्रत्यय हो, पातिः–स्वामी । संपातिः–पक्षिराजः ॥

६८४ 'वातेर्नित्' ॥ ॥ 'वातिरादित्यसोमयोः' ॥

६८४–वा धातुके उत्तर अति प्रत्यय हो, और वह नित् हो, वातिः–'आदित्यसोमयोः' ॥

६८५ 'अर्तेश्च' ॥ ॥ अरतिरुद्वेगः ॥

६८५–ऋ धातुके उत्तर अति प्रत्यय हो,अरतिः–उद्वेगः॥

६८६ 'तृहेः क्नो हलोपश्च' ॥ ॥ तृणम् ॥

६८६–तृह् धातुके उत्तर क्न प्रत्यय हो और हकारका लोप हो, तृणम ॥

६८७'वृञ्लुटितनिताडिभ्य उलच् तण्डश्च'॥ व्रियन्ते लुटयन्ते तन्यन्ते ताडयन्त इति वा तण्डुलाः ॥

६८७–वृञ्, लुट् तन्, और ताडि, धातुके उत्तर उलच् प्रत्यय हो, और तण्ड हो, व्रियन्ते, लुटयन्ते, तन्यन्ते, ताडयन्ते इति वा, इस विग्रहमें तण्डुलाः (चावल) ॥

६८८ 'दंसेष्टटनौ न आ च' ॥ ॥ 'दासः सेवकशूद्रयोः' ॥

६८८–दन्स धातुके उत्तर ट, टन् प्रत्यय हों, और नके स्थानमें आ आदेश हो, "दासः सेवकशूद्रयोः" ॥

६८९ 'दंशेश्च' ॥ ॥ दाशो धीवरः ॥

६८९–दंश धातुके उत्तर भी यह प्रत्यय और आदेश हो। दाशो धीवरः । (धीमर) ॥

६९० 'उदि चेर्डैसिः' ॥ ॥ स्वरादिपाठादव्ययत्वम् । उच्चैः ॥

६९०–उत्पूर्वक चि धातुके उत्तर डैसि प्रत्यय हो, उच्चैः (ऊंचा) और स्वरादिगणके मध्यमें पठित होनेके कारण इसकी अव्यय संज्ञा होगी ॥

६९१ 'नौ दीर्घश्च' ॥ ॥ नीचैः ॥

६९१–निपूर्वक चि धातुके उत्तर डैसि प्रत्यय हो, और निके इकारको दीर्घ हो, नीचैः । (नीचा) ॥

६९२'सौ रमेः क्तो दमे पूर्वपदस्य च दीर्घः'॥ रमे सुपूर्वाद्दमे वाच्ये क्तः स्यात् । कित्त्वादनुनासिकलोपः । सूरत उपशान्तो दयालुश्च ॥

६९२–सुपूर्व रम् धातुके उत्तर दम अर्थ होनेपर क्त प्रत्यय हो, और पूर्व पदको दीर्घ हो, कित्वके कारण अनुनासिक वर्णका लोप हो, सूरतः उपशान्तः,दयालुः ॥

६९३ 'पूञो यण्णुक् ह्रस्वश्च' ॥ ॥ यत्प्रत्ययः । पुण्यम् ॥

६९३–पू धातुके उत्तर यत् प्रत्यय हो, और णुक् आगम और ह्रस्व हो, पुण्यम् ॥

६९४ 'स्रंसेः शिः कुट् किच्च' ॥ ॥ स्रंसतेः शिरादेशः यत्प्रत्ययः कित्तस्य कुडागमश्च ॥ शिक्यम् ॥

६९४–स्रंस धातुके उत्तर यत् प्रत्यय हो, और यह प्रत्यय कित्संज्ञक हो धातुको शि आदेश और उसको कुडागम हो, शिक्यम् । (छींका) ॥

६९५ 'अर्तेः क्युरुच्च' ॥ ॥ उरणो मेषः ॥

६९५–ऋ–धातुके उत्तर क्यु प्रत्यय और अकारके स्थानमें उकार हो, उरणः–मेषः । (मेढा) ॥

६९६ 'हिंसेरीरन्नीरचौ' ॥ ॥ हिंसीरो व्याघ्रदुष्टयोः ॥

६९६–हिंस धातुके उत्तर ईरन् और ईरच प्रत्यय हों, हिंसीरः व्याघ्रः दुष्टः ॥

६९७ 'उदि दृणातेरजलौ पूर्वपदान्त्यलोपश्च' ॥ ॥ उदरम् ॥

६९७–उत्पूर्वक दॄ धातुके उत्तर अच् और अल् प्रत्यय हों, और पूर्वपदके अन्त भागका अर्थात् दकारका लोप हो, उदरम् । (पेट) ॥

६९८ 'डित् खनेर्मुट् स चोदात्तः' ॥ ॥ अच् अल् च डित्स्याद्धातोर्मुट् स चोदात्तः । मुखम् ॥

६९८–खन धातुके उत्तर अच् और अल् प्रत्यय हों और

धातुको मुट् आगम हो, और वह डित्संज्ञक और उदात्तस्वर हो मुखम् ॥

६९९ 'अमेः सन्' ॥ ॥ अंसः ॥

६९९--अमि धातुके उत्तर सन् प्रत्यय हो, अंसः ॥

७०० 'मुहेः खो मूर् च' ॥ ॥ मूर्खः ॥

७००--मुह् धातुके उत्तर ख प्रत्यय हो, और मूर् आदेश हो, मूर्खः ॥

७०१ 'नहेर्हलोपश्च' ॥ ॥ नखः ॥

७०१--नह् धातुके उत्तर ख प्रत्यय हो, और हकारका लोप हो, नखः ॥

७०२ 'शीङो ह्रस्वश्च' ॥ ॥ शिखा ॥

७०२--शीङ् धातुके उत्तर ख प्रत्यय हो, और ह्रस्व हो, शिखा ॥

७०३ 'माङ ऊखो मय् च' ॥ ॥ मयूखः ॥

७०३--माङ् धातुके उत्तर ऊख प्रत्यय हो, और धातुके स्थानमें मय आदेश हो । मयूखय् (किरण) ॥

७०४ 'कलिगलिभ्यां फगस्योच्च' ॥ ॥ कुल्फः शरीरावयवो रोगश्च । गुल्फः पादग्रन्थिः॥

७०४--कलि और गलि धातुके उत्तर फक् प्रत्यय हो, और अको उत् आदेश हो, कुल्फः शरीरावयवो रोगश्च । गुल्फः पादग्रन्थिः ॥

७०५ 'स्पृशेः श्वणशुनौ पृ च' ॥ ॥ श्वणशुनौ प्रत्ययौ पृ इत्यादेशः । 'पार्श्वोऽस्त्री कक्षयोरधः' । पर्शुरायुधम् ॥

७०५--स्पृश् धातुके उत्तर श्वण् और शुन् प्रत्यय हों, और धातुके स्थानमें पृ आदेश हो, "पार्श्वोऽस्त्री कक्षयोरधः"। पर्शुः आयुधम् । (फरस्या) ॥

७०६ 'श्मनि श्रयतेर्डुन्' ॥ ॥ श्मन्शब्दो मुखवाची । मुखमाश्रयत इति श्मश्रु ॥

७०६--श्मन् शब्दपूर्वक श्रि धातुके उत्तर डुन् प्रत्यय हो, श्मन् शब्दसे मुख समझना । मुखमाश्रयते इति श्मश्रु (मूंछ) ॥

७०७ 'अश्र्वादयश्च' ॥ ॥ अश्रु नयनजलम्॥

७०७--अश्रु आदि शब्द निपातनसे सिद्ध हों । अश्रु नयनजलम् ॥

७०८ 'जनेष्टन् लोपश्च' ॥ ॥ जटा ॥

७०८--जन धातुके उत्तर टन् प्रत्यय हो, और धातुके नकारका लोप हो, जटा ॥

७०९ 'अच् तस्य जङ्घ च' ॥ ॥ तस्य जनेः जङ्घादेशः स्यादच् । जङ्घा ॥

७०९--जन धातुके उत्तर अच् प्रत्यय हो, और धातुके स्थानमें जंघ आदेश हो जंघा ॥

७१० 'हन्तेः शरीरावयवे द्वे च'॥ ॥ जघनम् 'पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः'॥

७१०--हन धातुके उत्तर भी शरीरावयवार्थमें अच् प्रत्यय हो, और द्वित्व हो, जघनम् । "पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः" । स्त्रीके कमरके नीचेका भाग नितम्ब कहाताहै पुरोभाग जंघा ॥

७११ 'क्लिशेरन् लो लोपश्च' ॥ ॥ लकारस्य लोपः । केशः ॥

७११--क्लिश धातुके उत्तर अन् प्रत्यय हो, और लकारका लोप हो—केशः ॥

७१२ 'फलेरितजादेश्च पः' ॥ ॥ पलितम्॥

७१२--फल धातुके उत्तर इतच् प्रत्यय हो, और फके स्थानमें प हो, पलितम् ॥

७१३ 'कृत्रादिभ्यः संज्ञायां वुन्' ॥ ॥ करकः । करका ॥ कटकः । नरकम् । नरकः । 'नरको नारकोऽपि च' इति द्विरूपकोशः । सरकं गगनम् । कोरकः । कोरकं च ॥

७१३--कृञादि धातुके उत्तर संज्ञार्थमें वुन् प्रत्यय हो करकः।करका।कटकः। नरकम्।नरकः।"नरको नारकोऽपि च"। इति द्विरूपकोशः । सरकं गमनम् । कोरकः कोरकञ्च ॥

७१४ 'चीकयतेराद्यन्तविपर्ययश्च' ॥ ॥ कीचको वंशभेदः ॥

७१४--ण्यन्त चीक धातुके उत्तर वुन् प्रत्यय हो, आदि और अन्तवर्णका विपर्यय हो, कीचको वंशभेदः । (जिनमें वायु भरजानेसे शब्द होताहै ऐसे बांस) ॥

७१५ 'पचिमच्योरिच्चोपधायाः' ॥ ॥ पेचकः । मेचकः ॥

७१५--पचि और मचि धातुके उत्तर वुन् प्रत्यय हो, और उपधाके स्थानमें इकार हो, पेचकः । मेचकः ॥

७१६ 'जनेररष्ठ च' ॥ ॥ जठरम् ॥

७१६--जन धातुके उत्तर अर् प्रत्यय हो और, धातुके नकारके स्थानमें ठ आदेश हो, जठरम् ॥

७१७ 'वचिमनिभ्यां चिच्च' ॥ ॥ वठरो मूर्खः । 'मठरो मुनिशौण्डयोः' । बिदादित्वान्माठरः । गर्गादित्वान्माठर्यः ॥

७१७--वचि और मनि धातुके उत्तर वुन् प्रत्यय हो और यह चित्संज्ञक हो, वठरः मूर्खः । " मठरो मुनिशौंडयोः " बिदादि गणीय होनेके कारण माठरः पद भी सिद्ध होगा । गर्गादि गणमें पाठ होनेसे माठर्यः ऐसा भी पद होता है ॥

७१८ 'ऊर्जि दृणातेरलचौ पूर्वपदान्तलोपश्च' ॥ ॥ 'ऊर्दरः शूररक्षसोः'॥

७१८--ऊर्ज उपपद रहते दृ धातुके उत्तर अल् और अच् प्रत्यय हों, और पूर्वपदके अन्तका लोप हो । "ऊर्दरः शूररक्षसोः" ॥

७१९ 'कुदरादयश्च' ॥ ॥ कुदरः कुसूलः । मूदरं विलसत् । सूदरः सर्पः ॥

७१९--कुदरादि शब्द निपातनसे सिद्ध हों । कुदरः कुसूलः । मूदरं बिलसत् । सूदरः सर्पः ॥

७२० 'हन्तेर्युनाद्यन्तयोर्धत्वतत्वे' ॥ ॥ घातनो मारकः ॥

७२०-हन् धातुके उत्तर युन् प्रत्यय हो, और धातुके आदि वर्ण अर्थात् ह के स्थानमें घ और अन्त वर्ण अर्थात् न के स्थानमें त हो, । घातनः मारकः ॥

७२१ 'क्रमिगमिक्षमिभ्यस्तुन् वृद्धिश्च' ॥ ॥ क्रान्तुः पक्षी । गान्तुः पथिकः । क्षान्तुर्मशकः ॥

७२१-क्रमि, गमि और क्षमि धातुके उत्तर तुन् प्रत्यय और वृद्धि हो, क्रान्तुः पक्षी । गान्तुः-पथिकः । क्षान्तुर्मशकः (अर्थात् मच्छर) ॥

७२२ 'हर्यतेः कन्यन् हिरच्' ॥ ॥ कन्यन् प्रत्ययः । हिरण्यम् ॥

७२२-हर्य्य धातुके उत्तर कन्यन् प्रत्यय और धातुके स्थानमें हिरच् आदेश हो । यथा-हिरण्यम् (सुवर्ण) ॥

७२३ 'कृञः पासः'॥ ॥ कर्पासः । बिल्वादित्वात्कार्पासं वस्त्रम् ॥

७२३-कृञ् धातुके उत्तर पास प्रत्यय हो, कर्पासः । (कपास) बिल्वादित्वके कारण कार्पासं वस्त्रम् (कपडा) ॥

७२४ 'जनेस्तु रश्च' ॥ ॥ जर्तुर्हस्ती योनिश्च॥

७२४-जनि धातुके उत्तर तु प्रत्यय और रकारान्तादेश हो, जर्तुः हस्ती योनिश्च ॥

७२५ 'ऊर्णोतेर्डः' ॥ ॥ ऊर्णा ॥

७२५-ऊर्णु धातुके उत्तर ड प्रत्यय हो, ऊर्णा ॥

७२६ 'दधातेर्यन्नुट् च' ॥ ॥ धान्यम् ॥

७२६-धा धातुके उत्तर यत् प्रत्यय और उसको नुट् आगम हो । धान्यम् ॥

७२७ 'जीर्यतेः क्रिन् रश्च वः' ॥ ॥ 'जिव्रिः स्यात्कलपक्षिणोः'।बाहुलकाद्धलि चेति दीर्घो न॥

७२७-जॄ धातुके उत्तर क्रिन् प्रत्यय हो, और र के स्थानमें व आदेश हो, ''जिव्रिः स्यात्कालपक्षिणोः'' । '' बाहुलकात् हलि च ३५४ '' इस सूत्रसे दीर्घ न होगा ॥

७२८ 'मव्यतेर्यलोपो मश्चापतुट् चालः'॥ ॥ मव्यतेरालप्रत्ययः स्यात्तस्यापतुडागमो धातोर्यलोपो मकारश्चान्त्यस्य । ममापतालो विषये॥

७२८-मव्य धातुके उत्तर आल् प्रत्यय हो और उसको आपतुट् आगम, यकारका लोप और अन्त वर्णके स्थानमें मकार हो, 'ममापतालो विषये' ॥

७२९ 'ऋजेः कीकन्' ॥ ॥ ऋजीक इन्द्रो धूमश्च ॥

७२९-ऋज् धातुके उत्तर कीकन् प्रत्यय हो, ऋजीकः इन्द्रो धूमश्च ॥

७३० 'तनोतेर्डउः सन्वच्च' ॥ ॥ 'तितउः पुंसि क्लीबे च' ॥

७३०--तन धातुके उत्तर डउ प्रत्यय हो, और उसको सन्वत् कार्य हो, ''तितउः पुंसि क्लीबे च '' ॥

७३१ 'अर्भकपृथुकपाका वयसि' ॥ ॥ ऋधु वृद्धौ । अतो वुन् । भकारश्चान्तादेशः । प्रथेः कुकन्संप्रसारणं च । पिबतेः कन् ॥

७३१-अर्भक, पृथुक और पाक शब्द वयोऽर्थमें निपातनसे सिद्ध हों । ऋधु वृद्धौ । ऋध धातुके उत्तर वुन् प्रत्यय हो और अन्तमें भकार आदेश हो । अर्भकः (बालक)। प्रथ धातुके उत्तर कुकन् प्रत्यय और सम्प्रसारण हो पृथुकः । पा धातुके उत्तर कन् प्रत्यय होगा । पाकः ॥

७३२ 'अवद्यावमाधमार्वरेफाः कुत्सिते'॥ ॥ वदेर्नञि यत् । अवद्यम् । अवतेरमः । वस्य पक्षे धः । अवमः । अधमः । अर्तेर्वन् । अर्वा॥ रिफतेस्तौदादिकात् अः रेफः ॥

७३२-अवद्य, अवम, अधम, अर्व, रेफ शब्द कुत्सितार्थमें नञ् उपपद रहते वद धातुके उत्तर यत् प्रत्यय निपातनसे सिद्ध होगा । अवद्यम् । अव धातुके उत्तर अम प्रत्यय होगा और विकल्प करके व के स्थानमें ध होगा, अवमः । अधमः । अर्त्ति धातुके उत्तर न् प्रत्यय होगा । अर्वा । तुदादि गणीय रिफ धातुके उत्तर अ प्रत्यय होगा । रेफः ॥

७३३ 'लीरीङो ह्रस्वः पुट् च तरौ श्लेषणकुत्सनयोः' ॥ ॥ तरौ प्रत्ययौ क्रमात् स्तो धातोर्ह्रस्वः प्रत्ययस्य पुट् । लिप्तं श्लिष्टम् । रिप्रं कुत्सितम् ॥

७३३-श्लेषण और कुत्सन अर्थ होनेपर लीङ् और रीङ् धातुके उत्तर क्रमसे त और र प्रत्यय हों । धातुको ह्रस्व हो; और प्रत्ययको पुट् आगम हो । लिप्तं श्लिष्टम् । रिप्रं कुत्सितम् । (निकम्मा) ॥

७३४ 'क्लिशेरीच्चोपधायाः कन् लोपश्च लो नाम् च' ॥ ॥ क्लिशेः कन् स्यात् उपधाया ईत्वं लस्य लोपो नामागमश्च । कीनाशो यमः । कित्वफलं चिन्त्यम ॥

७३४-क्लिश धातुके उत्तर कन् प्रत्यय हो, पश्चात् उपधाके स्थानमें ईकार, लकारका लोप और नामागम हो, कीनाशो यमः । कित्संज्ञा करनेका फल विवेच्य है ॥

७३५ 'अश्नोतेराशुकर्मणि वरट् च' ॥ ॥ चकारादुपधाया ईत्वम् । ईश्वरः ॥

७३५-अश धातुके उत्तर शीघ्र करण अर्थमें वरट् प्रत्यय हो चकारके कारण उपधाके स्थानमें ईत्व हो,ईश्वरः॥

७३६ 'चतेरुरन्' ॥ ॥ चत्वारः ॥

७३६--चति धातुके उत्तर उरन् प्रत्यय हो, चत्वारः । (चार) ॥

७३७ 'प्रात्तेररन्' ॥ ॥ प्रातः ॥

७३७-प्रपूर्वक अति धातुके उत्तर अरन् प्रत्यय हो, प्रातः ॥

७३८ 'अमेस्तुट् च' ॥ ॥ अन्तर्मध्यम् ॥

७३८-अमि धातुके उत्तर अरन् प्रत्यय हो, और तुट् आगम हो, अन्तः मध्यम् ॥

७३९ 'दहेर्गोलोपो दश्च नः' ॥ ॥ गप्रत्ययो धातोरन्त्यस्य लोपो दकारस्य नकारः। नगः ॥

७३९-दह धातुके उत्तर ग प्रत्यय, धातुके अन्त-भागका लोप और दकारके स्थानमें नकार हो, । नगः (पर्वत, अचल) ॥

७४० 'सिचेः संज्ञायां हनुमौ कश्च' ॥ ॥ सिञ्चतेः कप्रत्ययो हकारादेशो नुम् च स्यात्। सिंहः ॥

७४०-संज्ञा अर्थ होनेपर सिच् धातुके उत्तर क प्रत्यय और हकारान्तादेश नुम् आगम हो, सिंहः ॥

७४१ 'व्याङि घ्रातेश्च जातौ' ॥ ॥ कप्रत्ययः स्यात्। व्याघ्रः ॥

७४१-जाति अर्थमें विपूर्वक और आङ्पूर्वक घ्रा धातुके उत्तर क प्रत्यय हो, व्याघ्रः ॥

७४२ 'हन्तेरच् घुर च' ॥ ॥ घोरम् ॥

७४२-हन धातुके उत्तर अच् प्रत्यय और घुर आदेश हो, घोरम् ॥

७४३ 'क्षमेरुपधालोपश्च' ॥ ॥ चादच्।क्ष्मा॥

७४३-क्षमि धातुकी उपधाका लोप हो, और अच् प्रत्यय हो, क्ष्मा ॥

७४४ 'तरतेर्ड्रिः' ॥ ॥ त्रयः। त्रीन् ॥

७४४-तृ धातुके उत्तर ड्रि प्रत्यय हो, त्रयः त्रीन् ॥

७४५ 'ग्रहेरनिः'॥ ॥ ग्रहणिः। ङीष्। ग्रहणी व्याधिभेदः ॥

७४५-ग्रह धातुके उत्तर अनि प्रत्यय हो, ग्रहणिः। इसके उत्तर ङीष् प्रत्यय भी होगा। ग्रहणी व्याधिभेदः। (दस्तोंकी बीमारी) ॥

७४६ 'प्रथेरमच्' ॥ ॥ प्रथमः ॥

७४६-प्रथि धातुके उत्तर अमच् प्रत्यय हो, प्रथमः। (पहला) ॥

७४७ 'चरेश्च' ॥ ॥ चरमः ॥

७४७-चर धातुके उत्तर अमच् प्रत्यय हो, चरमः। (अन्त) ॥

७४८ 'मङ्गेरलच्' ॥ ॥ मङ्गलम् ॥

॥ इत्युणादिषु पञ्चमः पादः ॥

७४८-मङ्गि धातुके उत्तर अलच् प्रत्यय हो, मङ्गलम् ॥

॥ इत्युणादिसूत्रे पञ्चमः पादः ॥

॥ इत्युणादिप्रकरणम् ॥

अथोत्तरकृदन्तम्।

३१६९ उणादयो बहुलम्। ३। ३। १॥

एते वर्तमाने संज्ञायां च बहुलं स्युः। केचिदविहिता अप्यूह्याः ॥

संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।
कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ॥

३१६९-उणादि प्रत्यय वर्त्तमान कालमें और संज्ञामें बाहुल्य रूपसे हों इन पञ्चपादी उणादि सूत्रोंमें जो सम्पूर्ण प्रत्यय विहित हुए हैं उनसे भिन्न प्रत्ययोंका भी बाहुल्य रूपसे ऊह करना चाहिये। ऊहनप्रकार लिखते हैं, कि, प्रथम तो संज्ञा-विषयमें, संपूर्ण धातुओंके रूप ऊहनीय हैं पश्चात् सम्पूर्ण प्रत्यय, और तत्पश्चात् सम्पूर्ण अनुबन्ध कार्यके अनुसार जानना चाहिये। यथा, कारुः। वायुः। पायुः। मायुः। स्वादुः। साधुः। आशुः। इतना ही उणादिमें शास्त्र (अनुशासन) है ॥

३१७० भूतेऽपि दृश्यन्ते। ३। ३।२॥

३१७०-उणादि प्रत्ययोंका प्रयोग अतीत कालमें भी देखा जाताहै अर्थात् वर्त्तमान कालमें ही बाहुल्य रूपसे और अतीत कालमें अल्प परिमाणसे प्रयोग देखा जाताहै ॥

३१७१ भविष्यति गम्यादयः।३।३।३॥

३१७१-गमी आदि णिनिप्रत्ययान्त शब्द भविष्यत् कालमें ही निपातनसे सिद्ध हों ॥

३१७२ दाशगोघ्नौ संप्रदाने।३।४।७३॥

एतौ संप्रदाने कारके निपात्येते। दाशन्ति तस्मै दाशः। गां हन्ति तस्मै गोघ्नोऽतिथिः ॥

३१७२-दाश और गोघ्न यह दो अच्प्रत्ययान्त क प्रत्ययान्त शब्द सम्प्रदान कारकमें निपातनसे सिद्ध हों, अर्थात् दाश धातुसे सम्प्रदानमें अच् प्रत्यय और गो पूर्वक हन् धातुसे क प्रत्यय सम्प्रदानमें निपातनसे हों, दाशन्ति तस्मै दाशः। गां हंति तस्मै गोघ्नोऽतिथिः ॥

३१७३ भीमादयोऽपादाने।३।४। ७४॥

भीमः। भीष्मः। प्रस्कन्दनः। प्ररक्षः। मूर्खः। खलतिः ॥

३१७३-भीमादि शब्द अपादान कारकमें निपातनसे सिद्ध हों। भीमः। भीष्मः। प्रस्कन्दनः। प्ररक्षः। मूर्खः। खलतिः-(इन्द्रलुप्त रोगवाला) ॥

३१७४ ताभ्यामन्यत्रोणादयः। ३। ४। ७५ ॥

संप्रदानपरामर्शार्थं ताभ्यामिति। ततोऽसौ भवति तन्तुः। वृत्तं तदिति वर्त्म। चरितं तदिति चर्म ॥

३१७४-सम्प्रदान और अपादान कारकभिन्न अन्यकारकमें उणादि प्रत्यय हों । कृत् प्रत्यय होनेके कारण कर्तृकारकमें ही प्राप्ति हुई थी किन्तु इस सूत्रसे कर्म्मादिमें भी उणादि प्रत्यय होंगे । यथा, ततोऽसौ भवति इस विग्रहमें तन्तुः वृत्तं तदिति वर्त्म । चरितं तत् इति चर्म्म ॥

३१७५ तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् । ३ । ३ । १० ॥

क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः । मान्तत्वादव्ययत्वम् । कृष्णं द्रष्टुं याति । कृष्णं दर्शको याति । अत्र वासरूपेण तृजादयो न पुनर्ण्वुलुक्तेः ॥

३१७५-क्रियार्थक क्रियावाचक पद उपपद होनेपर भविष्यत् कालमें धातुके उत्तर तुमुन् और ण्वुल् प्रत्यय हों। मकारान्तत्वके कारण तदन्त पद अव्यय हों, यथा-कृष्णं द्रष्टुं याति। कृष्णदर्शको याति।इस स्थलमें क्रियानिमित्तक क्रियावाचक पद उपपद होनेपर वासरूप विधिसे तृच् आदि प्रत्यय नहीं होंगे। कारण कि, पुनर्वार ण्वुल् प्रत्यय उक्त हुआहै ॥

३१७६समानकर्तृकेषु तुमुन्३।३।१५८॥

अक्रियार्थोपपदार्थमेतत् । इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुमुन् स्यात् । इच्छति भोक्तुम् । वष्टि वाञ्छति वा ॥

३१७६-जिस स्थलमें क्रियार्थक क्रियावाचक पद उपपद नहीं है उस स्थलमें तुमुन् प्रत्ययके विधानार्थ यह सूत्र है, इच्छार्थमें वर्त्तमान ऐसी एक कर्त्तावाली सम्पूर्ण धातु उपपद रहते धातुके उत्तर तुमुन् प्रत्यय हो, इच्छति भोक्तुं, वष्टि वाञ्छति वा । एक कर्त्ता न होनेपर 'पुत्रस्य पठनमिच्छति' यहां तुमुन् न हुआ ॥

३१७७ शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् । ३ ।४।६५॥

एषूपपदेषु धातोस्तुमुन् स्यात् । शक्नोति भोक्तुम् । एवं धृष्णोतीत्यादौ । अर्थग्रहणमस्तिनैव संबध्यते, अनन्तरत्वात् । अस्ति भवति विद्यते वा भोक्तुम् ॥

३१७७-शक, धृष, ज्ञा, ग्ला, घट, रभ, लभ, क्रम, सह, अर्ह और अस्त्यर्थ धातु उपपद होनेपर धातुके उत्तर तुमुन् प्रत्यय हो, शक्नोति भोक्तुम् । इसी प्रकारसे अन्यत्र-यथा, धृष्णोति भोक्तुम् इत्यादि । अनन्तरत्वके कारण अर्थ शब्दका अस्ति पदके ही साथ संबन्ध हुआ अस्ति भवति विद्यते वा भोक्तुम् ॥

३१७८ पर्याप्तिवचनेष्वलमर्थेषु । ३ । ४ । ६६ ॥

पर्याप्तिः पूर्णता । तद्वाचिषु सामर्थ्यवचनेषूपपदेषु तुमुन् स्यात् । पर्याप्तो भोक्तुं प्रवीणः कुशलः पटुरित्यादि । पर्याप्तिवचनेषु किम् । अलंभुक्त्वा । अलमर्थेषु किम् । पर्याप्तं भुङ्क्ते । प्रभूततेह गम्यते न तु भोक्तुः सामर्थ्यम् ॥

३१७८-पर्य्याप्ति अर्थात् पूर्णता तद्वाचक और अलमर्थ अर्थात् सामर्थ्यवाचक शब्द उपपद होनेपर धातुके उत्तर तुमुन् प्रत्यय हो, पर्य्याप्तो भोक्तुम् । प्रवीणः कुशलः पटुः इत्यादि । पर्य्याप्तिवाचक न होनेपर, अलं भुक्त्वा । अलमर्थ न होनेपर पर्य्याप्तं भुंक्ते। इस स्थलमें भोजनकर्त्ताकी सामर्थ्य नहीं है किन्तु प्रचुरार्थ गम्यमान है ॥

३१७९ कालसमयवेलासु तुमुन् । ३ । ३ । १६७ ॥

पर्यायोपादानमर्थोपलक्षणार्थम् । कालार्थेषूपपदेषु तुमुन् स्यात् । कालः समयो वेला अनेहा वा भोक्तुम् । प्रैषादिग्रहणमिहानुवर्तते तेनेह न । भूतानि कालः पचतीति वार्ता ॥

३१७९-"कालादिषु तुमुन्" ऐसा सूत्र करनेसे कार्यसिद्धि रहते पर्यायोपादान कालार्थक उपपद रहते तुमुन् विधानार्थ है । कालवाचक, समयवाचक और वेलावाचक शब्द उपपद होनेपर धातुके उत्तर तुमुन् प्रत्यय हो, यथा-कालः समयः वेला अनेहा वा भोक्तुम् । इस स्थलमें प्रैषादि शब्दोंकी अनुवृत्ति होती है । इसी कारण "भूतानि कालः पचतीति वार्त्ता" इस स्थलमें तुमुन् नहीं हुआ ॥

३१८० भाववचनाश्च । ३ । ३ ।११ ॥

भाव इत्यधिकृत्य वक्ष्यमाणा घञादयः क्रियार्थायां क्रियायां भविष्यति स्युः । यागाय याति ॥

३१८०-"भावे" इस सूत्रका अधिकार करके वक्ष्यमाण घञादि प्रत्यय क्रियानिमित्तक क्रियावाचक पद उपपद होनेपर भविष्यत् कालमें धातुके उत्तर हों, यथा-यागाय याति ॥

३१८१ अण् कर्मणि च । ३ । ३।१२॥

कर्मण्युपपदे क्रियार्थायां क्रियायां चाण् स्यात् । ण्वुलोऽपवादः । काण्डलावो व्रजति । परत्वादयं कादीन् बाधते । कम्बलदायो व्रजति ॥

३१८१-कर्म्म उपपद होनेपर क्रियानिमित्तक क्रियावाचक पद उपपद होनेपर धातुके उत्तर भविष्यत् कालमें अण् प्रत्यय हो, यह अण् प्रत्यय ण्वुल् प्रत्ययका अपवाद है यथा-कांडलावो व्रजति । परत्वके कारण यह प्रत्यय ककारादि प्रत्ययोंको बाधता है । कम्बलदायो व्रजति ॥

३१८२ पदरुजविशस्पृशो घञ् । ३ । ३ । १६ ॥

भविष्यतीति निवृत्तम् । पद्यतेऽसौ पादः । रुजतीति रोगः।विशतीति वेशः।स्पृशतीति स्पर्शः

३१८२-यहांसे भविष्यत् अर्थकी निवृत्ति हुई। पद, रुज, विश और स्पृश धातुके उत्तर घञ् प्रत्यय हो, यथा-पद्यते असौ इति पादः। रुजति इति रोगः। विशतीति वेशः। स्पृशति इति स्पर्शः ॥

३१८३ सृ स्थिरे। ३। ३। १७॥

सृ इति लुप्तविभक्तिकम्। सर्तेः स्थिरे कर्त्तरि घञ् स्यात्। सरति कालान्तरमिति सारः॥ अतीव्याधिमत्स्यबलेषु चेति वाच्यम् ॥ * ॥ अतीसारो व्याधिः। अन्तर्भावितण्यर्थोऽत्र सरतिः रुधिरादिकमतिशयेन सारयतीत्यर्थः। विसारो मत्स्यः। सारो बले दृढांशे च॥

३१८३-सृ यह लुप्तविभक्तिक है। स्थिर कर्त्ता अर्थमें सृ धातुके उत्तर घञ् प्रत्यय हो, यथा-सरति कालान्तरम् इति सारः। सृ धातुसे व्याधि, मत्स्य, और बल अर्थमें घञ् हो ऐसा कहना चाहिये * ॥ अतीसारो व्याधिः। इस स्थलमें सृ धातु अन्तर्भावित णिजर्थ है। अर्थात् जो व्याधि रुधिरादिको अतिशय करके निर्गत करै उसको अतीसार कहतेहैं। विसारो मत्स्यः। सार शब्दसे बल और दृढांश समझना॥

३१८४ भावे। ३। ३। १८॥

सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् स्यात्। पाकः। पाकौ ॥

३१८४-सिद्धावस्थापन्न धात्वर्थ होनेपर धातुसे घञ् प्रत्यय हो, यथा, पाकः। पाकौ। (सिद्धभोजन)॥

३१८५ स्फुरतिस्फुलत्योर्घञि। ६। १। ४७॥

अनयोरेच आत्वं स्याद् घञि। स्फारः। स्फालः। उपसर्गस्य घञीति दीर्घः। परीहारः। इकः काशे। ६। ३। १२३॥ काशे उत्तरपदे इगन्तस्यैव प्रादेर्दीर्घः। नीकाशः। अनूकाशः। इकः किम्। प्रकाशः। नोदात्तोपदेशेति न वृद्धिः। शमः। आचमादेस्तु। आचामः। कामः। वामः। विश्राम इति त्वपाणिनीयम्॥

३१८५-घञ् प्रत्यय परे रहते स्फुर और स्फुल धातुके एच्के स्थानमें आकार हो, यथा-स्फारः। स्फालः। "उपसर्गस्य घञि० (१०४४)" इस सूत्रसे दीर्घ होकर परीहारः। काश शब्द उपपद होनेपर इगन्तही आदि उपसर्गको दीर्घ हो। नीकाशः। अनूकाशः। इगन्त उपसर्ग उपपद न होनेपर दीर्घ नहीं होगा, प्रकाशः। "नोदात्तोपदेश०(२७६३)" इस सूत्रसे वृद्धि नहीं होगी, यथा-शमः। आङ्पूर्वक चमादि धातुओंके तो, आचामः। कामः। वामः। विश्रामः। यह पद पाणिनि महर्षिको अभिप्रेत नहीं है॥

३१८६ स्यदो जवे। ६। ४। २८॥

स्यन्देर्घञि नलोपो वृद्ध्यभावश्च निपात्यते। स्यदो वेगः। अन्यत्र स्यन्दः॥

३१८६-घञ् प्रत्यय परे रहते स्यन्दि धातुके नकारका लोप हो, और वृद्धिका अभाव निपातनसे सिद्ध हो, स्यदो वेगः। अन्य अर्थमें अर्थात् प्रस्रवण अर्थमें नकारका लोप नहीं होगा, यथा-स्यन्दः (टपकना)॥

३१८७ अवोदैधौद्मप्रश्रथहिमश्रथाः। ६। ४। २९॥

अवोदः अवक्लेदनम्। एध इन्धनम्। ओद्म उन्दनम्। श्रन्थेर्नलोपो वृद्ध्यभावश्च॥

३१८७-अवोद, एध, ओद्म, प्रश्रथ, हिम, श्रथ यह संपूर्ण पद निपातनसे सिद्ध हों, यथा-अवोदः अवक्लेदनम्। एध इन्धनम्। ओद्म उन्दनम्। श्रन्थ धातुके नकारका लोप हो, और अकारको वृद्धि न हो, प्रश्रथः। इत्यादि॥

३१८८ अकर्तरि च कारके संज्ञायाम्। ३। ३। १९॥

कर्तृभिन्ने कारके घञ् स्यात्॥

३१८८-कर्तृभिन्न कारकमें संज्ञा होनेपर धातुके उत्तर घञ् प्रत्यय हो॥

३१८९ घञि च भावकरणयोः। ६। ४। २७॥

रञ्जेर्नलोपः स्यात्। रागः। अनयोः किम्। रज्यत्यस्मिन् रङ्गः। प्रास्यते इति प्रासः। संज्ञायामिति प्रायिकम्। को भवता लाभो लब्ध इत उत्तरं भावे अकर्तरि कारक इति कृत्यल्युटो बहुलमिति यावद् द्वयमप्यनुवर्तते॥

३१८९--भाव और करणमें घञ् प्रत्यय परे रहते रञ्ज धातुके नकारका लोप हो, रागः। भाव, और करण अर्थ न होनेपर रज्यति अस्मिन् इस विग्रहमें रङ्गः। इस स्थलमें नकारका लोप नहीं हुआ। प्रास्यते इति प्रासः। "संज्ञायाम्" अर्थात् संज्ञा होनेपर घञ् होगा ऐसा जो कहा है वह प्रायिक अभिप्रायमें है अर्थात् सर्वत्र नहीं। यथा, को भवता लाभः लब्धः। इस स्थलमें संज्ञा नहीं है तथापि घञ् प्रत्यय हुआहै। इससे परवर्त्ती सूत्रमें "भावे" और "अकर्तरि कारके" इन दोनों पदोंकी "कृत्यल्युटो बहुलम् २८४१" इस सूत्रतक अनुवृत्ति होगी॥

३१९० परिमाणाख्यायां सर्वेभ्यः। ३। ३। २०॥

घञ्। अजपोर्बाधनार्थमिदम्। एकस्तण्डुलनिचायः। द्वौ शूर्पनिष्पावौ। द्वौ कारौ॥

दारजारौ कर्तरि णिलुक्च ॥ * ॥ दारयन्तीति दाराः । जारयन्तीति जाराः ॥

३१९०-परिमाण अर्थ होनेपर भावमें और कर्तृभिन्न कारकमें सम्पूर्ण धातुओंके उत्तर घञ् प्रत्यय हो, अच् और अप् प्रत्ययके बाधनार्थ यह सूत्र विहित हुआहै । एकस्तण्डुलनिचायः । द्वौ शूर्पनिष्पावौ । द्वौ कारौ ॥

"दारजारौ कर्त्तरि णिलुक् च" ण्यन्त दॄ धातुसे और जॄ धातुसे कर्तामें घञ् प्रत्यय हो और णिलोपको बाध कर णि लुक् हो ऐसा कहना चाहिये* दारयन्ति इस विग्रहमें कर्त्तामें घञ् और णिका लुक् होकर दाराः पद सिद्ध हुआहै । तथा जारयन्ति इस विग्रहमें कर्त्तामें घञ् और णिका लुक् होकर जाराः पद सिद्ध हुआहै । दाराः-स्त्री । जाराः (यार)॥

३१९१ इङश्च । ३ । ३ । २१ ॥

घञ् । अचोपवादः । उपेत्य अस्माद्धीयते उपाध्यायः ॥ अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष् ॥ * ॥ उपाध्याया । उपाध्यायी ॥ शॄ वायुवर्णनिवृत्तेषु ॥ * ॥ शॄ इत्यविभक्तिको निर्देशः । शारो वायुः । करणे घञ् । शारो वर्णः । चित्रीकरणमिह धात्वर्थः । निव्रियते आव्रियतेऽनेनेति निवृतमावरणम् । बाहुलकात्करणे क्तः । गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः । अकृतप्रावरण इत्यर्थः ॥

३१९१-कर्तृभिन्न कारकमें इङ् धातुके उत्तर घञ् प्रत्यय हो यह सूत्र अच् प्रत्ययका बाधक है, यथा, "उपेत्य अस्मात् अधीयते"इस विग्रहमें, उपाध्यायः ॥

अपादान कारकमें स्त्रीलिङ्गमें घञ् प्रत्यय हो और इस घञ् प्रत्ययान्त पदके उत्तर विकल्प करके ङीष् हो, यथा-उपाध्याया, उपाध्यायी ॥

वायु वर्ण और निवृत्त अर्थ होनेपर शॄ धातुके उत्तर घञ् प्रत्यय हो * शॄ इसमें विभक्तियुक्त न करके निर्देश कियाहै । शारो वायुः । शॄ धातुके उत्तर करणमें घञ् प्रत्यय हुआहै । शारो वर्णः । इस स्थलमें शॄ धातुका अर्थ चित्रीकरण है । "निव्रियते आव्रियते अनेन" इस विग्रहमें निवृत्त अर्थात् आदरणार्थमें वृ धातुके उत्तर बाहुलकबलसे करणमें क्त प्रत्यय हुआहै। निवृत्तम्-"गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः" अकृत-प्रावरण इत्यर्थः ॥

३१९२ उपसर्गे रुवः । ३ । ३ । २२ ॥

घञ् । संरावः । उपसर्गे किम् । रवः ॥

३१९२-भावमें और कर्तृभिन्न कारकमें उपसर्गपूर्वक रु धातुके उत्तर घञ् प्रत्यय हो, यथा, संरावः । उपसर्गपूर्वक न होनेपर घञ् नहीं होगा । यथा, रवः ॥

३१९३ अभिनिसः स्तनः शब्दसंज्ञायाम् । ८ । ३ । ८६ ॥

अस्मात् स्तनेः सस्य मूर्धन्यः । अभिनिष्टानो वर्णः । शब्दसंज्ञायां किम् । अभिनिः स्तनति मृदङ्गः ॥

३१९३-शब्दसंज्ञा होनेपर अभिपूर्वक और निस्पूर्वक स्तन धातुके सकारको मूर्धन्य हो, यथा-अभिनिष्टानो वर्णः । शब्दसंज्ञा न होनेपर अभिनिः स्तनति मृदङ्गः ॥

३१९४ समि युद्रुदुवः । ३ । ३ । २३ ॥

संयूयते मिश्रीक्रियते गुडादिभिरिति संयावः पिष्टविकारोऽपूपविशेषः । सन्द्रावः । सन्दावः ॥

३१९४-सम्पूर्वक यु, द्रु और दु धातुके उत्तर भाव और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, यथा-संयूयते मिश्रीक्रियते डादिभिः इति संयावः । अर्थात् पिष्टविकारोऽपूपविशेषः, सन्द्रावः । सन्दावः ॥

३१९५ श्रिणीभुवोऽनुपसर्गे ।३।३।२४॥

श्रायः । नायः । भावः । अनुपसर्गे किम् । प्रश्रयः।प्रणयः । प्रभवः। कथं प्रभावो राज्ञ इति। प्रकृष्टो भाव इति प्रादिसमासः । कथं राज्ञो नय इति । बाहुलकात् ॥

३१९५-उपसर्ग पूर्वमें न रहते श्रि, नी और भू धातुके उत्तर भाव और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, यथा, श्रायः । नायः । भावः । उपसर्ग पूर्वमें रहते घञ् नहीं होगा, यथा-प्रश्रयः । प्रणयः । प्रभवः । "प्रभावो राज्ञः" इस स्थलमें प्रभाव पद किस प्रकारसे सिद्ध हुआ ? प्रकृष्टः भावः । इस प्रादि समासमें प्रभावः पद निष्पन्न हुआहै । प्रथम भू धातुके उत्तर घञ् प्रत्यय होनेपर भावः पश्चात् समासद्वारा सिद्ध हुआहै । "राज्ञो नयः" इस स्थलमें नयः पद किस प्रकारसे सिद्ध हुआ ? यह बाहुलकबलसे हुआहै ऐसा जानना चाहिये ॥

३१९६ वौ क्षुश्रुवः । ३ । ३ । २५ ॥

विक्षावः । विश्रावः । वौ किम् । क्षवः।श्रवः॥

३१९६-विपूर्वक क्षु और श्रु धातुके उत्तर भावमें और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, यथा-विक्षावः । विश्रावः । जिस स्थानमें विपूर्वक नहीं होगा उस स्थानमें घञ् नहीं होगा, यथा-क्षवः । श्रवः । श्रु+अच्=श्रवः-(कान) ॥

३१९७ अवोदोर्नियः । ३ । ३ । २६ ॥

अवनायः अधोनयनम् । उन्नायः ऊर्ध्वनयनम् । कथमुन्नयः उत्प्रेक्षेति । बाहुलकात् ॥

३१९७-अवपूर्वक और उत्पूर्वक नी धातुके उत्तर भाव और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, यथा-अवनायः-अधोनयनम् । उन्नायः-ऊर्ध्वनयनम् । "उन्नयः उत्प्रेक्षा" इस स्थलमें उन्नयः पद किस प्रकारसे सिद्ध हुआ ? बाहुलकबलसे सिद्ध हुआहै ॥

३१९८ प्रे द्रुस्तुस्रुवः । ३ । ३ । २७ ॥

प्रद्रावः । प्रस्तावः । प्रस्रावः । प्रे इति किम् । द्रवः । स्तवः । स्रवः ॥

३१९८-प्रपूर्वक, द्रु, ६ और श्रु धातुके उत्तर भाव और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, प्रद्रावः। प्रस्तावः।प्रस्रावः। प्रपूर्वक न होनेपर द्रवः, स्तवः, स्रवः ॥

३१९९ निरभ्योः पूल्वोः । ३ ।३।२८॥

निष्पूयते शूर्पादिभिरिति निष्पावो धान्यविशेषः। अभिलावः।निरभ्योः किम्।पवः।लवः॥

३१९९-निर्पूर्वक पू धातु और अभिपूर्वक लू धातुके उत्तर भाव, और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, यथा-निष्पूयते शूर्पादिभिः इस विग्रहमें निष्पावः अर्थात् धान्यविशेष। अभिलावः। निर् और अभिपूर्वक न होनेपर पवः। लवः। इस स्थलमें घञ् नहीं हुआ ॥

३२०० उन्न्योर्ग्रः । ३ । ३ । २९ ॥

उद्गारः। निगारः। उन्न्योः किम् । गरः ॥

३२००-भावमें और कर्तृभिन्न कारकमें उत् और निपूर्वक गॄ धातुके उत्तर घञ् प्रत्यय हो, यथा-उद्गारः। निगारः। उत् और निपूर्वक न होनेपर,गरः। इस स्थलमें घञ् नहीं हुआ। अच् हुआ ॥

३२०१ कॄ धान्ये। ३ । ३ । ३० ॥

कॄ इत्यस्माद्धान्यविषयकादुन्न्योर्घञ् स्यात्। उत्कारो निकारो धान्यस्य विक्षेप इत्यर्थः। धान्ये किम्। भिक्षोत्करः। पुष्पनिकरः॥

३२०१-धान्य अर्थ होनेपर भावमें और कर्तृभिन्न कारकमें उत् और निपूर्वक कॄ धातुके उत्तर घञ् प्रत्यय हो, यथा-उत्कारः। निकारः। अर्थात् धान्यका विक्षेप। धान्य न होनेपर, भिक्षोत्करः। पुष्पनिकरः। इस प्रकार होगा ॥

३२०२ यज्ञे समि स्तुवः । ३ । ३।३१॥

समेत्य स्तुवन्ति यस्मिन् देशे छन्दोगाः स देशः संस्तावः। यज्ञे किम्। संस्तवः परिचयः॥

३२०२-यज्ञ अर्थ होनेपर भावमें और कर्तृभिन्न कारकमें सम्पूर्वक स्तु धातुके उत्तर घञ् प्रत्यय हो, यथा, "समेत्य स्तुवन्ति यस्मिन्देशे छन्दोगाः स देशः संस्तावः।" (संस्तावः-जिस देशमें सामवेदी मिलकर स्तुति करते हैं)। यज्ञ न होनेपर संस्तवः अर्थात् परिचयः॥

३२०३ प्रे स्त्रोऽयज्ञे।३ । ३। ३२ ॥

अयज्ञे इति छेदः। यज्ञे इति प्रकृतत्वात्। प्रस्तारः।अयज्ञे किम्।बर्हिषः प्रस्तरो मुष्टिविशेषः॥

३२०३-यज्ञभिन्न अर्थ होनेपर प्रपूर्वक स्तॄ धातुके उत्तर भावमें और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, पूर्वसूत्रमें यज्ञ अर्थ देखा जाताहै, अत एव इस स्थलमें अयज्ञ यह पदच्छेद किया, यथा, प्रस्तारः। जिस स्थानमें यज्ञार्थ होगा उस स्थलमें बर्हिषः प्रस्तरः मुष्टिविशेषः ऐसा होगा ॥

३२०४ प्रथने वावशब्दे । ३ । ३ ।३३॥

विपूर्वात् स्तृणातेर्घञ् स्यादशब्दविषये प्रथने। पटस्य विस्तारः। प्रथने किम् । तृणविस्तरः। अशब्दे किम्। ग्रन्थविस्तरः॥

३२०४-शब्दभिन्न विषयीभूत आख्यान होनेपर भावमें और कर्तृभिन्न कारकमें विपूर्वक स्तॄ धातुके उत्तर घञ् प्रत्यय हो, यथा-पटस्य विस्तारः। प्रथन अर्थात् आख्यान अर्थ न होनेपर तृणविस्तरः। शब्द अर्थ होनेपर, ग्रन्थविस्तरः॥

३२०५ छन्दोनाम्नि च। ३। ३।३४॥

स्त्र इत्यनुवर्तते। विष्टारपङ्क्तिश्छन्दः। विस्तीर्यन्तेऽस्मिन्नक्षराणीत्यधिकरणे घञ् ततः कर्मधारयः॥

३२०५-'स्त्रः' इस पदकी यहाँ अनुवृत्ति होतीहै छन्दका नाम होनेपर विपूर्वक स्तॄ धातुके उत्तर भावमें और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, यथा, विष्टारपंक्तिः अर्थात् इस नाम का छन्द। इस स्थलमें "विस्तीर्यन्तेऽस्मिन्नक्षराणीत्यधिकरणे घञ्" इस विग्रहमें अधिकरणमें घञ् प्रत्यय हुआहै। पश्चात् कर्मधारय समास हुआहै ॥

३२०६ छन्दोनाम्नि च। ८।३।९४॥

विपूर्वात् स्तृणातेर्घञन्तस्य सस्य षत्वं स्याच्छन्दोनाम्नि। इति षत्वम्॥

३२०६-छन्दका नाम होनेपर घञ् प्रत्ययान्त विपूर्वक स्तॄ धातुके सकारको षत्व हो। इस सूत्रसे षत्व हुआ ॥

३२०७ उदि ग्रहः। ३ । ३ । ३५ ॥

उद्ग्राहः॥

३२०७-उत्पूर्वक ग्रह धातुके उत्तर घञ् प्रत्यय हो,यथा-उद्ग्राहः॥

३२०८ समि मुष्टौ । ३ । ३ । ३६ ॥

मल्लस्य संग्राहः।मुष्टौ किम्। द्रव्यस्य संग्रहः॥

३२०८-मुष्टिविषयक धात्वर्थ गम्यमान होनेपर सम्पूर्वक ग्रह धातुके उत्तर घञ् प्रत्यय हो, यथा-मल्लस्य संग्राहः दृढ ग्रहण मुष्टिसे होताहै। इस कारण मुष्टिविषयक धात्वर्थ गम्यमान है। मुष्टिविषयक धात्वर्थ न होनेपर यथा-द्रव्यस्य संग्रहः॥

३२०९ परिन्योर्नीणोर्द्यूताभ्रेषयोः। ३ । ३ । ३७ ॥

परिपूर्वान्नयतेर्निपूर्वादिणश्च घञ् स्यात् क्रमेण द्यूतेऽभ्रेषे च विषये। परिणायेन शारान् हन्ति। समन्तान्नयनेनेत्यर्थः। एषोऽत्र न्यायः। उचितमित्यर्थः। द्यूताभ्रेषयोः किम्। परिणयो विवाहः। न्ययो नाशः॥

३२०९-परिपूर्वक नी धातुके उत्तर द्यूत विषयक नयन अर्थ होनेपर निपूर्वक इण् धातुके उत्तर अभ्रेष विषयक गमन अर्थ होनेपर घञ् प्रत्यय हो, यथा-परिणायेन शारान् हन्ति समन्तान्नयनेनेत्यर्थः। एषोऽत्र न्यायः अर्थात् यही इस स्थलमें उचित है। द्यूतविषयक नयन और अभ्रेष विषयक गमन अर्थ न होनेपर परिणयो विवाहः। न्ययो नाशः॥

३२१० परावनुपात्यय इणः।३।३।३८॥

क्रमप्राप्तस्य अनतिपातोऽनुपात्ययः । तव पर्यायः । अनुपात्यये किम् । कालस्य पर्ययः । अतिपात इत्यर्थः ॥

३२१०-क्रम प्राप्तिका अनतिपात अर्थात् अविच्छेद अर्थ होनेपर परिपूर्वक इण् धातुके उत्तर घञ् प्रत्यय हो, तव पर्य्यायः । जिस स्थानमें क्रमप्राप्तिका अनतिपात नहीं होगा उस स्थानमें कालस्य पर्य्ययः अतिपातः इत्यर्थः ॥

३२११ व्युपयोः शेतेः पर्याये।३।३।३९॥

तव विशायः । तव राजोपशायः । पर्याये किम् । विशयः । संशयः । उपशयः समीपशयनम् ॥

३२११-पर्याय गम्यमान होनेपर विपूर्वक और उपपूर्वक शीङ् धातुके उत्तर घञ् प्रत्यय हो, यथा-तव विशायः । तव राजोपशायः । पर्य्यायसे भिन्नार्थमें, विशयः। संशयः। उपशयः समीपशयनम् ॥

३२१२ हस्तादाने चेरस्तेये ।३।३।४०॥

हस्तादान इत्यनेन प्रत्यासत्तिरादेयस्य लक्ष्यते । पुष्पप्रचायः । हस्तादाने किम् । वृक्षाग्रस्थानां फलानां यष्टया प्रचयं करोति । अस्तेये किम् । पुष्पप्रचयश्चौर्येण ॥

३२१२-स्तेयसे भिन्न हस्तादान गम्यमान होनेपर चिञ् धातुके उत्तर घञ् प्रत्यय हो, हस्तादान शब्दसे आदेय वस्तुकी प्रत्यासत्ति जानना चाहिये, यथा-पुष्पप्रचायः । घञ् होनेसे वृद्धि होगी । हस्तसे प्रचय करताहै, हस्तादाने किम् , वृक्षाग्रस्थानां फलानां यष्टया प्रचयं करोति । स्तेय होनेपर पुष्पप्रचयश्चौर्येण॥

३२१३ निवासचितिशरीरोपसमाधानेष्वादेश्च कः । ३ । ३ । ४१ ॥

एषु चिनोतेर्घञ् आदेश्च ककारः । उपसमाधानं राशीकरणं तच्च धात्वर्थः । अन्ये प्रत्ययार्थस्य कारकस्योपाधिभूताः । निवासे । काशीनिकायः । चितौ । आकायमग्निं चिन्वीत । शरीरे । चीयतेऽस्मिन्नस्थ्यादिकमिति कायः । समूहे । गोमयनिकायः । एषु किम् । चयः । चः कः इति वक्तव्ये आदेरित्युक्तेर्यङ्लुक्यादेरेव यथा स्यादिति । गोमयानां निकेचायः । पुनः-पुना राशीकरणमित्यर्थः ॥

३२१३-निवास, चिति, शरीर, उपसमाधान इन सम्पूर्ण अर्थोंमें चि धातुके उत्तर घञ् प्रत्यय हो और आदि वर्णके स्थानमें क आदेश हो, उपसमाधान शब्दसे राशीकरण समझना । यही धातुका अर्थ है । अन्य अर्थ प्रत्ययार्थ कारकके उपाधिभूत हैं । निवासार्थमें यथा-काशीनिकायः । चिति अर्थमें उदाहरण. । यथा, आकायमग्निं चिन्वीत । शरीरार्थमें यथा-चीयतेऽस्मिन्नस्थ्यादिकमिति कायः। इस विग्रहमें कायः। ऐसा पद हुआ। (जिसमें अस्थि आदिका चयन हो वह कायः) समूहार्थमें यथा, गोमयनिकायः । जिस स्थानमें यह समस्त अर्थ नहीं होंगे उस स्थानमें चयः ऐसा होगा। चके स्थानमें क हो ऐसा कहना ही ठीक है। फिर जो आदिके स्थानमें कहा है वह यङ्लुक् होनेपर आदिके स्थानमें ककार आदेश होगा इस निमित्त है । गोमयानां निकेचायः अर्थात् बार २ राशीकरण समझना ॥

३२१४ सङ्घे चानौत्तराधर्ये।३।३।४२॥

चेर्घञ् आदेश्च कः । भिक्षुनिकायः ।प्राणिनां समूहः संघः । अनौत्तराधर्ये किम् । सूकरनिचयः । संघे किम् । ज्ञानकर्मसमुच्चयः ॥

३२१४-उत्तराधर भावसे भिन्न समूह अर्थमें चि धातुके उत्तर घञ् प्रत्यय हो, और आदि वर्णके स्थानमें ककार आदेश हो, यथा-भिक्षुनिकायः । प्राणिसमूहको संघ कहतेहैं । जिस स्थानमें उत्तराधर भाव अर्थ है उसस्थानमें सूकरनिचयः। स्तन्यपानार्थ सूकर उत्तराधरभावसे शयन करता है, जिस स्थानमें समूह न होगा उस स्थानमें ज्ञानकर्म्मसमुचयः । (अर्थात् ज्ञान और कर्मका एकीभाव) ॥

३२१५ कर्मव्यतिहारे णच् स्त्रियाम् । ३ । ३ । ४३ ॥

स्त्रीलिङ्गे भावे णच् ॥

३२१५-कर्म्मका व्यतिहार अर्थ होनेपर स्त्रीलिङ्ग भावमें णच् प्रत्यय हो ॥

३२१६ णचः स्त्रियामञ् । ५।४।१४ ॥

३२१६-स्त्रीलिङ्गमें विहित णच् प्रत्ययान्त शब्दके उत्तर अञ् प्रत्यय हो ॥

३२१७ न कर्मव्यतिहारे । ७ । ३ । ६ ॥

अत्र ऐच् न स्यात् । व्यावक्रोशी । व्यावहासी ॥

३२१७-कर्म्मव्यतिहार अर्थ होनेपर ऐच् आगम नहीं होगा, व्यावक्रोशी । व्यावहासी ॥

३२१८ अभिविधौ भाव इनुण् । ३ । ३ । ४४ ॥ ॥ आदिवृद्धिः ॥

३२१८-कार्त्स्न्य करके सम्बन्ध गम्यमान होनेपर भावमें इनुण् प्रत्यय हो ॥

३२१९ अणिनुणः । ५ । ४ । १५ ॥

इनण्यनपत्ये । सांराविणं वर्तते ॥

३२१९-इनुण् प्रत्ययान्त शब्दके उत्तर स्वार्थमें अण् प्रत्यय हो, आदि पदको वृद्धि हो । "इनण्यनपत्ये (१२४५)" इस सूत्रसे प्रकृतिभाव होगा । सांराविणम् वर्त्तते ॥

३२२० आक्रोशेऽवन्योर्ग्रहः ।३।३।४५॥

अव नि एतयोर्ग्रहेर्घञ् स्यात् शापे । अवग्राहस्ते भूयात् । अभिभव इत्यर्थः । निग्राहस्ते भूयात् । बाध इत्यर्थः । आक्रोशे किम् । अवग्रहः पदस्य । निग्रहश्चोरस्य ॥

३२२०—शाप अर्थ होनेपर अवपूर्वक और निपूर्वक ग्रह धातुके उत्तर घञ् प्रत्यय हो, अवग्राहस्ते भूयात् । अवग्राह शब्दसे अभिभव समझना । निग्राहस्ते भूयात् । निग्राह शब्दसे बाध समझना । जिस स्थानमें आक्रोश अर्थ नहीं होगा, उस स्थलमें अवग्रहः पदस्य । निग्रहः चोरस्य । इत्यादि ॥

३२२१ प्रे लिप्सायाम् । ३ । ३ । ४६ ॥

पात्रप्रग्राहेण चरति भिक्षुः ॥

३२२१—लिप्सा अर्थात् लाभेच्छा होनेपर प्रपूर्वक ग्रह धातुके उत्तर घञ् प्रत्यय हो, यथा, पात्रप्रग्राहेण चरति भिक्षुः । लिप्साले भिन्न अर्थमें, प्रग्रहो देवदत्तस्य । प्र+ग्रह+घञ्=प्रग्राहः ॥

३२२२ परौ यज्ञे । ३ । ३ । ४७ ॥

उत्तरः परिग्राहः । स्फ्येन वेदेः स्वीकरणम् ॥

३२२२—प्रयुज्यमान होनेपर परि पद रहते ग्रह धातुसे घञ् प्रत्यय हो, उत्तरः परिग्राहः । स्फ्येन वेदेः स्वीकरणम् ॥

३२२३ नौ वृ धान्ये ।३। ३। ४८ ॥

वृ इति लुप्तपञ्चमीकम् । नीवाराः । धान्ये किम् । निवरा कन्या । क्विन्विषयेपि बाहुलकादप् । प्रवरा सेतिवत् ॥

३२२३—वृ यह लुप्त पञ्चमीका पद है, धान्य अर्थ होनेपर निपूर्वक वृ धातुके उत्तर घञ् प्रत्यय हो, यथा, नीवारः (मुनिअन्न)"उपसर्गस्य घञ्० ६।३।१२२ "इससे उपसर्गको दीर्घ हुआ जिस स्थानमें धान्य अर्थ नहीं होगा उस स्थानमें निवरा कन्या । क्विन्विषयमें भी बाहुलकबलसे अप् प्रत्यय होगा यथा, प्रवरा सा । इस प्रकार होगा ॥

३२२४ उदि श्रयतियौतिपूद्रुवः ३।३।४९॥

उच्छ्रायः । उद्यावः । उत्पावः । उद्द्रावः । कथं पतनान्ताः समुच्छ्रया इति । बाहुलकात् ॥

३२२४—उद् उपपद रहते श्रि, यु, पू, द्रु इन सम्पूर्ण धातुओंके उत्तर घञ् प्रत्यय हो, यथा—उच्छ्रायः । उद्यावः । उत्पावः । उद्द्रावः। ऐसा होनेपर"पतनान्ताः समुच्छ्रायाः"ऐसा प्रयोग किस प्रकारसे सिद्ध हुआ ? वह बाहुलकबलसे सिद्ध हुआहै ऐसा जानना चाहिये ॥

३२२५ विभाषाङि रुप्लुवोः।३।३।५०॥

आरावः । आरवः । आप्लावः । आप्लवः ॥

३२२५—आङ् उपपद रहते रु और प्लु धातुके उत्तर विकल्प करके घञ् प्रत्यय हो, यथा—आरावः, आरवः । आप्लावः, आप्लवः ॥

३२२६ अवे ग्रहो वर्षप्रतिबन्धे । ३ । ३ । ५१ ॥

विभाषेति वर्तते । अवग्रहः । अवग्राहः । वर्षप्रतिबन्धे किम् । अवग्रहः पदस्य ॥

३२२६—विभाषा पदकी अनुवृत्ति आती है । वर्षप्रतिबन्ध अर्थ होनेपर अव उपपद रहते ग्रह धातुके उत्तर विकल्प करके घञ् प्रत्यय हो, अवग्राहः, अवग्रहः । वर्षप्रतिबन्ध अर्थ न होनेपर, अवग्रहः पदस्य । इस प्रकार होगा ॥

३२२७ प्रे वणिजाम् ।३।३।५२ ॥

प्रे ग्रहेर्घञ् वा वणिजां संबंधी चेत्प्रत्ययार्थः। तुलासूत्रमिति यावत् । तुलाप्रग्राहेण चरति । तुलाप्रग्रहेण ॥

३२२७—यदि प्रत्ययार्थ वणिक् सम्बन्धी अर्थात् तुलासूत्र हो तो प्रपूर्वक ग्रह धातुके उत्तर विकल्प करके घञ् प्रत्यय हो, यथा, तुलाप्रग्राहेण चरति तुला प्रग्रहेण वा ॥

३२२८ रश्मौ च । ३ । ३ । ५३ ॥

प्रग्रहः । प्रग्राहः ॥

३२२८—रश्मि अर्थ होनेपर प्रपूर्वक ग्रह धातुके उत्तर विकल्प करके घञ् प्रत्यय हो, यथा, प्रग्राहः—प्रग्रहः ॥

३२२९ वृणोतेराच्छादने । ३।३।५४॥

विभाषा प्र इत्येव । प्रवारः । प्रवरः ॥

३२२९—आच्छादनार्थ होनेपर प्रपूर्वक वृ धातुके उत्तर विकल्प करके घञ् प्रत्यय हो, यथा, प्रवारः—प्रवरः ॥

३२३० परौ भुवोऽवज्ञाने । ३ ।३।५५॥

परिभावः । परिभवः । अवज्ञाने किम् । सर्वतो भवनं परिभवः ॥

३२३०—अवज्ञा अर्थ होनेपर परिपूर्वक भू धातुके उत्तर विकल्प करके घञ् प्रत्यय हो, यथा—परिभावः, परिभवः । जिस स्थानमें अवज्ञा अर्थ नहीं होगा, उस स्थानमें—सर्वतो भवनं परिभवः । इसप्रकार होगा ॥

३२३१ एरच् । ३ । ३ । ५६ ॥

चयः । जयः ॥ भयादीनामुपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थम् ॥* भयम् । वर्षम् ॥

३२३१—इकारान्त धातुके उत्तर अच् प्रत्यय हो, यथा—चयः । जयः ॥

भी आदि धातुओंके उत्तर भी अच् प्रत्यय हो * पूर्वोक्त वार्तिकका प्रयोजन कहते हैं ॥

नपुंसक लिङ्गमें क्तादि प्रत्यय न हों इसलियेभी आदि धातुसे अच् प्रत्ययका विधान किया है * भयम् । वर्षम् ॥

३२३२ ऋदोरप् । ३ । ३ । ५७ ॥

ऋवर्णान्तादुवर्णान्तादप् । करः । गरः । शरः । यवः । लवः । स्तवः । पवः ॥

३२३२ ऋवर्णान्त और उवर्णान्त धातुके उत्तर अप् प्रत्यय हो, यथा–करः । गरः । शरः । यवः । लवः । स्तवः । पवः ॥

३२३३ वृक्षासनयोर्विष्टरः ।८।३।९३॥

अनयोर्विपूर्वस्य स्तृः षत्वं निपात्यते । विष्टरो वृक्ष आसनं च । वृक्षेत्यादि किम् । वाक्यस्य विस्तरः ॥

३२३३–वृक्ष और आसन अर्थ होनेपर विपूर्वक स्तृ धातुके सकारको निपातनसे षत्व हो, यथा–विष्टरः अर्थात् वृक्ष और आसन। वृक्षादि अर्थ न होनेपर,वाक्यस्य विस्तरः ॥

३२३४ ग्रहवृदृनिश्चिगमश्च । ३।३।५८॥

अप् स्यात् । घञोऽपवादः । ग्रहः । वरः । दरः । निश्चयः । गमः ॥ वशिरण्योरुपसंख्यानम् ॥ * ॥ वशः । रणः ॥ घञर्थे कविधानम् ॥ * ॥ प्रस्थः । विघ्नः ॥ द्वित्वप्रकरणे के कृञादीनामिति वक्तव्यम् ॥ * ॥ चक्रम् । चिक्लिदम् । चक्रसः ॥

३२३४–ग्रह धातु, वृ धातु, दृ धातु, निर्पूर्वक चि धातु और गम धातुके उत्तर अप् प्रत्यय हो, यह सूत्र घञ् और अच् प्रत्ययका अपवाद है, यथा–ग्रहः । वरः । दरः । निश्चयः । गमः ।

वश और रण धातुके उत्तर भी अप् प्रत्यय हो । ऐसा कहना चाहिये * यथा–वशः । रणः ।

घञ् प्रत्ययके अर्थमें कप् प्रत्यय भी हो * । यथा–प्रस्थः । विघ्नः ।

द्वित्वप्रकरणमें "एकाचो द्वे प्रथमस्य" इस द्वित्वप्रकरणमें क प्रत्यय परे रहते कृञ् आदि धातुओंके एकाच् प्रथम अवयवको द्वित्व हो* । यथा–चक्रम्। चिक्लिदम् । चक्रसः ॥

३२३५ उपसर्गेऽदः ।३ । ३ ।५९ ॥

अप् स्यात् ॥

३२३५–उपसर्ग उपपद रहते अद धातुके उत्तर अप् प्रत्यय हो ॥

३२३६ घञपोश्च । २ ।४ । ३८ ॥

अदेर्घस्लृ स्यात् घञि अपि च । प्रघसः । विघसः । उपसर्गे किम् । घासः ॥

३२३६–घञ् और अप् प्रत्यय परे रहते अद धातुके स्थानमें घस्लृ आदेश हो, यथा–प्रघसः । विघसः । उपसर्ग उपपद न होनेपर, घासः ॥

३२३७ नौ ण च । ३ । ३ ।६० ॥

नौ उपपदे अदेर्णः स्यादप् च । न्यादः । निघसः ॥

३२३७–नि उपपद रहते अद धातुके उत्तर ण प्रत्यय हो और अप् प्रत्यय भी हो, यथा–न्यादः । निघसः ॥

३२३८ व्यधजपोरनुपसर्गे । ३।३। ६१॥

अप् स्यात् । व्यधः । जपः । उपसर्गे तु आव्याधः । उपजापः ॥

३२३८–उपसर्ग पूर्वक न होनेपर व्यध धातुके और जप धातुके उत्तर अप् प्रत्यय हो, यथा–व्यधः । जपः । उपसर्ग पूर्वक होनेपर घञ् प्रत्यय होगा । यथा–आव्याधः । उपजापः ॥

३२३९ स्वनहसोर्वा । ३ । ३ । ६२ ॥

अप् । पक्षे घञ् । स्वनः । स्वानः । हसः । हासः । अनुपसर्ग इत्येव । प्रस्वानः । प्रहासः ॥

३२३९–उपसर्ग पूर्वमें न हो ऐसा जो स्वन और हस धातु उसके उत्तर विकल्प करके अप् प्रत्यय हो, पक्षमें घञ् प्रत्यय होगा । यथा–स्वनः, स्वानः । हसः, हासः । जिस स्थलमें उपसर्ग पूर्वमें हो, उस स्थलमें घञ् प्रत्यय होगा । यथा, प्रस्वानः । प्रहासः । स्वन्+अप्=स्वनः । स्वन्+घञ्=स्वानः ॥

३२४० यमः समुपनिविषु च।३।३।६३॥

एषु अनुपसर्गे च यमेरप् वा । संयमः । संयामः । उपयमः । उपयामः । नियमः । नियामः । वियमः । वियामः । यमः । यामः॥

३२४०–सम्, उप, नि और वि उपपद रहते यम धातुके उत्तर और अनुपसर्ग पूर्वक यम धातुके उत्तर विकल्प करके अप् प्रत्यय हो, यथा–संयमः, संयामः । उपयमः, उपयामः । नियमः, नियामः । वियमः, वियामः । यमः, यामः । पक्षमें घञ्=यामः ॥

३२४१ नौ गदनदपठस्वनः ।३ ।३।६४॥

अप् वा स्यात् । निगदः । निगादः । निनदः । निनादः । निपठः । निपाठः । निस्वनः । निस्वानः ॥

३२४१–निपूर्वक गद, नद, पठ और स्वन धातुके उत्तर विकल्प करके अप् प्रत्यय हो, यथा–निगदः, निगादः । निनदः, निनादः । निपठः,निपाठः । निस्वनः, निस्वानः ॥

३२४२ क्वणो वीणायां च ।३। ३। ६५ ॥

नावनुपसर्गे च वीणाविषयाच्च क्वणतेरप् वा स्यात् । वीणाग्रहणं प्राद्यर्थम् । निक्वणः । निक्वाणः । क्वणः । क्वाणः । वीणायां तु प्रक्वणः । प्रक्वाणः ॥

३२४२–निपूर्वक और अनुपसर्गपूर्वक वीणाविषयक जो क्वण धातु उसके उत्तर विकल्प करके अप् प्रत्यय हो, वीणा शब्दग्रहण प्रादि उपसर्गार्थ है, यथा–निक्वणः, निक्वाणः । क्वणः,क्वाणः । वीणा विषयमें प्रक्वणः, प्रक्वाणः इस प्रकार होगा ॥

३२४३ नित्यं पणः परिमाणे । ३ । ३ । ६६ ॥

अप् स्यात् । मूलकपणः । शाकपणः । व्यवहारार्थं मूलकादीनां परिमितो मुष्टिर्बध्यते सोऽस्य विषयः । परिमाणे किम् । पाणः ॥

३२४३–परिमाणविशेष अर्थ गम्यमान होनेपर पण धातुके उत्तर नित्य ही अप् प्रत्यय हो, यथा–मूलकपणः। शाकपणः। व्यवहारार्थ मूलकादिकी परिमित जो मुट्ठी बांधी जाती है, इस स्थलमें परिमाण शब्दसे वही समझनी चाहिये । परिमाण न होनेपर पाणः ऐसा पद होगा ॥

३२४४ मदोऽनुपसर्गे । ३ । ३ । ६७ ॥

धनमदः । उपसर्गे तु । उन्मादः ॥

३२४४–उपसर्गपूर्वक न होनेपर मद धातुके उत्तर अप् प्रत्यय हो, यथा–धनमदः । जिस स्थानमें उपसर्गपूर्वक होगा उस स्थलमें उन्मादः ऐसा होगा । उन्मद=घञ्=उन्मादः (बावलापन) ॥

३२४५ प्रमदसम्मदौ हर्षे । ३ । ३ । ६८ ॥

हर्षे किम् । प्रमादः । संमादः ॥

३२४५–हर्ष अर्थ होनेपर प्रमद और संमद यह दो पद निपातनसे सिद्ध हों, जिस स्थानमें हर्ष नहीं होगा उस स्थलमें प्रमादः । संमादः । इस प्रकार होगा ॥

३२४६ समुदोरजः पशुषु । ३ । ३ । ६९ ॥

संपूर्वोऽजिः समुदाये उत्पूर्वश्च प्रेरणे तस्मात्पशुविषयकादप् स्यात्। अघञपोरित्युक्तेर्वीभावो न । समजः पशूनां सङ्घः । उदजः पशूनां प्रेरणम् । पशुषु किम् । समाजो ब्राह्मणानाम् । उदाजः क्षत्त्रियाणाम् ॥

३२४६–सम् उद् उपसर्ग उपपद रहते पशुविषयक अज धातुके उत्तर अप् प्रत्यय हो, सूत्रमें "अघञपो"ऐसी उक्तिके कारण वीभाव नहीं होगा, यथा–समजः पशुसमूहः । उदजः पशुप्रेरणम् । पशुविषयक न होनेपर अर्थात् पशुसे भिन्न अन्यजातिविषयक होनेपर " समाजः ब्राह्मणानाम् " इस स्थानमें अप् प्रत्यय नहीं होगा । उदाजः क्षत्त्रियाणाम् । इस स्थलमें अप् नहीं हुआ ॥

३२४७ अक्षेषु ग्लहः । ३ । ३ । ७० ॥

अक्षशब्देन देवनं लक्ष्यते तत्र यत्पणरूपेण ग्राह्यं तत्र ग्लह इति निपात्यते अक्षस्य ग्लहः । व्यात्युक्षीमभिसरणग्लहामदीव्यन् । अक्षेषु किम् । पादस्य ग्रहः ॥

३२४७–अक्ष शब्दसे पाशक्रीडा समझना । इस क्रीडाविषयमें पणरूपसे जो गृहीत होताहै उस अर्थमें ग्लह ऐसा पद निपातनसे सिद्ध हो, अर्थात् ग्रह धातुके उत्तर अप् प्रत्यय होकर रकारके स्थानमें ल होगा,यथा–अक्षस्य ग्लहः। "व्यात्युक्षीमभिसरणग्लहामदीव्यन् " । अक्षभिन्नार्थमें पादस्य ग्रहः ।

इस स्थलमें " ग्रहवृद० " इस सूत्रसे अप् प्रत्यय हुआ । लकार नहीं हुआ ॥

३२४८ प्रजने सर्तेः । ३ । ३ । ७१ ॥

प्रजनं प्रथमगर्भग्रहणम् । गवामुपसरः । कथमवसरः प्रसर इति । अधिकरणे पुंसि संज्ञायामिति घः ॥

३२४८–प्रजन अर्थात् गर्भग्रहण अर्थ होनेपर सृ धातुके उत्तर अप् प्रत्यय हो, यथा–गवामुपसरः । अवसरः और प्रसरः यह दो पद किस प्रकारसे सिद्ध हुए हैं ? अधिकरणमें "पुंसि संज्ञायाम्० ३२९६ " इस सूत्रसे घ प्रत्यय हुआहै ॥

३२४९ ह्वः संप्रसारणं च न्यभ्युपविषु । ३ । ३ । ७२ ॥

निहवः । अभिहवः । उपहवः । विहवः । एषु किम् । प्रह्वायः ॥

३२४९–नि, अभि, उप और वि उपसर्ग उपपद रहते ह्वेञ् धातुके उत्तर अप् प्रत्यय हो, और सम्प्रसारण हो, यथा–निहवः । अभिहवः । उपहवः । विहवः । यह सम्पूर्ण पूर्वमें न रहते अर्थात् इनसे भिन्न अन्य उपसर्ग पूर्वमें रहते घञ् होगा, यथा–प्रह्वायः ॥

३२५० आङि युद्धे । ३ । ३ । ७३ ॥

आहूयन्तेऽस्मिन्नित्याहवः । युद्धे किम् । आह्वायः ॥

३२५०–युद्ध अर्थ होनेपर आङ्पूर्वक ह्वेञ् धातुके उत्तर भी अप् प्रत्यय हो, और सम्प्रसारण हो, यथा–आहूयन्ते अस्मिन् इस विग्रहमें आहवः (युद्ध) । युद्ध अर्थ न होनेपर आह्वायः इस प्रकार होगा ॥

३२५१ निपानमाहावः । ३ । ३ । ७४ ॥

आङ्पूर्वस्य ह्वयतेः संप्रसारणमप् वृद्धिश्चोदकाधारश्चेद्वाच्यः । आहावस्तु निपानं स्यादुपकूपजलाशये ॥

३२५१–यदि निपान अर्थात् उदकाधार अर्थ हो तो आहवः यह पद निपातनसे सिद्ध हो, अर्थात् आङ्पूर्वक ह्वेञ् धातुके उत्तर अप् प्रत्यय और वृद्धि सम्प्रसारण निपातनसे सिद्ध होगा । " आहवस्तु निपानं स्यादुपकूपजलाशये " ॥

३२५२ भावेऽनुपसर्गस्य । ३ । ३ । ७५ ॥

अनुपसर्गस्य ह्वयतेः संप्रसारणमप् च स्याद् भावे । हवः ॥

३२५२–उपसर्ग पूर्वमें न रहते ऐसी जो ह्वेञ् धातु उसके उत्तर भावमें अप् प्रत्यय हो, और सम्प्रसारण हो, यथा–हवः ॥

३२५३ हनश्च वधः । ३ । ३ । ७६ ॥

अनुपसर्गाद्धन्तेर्भावे अप् स्यात् वधादेशश्चान्तोदात्तः वधेन दस्युम् । चाद्घञ् । घातः ॥

३२५३-अनुपसर्ग पूर्वक हन् धातुके उत्तर भावमें अप् प्रत्यय हो, और हन धातुके स्थानमें वधादेश हो, और उसके अन्तवर्णको उदात्त स्वर हो, यथा-वधेनः दस्युम्। चकार निर्देशके कारण घञ् प्रत्यय भी हो,यथा-घातः ॥

३२५४ मूर्तौ घनः । ३ । ३ । ७७ ॥

मूर्तिः काठिन्यं तस्मिन्नभिधेये हन्तेरप् स्यात् घनश्चादेशः । अभ्रघनः । कथं सैन्धवघनमानयेति । धर्मशब्देन धर्मी लक्ष्यते ॥

३२५४-मूर्ति अर्थात् काठिन्य अर्थ होनेपर हन धातुके उत्तर अप् प्रत्यय हो और हन धातुके स्थानमें घन आदेश हो, अभ्रघनः। तो " सैन्धवघनमानय" इस स्थलमें किस प्रकारसे प्रयोग हुआ ? इस स्थानमें धर्म शब्दसे धर्म्मी अर्थात् धर्मवान् लक्षित होताहै ॥

३२५५ अन्तर्घनोदेशे । ३ । ३ । ७८॥

वाहीकग्रामविशेषस्य संज्ञेयम् । अन्तर्घण इति पाठान्तरम् ॥

३२५५-देश अर्थ होनेपर 'अन्तर्घनः' यह पद निपातनसे सिद्ध हो, यह वाहीकग्रामविशेषकी संज्ञा है । 'अन्तर्घणः' ऐसा पाठान्तर भी है ॥

३२५६ अगारैकदेशे प्रघणः प्रघाणश्च । ३ । ३ । ७९ ॥

द्वारदेशे द्वौ प्रकोष्ठावलिन्दौ आभ्यन्तरो बाह्यश्च । तत्र बाह्ये प्रकोष्ठे निपातनमिदम् । प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति प्रघणः । प्रघाणः । कर्मण्यप् । पक्षे वृद्धिः ॥

३२५६-अगार अर्थात् गृहका एकदेश होनेपर 'प्रघणः' और 'प्रघाणः' यह पद निपातनसे सिद्ध हों, द्वारदेशमें दो प्रकोष्ठ होतेहैं आभ्यन्तर और बाह्य उसमें बाह्य प्रकोष्ठ होनेपर यह निपातन है, यथा-प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते, इस विग्रहमें 'प्रघणः, प्रघाणः' इस स्थलमें कर्म्मवाच्यमें अप् प्रत्यय हुआहै और विकल्प करके वृद्धि हुईहै ॥

३२५७ उद्घनोऽत्याधानम् ।३।३।८०॥

अत्याधानमुपरि स्थापनम् । यस्मिन् काष्ठे अन्यानि काष्ठानि स्थापयित्वा तक्ष्यन्ते तदुद्घनः। अधिकरणेऽप् ॥

३२५७-अत्याधान अर्थात् उपरि स्थापन अर्थ होनेपर 'उद्घनः' यह पद निपातनसे सिद्ध हो, जिस काष्ठके ऊपर दूसरा काष्ठ रखकर छेदन कियाजाय उसको'उद्घनः' कहतेहैं, इस स्थलमें अधिकरणवाच्यमें अप् प्रत्यय हुआहै ॥

३२५८ अपघनोऽङ्गम् । ३ । ३ । ८१॥

अङ्गं शरीरावयवः । स चेह न सर्वः किंतु पाणिः पादश्चेत्याहुः । करणेऽप् । अपघातोऽन्यः॥

३२५८-अङ्ग अर्थात् शरीरावयव वाच्य होनेपर 'अपघनः' यह पद निपातनसे सिद्ध हो । वह अङ्ग यहां सब नहीं लेना, किन्तु पाणि और पाद यह पूर्वाचार्य्य कहेहैं । 'अपघनः' यहां करणवाच्यमें अप् प्रत्यय हुआहै । अन्यार्थमें 'अपघातः' ऐसा होगा ॥

३२५९ करणेऽयोविद्रुषु । ३ । ३।८२॥

एषु हन्तेः करणेऽप् स्याद्घनादेशश्च। अयो हन्यतेऽनेनेत्ययोघनः । विघनः ।द्रुघनः।द्रुघण इत्येके। पूर्वपदात्संज्ञायामिति णत्वम् । संज्ञैषा कुठारस्य। द्रुर्वृक्षः ॥

३२५९-अयस्, वि और द्रु शब्द उपपद होनेपर करण वाच्यमें हन् धातुके उत्तर अप् प्रत्यय हो, और हन् धातुके स्थानमें घन आदेश हो, यथा-अयो हन्यते अनेन, इस विग्रहमें अयोघनः । विघनः । द्रुघनः । 'द्रुघणः' ऐसा कोई कहतेहैं यहां "पूर्वपदात् संज्ञायाम् ८५७" इस सूत्रसे णत्व हुआ । द्रुघणः यह कुठारकी संज्ञा है।द्रु शब्दसे वृक्ष समझना॥

३२६० स्तम्बे क च । ३ । ३ । ८३ ॥

स्तम्बे उपपदे हन्तेः करणे कः स्यादप् च पक्षे घनादेशश्च । स्तम्बघ्नः । स्तम्बघनः । करण इत्येव । स्तम्बघातः ॥

३२६०-स्तम्ब शब्द उपपद होनेपर हन् धातुके उत्तर करणवाच्यमें क और अप् प्रत्यय हो, पक्षमें धातुके स्थानमें घन आदेश हो, यथा-स्तम्बघ्नः, स्तम्बघनः । करणभिन्नमें 'स्तम्बघातः' पद होगा ॥

३२६१ परौ घः । ३ । ३ । ८४ ॥

परौ हन्तेरप् स्यात्करणे घशब्दश्चादेशः । परिहन्यतेऽनेनेति परिघः ॥

३२६१-परिपूर्वक हन् धातुके उत्तर करणवाच्यमें अप् प्रत्यय हो, और धातुके स्थानमें घ आदेश हो, यथा-परिहन्यते अनेन, इस विग्रहमें परिघः ॥

३२६२ परेश्च घाङ्कयोः । ८ । २।२२॥

परे रेफस्य लो वा स्याद् घशब्देऽङ्कशब्दे च। पलिघः-परिघः।पल्यंकः-पर्यङ्कः।इह तरप्तमपौ घ इति कृत्रिमस्य न ग्रहणं व्याख्यानात् ॥

३२६२-घ शब्द और अंक शब्द परे रहते परि उपसर्गके रकारके स्थानमें विकल्प करके लकार आदेश हो, यथा-पलिघः, परिघः । पल्यङ्कः, पर्य्यंकः । इस सूत्रमें "तरप्तमपौ घः २००३" इस सूत्रोक्त कृत्रिम घका ग्रहण नहीं है कारण कि, ऐसा व्याख्यान है ॥

३२६३ उपघ्न आश्रये । ३ ।३ । ८५ ॥

उपपूर्वाद्धन्तेरप् स्यादुपधालोपश्च । आश्रयशब्देन सामीप्यं लक्ष्यते । पर्वतेनोपहन्यते सामीप्येन गम्यत इति पर्वतोपघ्नः ॥

३२६३-आश्रय अर्थ होनेपर उपपूर्वक हन् धातुके

उत्तर अप् प्रत्यय हो, और उपधाका लोप हो, आश्रय शब्दसे इस स्थानमें सामीप्य समझना, यथा–पर्वतेन उपहन्यते अर्थात् सामीप्येन गम्यते, इस विग्रहमें पर्वतोपघ्नः ॥

३२६४ सङ्घोद्घौ गणप्रशंसयोः । ३ । ३ । ८६ ॥

संहननं संघः । भावेऽप् । उद्धन्यते उत्कृष्टो ज्ञायते इत्युद्घः । कर्मण्यप् । गत्यर्थानां बुद्ध्यर्थत्वात् हन्तिर्ज्ञाने ॥

३२६४–संघ और उद्घ यह दो शब्द यथाक्रम गण और प्रशंसा अर्थमें निपातनसे सिद्ध हों, यथा–संहननम्, इस विग्रहमें 'संघः' इस स्थलमें भाववाच्यमें अप् प्रत्यय हुआहै उद्धन्यते उत्कृष्टो ज्ञायते, इस विग्रहमें 'उद्घः' इस स्थलमें कर्म्मवाच्यमें अप् प्रत्यय हुआहै । गत्यर्थक धातुओंका बुद्धयर्थक होनेके कारण हन् धातु ज्ञानार्थमें है, अतएव 'उद्धन्यते' इसका 'उत्कृष्टो ज्ञायते' ऐसा विवरण लिखे हैं ॥

३२६५ निघो निमितम् ।३। ३ । ८७॥

समन्तान्मितं निमितम् । निर्विशेषं हन्यन्ते ज्ञायन्त इति निघाः वृक्षाः । समारोहपरिणाहा इत्यर्थः ॥

३२६५–निमित अर्थ होनेपर 'निघः' यह पद निपातनसे सिद्ध हो । समन्तात् मितको निमित कहतेहैं, निर्विशेषं हन्यन्ते ज्ञायन्ते, इस विग्रहमें निघाः–वृक्षाः, अर्थात् समारोहणसे विस्तारयुक्त ॥

३२६६ ड्वितः क्त्रिः । ३ । ३ । ८८ ॥

अयं भाव एव स्वभावात् । क्त्रेर्मम्नित्यम् । नित्यग्रहणात् क्त्रिर्मब्विषयः । अत एव क्त्र्यन्तेन न विग्रहः । डुपचष् पाके । पाकेन निर्वृत्तं पक्त्रिमम् । डुवप् । उप्त्रिमम् ॥

३२६६–डु इत् है जिसमें ऐसे धातुके उत्तर क्त्रि प्रत्यय हो, यह प्रत्यय स्वभावसे भाववाच्यमें ही होताहै । "क्त्रेर्मम्नित्यम् १५७०" इससे क्त्रिप्रत्ययान्तके उत्तर निर्वृत्तार्थमें नित्य मप् होगा । नित्य शब्दके ग्रहणके कारण क्त्रि प्रत्ययान्तही मप् प्रत्ययके विषयीभूत है, अतएव क्त्रिप्रत्ययान्तके साथ विग्रह नहीं हुआ, यथा–पाकार्थक डुपचष् धातुका पाकेन निर्वृत्तम्, इस विग्रहमें पक्त्रिमम् । बीज सन्तानार्थक डुवप् धातुका उप्त्रिमम् ॥

३२६७ ट्वितोऽथुच् । ३ । ३ । ८९ ॥

अयमपि स्वभावाद् भाव एव । टुवेपृ । वेपथुः । श्वयथुः ॥

३२६७–ट्वित् धातुओंके उत्तर अथुच् प्रत्यय हो, यह प्रत्यय भी स्वभावतः भाववाच्यमें ही होताहै, यथा–टुवेपृ धातुका वेपथुः । श्वयथुः ॥

३२६८ यजयाचयतविच्छप्रच्छरक्षो नङ् । ३ । ३ । ९० ॥

यज्ञः । याच्ञा । यत्नः । विश्नः । प्रश्नः । प्रश्ने चासन्नेति ज्ञापकान्न संप्रसारणम् । ङित्त्वं तु विश्न इत्यत्र गुणनिषेधाय । रक्ष्णः ॥

३२६८–यज्, याच्, यत्, विच्छ्, प्रच्छ् और रक्ष् धातुके उत्तर नङ् प्रत्यय हो, यथा–यज्ञः। याच्ञा। यत्नः। विश्नः। प्रश्नः। यहां "प्रश्ने चासन्न० २७७७" इस ज्ञापकसे सम्प्रसारण नहीं हुआ । 'विश्नः' इस स्थलमें गुणनिषेधके निमित्त प्रत्ययमें ङित्करण है । रक्ष्णः ॥

३२६९ स्वपो नन् । ३ । ३ । ९१ ॥

स्वप्नः ॥

३२६९–स्वप् धातुके उत्तर नन् प्रत्यय हो, यथा–स्वप्नः ॥

३२७० उपसर्गे घोः किः । ३।३।९२ ॥

प्रधिः । अन्तर्धिः। उपाधीयतेऽनेनेत्युपाधिः॥

३२७०–उपसर्ग उपपद रहते घुसंज्ञक धातुके उत्तर कि प्रत्यय हो, प्रधिः । अन्तर्धिः । उपाधीयतेऽनेनेत्युपाधिः ॥

३२७१ कर्मण्यधिकरणे च ।३।३।९३॥

कर्मण्युपपदे घोः किः स्यादधिकरणेऽर्थे । जलानि धीयन्तेऽस्मिन्निति जलधिः ॥

३२७१–कर्म्म उपपद होनेपर अधिकरणवाच्यमें घुसंज्ञक धातुके उत्तर कि प्रत्यय हो,यथा–जलानि धीयन्ते अस्मिन् ,इस विग्रहमें जलधिः (समुद्र) ॥

३२७२ स्त्रियां क्तिन् । ३ । ३ । ९४ ॥

स्त्रीलिंगे भावादौ क्तिन् स्याद् घञोऽपवादः। अजपौ तु परत्वाद्बाधते । कृतिः। चितिः। स्तुतिः। स्फायी। स्फातिः। स्फीतिकाम इति तु प्रामादिकम् । क्तान्ताद्धात्वर्थे णिचि अच् इरिति वा समाधेयम् ॥ श्रुयजीषिस्तुभ्यः करणे ॥ * ॥ श्रूयतेऽनया श्रुतिः । यजेरिष्टेश्च इष्टिः । स्तुतिः । ॠल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः ॥*॥ तेन नत्वम्।कीर्णिः।गीर्णिः।लूनिः। धूनिः। पूनिः।ह्लाद इति योगविभागात् क्तिनि ह्रस्वः। प्रह्लत्तिः। ति च। ऊर्तिः। फुल्लतिः॥चायतेः क्तिनि चिभावो वाच्यः ॥ * ॥ अपचितिः ॥ सम्पदादिभ्यः क्विप् ॥ * ॥ सम्पत् । विपत् ॥ क्तिन्नपीष्यते ॥ * ॥ सम्पत्तिः । विपत्तिः ॥

३२७२–स्त्रीलिङ्गमें भावादिवाच्यमें धातुके उत्तर क्तिन् प्रत्यय हो, यह घञ् प्रत्ययका विशेषक है । अच् और अप् प्रत्ययको तो परत्वके कारण बाधता है, यथा–कृतिः। चितिः। स्तुतिः। स्फायी–स्फातिः। स्फीतिकामः, यह तो प्रामादिक है,

अथवा क्त प्रत्ययान्तके उत्तर धात्वर्थमें णिच् प्रत्यय करनेपर "अच इः" इस सूत्रसे इ प्रत्यय करके उक्तपदकी सिद्धि होगी।

श्रु, यज, इष, स्तु, धातुओंके उत्तर करणवाच्यमें क्तिन् प्रत्यय हो * श्रूयते अनया, इस विग्रहमें श्रुतिः। यज् और इष् धातुके उत्तर क्तिन् प्रत्यय करके 'इष्टिः' ऐसा पद होगा। स्तुतिः।

ॠ धातु और लू आदि धातुओंके उत्तर क्तिन् प्रत्यय निष्ठा प्रत्ययकी समान हो * इसलिये नत्व होगा, कीर्णिः। गीर्णिः। लूनिः। धूनिः। पूनिः। "ह्लादः ३०७३" ऐसे योगविभाग अर्थात् भिन्न सूत्रकरणके कारण क्तिन् प्रत्यय परे ह्रस्व होगा, प्रह्लत्तिः। "ति च ३०३७" इससे उत्व होकर चूर्त्तिः। फुल्तिः।

"चायतेः क्तिनि चिभावो वाच्यः" अर्थात् चाय् धातुको क्तिन् प्रत्यय परे रहते चिभाव हो * अपचितिः।

"सम्पदादिभ्यः क्विप्" अर्थात् पद आदि धातुके उत्तर क्विप् प्रत्यय हो* सम्पत्। विपत्।

क्तिन् प्रत्यय भी सम्पदादि धातुसे हो * यथा—सम्पत्तिः। विपत्तिः॥

३२७३ स्थागापापचो भावे।३।३।९५॥

क्तिन् स्यादङोऽपवादः। प्रस्थितिः। उपस्थितिः। संगीतिः। सम्पीतिः। पक्तिः। कथमवस्था संस्थेति व्यवस्थायामिति ज्ञापकात्॥

३२७३—स्था, गा, पा और पच् धातुओंके उत्तर भाववाच्यमें क्तिन् प्रत्यय हो, यह अङ् प्रत्ययका विशेषक अर्थात् अपवाद है, न यथा—प्रस्थितिः। उपस्थितिः। सङ्गीतिः। सम्पीतिः। पक्तिः। अङ् प्रत्ययका बाध होजानेसे अवस्था और संस्था यह पद किस प्रकारसे सिद्ध हुआ? तो व्यवस्थायाम्' इस ज्ञापकके कारण क्वचित् अङ् प्रत्यय भी होनेसे उक्त पद सिद्ध हुए॥

३२७४ ऊतियूतिजूतिसातिहेतिकीर्तयश्च।३।३।९७॥

अवतेर्ज्वरत्वरेत्यूठ्। ऊतिः। स्वरार्थं वचनम्। उदात्त इति हि वर्तते। यूतिः। जूतिः। अनयोर्दीर्घत्वं च निपात्यते। स्यतेः सातिः। द्यतिस्यतिमास्थेतीत्वे प्राप्ते इत्त्वाभावो निपात्यते। सनोतेर्वा जनसनेत्यात्वे कृते स्वरार्थं निपातनम्। हन्तेर्हिनोतेर्वा हेतिः। कीर्तिः॥

३२७४—ऊति, यूति, जूति, साति, हेति और कीर्ति यह क्तिन् प्रत्ययान्त पद निपातनसे सिद्ध हों, यथा—अव धातुको "ज्वरत्वर० २६५४" इस सूत्रसे ऊठ् होकर—ऊतिः। यह सूत्र स्वरार्थ है, "उदात्तः" इस पदकी अनुवृत्ति आतीहै। यूतिः। जूतिः। इन दोनों पदोंमें दीर्घ निपातनसे हुआहै। सा धातुके उत्तर क्तिन् प्रत्यय होकर—सातिः, यहां "द्यतिस्यतिमास्था० ३०७४" इस सूत्रसे प्राप्त इत्वका अभाव निपातनसे हुआ। अथवा सन धातुको "जनसन० २५०४" इस सूत्रसे आकार होनेपर निपातन स्वरविधानके निमित्त जानना। हन अथवा हि धातुका हेतिः। कृत धातुका कीर्तिः॥

३२७५ व्रजयजोर्भावे क्यप्।३।३।९८॥

व्रज्या। इज्या॥

३२७५—व्रज् और यज् धातुके उत्तर भाववाच्यमें क्यप् हो, यथा—व्रज्या। इज्या॥

३२७६ संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः।३।३।९९॥

समजादिभ्यः स्त्रियां भावादौ क्यप्स्यात्स चोदात्तः संज्ञायाम्॥ अजेः क्यपि वीभावो नेति वाच्यम्॥ *॥ समजन्ति तस्यामिति समज्या सभा। निषीदन्त्यस्यामिति निषद्या आपणः। निपतन्त्यस्यामिति निपत्या पिच्छिला भूमिः। मन्यतेऽनयेति मन्या गलपार्श्वशिरा। विदन्त्यनया विद्या। सुत्या अभिषवः। शय्या। भृत्या। ईयतेऽनया इत्या शिबिका॥

३२७६—संज्ञामें संपूर्वक अज्, निपूर्वक सद्, निपूर्वक पत्, मन्, विद्, षुञ्, शीङ् भृञ् और इण् धातुओंके उत्तर स्त्रीलिङ्गमें भावादिवाच्यमें क्यप् प्रत्यय हो, और वह उदात्त हो।

अज् धातुको क्यप् प्रत्यय परे वीभाव न हो * यथा—समजन्ति अस्याम्, इस विग्रहमें समज्या, अर्थात् सभा। निषीदन्त्यस्याम्=निषद्या—आपणः। निपतन्त्यस्याम् इस विग्रहमें निपत्या—पिच्छिला भूमिः। मन्यते अनया, इस विग्रहमें मन्या गलपार्श्वशिरा। विदन्त्यनया, इस विग्रहमें विद्या। सुनोति अनया=सुत्या—अभिषवः। शेते अस्याम्=शय्या। भृत्या। ईयते अनया, इत्या—शिबिका॥

३२७७ कृञः श च।३।३।१००॥

कृञ इति योगविभागः। कृञः क्यप्स्यात्। कृत्या। श च। चात् क्तिन्। क्रिया। कृतिः॥

३२७७—"कृञः" यह योगविभाग है, कृञ् धातुके उत्तर क्यप् प्रत्यय हो, यथा—कृत्या। श च कृञ् धातुके उत्तर श प्रत्यय हो, और चकारनिर्देशके कारण क्तिन् प्रत्यय भी हो, यथा—क्रिया। कृतिः॥

३२७८ इच्छा।३।३।१०१॥

इषेर्भावे शो यगभावश्च निपात्यते। इच्छा॥ परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम् * शो यक् च निपात्यते परिचर्या पूजा। परिसर्या परिसरणम्। अत्र गुणोऽपि। मृग अन्वेषणे चुरादावदन्तः। अतो लोपाभावोऽपि। शे यकि णिलोपः। मृगया। अटतेः शे यकि टचशब्दस्य द्वित्वं पूर्वभागे यकारनिवृत्तिर्दीर्घश्च। अटाट्या॥ जागर्तेरकारो वा पक्षे शः। जागरा। जागर्या॥

३२७८-निपातनसे इष् धातुके उत्तर भाववाच्यमें श प्रत्यय हो, और यक् प्रत्ययका अभाव हो, इच्छा।

परिचर्या, परिसर्या, मृगया, अटाट्या, यह पद भी निपातनसे निष्पन्न हों, अर्थात् परिपूर्वक चर आदि धातुओंके उत्तर श और यक् निपातनसे हो * यथा-परिसर्य्या-पूजा परिसर्य्या-परिसरणम्, इस स्थलमें गुण भी हुआ। चुरादिमें अन्वेषणार्थक मृग धातु अदन्त है, उसके अकारका लोपाभाव भी निपातनसे हुआ, श प्रत्यय और यक् होनेपर णिका लोप होकर-मृगया। अट् धातुसे श प्रत्यय और यक् करनेपर टय शब्दको द्वित्व और पूर्वभागमें यकारनिवृत्ति और दीर्घ निपातनसे होकर अटाट्या॥

"जागर्त्तेरकारो वा०" अर्थात् जागृ धातुके उत्तर विकल्प करके अकार प्रत्यय हो * विकल्प पक्षमें श प्रत्यय होगा, यथा-जागरा, जागर्य्या॥

३२७९ अ प्रत्ययात्। ३। ३। १०२॥

प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारप्रत्ययः स्यात्। चिकीर्षा। पुत्रकाम्या॥

३२७९-प्रत्ययान्त धातुके उत्तर स्त्रीलिंगमें अकार प्रत्यय हो, यथा-चिकीर्षा पुत्रकाम्या॥

३२८० गुरोश्च हलः। ३। ३। १०३॥

गुरुमतो हलन्तात् स्त्रियामकारः स्यात्। ईहा। ऊहा। गुरोः किम्। भक्तिः। हलः किम्। नीतिः॥ निष्ठायां सेट् इति वक्तव्यम्॥*॥ नेह। आप्तिः। तितुत्रेति नेट्। दीप्तिः॥ तितुत्रेष्वग्रहादीनामिति वाच्यम्॥*॥ निगृहीतिः। निपठितिः॥

३२८०-गुरुस्वरविशिष्ट व्यञ्जनवर्णान्त धातुके उत्तर स्त्रीलिङ्गमें अकार प्रत्यय हो, यथा-ईहा। ऊहा। गुरुविशिष्ट न होनेपर तो भक्तिः। हलन्त न होनेपर तो नीतिः।

निष्ठा प्रत्यय परे रहते सेट् हो ऐसे गुरुमान् हलन्त धातुके उत्तर अकार हो, ऐसा कहना चाहिये * इससे 'आप्तिः' इस स्थलमें अकार प्रत्यय नहीं हुआ, क्योंकि-इस स्थलमें "तितुत्र० ३१६३" इस सूत्रसे इट् नहीं होताहै। दीप्तिः।

"तितुत्रेष्वग्रहादीनाम्०" अर्थात् तितुत्र सूत्रसे ग्रहादि भिन्नधातुके उत्तर इट्निषेध हो, ऐसा कहना चाहिये * यथा-निगृहीतिः। निपठितिः॥

३२८१ षिद्भिदादिभ्योऽङ्। ३। ३। १०४॥

षिद्भ्यो भिदादिभ्यश्च स्त्रियामङ्। जृष्। ऋदृशोऽङि गुणः। जरा। त्रपूष्। त्रपा। भिदा। विदारण एवायम्। भित्तिरन्या। छिदा। मृजा। कृपेः संप्रसारणं च। कृपा॥

३२८१-षित् धातु और भिदादि धातुओंके उत्तर स्त्रीलिङ्गमें अङ् प्रत्यय हो, जॄष् धातुको अङ् प्रत्यय परे रहते-"ऋदृशोऽङि २४०६" इस सूत्रसे गुण होकर-जरा। त्रपूष्-त्रपा। भिदा। विदारणार्थमें ही यह पद होगा, अन्य अर्थमें भित्तिः होगा। छिदा। मृजा।

कृप् धातुको सम्प्रसारण भी हो, कृपा॥

३२८२ चिन्तिपूजिकथिकुम्बिचर्चश्च। ३। ३। १०५॥

अङ् स्याद्युचोऽपवादः। चिन्ता। पूजा। कथा। कुम्बा। चर्चा॥

३२८२-चिन्त्, पूज्, कथ्, कुम्ब् और चर्च् धातुके उत्तर अङ् प्रत्यय हो, यह सूत्र युच् प्रत्ययका विशेषक है, चिन्ता। पूजा। कथा। कुम्बा। चर्चा॥

३२८३ आतश्चोपसर्गे। ३। ३। १०६॥

अङ् स्यात्। क्तिनोऽपवादः। प्रदा। उपदा। श्रदन्तरोरुपसर्गवद्वृत्तिः। श्रद्धा। अन्तर्धा। उपसर्गे घोः किरित्यनेन किः। अन्तर्धिः॥

३२८३-उपसर्ग पूर्वमें रहते आकारान्त धातुके उत्तर अङ् प्रत्यय हो, यह क्तिन् प्रत्ययका विशेषक है, यथा-प्रदा। उपदा॥

श्रत् और अन्तः शब्दको उपसर्गकी समान कार्य्य हो, इससे श्रत् शब्द अन्तः शब्द उपपद रहते भी आकारान्त धातुके उत्तर अङ् प्रत्यय होगा, यथा-श्रद्धा। अन्तर्द्धा। "उपसर्गे घोः किः ३२७०" इससे कि प्रत्यय होकर-अन्तर्धिः॥

३२८४ ण्यासश्रन्थो युच्। ३। ३। १०७॥

अकारस्यापवादः। कारणा। हारणा। आसना। श्रन्थना॥ घट्टिवन्दिविदिभ्यश्चेति वाच्यम्॥*॥ घट्टना। वन्दना। वेदना॥ इषेरनिच्छार्थस्य॥*॥ अन्वेषणा॥ परेर्वा॥*॥ पर्येषणा। परीष्टिः॥

३२८४-णिजन्त धातु आस् धातु और श्रन्थ् धातुके उत्तर युच् प्रत्यय हो, यह अकार प्रत्ययका विशेषक है, यथा-कारणा। हारणा। आसना। श्रन्थना।

घट्ट्, वन्द् और विद् धातुके उत्तर भी युच् प्रत्यय हो * यथा-घट्टना। वन्दना। वेदना।

अनिच्छार्थक इष् धातुके उत्तर युच् प्रत्यय हो * यथा-अन्वेषणा।

परिपूर्वक इष् धातुके उत्तर विकल्प करके युच् प्रत्यय हो* यथा-पर्य्येषणा, परीष्टिः॥

३२८५ रोगाख्यायां ण्वुल्बहुलम्। ३। ३। १०८॥

प्रच्छर्दिका। प्रवाहिका। विचर्चिका। क्वचिन्न। शिरोर्तिः॥ धात्वर्थनिर्देशे ण्वुल्वक-

व्यः ॥ * ॥ आसिका । शायिका ॥ इक्श्तिपौ धातुनिर्देशे ॥ * ॥ पचिः । पचतिः ॥ वर्णात्कारः ॥ * ॥ निर्देश इत्येव । अकारः ॥ ककारः ॥ रादिफः ॥ * ॥ रेफः ॥ मत्वर्थाच्छः ॥ * ॥ बहुलवचनादकारलोपः । मत्वर्थीयः ॥ इणजादिभ्यः ॥ * ॥ आजिः । आतिः । इञ् वपादिभ्यः ॥ * ॥ वापिः । वासिः । स्वरे भेदः ॥ इक् कृष्यादिभ्यः ॥ * ॥ कृषिः । गिरिः ॥

३२८५-रोगकी आख्या अर्थात् नाम होनेपर धातुके उत्तर बहुल करके ण्वुल् प्रत्यय हो, यथा-प्रच्छर्दिका । प्रवाहिका । विचर्चिका । किसी २ स्थलमें ण्वुल् प्रत्यय न होगा, यथा-शिरोऽर्त्तिः ।

धातुके अर्थनिर्देशमें ण्वुल् प्रत्यय हो * यथा-आसिका । शायिका ।

धातुनिर्देशमें इक् और श्तिप् प्रत्यय हो * पचिः । पचतिः ।

वर्णके निर्देशमें वर्णसे कार प्रत्यय हो * यथा-अकारः । ककारः ।

रवर्णके उत्तर इफ प्रत्यय हो * यथा-रेफः ।

मत्वर्थ शब्दके उत्तर छ प्रत्यय हो * बहुलवचनसे अकारका लोप होकर-मत्वर्थीयः ।

अजादि धातुओंके उत्तर इण् प्रत्यय हो * यथा-आजिः । आतिः ।

वपादि धातुओंके उत्तर इञ् प्रत्यय हो * यथा-वापिः । वासिः । इण् प्रत्ययसे इञ् प्रत्ययमें केवल स्वरविशेष है ।

कृष्यादि धातुओंके उत्तर इक् प्रत्यय हो * यथा-कृषिः । गिरिः ॥

३२८६ संज्ञायाम् । ३ । ३ । १०९ ॥

अत्र धातोर्ण्वुल् । उद्दालकपुष्पभञ्जिका ॥

३२८६-संज्ञा होनेपर धातुके उत्तर ण्वुल् हो, उद्दालकपुष्पभञ्जिका ॥

३२८७ विभाषाख्यानपरिप्रश्नयोरिञ्च । ३ । ३ । ११० ॥

परिप्रश्ने आख्याने च गम्ये इञ् स्याच्चात् ण्वुल्। विभाषोक्तेर्यथाप्राप्तमन्येपि। कां त्वं कारिं कारिकां क्रियां कृत्यां कृतिं वाऽकार्षीः । सर्वां कारिं कारिकां क्रियां कृत्यां कृतिं वाऽकार्षम्। एवं गणिं गणिकां गणनाम् । पाचिं पाचिकां पचां पक्तिम् ॥

३२८७-आख्यान और परिप्रश्न गम्य होनेपर धातुके उत्तर विकल्प करके इञ् प्रत्यय और चकारसे ण्वुल् प्रत्यय हो, विभाषा पदकी उक्तिके कारण यथाप्राप्त अन्यप्रत्यय भी होगा, यथा-कां, त्वं, कारिं, कारिकां, क्रियां, कृत्यां, कृतिं, वा अकार्षीः । सर्वां, कारिं, कारिकां, क्रियां, कृत्यां, कृतिं वा अकार्षम् । इसी प्रकार गणिं, गणिकाम्, गणनाम् । पाचिं, पाचिकां, पचां, पक्तिम् ॥

३२८८ पर्यायार्हर्णोत्पत्तिषु ण्वुच् । ३ । ३ । १११ ॥

पर्यायः परिपाटी क्रमः । अर्हणमर्हः योग्यता । पर्यायादिषु द्योत्येषु ण्वुच् वा स्यात् । भवत आसिका । शायिका । अग्रगामिका । भवानिक्षुभक्षिकामर्हति । ऋणे । इक्षुभक्षिकां मे धारयति । उत्पत्तौ । इक्षुभक्षिका उदपादि ॥

३२८८-पर्य्याय, अर्ह, ऋण और उत्पत्ति द्योत्य रहते धातुके उत्तर विकल्प करके ण्वुच प्रत्यय हो, पर्य्याय शब्दसे परिपाटी अर्थात् क्रम समझना । अर्ह शब्दसे योग्यता समझना । यथा-भवत आसिका शायिका । अग्रगामिका । भवानिक्षुभक्षिकामर्हति । ऋण अर्थमें यथा-इक्षुभक्षिकां मे धारयति । उत्पत्ति अर्थमें यथा-इक्षुभक्षिका उदपादि ॥

३२८९ आक्रोशे नञ्यनिः ।३।३।११२॥

विभाषेति निवृत्तम् । नञि उपपदेऽनिः स्यादाक्रोशे। अजीवनिस्ते शठ भूयात् । अप्रयाणिः॥ कृत्यल्युटो बहुलम् । ३ । ३ । ११३ ॥ कृत्यल्युटो बहुलम् । भावेऽकर्तरि च कारके संज्ञायामिति च निवृत्तम्। राज्ञा भुज्यन्ते राजभोजनाः शालयः ॥ नपुंसके भावे क्तः । ३ । ३ । ११४ ॥

३२८९-इस सूत्रसे विभाषा पदकी निवृत्ति हुई । नञ् शब्द उपपद होनेपर आक्रोशार्थमें धातुके उत्तर अनि प्रत्यय हो, यथा-अजीवनिस्ते शठ भूयात् । अप्रयाणिः ॥

(२८४१)-कृत्य प्रत्यय और ल्युट् प्रत्यय बहुल प्रकारसे हो, "भावेऽकर्त्तरि च कारके संज्ञायाम्" इन दोनोंकी यहां निवृत्ति हुई राज्ञा भुज्यन्ते राजभोजनाः-शालयः ॥

(३०९० भाववाच्य और नपुंसक लिंगमें धातुके उत्तर क्त प्रत्यय हो) ॥

३२९० ल्युट् च । ३ । ३ । ११५ ॥

हसितम् । हसनम् । योगविभाग उत्तरार्थः॥

३२९०-भाववाच्यमें नपुंसक लिङ्गमें धातुके उत्तर ल्युट् प्रत्यय भी हो, यथा-हसितम् । हसनम् । भिन्न सूत्र करना उत्तरार्थ है ॥

३२९१ कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम् । ३ । ३ । ११६ ॥

येन स्पृश्यमानस्य कर्तुः शरीरसुखमुत्पद्यते तस्मिन् कर्मण्युपपदे ल्युट् स्यात् । पूर्वेण सिद्धे नित्यसमासार्थं वचनम् । पयःपानं सुखम् । कर्तुरिति किम् । गुरोः स्नापनं सुखम् । नेह गुरुः कर्ता किं तु कर्म ॥

३२९१-जिस कर्म्मसे स्पृश्यमान कर्त्ताके शरीरका सुख उत्पन्न हो वह कर्म्म उपपद होनेपर धातुके उत्तर ल्युट् प्रत्यय हो, पूर्वसूत्रसे सिद्ध होनेपर भी यह सूत्र केवल नित्य समासार्थ है यथा-पयःपानम् सुखम् । 'कर्त्तुः' क्यों कहा ? तो 'गुरोः स्नापनं सुखम्' इस स्थलमें ल्युट् नहीं हो, यहां गुरु कर्त्ता नहीं है किन्तु कर्म है ॥

३२९२ वा यौ । २ । ४ । ५७ ॥

अजेर्वी वा स्याद् यौ । प्रवयणम् । प्राजनम् ॥

३२९२-यु प्रत्यय परे रहते अज् धातुको विकल्प करके वी आदेश हो, यथा-प्रवयणम्, प्राजनम् ॥

३२९३ करणाधिकरणयोश्च ३ । ३ । ११७ ॥

ल्युट् स्यात् । इध्मप्रव्रश्चनः कुठारः । गोदोहनी स्थाली । खलः प्राक् करणाधिकरणयोरित्यधिकारः ॥

३२९३-करण और अधिकरण वाच्यमें धातुके उत्तर ल्युट् प्रत्यय हो, यथा-इध्मप्रव्रश्चनः-कुठारः । गोदोहनी-स्थाली । खल् प्रत्ययके पूर्वतक 'करणाधिकरणयोः' इसका अधिकार चलैगा ॥

३२९४ अन्तरदेशे । ८ । ४ । २४ ॥

अन्तःशब्दाद्धन्तेर्नस्य णः स्यात् । अन्तर्हणनम् । देशे तु अन्तर्हननो देशः । अत्पूर्वस्येत्येव । अन्तर्घ्नन्ति । तपरः किम् । अन्तरघानि ॥

३२९४-देशभिन्न अर्थ होनेपर अन्तः शब्दके परे हन् धातुके नकारको णत्व हो, यथा-अन्तर्हणनम् । देश अर्थ होनेपर अन्तर्हननो देशः । इस स्थलमें णत्व नहीं हुआ। अत् पूर्वक नकारको ही णत्व होगा, इस कारण 'अन्तर्घ्नन्ति' इस स्थलमें णत्व नहीं हुआ । तपरः कहनेकी आवश्यकता क्या है ? तो 'अन्तरघानि' इस स्थानमें णत्व नहीं हो ॥

३२९५ अयनं च । ८ । ४ । २५ ॥

अयनस्य णोऽन्तःशब्दात्परस्य । अन्तरयणम् । अदेश इत्येव । अन्तरयनो देशः ॥

३२९५-देश भिन्नार्थमें अन्तः शब्दके परवर्त्ती अयन शब्दके नकारको णत्व हो, यथा-अन्तरयणम् । जिस स्थानमें देश अर्थ होगा, उस स्थानमें णत्व नहीं होगा, यथा-अन्तरयनो देशः ॥

३२९६ पुंसि संज्ञायां घः प्रायेण । ३ । ३ । ११८ ॥

३२९६-संज्ञा होनेपर पुँल्लिंगमें धातुके उत्तर घ प्रत्यय हो-॥

३२९७ छादेर्घेऽद्व्युपसर्गस्य । ६ । ४ । ९६ ॥

द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वः स्याद् घे परे । दन्ताश्छाद्यन्तेऽनेन दन्तच्छदः । अद्वीति किम् । समुपच्छादः । आकुर्वन्त्यस्मिन् आकरः ॥

३२९७-द्विप्रभृति उपसर्गोंसे हीन छादि धातुओंको ह्रस्व हो घ प्रत्यय परे रहते, यथा-दन्ताश्छाद्यन्ते अनेन, इस विग्रहमें दन्तच्छदः । प्रच्छदः । द्विप्रभृति उपसर्गोंसे हीन हो ऐसा क्यों कहा ? तो 'समुपच्छादः' यहां ह्रस्व न हो । आकुर्वन्त्यस्मिन्, इस विग्रहमें आकरः ॥

३२९८ गोचरसंचरवहव्रजव्यजापणनिगमाश्च । ३ । ३ । ११९ ॥

घान्ता निपात्यन्ते । हलश्चेति वक्ष्यमाणस्य घञोऽपवादः । गावश्चरन्त्यस्मिन्निति गोचरो देशः । संचरन्तेऽनेन संचरो मार्गः । वहन्त्यनेन वहः स्कन्धः । व्रजः । व्यजस्तालवृन्तम् । निपातनाद्वीभावो न । आपणः पण्यस्थानम् । निगच्छन्त्यनेन निगमश्छन्दः । चात्कषः । निकषः ॥

३२९८-गोचर, सञ्चर, वह, व्रज, व्यज, आपण और निगम यह घ प्रत्ययान्त पद निपातनसे सिद्ध हों, यह सूत्र "हलश्च ३३००" इस सूत्रसे वक्ष्यमाण घञ् प्रत्ययका विशेषक है, यथा-गावश्चरन्त्यस्मिन्, इस विग्रहमें गोचरो देशः । सञ्चरन्ते अनेन, इस विग्रहमें सञ्चरो मार्गः । वहन्त्यनेन, इस विग्रहमें वहः-स्कन्धः । व्रजः । व्यजः-तालवृन्तम् । यह निपातनके कारण अज् धातुके स्थानमें वी आदेश नहीं हुआ। आपणः-पण्यस्थानम् । निगच्छन्त्यनेन, इस विग्रहमें निगमश्छन्दः । चकारनिर्देशके कारण 'कषः निकषः' यह दो पद भी निपातनसे सिद्ध हुए ॥

३२९९ अवे तॄस्त्रोर्घञ् । ३ । ३ । १२० ॥

अवतारः कूपादेः । अवस्तारो जवनिका ॥

३२९९-अव पूर्वक तॄ और स्तॄ धातुके उत्तर संज्ञामें करण और अधिकरण वाच्यमें पुँल्लिङ्गमें घञ् प्रत्यय हो, यथा अवतारः कूपादेः । अवस्तारो जवनिका ॥

३३०० हलश्च । ३ । ३ । १२१ ॥

हलन्ताद्घञ् स्यात् । घापवादः । रमन्ते योगिनोऽस्मिन्निति रामः । अपमृज्यतेऽनेन व्याध्यादिरित्यपामार्गः । विमार्गः समूहनी ॥

३३००-करण और अधिकरण वाच्यमें पुँल्लिङ्गमें संज्ञा होनेपर हलन्त धातुके उत्तर घञ् प्रत्यय हो, यह सूत्र घ प्रत्ययका अपवाद है।रमन्ते योगिनोऽस्मिन्,इस विग्रहमें रामः। अपमृज्यतेऽनेन व्याध्यादिः, इस विग्रहमें अपामार्गः । विमार्गः समूहनी ॥

३३०१ अध्यायन्यायोद्यावसंहाराश्च । ३ । ३ । १२२ ॥

अधीयतेऽस्मिन् अध्यायः । नियन्ति उद्युवन्ति संहरन्त्यनेनेति विग्रहः ॥ अवहाराधारावायानामुपसंख्यानम् ॥ * ॥

३३०१-अध्याय, न्याय,उद्याव, संहार यह घञ् प्रत्ययान्त

शब्द निपातनसे सिद्ध हों, यथा–अधीयते अस्मिन्, इस विग्रहमें अध्यायः । नियन्ति अनेन, इस विग्रहमें न्यायः । उद्युवन्ति अनेन, इस विग्रहमें उद्यावः । संहरन्ति अनेन इस विग्रहमें संहारः ।

अवहार, आधार, आवाय यह घञ् प्रत्ययान्त शब्द निपातनसे सिद्ध हों ॥

३३०२ उदङ्कोऽनुदके । ३ । ३ ।१२३॥

उत्पूर्वादञ्चतेर्घञ् स्यात् न तूदके । घृतमुदच्यते उद्धियतेऽस्मिन्निति घृतोदंकश्चर्ममयं भाण्डम् । अनुदके किम् । उदकोदञ्चनः ॥

३३०२–'उदङ्कः' यह घञ् प्रत्ययान्त शब्द निपातनसे सिद्ध हो, उदक भिन्न अर्थ होनेपर अर्थात् उत्पूर्वक अंच् धातुके उत्तर उदकभिन्न अर्थमें घञ् प्रत्यय हो, यथा–घृतमुदच्यते उद्धियते अस्मिन्, इस विग्रहमें घृतोदङ्कः–चर्म्ममयं भाण्डम् । उदक अर्थ होनेपर घञ् प्रत्यय नहीं होगा, यथा–उदकोदञ्चनः ॥

३३०३ जालमानायः । ३ । ३ ।१२४॥

आनीयन्ते मत्स्यादयोऽनेनेत्यानायः । जालमिति किम् । आनयनः ॥

३३०३–जाल अर्थ होनेपर 'आनायः' यह घञ् प्रत्ययान्त पद निपातनसे सिद्ध हो, यथा–आनीयन्ते मत्स्यादयोऽनेन, इस विग्रहमें आनायः । जिस स्थानमें जाल नहीं होगा, उस स्थानमें आनयनः ॥

३३०४ खनो घ च । ३ । ३ । १२५॥

चाद् घञ् । आखनः । आखानः । घित्करणमन्यतोप्ययमिति ज्ञापनार्थम् । तेन भगः पदमित्यादि ॥ खनेर्डडरेकेकवका वाच्याः ॥ * ॥ आखः । आखरः।आखनिकः । आखनिकवकः । एते खनित्रवचनाः ॥

३३०४–खन् धातुके उत्तर घ प्रत्यय हो, और चकारनिर्देशसे घञ् प्रत्यय हो, यथा–आखनः । आखानः । खन् धातुमें घित् प्रयुक्त कार्य्यप्रवृत्ति योग्य वर्ण न होनेसे प्रत्ययमें घित् करण अन्य धातुके उत्तर भी यह प्रत्यय हो, यह जतानेके निमित्त है, इससे भगः पदम् इत्यादि पदोंकी सिद्धि हुई ।

" खनेर्डडरेकेकवकाः वाच्याः" अर्थात् खन् धातुके उत्तर ड, डर, इक, इकवक यह चार प्रत्यय हों * यथा–आखः । आखरः । आखनिकः । आखनिकवकः । यह सब खनित्रवाचक हैं ॥

३३०५ ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषु खल् । ३ । ३ । १२६ ॥

करणाधिकरणयोरिति निवृत्तम् । एषु दुःखसुखार्थेषूपपदेषु खल् स्यात् । तयोरेवेति भावे कर्मणि च कृच्छ्रे । दुष्करः कटो भवता । अकृच्छ्रे । ईषत्करः । सुकरः ॥ निमिमीलियां खलचोरात्त्वं नेति वाच्यम् ॥*॥ ईषन्निमयः । दुष्प्रमयः। सुविलयः । निमयः । मयः ।लयः॥

३३०५–'करणाधिकरणयोः' यह निवृत्त हुआ। दुःख और सुखवाचक ईषत्, दुस् और सु यह तीन शब्द उपपद होनेपर अर्थात् पूर्वमें रहते धातुके उत्तर खल् प्रत्यय हो, " तयोरेव० २८३३ " इस सूत्रसे भाव और कर्म्मवाच्यमें होगा, दुःखार्थका उदाहरण यथा–दुष्करः कटो भवता (तुमसे चटाई बननी कठिन है) सुखार्थका उदाहरण जैसे–ईषत्करः । सुकरः ।

"निमिमीलियां खलचोरात्त्वं नेति वाच्यम् " अर्थात् निमिपूर्वक मि धातु मी धातु ली धातुको खल् और अच् प्रत्यय परे रहते आत्व न हो * यथा–ईषन्निमयः । दुःप्रमयः । सुविलयः । निमयः । मयः । लयः ॥

३३०६ उपसर्गात् खल्घञोः ।७।१।६७॥

उपसर्गादेव लभेर्नुम् स्यात् । ईषत्प्रलम्भः । दुष्प्रलम्भः । सुप्रलम्भः । उपालम्भः । उपसर्गात्किम् । ईषल्लभः । लाभः ॥

३३०६–खल् और घञ् प्रत्यय परे रहते उपसर्गपूर्वक ही, लभ् धातुके उत्तर नुम्का आगम हो, यथा–ईषत्प्रलम्भः। दुष्प्रलम्भः । सुप्रलम्भः । उपालम्भः । जिस स्थानमें उपसर्गपूर्वक नहीं होगा, उस स्थानमें ईषल्लभः । लाभः। ऐसा होगा ॥

३३०७ न सुदुर्भ्यां केवलाभ्याम् । ७ । १ । ६८ ॥

उपसर्गान्तररहिताभ्यां सुदुर्भ्यां लभेर्नुम्न स्यात् खल्घञोः । सुलभम् । दुर्लभम् । केवलाभ्यां किम् । सुप्रलम्भः । अतिदुर्लम्भः । कथं तर्हि अतिसुलभमतिदुर्लभमिति । यदा स्वती कर्मप्रवचनीयौ तदा भविष्यति ॥

३३०७–खल् और घञ् प्रत्यय परे रहते उपसर्गान्तरसे रहित सु और दुर् उपसर्गके परे स्थित लभ् धातुके नुम्का आगम न हो, सुलभम् । दुर्लभम् । जिस स्थानमें उपसर्गान्तरसे रहित नहीं होगा, उस स्थानमें सुप्रलम्भः । अतिदुर्लम्भः । उपसर्गान्तरसे रहित ही सु और दुर् उपसर्गके परे स्थित लभ् धातुको नुम्का निषेध होनेसे ' अतिसुलभम्' और 'अतिदुर्लभम्' यह पद किस प्रकारसे सिद्ध हुए ? तो जिस स्थानमें सु और अति शब्दकी कर्म्मप्रवचनीय संज्ञा होगी, उस स्थानमें उक्त पद सिद्ध होंगे ॥

३३०८ कर्तृकर्मणोश्च भूकृञोः । ३ । ३ । १२७ ॥

कर्तृकर्मणोरीषदादिषु च उपपदेषु भूकृञोः । खल् स्यात् । यथासंख्यं नेष्यते । कर्तृकर्मणी च धातोरव्यवधानेन प्रयोज्ये ईषदादयस्तु ततः

प्राक् ॥ कर्तृकर्मणोश्च्व्यर्थयोरिति वाच्यम्॥*॥ खित्त्वान्मुम् । अनाढ्येनाढ्येन दुःखेन भूयते दुराढ्यम्भवम् । ईषदाढ्यम्भवम् । स्वाढ्यम्भवम् । ईषदाढ्यङ्करः । दुराढ्यङ्करः । स्वाढ्यंकरः । च्व्यर्थयोः किम् । आढ्येन सुभूयते ॥

३३०८–कर्त्ता, कर्म्म और ईषत्, दुस् और सु शब्द उपपद होनेपर भू और कृञ् धातुके उत्तर खल् प्रत्यय हो । इस स्थानमें ग्रन्थकारने क्रमकी इच्छा नहीं कीहै । कर्त्ता और कर्म्मको धातुके अव्यवधानसे प्रयोग करना चाहिये । ईषदादि शब्दको तो उसके पश्चात् प्रयोग करना चाहिये ।

कर्ता और कर्म्म च्वि प्रत्ययार्थक हो तो उक्तकार्य्य हो ऐसा कहना चाहिये * खित्त्वके कारण मुम्का आगम होगा, यथा–अनाढ्येनाढ्येन दुःखेन भूयते, इस विग्रहमें दुराढ्यम्भवम् । ईषदाढ्यम्भवम् । स्वाढ्यम्भवम् । ईषदाढ्यंकरः । दुराढ्यंकरः । स्वाढ्यंकरः । जिस स्थानमें च्वि प्रत्ययार्थक कर्त्ता और कर्म्म नहीं होगा, उस स्थानमें 'आढ्येन सुभूयते' इस प्रकार होगा ॥

३३०९ आतो युच् । ३ । ३ । १२८ ॥

खलोऽपवादः । ईषत्पानः सोमो भवता । दुष्पानः । सुपानः ॥ भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः ॥ * ॥ दुःशासनः । दुर्योधन इत्यादि ॥

३३०९–आकारान्त धातुके उत्तर युच् प्रत्यय हो, यह प्रत्यय खल् प्रत्ययका विशेषक है, यथा–ईषत् पानः सोमो भवता । दुष्पानः । सुपानः ।

"भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज् वाच्यः" अर्थात् भाषामें शास्, युध्, दृश्, धृष् और मृष् धातुके उत्तर युच् प्रत्यय हो * यथा–दुःशासनः । दुर्योधनः । इत्यादि ॥

३३१० षात्पदान्तात् । ८ । ४ । ३५ ॥

नस्य णो न । निष्पानम् । सर्पिष्पानम् । षात्किम् । निणयः । पदान्तात्किम् । पुष्णाति । पदे अन्तः पदान्तः इति सप्तमीसमासोयम् । तेनेह न । सुसर्पिष्केण ॥

३३१०–अडादि व्यवधान रहते भी पदान्त षकारके परे स्थित नकारको णत्व न हो, निष्पानम् । सर्पिष्पानम् । षकारके परे न होनेसे निर्णयः । जिस स्थानमें पदान्त षकारके परे नहीं होगा, उस स्थानमें पुष्णाति । "पदेऽन्तः=पदान्तः" इस प्रकार यह पद सप्तमीतत्पुरुषसमाससे निष्पन्न है, इस कारण इस स्थानमें णत्वनिषेध नहीं हुआ, यथा–सुसर्पिष्केण ॥

३३११ आवश्यकाधमर्ण्ययोर्णिनिः । ३ । ३ । १७० ॥

अवश्यंकारी । शतन्दायी ॥

३३११–आवश्यक और अधमर्ण अर्थ होनेपर धातुके उत्तर णिनि प्रत्यय हो, अवश्यङ्कारी । शतन्दायी ॥

३३१२ कृत्याश्च । ३ । ३ । १७१ ॥

आवश्यकाधमर्ण्ययोरित्येव । अवश्यं हरिः सेव्यः । शतं देयम् ॥

३३१२–आवश्यक और अधमर्ण अर्थ होनेपर धातुके उत्तर कृत्य प्रत्यय हो, अवश्यं हरिः सेव्यः । शतन्देयम् ॥

३३१३ क्तिच्क्तौ च संज्ञायाम् । ३ । ३ । १७४ ॥

धातोः क्तिच् क्तश्च स्यादाशिषि संज्ञायाम् । तितुत्रेति नेट् । भवतात् भूतिः ॥

३३१३–आशीर्वादार्थमें संज्ञा होनेपर धातुके उत्तर क्तिच् और क्त प्रत्यय हो, "तितुत्रेति० ३१६३" इस सूत्रसे इट् निषेध होकर–यथा–भवतात्=भूतिः ॥

३३१४ न क्तिचि दीर्घश्च । ६ । ४ । ३९ ॥

अनिटां वनतितनोत्यादीनां च दीर्घानुनासिकलोपौ न स्तः क्तिचि परे । यन्तिः । रन्तिः । वन्तिः । तन्तिः ॥

३३१४–क्तिच प्रत्यय परे रहते अनिट् धातु और वन् तथा तनादि धातुओंको दीर्घ और अनुनासिक वर्णका लोप न हो, यथा–यन्तिः, रन्तिः, वन्तिः, तन्तिः ॥

३३१५ सनः क्तिचि लोपश्चास्याऽन्यतरस्याम् । ६ । ४ । ४५ ॥

सनोतेः क्तिचि आत्वं वा स्याल्लोपश्च वा । सनुतात् । सातिः । सतिः । सन्तिः । देवा एनं देयासुर्देवदत्तः ॥

३३१५–क्तिच् प्रत्यय परे रहते सन धातुको आकार हो विकल्प करके, और धातुके नकारका लोप हो विकल्प करके, यथा–सनुतात्, इस विग्रहमें सातिः, सतिः, सन्तिः । देवा एनं देयासुः देवदत्तः ॥

३३१६ अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा । ३ । ४ । १८ ॥

प्रतिषेधार्थयोरलङ्खल्वोरुपपदयोः क्त्वा स्यात् । प्राचां ग्रहणं पूजार्थम् । अमैवाव्ययेनेतिनियमान्नोपपदसमासः । दोदद्धोः । अलं दत्त्वा । घुमास्था । पीत्वा खलु । अलंखल्वोः किम् । मा कार्षीत् । प्रतिषेधयोः किम् । अलंकारः ॥

३३१६–प्रतिषेधार्थक अलम् और खलु शब्द उपपद होनेपर अर्थात् पूर्वमें रहते धातुके उत्तर क्त्वा प्रत्यय हो, सूत्रमें 'प्राचाम्' इस पदका ग्रहण पूजार्थ जानना "अमैवाव्ययेन ७८३" इस नियमके कारण उपपदसमास नहीं होगा । "दो दद् घोः ३०७७" इस सूत्रसे दा धातुके स्थानमें दद्

आदेश हुआ, यथा–अलं दत्त्वा । "घुमास्था० २४६२" इस सूत्रसे धातुके आकारके स्थानमें ईकार होकर–पीत्वा खलु । अलम् और खलु शब्द उपपद न होनेपर क्त्वा प्रत्यय नहीं होगा, यथा–मा कार्षीत् । प्रतिषेधार्थक न होनेपर क्त्वा प्रत्यय नहीं होगा, यथा–अलङ्कारः (भूषण) ॥

३३१७ उदीचां माङो व्यतीहारे । ३ । ४ । १९ ॥

व्यतीहारेऽर्थे माङः क्त्वा स्यात् । अपूर्वकालार्थमिदम् ॥

३३१७–व्यतीहारार्थमें माङ् धातुके उत्तर क्त्वा प्रत्यय हो, यह सूत्र पूर्वकालार्थक नहीं है–॥

३३१८ मयतेरिदन्यतरस्याम् । ६ । ४ । ७० ॥

मेङ इकारोन्तादेशः स्याद्वा ल्यपि । अपमित्य याचते । अपमाय । उदीचां ग्रहणाद्यथाप्राप्तमपि । याचित्वा अपमयते ॥

३३१८–मेङ् धातुके एकारके स्थानमें इकार आदेश हो विकल्प करके ल्यप् प्रत्यय परे रहते, यथा–अपमित्य याचते । अपमाय । 'उदीचाम्' इस पदका ग्रहण करनेके कारण यथाप्राप्त अन्य प्रत्यय भी होंगे, यथा–याचित्वा अपमयते॥

३३१९ परावरयोगे च । ३ । ४ । २० ॥

परेण पूर्वस्यावरेण परस्य योगे गम्ये धातोः क्त्वा स्यात् । अप्राप्य नदीं पर्वतः । परनदीयोगोऽत्र पर्वतस्य । अतिक्रम्य पर्वतं स्थिता नदी । अवरपर्वतयोगोऽत्र नद्याः ॥

३३१९–परके साथ पूर्वका और अवरके साथ परका योग गम्य होनेपर धातुके उत्तर क्त्वा प्रत्यय हो, यथा–अप्राप्य नदीं पर्वतः, इस स्थानमें पर्वतका पर नदीके साथ योग है । अतिक्रम्य पर्वतं स्थिता नदी, इस स्थलमें नदीका अवर पर्वतके साथ योग है ॥

३३२० समानकर्तृकयोः पूर्वकाले । ३ । ४ । २१ ॥

समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात् । क्त्वा तु अव्ययकृतो भावे । भुक्त्वा व्रजति । द्वित्वमतन्त्रम् । स्नात्वा भुक्त्वा पीत्वा व्रजति । अनुदात्तेत्यनुनासिकलोपः । विष्णुं नत्वा स्तौति । स्वरत्यादेः श्र्युकः क्तितीति नित्यमिडभावः पूर्वविप्रतिषेधेन । स्वृत्वा । सूत्वा । धूत्वा ॥

३३२०–एककर्तृक धात्वर्थके मध्य पूर्वकालमें विद्यमान जो धातु उसके उत्तर क्त्वा प्रत्यय हो, 'अव्ययकृतो भावे' इस सूत्रसे भाववाच्यमें क्त्वा प्रत्यय होगा, यथा–भुक्त्वा व्रजति। सूत्रमें द्विवचन विवक्षित नहीं है, इससे स्नात्वा, भुक्त्वा, पीत्वा व्रजति । "अनुदात्त० २४२८" इस सूत्रसे अनुनासिक वर्णका लोप होकर–विष्णुं नत्वा स्तौति । स्वृ आदि धातुओंको "श्र्युकः किति २३८१" इस सूत्रसे नित्य इट्का अभाव पूर्वविप्रतिषेधसे होकर–स्वृत्वा । सूत्वा । धूत्वा ॥

३३२१ क्त्वि स्कन्दिस्यन्दोः । ६ । ४ । ३१ ॥

एतयोर्नलोपो न स्यात् क्त्वि परे । स्कन्त्वा । ऊदित्त्वादिड्वा । स्यन्दित्वा । स्यन्त्वा ॥

३३२१–क्त्वा प्रत्यय परे रहते स्कन्द और स्यन्द धातुके नकारका लोप न हो, यथा–स्कन्त्वा । ऊकार इत् होनेके कारण स्यन्द धातुके उत्तर इट् विकल्प करके होगा, यथा–स्यन्दित्वा, स्यन्त्वा ॥

३३२२ न क्त्वा सेट् । १ । २ । १८ ॥

सेट् क्त्वा किन्न स्यात् । शयित्वा । सेट् किम् । कृत्वा ॥

३३२२–इट्के साथ विद्यमान जो क्त्वा प्रत्यय वह कित् न हो, यथा–शयित्वा । जिस स्थानमें सेट् नहीं होगा, उस स्थलमें कित्वनिषेध नहीं होगा, यथा–कृत्वा ॥

३३२३ मृडमृदगुधकुषक्लिशवदवसः क्त्वा । १ । २ । ७ ॥

एभ्यः सेट् क्त्वा कित् । मृडित्वा । क्लिशः क्तेति वेट् । क्लिशित्वा । क्लिष्ट्वा । उदित्वा । उषित्वा । रुदविदेति कित्त्वम् । रुदित्वा । विदित्वा । मुषित्वा । गृहीत्वा ॥

३३२३–मृड्, मृद्, गुध्, कुष्, क्लिश्, वद् और वस् धातुओंके उत्तर सेट् क्त्वा प्रत्यय कित् हो, यथा–मृडित्वा । "क्लिशः क्त्वा ३०४९" इस सूत्रसे विकल्प करके इट् होकर क्लिशित्वा, क्लिष्ट्वा । उषित्वा । उदित्वा । "रुदविद० २६०९" इस सूत्रसे कित्व होकर रुदित्वा । विदित्वा । मुषित्वा । गृहीत्वा ॥

३३२४ नोपधात्थफान्ताद्वा । १ । २ । २३ ॥

सेट् क्त्वा कित्स्याद्वा । श्रथित्वा । श्रन्थित्वा । गुफित्वा । गुम्फित्वा । नोपधात्किम् । कोथित्वा । रेफित्वा ॥

३३२४–नकारोपध थकारान्त और फकारान्त धातुओंके उत्तर सेट् क्त्वा प्रत्यय कित् हो विकल्प करके, यथा-श्रथित्वा, श्रन्थित्वा। गुफित्वा, गुम्फित्वा । नकारोपध धातु न होनेपर कित्व नहीं होगा, अत एव गुण होकर–कोथित्वा रेफित्वा ॥

३३२५ वञ्चिलुञ्च्यृतश्च । १ । २ । २४ ॥

सेट् क्त्वा किद्वा । वचित्वा । वञ्चित्वा । लुचित्वा । लुञ्चित्वा । ऋतित्वा । अर्तित्वा ॥

३३२५–वञ्च्, लुञ्च्, ऋत् धातुओंके उत्तर सेट् क्त्वा प्रत्ययकी विकल्प करके कित्व हो, यथा–वचित्वा, वञ्चित्वा । लुचित्वा, लुञ्चित्वा । ऋतित्वा, अर्तित्वा ॥

३३२६ तृषिमृषिकृशेः काश्यपस्य । १ । २ । २५ ॥

एभ्यः सेट् क्त्वा किद्वा । तृषित्वा । तर्षित्वा । मृषित्वा । मर्षित्वा । कृशित्वा । कर्शित्वा । रलो व्युपधादिति वा कित्त्वम् । द्युतित्वा । द्योतित्वा । लिखित्वा । लेखित्वा । रलः किम् । सेवित्वा । व्युपधात्किम् । वर्तित्वा । हलादेः किम् । एषित्वा । सेट् किम् । भुक्त्वा । वसतिक्षुधोरिट् । उषित्वा । क्षुधित्वा । क्षोधित्वा । अञ्चेः पूजायामिति नित्यमिट् । अञ्चित्वा । गतौ तु । अक्त्वेत्यपि । लुभित्वा । लोभित्वा । लुभोऽविमोहन इतीट् । विमोहने तु लुब्ध्वा ॥

३३२६–काश्यपमुनिके मतसे तृष्, मृष्, कृश् इन तीन धातुओंके उत्तर सेट् क्त्वा प्रत्ययको कित्व हो, यथा–तृषित्वा, तर्षित्वा । मृषित्वा, मर्षित्वा । कृशित्वा, कर्शित्वा । "रलो व्युपधात्० २६१७" इस सूत्रसे विकल्प करके कित्व होकर–द्युतित्वा, द्योतित्वा । लिखित्वा, लेखित्वा ।

जिस स्थानमें रलन्त धातुके परे नहीं होगा, उस स्थानमें कित्व नहीं होगा, यथा–सेवित्वा ।

इकारोपध और उकारोपध न होनेसे कित्व न होकर–वर्तित्वा । हलादि न होनेसे कित्व नहीं होकर–एषित्वा । सेट् अर्थात् इट्के साथ युक्त क्त्वा प्रत्यय न होनेसे कित्व नहीं होकर–भुक्त्वा ॥

"वसतिक्षुधोरिट् ३०४६" इस सूत्रसे वस् और क्षुध् धातुके उत्तर क्त्वा प्रत्ययको इट् होकर–उषित्वा । क्षुधित्वा, क्षोधित्वा । "अञ्चेः पूजायाम् ३०४७" इससे पूजार्थक अञ्च् धातुके उत्तर नित्य इट् होकर–अञ्चित्वा । गत्यर्थक अञ्च् धातुके उत्तर इट् नहीं होगा, यथा–अक्त्वा । "लुभोऽविमोहने ३०४८" इस सूत्रसे अविमोहनार्थमें इट् होकर–लुभित्वा, लोभित्वा । विमोहनार्थमें तो इट् नहीं होगा, यथा–लुब्ध्वा ॥

३३२७ जॄव्रश्च्योः क्त्वि । ७ । २ । ५५ ॥

आभ्यां परस्य क्त्व इट् स्यात् । जरीत्वा । जरित्वा । व्रश्चित्वा ॥

३३२७–जॄ और व्रश्च् धातुके उत्तर क्त्वा प्रत्ययको इट् हो, यथा–जरीत्वा, जरित्वा । व्रश्चित्वा ॥

३३२८ उदितो वा । ७ । २ । ५६ ॥

उदितः परस्य क्त्व इड्वा । शमित्वा । अनुनासिकस्य क्वीति दीर्घः । शान्त्वा । देवित्वा । द्यूत्वा ॥

३३२८–उदित् धातुके उत्तर क्त्वा प्रत्ययको विकल्प करके इट् हो, शमित्वा । "अनुनासिकस्य क्विप० २६६६" इस सूत्रसे दीर्घ होकर शान्त्वा । देवित्वा, द्यूत्वा ॥

३३२९ क्रमश्च क्त्वि । ६ । ४ । १८ ॥

क्रम उपधाया वा दीर्घः स्यात् झलादौ क्त्वि परे । क्रान्त्वा । क्रन्त्वा । झलि किम् । क्रमित्वा । पूङश्चेति वेट् । पवित्वा । पूत्वा ॥

३३२९–झलादि क्त्वा प्रत्यय परे रहते क्रम् धातुकी उपधाको विकल्प करके दीर्घ हो, यथा–क्रान्त्वा, क्रन्त्वा । झलादि न होनेपर 'क्रमित्वा' इस प्रकार होगा । "पूङश्च ३०५०" इस सूत्रसे विकल्प करके इट् होकर–पवित्वा, पूत्वा ॥

३३३० जान्तनशां विभाषा । ६ । ४ । ३२ ॥

जान्तानां नशेश्च नलोपो वा स्यात् क्त्वि परे । भक्त्वा । भङ्क्त्वा । रक्त्वा । रङ्क्त्वा । मस्जिनशोरिति नुम् । तस्य पक्षे लोपः । नष्ट्वा । नंष्ट्वा । रधादिभ्यश्चेतीट्पक्षे । नशित्वा । झलादाविति वाच्यम् । नेह । अञ्जित्वा । ऊदित्वाद्वेट् । पक्षे । अक्त्वा । अङ्क्त्वा । जनसनेत्यात्त्वम् । खात्वा । खनित्वा । द्यतिस्यतीतीत्त्वम् । दित्वा । सित्वा । मित्वा । स्थित्वा । दधातेर्हिः । हित्वा ॥

३३३०–क्त्वा प्रत्यय परे रहते जकारान्त धातु और नश् धातुके नकारका विकल्प करके लोप हो, भक्त्वा, भङ्क्त्वा । रक्त्वा, रङ्क्त्वा । "मस्जिनशो० २५१७" इस सूत्रसे नुम् हुआ, उसका विकल्प करके लोप होकर–नष्ट्वा, नंष्ट्वा । "रधादिभ्यश्च २५१४" इस सूत्रसे इट् पक्षमें 'नशित्वा' इस प्रकार रूप होगा ।

"झलादाविति वाच्यम्" अर्थात् झलादि क्त्वा प्रत्यय परे रहते विकल्प करके नकारका लोप हो ऐसा कहना चाहिये *। इससे यहां नहीं हुआ, यथा–अञ्जित्वा, यहां ऊकार इत् होनेके कारण विकल्प करके इट् हुआ है । इट्के विकल्पपक्षमें अक्त्वा, अङ्क्त्वा । "जनसन० २५०४" इस सूत्रसे धातुको आकार होकर, यथा–खात्वा, खनित्वा । "द्यतिस्यति० ३०७४" इस सूत्रसे इकार होकर–दित्वा । सित्वा । मित्वा । स्थित्वा । "दधातेर्हिः ३०७६" इस सूत्रसे धा धातुके स्थानमें हि आदेश होकर–हित्वा ॥

३३३१ जहातेश्च क्त्वि । ७ । ४ । ४३ ॥

हित्वा । हाङस्तु । हात्वा । अदो जग्धिः । जग्ध्वा ॥

३३३१–ओहाक् धातुको क्त्वा प्रत्यय परे रहते हि आदेश हो, यथा–हित्वा । हाङ् धातुका तो 'हात्वा' ऐसा पद होगा । "अदो जग्धिः ३०८०" इस सूत्रसे अद् धातुको जग्धि आदेश होकर–यथा–जग्ध्वा ॥

३३३२ समासेऽनञ्पूर्वे क्त्वो ल्यप् । ७ । १ । ३७ ॥

अव्ययपूर्वपदे अनञ्समासे क्त्वो ल्यबादेशः स्यात् । तुक् । प्रकृत्य । अनञ् किम् । अकृत्वा । पर्युदासाश्रयणान्नेह । परमकृत्वा ॥

३३३२-अव्यय पूर्वपदक नञ् भिन्न तत्पुरुष समास होने-पर क्त्वा प्रत्ययके स्थानमें ल्यप् आदेश हो, तुक् आगम होकर-यथा-प्रकृत्य । नञ्तत्पुरुष समास होनेपर ल्यप् नहीं होगा, यथा-अकृत्वा । पर्युदास नञ्के आश्रयणके कारण यहां भी ल्यबादेश नहीं हुआ, यथा-परमकृत्वा ॥

३३३३ षत्वतुकोरसिद्धः । ६ । १ । ८६ ॥

षत्वे तुकि च कर्तव्ये एकादेशशास्त्रमसिद्धं स्यात् । कोऽसिचत् । इह षत्वं न । अधीत्य । प्रेत्य । ह्रस्वस्येति तुक् ॥

३३३३-षत्व और तुक् कर्त्तव्य रहते एकादेशशास्त्र असिद्ध हो, इससे कोऽसिचत्, इस स्थानमें षत्व नहीं हुआ । अधीत्य । प्रेत्य यहां "ह्रस्वस्य० २८५८" इस सूत्रसे तुक् आगम हुआहै ॥

३३३४ वा ल्यपि । ६ । ४ । ३८ ॥

अनुदात्तोपदेशानां वनतितनोत्यादीनामनुनासिकलोपो वा स्याल्ल्यपि । व्यवस्थितविभाषेयम् । तेन मान्तानिटां वा नान्तानिटां वनादीनां च नित्यम् । आगत्य । आगम्य । प्रणत्य । प्रणम्य । प्रहत्य । प्रमत्य । प्रवत्य । वितत्य । अदो जग्धिः । अन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधते । जग्धिविधौ ल्यब्ग्रहणात् । तेन हित्वदत्त्वाऽऽत्वेत्वदीर्घत्वशूठिटो ल्यपि न । विधाय । प्रदाय । प्रखन्य । प्रस्थाय । प्रक्रम्य । आपृच्छ्य । प्रदीव्य ।

३३३४-ल्यप् प्रत्यय पर रहते नुदात्तोपदश धातु और वन् धातु और तनादि धातुओंके विकल्प करके अनुनासिकका लोप हो, यह व्यवस्थित विभाषा है, इससे यह फल हुआ कि, मान्त अनिट धातुके अनुनासिक वर्णका विकल्प करके लोप और नान्त अनिट् धातुओंके और वन आदि धातुओंके अनुनासिक वर्णका नित्य लोप होगा, यथा-आगत्य, आगम्य । प्रणत्य, प्रणम्य । प्रहत्य । प्रमत्य । प्रवत्य । वितत्य । "अदो जग्धिः ३०८०" इस सूत्रसे अद धातुके स्थानमें जग्धि आदेश हो । जग्ध्यादेशकी विधिमें ल्यप् ग्रहणके कारण ल्यप् आदेश बहिरङ्ग होनेपर भी अन्तरङ्ग विधिको बाध करताहै, इससे यह फल हुआ कि, ल्यप् परे हि आदेश दत्व, आत्व, इत्व, दीर्घ, ऊठ् और इट् यह सम्पूर्ण कार्य्य नहीं होंगे, यथा-विधाय । प्रदाय । प्रखन्य । प्रस्थाय । प्रक्रम्य । आपृच्छ्य । प्रदीव्य ॥

३३३५ न ल्यपि । ६ । ४ । ६९ ॥

ल्यपि परे घुमास्थादेरीत्वं न । धेट् । प्रधाय । प्रमाय । प्रगाय । प्रपाय । प्रहाय । प्रसाय । मीनातिमिनोतीत्यात्वम् । प्रमाय । निमाय । उपदाय । विभाषा लीयतेः । विलाय । विलीय । णिलोपः । उत्तार्य । विचार्य ॥

३३३५-ल्यप् प्रत्यय परे रहते घुसंज्ञक और मा और स्था आदि धातुओंको ईकार नहीं हो, धेट् प्रधाय । प्रमाय । प्रगाय । प्रपाय । प्रहाय । प्रसाय । "मीनाति मिनोति० २५०८" इस सूत्रसे आत्व होकर-प्रमाय । निमाय । उपदाय । "विभाषा लीयतेः २५०९" इस सूत्रसे विकल्प करके आत्व होकर-विलाय, विलीय । णिका लोप होकर-उत्तार्य्य । विचार्य ॥

३३३६ ल्यपि लघुपूर्वात् । ६ । ४ । ५६ ॥

लघुपूर्वात्परस्य णेरयादेशः स्यात् ल्यपि । विगणय्य । प्रणमय्य । प्रवेभिदय्य । लघुपूर्वात्किम् । संप्रधार्य ॥

३३३६-ल्यप् प्रत्यय परे रहते लघुपूर्वक धातुके परे जो णि उसके स्थानमें अय आदेश हो, विगणय्य । प्रणमय्य । प्रवेभिदय्य । जिस स्थानमें लघुपूर्वक नहीं होगा उस स्थानमें अयादेश न होकर-'सम्प्रधार्य्य' इस प्रकार होगा ॥

३३३७ विभाषापः । ६ । ४ । ५७ ॥

आप्नोतेर्णेरयादेशो वा स्यात् ल्यपि । प्रापय्य । प्राप्य ॥

३३३७-ल्यप् प्रत्यय परे रहते आप् धातुके परे स्थित णिके स्थानमें विकल्प करके अय आदेश हो, यथा-प्रापय्य, प्राप्य ॥

३३३८ क्षियः । ६ । ४ । ५९ ॥

क्षियो ल्यपि दीर्घः स्यात् । प्रक्षीय ॥

३३३८-ल्यप् प्रत्यय परे रहते क्षि धातुके इकारको दीर्घ हो, प्रक्षीय ॥

३३३९ ल्यपि च । ६ । १ । ४१ ॥

वेञो ल्यपि संप्रसारणं न स्यात् । प्रवाय ।

३३३९-ल्यप् प्रत्यय परे रहते वेञ् धातुको सम्प्रसारण न हो, प्रवाय ॥

३३४० ज्यश्च । ६ । १ । ४२ ॥

प्रज्याय ॥

३३४०-ल्यप् प्रत्यय परे रहते ज्या धातुको सम्प्रसारण न हो, प्रज्याय ॥

३३४१ व्यश्च । ६ । १ । ४३ ॥

उपव्याय ॥

३३४१-ल्यप् प्रत्यय परे रहते व्येञ् धातुको सम्प्रसारण न हो, उपव्याय ॥

३३४२ विभाषा परेः । ६ । १ । ४४ ॥

परेर्व्येञो वा संप्रसारणं स्याल्ल्यपि । तुकं बाधित्वा परत्वाद्धल इति दीर्घः । परिवीय । परिव्याय । कथं मुखं व्यादाय स्वपिति, नेत्रे निमील्य हसतीति । व्यादानसंमीलनोत्तरकालेऽपि स्वापहासयोरनुवृत्तेस्तदंशविवक्षया भविष्यति ॥

३३४२ल्यप् प्रत्यय परे रहते परिपूर्वक व्येञ् धातुको विकल्प करके सम्प्रसारण हो, तुक्को बाधकर परत्वके कारण " हलः २५५९ " इस सूत्रसे दीर्घ होकर-परिवीय, परिव्याय।

मुखव्यादान और नेत्रनिमीलनको स्वाप् और हासके बाद होनेके कारण पूर्वकाल विशिष्टार्थ वृत्ति धातुको न होनेसे किस प्रकार ' मुखं व्यादाय स्वपिति ' यह प्रयोग और "नेत्रे निमील्य हसति" यह प्रयोग सिद्ध हुए? तो व्यादान और सम्मीलनके उत्तरकालमें भी निद्रा और हासके संबन्धके कारण उस अंशकी विवक्षासे होगा॥

३३४३ आभीक्ष्ण्ये णमुल् च।३।४।२२॥

पौनःपुन्ये द्योत्ये पूर्वविषये णमुल् स्यात् क्त्वा च। द्वित्वम्। स्मारंस्मारं नमति शिवम्। स्मृत्वास्मृत्वा। पायंपायम्। भोजंभोजम्। श्रावंश्रावम्। चिण्णमुलोरिति णमुल्परे णौ वा दीर्घः। गामंगामम्।विभाषाचिण्णमुलोरिति नुम् वा। लम्भंलम्भम्। लाभंलाभम्। व्यवस्थितविभाषया उपसृष्टस्य नित्यं नुम्। प्रलम्भंप्रलम्भम्। जाग्रोऽविचिण्णिति गुणः। जागरंजागरम्। ण्यन्तस्याप्येवम्॥

३३४३-पौनःपुन्य अर्थ द्योत्य होनेपर पूर्वविषयमें णमुल् और क्त्वा प्रत्यय हो, द्वित्व होकर-स्मारंस्मारं नमति शिवम्। स्मृत्वास्मृत्वा। पायंपायम्। भोजंभोजम्। श्रावंश्रावम्। "चिण्णमुलोः० २७६२" इस सूत्रसे णमुल्परक णि प्रत्यय परे रहते विकल्प करके दीर्घ होकर-गामंगामम्। गमंगमम्। विभाषा चिण्णमुलोः २७६५" इस सूत्रसे विकल्प करके नुम् होकर-लम्भंलम्भम्। लाभंलाभम्। व्यवस्थित विभाषासे उपसर्गविशिष्ट लभ् धातुको नित्य नुम् होकर-प्रलम्भंप्रलम्भम्। "जाग्रोऽविचिण्० २४८०" इस सूत्रसे गुण होकर-जागरंजागरम्। णिजन्तके भी इसी प्रकार रूप होंगे॥

३३४४ न यद्यनाकाङ्क्षे। ३। ४।२३॥

यच्छब्दे उपपदे पूर्वकाले यत्प्राप्तं तन्न यत्र पूर्वोत्तरे क्रिये तद्वाक्यमपरं नाकाङ्क्षते चेत्। यदयं भुङ्क्ते ततः पठति। इह क्त्वाणमुलौ न। अनाकाङ्क्षे किम्। यदयं भुक्त्वा व्रजति ततोऽधीते॥

३३४४-जिस वाक्यमें पूर्व और उत्तर कालाभिधायी क्रिया है, वह वाक्य यदि अपर वाक्यकी आकांक्षा न करे तो यत् शब्द उपपद होनेपर पूर्वकालमें प्राप्त क्त्वा और णमुल् प्रत्यय नहीं हो, यदयं भुंक्ते ततः पठति। इस स्थानमें क्त्वा वा णमुल् प्रत्यय नहीं हुआ। अनाकांक्षे क्यों कहा? तो भुक्त्वा व्रजति ततोऽधीते॥

३३४५विभाषाग्रे प्रथमपूर्वेषु।३।४।२४॥

आभीक्ष्ण्ये इति नानुवर्तते। एषूपपदेषु समानकर्तृकयोः पूर्वकाले क्त्वाणमुलौ वा स्तः। अग्रे भोजं व्रजति। अग्रे भुक्त्वा। प्रथमम्भोजम्। प्रथमम्भुक्त्वा। पूर्वम्भोजम्। पूर्वम्भुक्त्वा। पक्षे लडादयः। अग्रे भुङ्क्ते ततो व्रजति। आभीक्ष्ण्ये तु पूर्वविप्रतिषेधेन नित्यमेव विधिः। अग्रे भोजम्भोजं व्रजति। भुक्त्वाभुक्त्वा॥

३३४५-इस सूत्रमें पौनःपुन्य अर्थकी अनुवृत्ति नहीं होती है। अग्रे, प्रथम और पूर्व यह तीन उपपद रहते एककर्तृक धातुके उत्तर पूर्वकाल विषयमें विकल्प करके क्त्वा और णमुल् प्रत्यय हो, यथा-अग्रे भोजं व्रजति। अग्रे भुक्त्वा। प्रथमं भोजम्। प्रथमं भुक्त्वा। पूर्वं भोजम्। पूर्वं भुक्त्वा। विकल्प पक्षमें लट् आदि प्रत्यय होंगे, यथा-अग्रे भुंक्ते ततो व्रजति। पौनःपुन्य अर्थमें तो पूर्वविप्रतिषेधके कारण नित्य ही विधि हुई। यथा-अग्रे भोजंभोजं व्रजति। भुक्त्वा-भुक्त्वा॥

३३४६ कर्मण्याक्रोशे कृञः खमुञ्। ३। ४। २५॥

कर्मण्युपपदे आक्रोशे गम्ये। चौरंकारमाक्रोशति। करोतिरुच्चारणे। चारशब्दमुच्चार्येत्यर्थः॥

३३४६-कर्म उपपद होनेपर और आक्रोश अर्थ गम्यमान होनेपर कृञ् धातुके उत्तर खमुञ् प्रत्यय हो, यथा-चौरंकारमाक्रोशति, इस स्थलमें कृ धातुका अर्थ उच्चारण समझना अत एव चौरंकारमाक्रोशति इसका चौर शब्द उच्चारण करके आक्रोश करताहै, ऐसा अर्थ हुआ॥

३३४७ स्वादुमि णमुल्। ३। ४।२६॥

स्वाद्वर्थेषु कृञो णमुल् स्यादेककर्तृकयोः पूर्वकाले। पूर्वपदस्य मान्तत्वं निपात्यते। अस्वादुं स्वादुं कृत्वा भुङ्क्ते स्वादुङ्कारं भुङ्क्ते। संपन्नंकारम्। लवणंकारम्। संपन्नलवणशब्दौ स्वादुपर्यायौ। वासरूपेण क्त्वापि। स्वादुं कृत्वा भुङ्क्ते॥

३३४७-स्वाद्वर्थक शब्द उपपद होनेपर एककर्तृक धात्वर्थके पूर्वकालविषयमें कृञ् धातुके उत्तर णमुल् प्रत्यय हो, पूर्वपदको मान्तत्व निपातनसे सिद्ध होकर, यथा-अस्वादुं स्वादुं कृत्वा भुंक्ते, इस विग्रहमें स्वादुङ्कारं भुंक्ते। सम्पन्नंकारम्। लवणंकारम्। सम्पन्न और लवण यह दो शब्द स्वादुपर्य्याय हैं। वासरूपविधिसे क्त्वा प्रत्यय भी होगा, यथा-स्वादुं कृत्वा भुंक्ते॥

३३४८ अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्। ३। ४। २७॥

एषु कृञो णमुल् स्यात् सिद्धः अप्रयोगोऽस्य एवंभूतश्चेत् कृञ्। व्यर्थत्वात्प्रयोगानर्ह इत्यर्थः।

अन्यथाकारम् । एवंकारम् । कथंकारम् । इत्थंकारं भुङ्क्ते । इत्थं भुङ्क्त इत्यर्थः । सिद्धेति किम् । शिरोऽन्यथा कृत्वा भुङ्क्ते ॥

३३४८-अन्यथा, एवम्, कथम्, और इत्थम् यह चार शब्द उपपद होनेपर कृञ् धातुके उत्तर णमुल् प्रत्यय हो, यदि यह कृञ् धातुका अप्रयोग सिद्ध हो तो, यथा-अन्यथाकारम् । एवंकारम् । कथंकारम् । इत्थंकारं भुंक्ते, अर्थात् इस प्रकार भोजन करताहै । कृ धातुके प्रयोग सिद्ध होनेपर तो शिरोऽन्यथा कृत्वा भुंक्ते ॥

३३४९ यथातथयोरसूयाप्रतिवचने । ३ । ४ । २८ ॥

कृञः सिद्धाप्रयोग इत्येव असूयया प्रतिवचने । यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये किं तवानेन ॥

३३४९-यथा और तथा उपपद होनेपर और असूयासे प्रतिवचन गम्य होनेपर सिद्धाप्रयोग कृञ् धातुके उत्तर णमुल् प्रत्यय हो, यथा-यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये किं तवानेन ॥

३३५० कर्मणि दृशिविदोः साकल्ये । ३ । ४ । २९ ॥

कर्मण्युपपदे णमुल् स्यात् । कन्यादर्शं वरयति । सर्वाः कन्या इत्यर्थः । ब्राह्मणवेदं भोजयति । यंयं ब्राह्मणं जानाति लभते विचारयति वा तं सर्वं भोजयतीत्यर्थः ॥

३३५०-कर्म्म उपपद होनेपर दृश् और विद् धातुके उत्तर साकल्यार्थमें णमुल् प्रत्यय हो, यथा-कन्यादर्शं वरयति, अर्थात् सम्पूर्ण कन्याओंको देखकर वरण करताहै । ब्राह्मणवेदं भोजयति । यं यं ब्राह्मणं जानाति लभते विचारयति वा तं सर्वं भोजयति इत्यर्थः ॥

३३५१ यावति विन्दजीवोः । ३ । ४ । ३० ॥

यावद्वेदं भुङ्क्ते । यावल्लभते । तावदित्यर्थः । यावज्जीवमधीते ॥

३३५१-यावत् शब्द उपपद होनेपर विन्द् और जीव् धातुके उत्तर णमुल् प्रत्यय हो, यथा-यावद्वेदं भुंक्ते । यावल्लभते तावदित्यर्थः । यावज्जीवमधीते ॥

३३५२ चर्मोदरयोः पूरेः । ३ । ४ । ३१ ॥

कर्मणीत्येव । चर्मपूरं स्तृणाति । उदरपूरं भुङ्क्ते ॥

३३५२-चर्म्म और उदर शब्द उपपद होनेपर पूर धातुके उत्तर णमुल् प्रत्यय हो, यथा-चर्म्मपूरं स्तृणाति । उदरपूरं भुंक्ते ॥

३३५३ वर्षप्रमाण ऊलोपश्चास्याऽन्यतरस्याम् । ३ । ४ । ३२ ॥

कर्मण्युपपदे पूरेर्णमुल् स्यादूकारलोपश्च वा समुदायेन वर्षप्रमाणे गम्ये । गोष्पदपूरं वृष्टो देवः । गोष्पदप्रं वृष्टो देवः । अस्येति किम् । उपपदस्य माभूत् । मूषिकाविलप्रम् ॥

३३५३-कर्म्म उपपद होनेपर पूर धातुके उत्तर णमुल् प्रत्यय हो, और धातुके ऊकारका विकल्प करके लोप हो, यदि समुदायसे वर्षप्रमाण गम्य हो तो, यथा-गोष्पदपूरं वृष्टो देवः । गोष्पदप्रं वृष्टो देवः । सूत्रमें "अस्य" ऐसा क्यों कहा ? तो उपपदके ऊकारका लोप नहीं हो, यथा-मूषिकाविलप्रम् ॥

३३५४ चेले क्नोपेः । ३ । ४ । ३३ ॥

चेलार्थेषु कर्मसूपपदेषु क्नोपेर्णमुल् स्याद्वर्षप्रमाणे । चेलक्नोपं वृष्टो देवः । वस्त्रक्नोपम् । वसनक्नोपम् ॥

३३५४-वर्षाका प्रमाण होनेपर चेलार्थक कर्म्म उपपद रहते क्नुप् धातुके उत्तर णमुल् प्रत्यय हो, यथा-चेलक्नोपं वृष्टो देवः । वस्त्रक्नोपम् । वसनक्नोपम् ॥

३३५५ निमूलसमूलयोः कषः । ३ । ४ । ३४ ॥

कर्मणीत्येव । कषादिष्वनुप्रयोगं वक्ष्यति । अत्र प्रकरणे पूर्वकाल इति न सम्बध्यते । निमूलकाषं कषति । समूलकाषं कषति । निमूलं समूलं कषतीत्यर्थः । एकस्यापि धात्वर्थस्य निमूलादिविशेषणसंबन्धाद्भेदः । तेन सामान्यविशेषभावेन विशेषणविशेष्यभावः ॥

३३५५-निमूल और समूल यह दो कर्म्म उपपद होनेपर कष् धातुके उत्तर णमुल् प्रत्यय हो, कषादिविषयमें अनुप्रयोग पश्चात् कहेंगे । इस प्रकरणमें पूर्वकालका संबन्ध नहीं होताहै । निमूलकाषं कषति । समूलकाषं कषति । निमूलं समूलं कषतीत्यर्थः । धात्वर्थ एक होनेपर भी निमूलादि विशेषण सम्बन्धसे भेद है, इस कारण सामान्यविशेषभावसे विशेषणको विशेष्यभाव हुआहै ॥

३३५६ शुष्कचूर्णरूक्षेषु पिषः । ३ । ४ । ३५ ॥

एषु कर्मसु पिषेर्णमुल् । शुष्कपेषं पिनष्टि । शुष्कं पिनष्टीत्यर्थः । चूर्णपेषम् । रूक्षपेषम् ॥

३३५६-शुष्क, चूर्ण और रूक्ष यह उपपद होनेपर पिष् धातुके उत्तर णमुल् प्रत्यय हो, यथा-शुष्कपेषं पिनष्टि । शुष्कं पिनष्टि इत्यर्थः । चूर्णपेषम् । रूक्षपेषम् ॥

३३५७ समूलाकृतजीवेषु हन्कृञ्ग्रहः । ३ । ४ ॥ ३६ ॥

कर्मणीत्येव । समूलघातं हन्ति । अकृतकारं करोति । जीवग्राहं गृह्णाति । जीवति इति जीवः । इगुपधलक्षणः कः । जीवन्तं गृह्णातीत्यर्थः ॥

३३५७–समूल, अकृत और जीव यह कर्म्म उपपद होनेपर यथाक्रमसे हन् कृञ् और ग्रह धातुके उत्तर णमुल् प्रत्यय हो। यथा, समूलघातं हन्ति। अकृतकारं करोति। जीवग्राहं गृह्णाति। जीवति इस विग्रहमें जीवः । "इगुपधज्ञाप्रीकिरः कः (२८९७)" इस सूत्रसे क प्रत्यय हुआ है। जीवन्तं गृह्णाति इत्यर्थः ॥

३३५८ करणे हनः । ३ । ४ । ३७ ॥

पादघातं हन्ति । पादेन हन्तीत्यर्थः । यथाविध्यनुप्रयोगार्थः सन्नित्यसमासार्थोऽयं योगः । भिन्नधातुसम्बन्धे तु हिंसार्थानां चेति वक्ष्यते॥

३३५८–करणवाचक पद उपपद होनेपर हन् धातुके उत्तर णमुल् प्रत्यय हो, यथा–पादघातं हन्ति । पादेन हन्तीत्यर्थः। यथाविधि अनुप्रयोग होकर नित्य समासार्थ यह पृथक् सूत्र विहित हुआहै । किन्तु इससे भिन्न धातु संबन्धमें "हिंसार्थानाञ्च (३३६९)" इस सूत्रको आगे कहेंगे ॥

३३५९ स्नेहने पिषः । ३।४। ३८॥

स्निह्यते येन तस्मिन् करणे पिषेर्णमुल् । उदपेषं पिनष्टि । उदकेन पिनष्टीत्यर्थः ॥

३३५९–जिसके द्वारा स्निग्ध हो ऐसा करण उपपद होनेपर पिष धातुके उत्तर णमुल् प्रत्यय हो, उदपेषं पिनष्टि उदकेन पिनष्टीत्यर्थः ॥

३३६० हस्ते वर्तिग्रहोः ।३।४।३९॥

हस्तार्थे करणे । हस्तवर्तं वर्तयति । करवर्तम्, हस्तेन गुलिकां करोतीत्यर्थः । हस्तग्राहं गृह्णाति । करग्राहम् । पाणिग्राहम् ॥

३३६०–हस्त अर्थ हो ऐसा करण उपपद होनेपर वृत और ग्रह धातुके उत्तर णमुल् प्रत्यय हो, यथा–हस्तग्राहं गृह्णाति । करग्राहम् । पाणिग्राहम् ॥

३३६१ स्वे पुषः । ३ । ४ । ४० ॥

करण इत्येव । स्व इत्यर्थग्रहणम् । तेन स्वरूपे पर्याये विशेषे च णमुल्। स्वपोषं पुष्णाति । धनपोषम् । गोपोषम् ॥

३३६१–स्वार्थमें करणवाचक पद उपपद होनेपर पुष धातुके उत्तर णमुल् प्रत्यय हो, इस स्थलमें स्वशब्दके अर्थका ही ग्रहण जानना चाहिये । उससे यह फल हुआ कि स्वशब्दका स्वरूप करण, पर्य्यायवाची करण और विशेषार्थ वाचक करण उपपद होनेपर पुष धातुके उत्तर णमुल् प्रत्यय हो, यथा–स्वपोषं पुष्णाति । धनपोषम् । गोपोषम् ॥

३३६२ अधिकरणे बन्धः । ३।४।४१॥

चक्रबन्धं बध्नाति । चक्रे बध्नातीत्यर्थः ॥

३३६२–अधिकरण वाचक पद उपपद होनेपर बन्ध धातुके उत्तर णमुल् प्रत्यय हो, यथा–चक्रबन्धं बध्नाति । चक्रे बध्नातीत्यर्थः ॥

३३६३ संज्ञायाम् । ३ । ४ । ४२ ॥

बध्नातेर्णमुल् संज्ञायाम् । क्रौञ्चबन्धं बद्धः । मयूरिकाबन्धम् । अट्टालिकाबन्धम् । बन्धविशेषाणां संज्ञा एताः ॥

३३६३–संज्ञा अर्थ होनेपर बन्ध धातुके उत्तर णमुल् प्रत्यय हो, यथा–क्रौञ्चबन्धं बद्धः । मयूरिकाबन्धम् । अट्टालिकाबन्धम् । यह बन्धविशेषोंकी संज्ञा हैं ॥

३३६४ कर्त्रोर्जीवपुरुषयोर्नशिवहोः । ३ । ४ । ४३ ॥

जीवनाशं नश्यति । जीवो नश्यतीत्यर्थः । पुरुषवाहं वहति । पुरुषो वहतीत्यर्थः ॥

३३६४–कर्तृवाचक जीव और पुरुष उपपद होनेपर क्रमसे नश और वह धातुके उत्तर णमुल् प्रत्यय हो, यथा, जीवनाशं नश्यति । जीवो नश्यति इत्यर्थः । पुरुषवाहं वहति । पुरुषो वहतीत्यर्थः ॥

३३६५ ऊर्ध्वे शुषिपूरोः । ३ ।४। ४४॥

ऊर्ध्वे कर्तरि । ऊर्ध्वशोषं शुष्यति । वृक्षादिरूर्ध्व एव तिष्ठञ्छुष्यतीत्यर्थः। ऊर्ध्वपूरं पूर्यते। ऊर्ध्वमुख एव घटादिर्वर्षोदकादिना पूर्णो भवतीत्यर्थः ॥

३३६५–ऊर्ध्वरूप कर्त्ता उपपद होनेपर शुष और पूरि धातुके उत्तर णमुल् प्रत्यय हो, यथा–ऊर्ध्वशोषं शुष्यति । वृक्षादिरूर्ध्व एव तिष्ठन् शुष्यति इत्यर्थः । ऊर्ध्वपूरं पूर्य्यते । ऊर्ध्वमुख एव घटादिः वर्षोदकादिना पूर्णो भवति इत्यर्थः ॥

३३६६ उपमाने कर्मणि च ।३।४।४५॥

चात्कर्तरि । घृतनिधायं निहितं जलम् । घृतमिव सुरक्षितमित्यर्थः । अजकनाशं नष्टः । अजक इव नष्ट इत्यर्थः ॥

३३६६–उपमान वाचक कर्म्म और चकार निर्देशके कारण उपमान वाचक कर्त्ता उपपद होनेपर धातुके उत्तर णमुल् प्रत्यय हो, यथा–घृतनिधायं निहितं जलम् । घृतमिव सुरक्षितमित्यर्थः । अजकनाशं नष्टः । अजक इव नष्ट इत्यर्थः ॥

३३६७ कषादिषु यथाविध्यनुप्रयोगः । ३ । ४ । ४६ ॥

यस्माण्णमुलुक्तः स एवानुप्रयोक्तव्य इत्यर्थः। तथैवोदाहृतम् ॥

३३६७-कषादि विषयमें जिस धातुके उत्तर णमुल् प्रत्यय हो, उस धातुका अनुप्रयोग कर्त्तव्य है । इसी प्रकार उदाहरण दियाहै ॥

३३६८ उपदंशस्तृतीयायाम् ।३।४।४७॥

इतः प्रभृति पूर्वकाल इति संबध्यते । तृतीयाप्रभृतीन्यन्यतरस्यामिति वा समासः । मूलकोपदंशं भुंक्ते । मूलकेनोपदंशम् । दश्यमानस्य मूलकस्य भुजिं प्रति करणत्वात्तृतीया। यद्यप्युपदंशिना सह न शाब्दः सम्बन्धस्तथाप्यार्थोऽस्त्येव कर्मत्वात्। एतावतैव सामर्थ्येन प्रत्ययः समासश्च । तृतीयायामिति वचनसामर्थ्यात् ॥

३३६८-इस सूत्रसे पूर्वकालका मण्डूकप्लुति करके अनुवृत्तिके कारण संबन्ध होगा । तृतीयान्त उपपद रहते समान कर्तृक धात्वर्थके मध्यमें पूर्व कालमें विद्यमान जो उपपूर्वक दंश धातु उसके उत्तर णमुल् प्रत्यय हो, "तृतीयाप्रभृतीन्यन्यतरस्याम् (७८४)" इस सूत्रसे विकल्प करके समास होगा, यथा-मूलकोपदंशं भुंक्ते मूलकेनोपदंशम् इस स्थलमें दश्यमान मूलकको भुजि क्रियामें करणत्वके कारण मूलक शब्दसे तृतीया विभक्ति हुई । यद्यपि उपदंशके साथ शाब्दसंबन्ध नहीं है तथापि कर्मत्वके कारण आर्थसंबंध है ही । "तृतीयायाम्"इस वचन सामर्थ्यके कारण प्रत्यय और समास होगा॥

३३६९ हिंसार्थानां च समानकर्मकाणाम् । ३ । ४ । ४८ ॥

तृतीयान्त उपपदेऽनुप्रयोगधातुना समानकर्मकाद्धिंसार्थाण्णमुल् स्यात् । दण्डोपघातं गाः कालयति । दण्डेनोपघातम् । दण्डताडम् । समानकर्मकाणामिति किम् । दण्डेन चोरमाहत्य गाः कालयति ॥

३३६९-तृतीयान्त पद उपपद होनेपर अनु प्रयुक्त धातुके साथ एककर्म्मक जो हिंसार्थ धातु, उसके उत्तर णमुल् प्रत्यय हो, यथा दंडोपघातं गाः कालयति । दंडेनोपघातम् । दण्डताडम् । एककर्म्मक जिस स्थानमें नहीं होगा उस स्थानमें दण्डेन चौरमाहत्य गाः कालयति ॥

३३७० सप्तम्यां चोपपीडरुधकर्षः । ३ । ४ । ४९ ॥

उपपूर्वेभ्यः पीडादिभ्यः सप्तम्यन्ते तृतीयान्ते चोपपदे णमुल् स्यात् । पार्श्वोपपीडं शेते । पार्श्वयोरुपपीडम् । पार्श्वाभ्यामुपपीडम् । व्रजोपरोधं गाः स्थापयति । व्रजेन व्रजे उपरोधं वा । पाण्युपकर्षं धानाः संगृह्णाति पाणावुपकर्षम् । पाणिनोपकर्षम् ॥

३३७०-सप्तम्यन्त और तृतीयान्त उपपद होनेपर उप-पूर्वक पीड, रुध, कृष इन धातुओंके उत्तर णमुल् प्रत्यय हो, यथा-पार्श्वोपपीडं शेते । पार्श्वयोरुपपीडम् । पार्श्वाभ्यामुपपीडम् । व्रजोपरोधं गाः स्थापयति । व्रजेन उपरोधम् व्रजे उपरोधम् वा । पाण्युपकर्षं धानाः संगृह्णाति । पाणावुपकर्षम् । पाणिनोपकर्षं वा ॥

३३७१ समासत्तौ । ३ । ४ । ५० ॥

तृतीयासप्तम्योर्धातोर्णमुल् स्यात्सन्निकर्षे गम्यमाने । केशग्राहं युध्यन्ते। केशेषु गृहीत्वा । हस्तग्राहम्। हस्तेन गृहीत्वा ॥

३३७१-तृतीयान्त और सप्तम्यन्त पद उपपद होनेपर और सन्निकर्ष गम्यमान होनेपर धातुके उत्तर णमुल् प्रत्यय हो, यथा-केशग्राहं युध्यन्ते केशेषु गृहीत्वा । हस्तग्राहम् । हस्तेन गृहीत्वा ॥

३३७२ प्रमाणे च । ३ । ४ । ५१ ॥

तृतीयासप्तम्योरित्येव । द्व्यंगुलोत्कर्षं खण्डिकां छिनत्ति । द्व्यंगुलेन द्व्यंगुले वोत्कर्षम् ॥

३३७२-तृतीयान्त और सप्तम्यन्त पद उपपद होनेपर और प्रमाण गम्यमान होनेपर धातुके उत्तर णमुल् प्रत्यय हो, यथा-द्व्यंगुलोत्कर्षं खण्डिकां छिनत्ति । द्व्यंगुलेन द्व्यंगुले वा उत्कर्षम् ॥

३३७३ अपादाने परीप्सायाम् । ३ । ४ । ५२ ॥

परीप्सा त्वरा । शय्योत्थायं धावति ॥

३३७३-अपादान कारक अर्थात् पञ्चम्यन्त पद उपपद होनेपर और परीप्सा अर्थात् त्वरा अर्थ होनेपर धातुके उत्तर णमुल् प्रत्यय हो, यथा-शय्योत्थायं धावति । (शय्यासे उठते ही दौडता है) ॥

३३७४ द्वितीयायां च । ३ । ४ । ५३॥

परीप्सायामित्येव । यष्टिग्राहं युध्यन्ते । लोष्टग्राहम् ॥

३३७४-द्वितीयान्त पद उपपद होनेपर धातुके उत्तर त्वरा अर्थमें णमुल् प्रत्यय हो, यथा-यष्टिग्राहं युध्यन्ते(बडी शीघ्रतासे लकडी लेकर लड़ने जाते हैं) लोष्टग्राहम् ॥

३३७५ अपगुरो णमुलि । ६ । १ । ५३॥

गुरी उद्यमने इत्यस्यैचो वा आत्स्याण्णमुलि। अस्यपगारं युध्यन्ते । अस्यपगोरम् ॥

३३७५-णमुल् प्रत्यय परे रहते उद्यमनार्थक अपपूर्वक गुरी धातुके एच्के अर्थात् ओकारके स्थानमें विकल्प करके आकार हो, यथा-अस्यपगारम् युध्यंते अस्यपगोरम् ॥

३३७६ स्वांगेऽध्रुवे । ३ । ४ । ५४ ॥

द्वितीयायामित्येव । अध्रुवे स्वांगे द्वितीयान्ते धातोर्णमुल् । भ्रूविक्षेपं कथयति । भ्रुवं विक्षेपम् । अध्रुवे किम् । शिर उत्क्षिप्य । येन विना न जीवनं तद् ध्रुवम् ॥

३३७६-द्वितीयान्त अध्रुव स्वाङ्ग वाचक शब्द उपपद होनेपर धातुके उत्तर णमुल् प्रत्यय हो, यथा-भ्रूविक्षेपं कथयति । भ्रुवं विक्षेपम् । जिस स्थानमें ध्रुव स्वाङ्ग होगा उस स्थलमें शिरः उत्क्षिप्य । जिसके विना जो जीव जीवित नहीं रहता, उसका नाम ध्रुव है ॥

३३७७ परिक्लिश्यमाने च ।३।४।५५॥

सर्वतो विबाध्यमाने स्वांगे द्वितीयान्ते णमुल् स्यात् । उरःप्रतिपेषं युध्यन्ते । कृत्स्नमुरः पीडयन्त इत्यर्थः । उरोविदारं प्रतिचस्करे नखैः । ध्रुवार्थमिदम् ॥

३३७७-परिक्लिश्यमान अर्थात् सब प्रकारसे विबाध्यमान अर्थ होनेपर और द्वितीयान्त स्वांगवाचक शब्द उपपद होनेपर धातुके उत्तर णमुल् प्रत्यय हो, यथा-उरःप्रतिपेषम् युध्यन्ते । कृत्स्नमुरः पीडयन्ते इत्यर्थः । "उरोविदारं प्रतिचस्करे नखैः" ध्रुवार्थ यह सूत्र है ॥

३३७८ विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः । ३ । ४ । ५६॥

द्वितीयायामित्येव । द्वितीयान्त उपपदे विश्यादिभ्यो णमुल् स्याद्व्याप्यमान आसेव्यमाने चार्थे गम्ये । गेहादिद्रव्याणां विश्यादिक्रियाभिः साकल्येन सम्बन्धो व्याप्तिः । क्रियायाः पौनःपुन्यमासेवा । नित्यवीप्सयोरिति द्वित्वं तु न भवति । समासेनैव स्वभावतस्तयोरुक्तत्वात् । यद्यप्याभीक्ष्ण्ये णमुलुक्त एव तथापि उपपदसंज्ञार्थमासेवायामिह पुनर्विधिः । गेहानुप्रवेशमास्ते गेहङ्गेहमनुप्रवेशम् । गेहमनुप्रवेशमनुप्रवेशम् । एवं गेहानुप्रपातम् । गेहानुप्रपादम् । गेहानुस्कन्दम् । असमासे तु गेहस्य णमुलन्तस्य च पर्यायेण द्वित्वम् ॥

३३७८-द्वितीयान्त पद उपपद होनेपर और व्याप्यमान और आसेव्यमान अर्थ होनेपर विशि,पति, पदि, स्कन्द इन चार धातुओंके उत्तर णमुल् प्रत्यय हो, गृहादि द्रव्यका विशि आदि क्रियाओंके साथ जो साकल्य करके संबन्ध उसका नाम व्याप्ति है । आसेवा अर्थात् क्रियाका पौनःपुन्य "नित्यवीप्सयोः (२१४०)" इस सूत्रसे समासके द्वारा ही स्वभावतः नित्य और वीप्साके उक्तत्वके कारणद्वित्व नहीं होगा । यद्यपि आभीक्ष्ण्य अर्थमें णमुल् उक्त हुआ है तथापि उपपद संज्ञाके निमित्त आसेवा विषयमें पुनर्विधान होगा । यह जताता है, यथा-गेहानुप्रवेशमास्ते, गेहंगेहमनुप्रवेशम् । इसी प्रकार गेहानुप्रपातम् । गेहानुप्रपादम् । गेहानुस्कन्दम् । असमास विषयमें गेह शब्दको और णमुल् प्रत्ययान्तको पर्याय करके द्वित्व होगा ॥

३३७९ अस्यतितृषोः क्रियान्तरे कालेषु । ३ । ४ । ५७ ॥

क्रियामन्तरयति व्यवधत्त इति क्रियान्तरः । तस्मिन्धात्वर्थे वर्तमानादस्यतेस्तृष्यतेश्च कालवाचिषुद्वितीयान्तेषूपपदेषु णमुल्स्यात् । द्व्यहात्यासं गाः पाययति । द्व्यहमत्यासम् । द्व्यहतर्षम् । द्व्यहन्तर्षम् । अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते । अद्य पाययित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः ॥

३३७९-क्रियाको अन्तर अर्थात् व्यवधान करे जो क्रिया उसका नाम क्रियान्तर है, यह क्रियान्तर धात्वर्थ होनेपर कालवाचक द्वितीयान्त पद उपपद होनेपर असि और तृष् धातुके उत्तर णमुल् प्रत्यय हो, यथा-द्व्यहात्यासं गाः पाययति द्व्यहमत्यासम् । द्व्यहतर्षम् । द्व्यहन्तर्षम् । अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते अद्य पाययित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः ॥

३३८० नाम्न्यादिशिग्रहोः ।३।४।५८॥

द्वितीयायामित्येव । नामादेशमाचष्टे । नामग्राहमाह्वयति ॥

३३८०-द्वितीयान्त नामन् शब्द उपपद होनेपर आङ् पूर्वक दिशि और आङ्पूर्वक ग्रहि धातुके उत्तर णमुल् प्रत्यय हो, नामादेशमाचष्टे । नामग्राहमाह्वयति ॥

३३८१ अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ । ३ । ४ । ५९ ॥

अयथाभिप्रेताख्यानं नाम अप्रियस्योच्चैः प्रियस्य नीचैः कथनम् । उच्चैःकृत्य-उच्चैःकृत्वा उच्चैःकारमप्रियमाचष्टे । नीचैःकृत्य-नीचैःकृत्वा-नीचैःकारं प्रियं ब्रूते ॥

३३८१-अव्यय शब्द उपपद होनेपर और अयथाभिप्रेत आख्यान होनेपर कृञ् धातुके उत्तर क्त्वा और णमुल् प्रत्यय हो, अप्रियको उच्च करके प्रियको नीच करके कथनको अयथाभिप्रेताख्यान कहते हैं, यथा-उच्चैःकृत्य, उच्चैःकृत्वा, उच्चैःकारमप्रियमाचष्टे । नीचैःकृत्य, नीचैःकृत्वा, नीचैःकारं प्रियं ब्रूते ॥

३३८२ तिर्यच्यपवर्गे । ३ । ४ । ६०॥

तिर्यक्शब्द उपपदे कृञः क्त्वाणमुलौ स्तः समाप्तौ गम्यायाम् । तिर्यक्कृत्य-तिर्यक्कृत्वा-तिर्यक्कारं गतः । समाप्य गत इत्यर्थः । अपवर्गे किम् । तिर्यक्कृत्वा काष्ठं गतः ॥

३३८२-समाप्ति अर्थ होनेपर और तिर्यक् शब्द उपपद होनेपर कृञ् धातुके उत्तर क्त्वा और णमुल् प्रत्यय हो,यथा-तिर्यक्कृत्य तिर्यक्कृत्वा तिर्यक्कारं गतः, समाप्य ग-

इत्यर्थः । अपवर्ग अर्थात् समाप्ति अर्थ न होनेपर तिर्य्यक्-कृत्वा काष्ठं गतः ॥

३३८३ स्वांगे तस्प्रत्यये कृभ्वोः । ३ । ४ । ६१ ॥

मुखतःकृत्य गतः । मुखतः कृत्वा । मुखतःकारम् । मुखतोभूय । मुखतो भूत्वा । मुखतोभावम् ॥

३३८३-तस् प्रत्ययान्त स्वाङ्गवाचक शब्द उपपद रहते कृ और भू धातुके उत्तर णमुल् प्रत्यय हो, यथा मुखतःकृत्य गतः, मुखतः कृत्वा । मुखतःकारम् । मुखतोभूयः । मुखतो भूत्वा । मुखतोभावम् ॥

३३८४ नाधार्थप्रत्यये च्व्यर्थे । ३ । ४ । ६२ ॥

नाधार्थप्रत्ययान्ते च्व्यर्थविषये उपपदे कृभ्वोः क्त्वाणमुलौ स्तः । अनाना नाना कृत्वा नानाकृत्य-नाना कृत्वा-नानाकारम् । विनाकृत्य-विना कृत्वा-विनाकारम् । नानाभूय-नाना भूत्वा-नानाभावम् । अनेकं द्रव्यमेकं भूत्वा :एकधाभूय-एकधा भूत्वा-एकधाभावम् । एकधाकृत्य-एकधाकृत्वा-एकधाकारम् । प्रत्ययग्रहणं किम् । हिरुक्कृत्वा । पृथग्भूत्वा ॥

३३८४-च्वि प्रत्ययार्थ विषयमें अर्थात् अभूत तद्भाव में नाधार्थ प्रत्ययान्त पद उपपद होनेपर कृ और भू धातुके उत्तर क्त्वा और णमुल् प्रत्यय हो, यथा-अनाना नाना कृत्वा । नानाकृत्य । नाना कृत्वा । नानाकारम् । विनाकृत्य । विना कृत्वा । विनाकारम् । नानाभूय । नाना भूत्वा । नानाभावम् । अनेकं द्रव्यमेकं भूत्वा । एकधाभूय । एकधा भूत्वा । एकधाभावम् । एकधाकृत्य । एकधा कृत्वा । एकधाकारम् । नाधार्थ प्रत्यय न होनेपर, हिरुक् कृत्वा । पृथग् भूत्वा । इस स्थानमें इस सूत्र करके प्रत्यय नहीं हुआ ॥

३३८५ तूष्णीमि भुवः । ३ । ४ । ६३ ॥

तूष्णींशब्दे भुवः क्त्वाणमुलौ स्तः । तूष्णींभूय । तूष्णींभूत्वा । तूष्णीं भावम् ॥

३३८५-तूष्णीम् शब्द उपपद रहते भूधातुके उत्तर क्त्वा और णमुल् प्रत्यय हों, यथा-तूष्णींभूय । तूष्णीं भूत्वा । तूष्णींभावम् ॥

३३८६ अन्वच्यानुलोम्ये । ३ । ४ । ६४ ॥

अन्वक्शब्द उपपदे भुवः क्त्वाणमुलौ स्तः आनुकूल्ये गम्यमाने । अन्वग्भूय आस्ते । अन्वग्भूत्वा । अन्वग्भावम् । अग्रतः पार्श्वतः पृष्ठतो वाऽनुकूलो भूत्वा आस्त इत्यर्थः । आनुलोम्ये किम् । अन्वग्भूत्वा तिष्ठति । पृष्ठतो भूत्वेत्यर्थः ॥

इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम् ।
विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे ॥ १ ॥
भट्टोजिदीक्षितकृतिः सैषा सिद्धान्तकौमुदी ।
प्रीत्यै भूयाद्भगवतोर्भवानीविश्वनाथयोः ॥ २ ॥

इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यामुत्तरार्धं समाप्तम् ॥

३३८६-अन्वक् शब्द उपपद होनेपर और आनुकूल्य अर्थ होनेपर भू धातुके उत्तर क्त्वा और णमुल् प्रत्यय हो, यथा अन्वग्भूय आस्ते । अन्वग्भूत्वा । अन्वग्भावम् । अग्रतः पार्श्वतः पृष्ठतः वानुकूलो भूत्वा आस्ते इत्यर्थः । जिस स्थानमें आनुकूल्य अर्थ नहीं होगा, उस स्थानमें णमुल् प्रत्यय नहीं होगा, केवल क्त्वा प्रत्यय होगा, यथा-अन्वग्भूत्वा तिष्ठति । तिष्ठतो भूत्वा तिष्ठति इत्यर्थः ॥

इस प्रकार इस ग्रन्थमें दिङ्मात्र लौकिक शब्दोंके प्रयोग दिखाये हैं इनका विस्तार शब्दकौस्तुभमें देखना चाहिये । यह सिद्धान्तकौमुदी भट्टोजिदीक्षितकी बनाई हुई है, यह भवानी और भगवान् विश्वनाथकी प्रीतिके निमित्त हो ॥ २ ॥

॥ इति कृदन्तप्रकरणं समाप्तम् ॥

॥ इति सिद्धान्तकौमुद्यां पंडितज्वालाप्रसादमिश्रकृतभाषाटीकायां कृदन्तप्रकरणं समाप्तम् ॥

॥ श्रीः ॥

॥ श्रीगणेशाय नमः ॥

अथ वैदिकप्रक्रिया ।

३३८७ छन्दसि पुनर्वस्वोरेकवचनम् । १ । २ । ६१ ॥

द्वयोरेकवचनं वा स्यात् । पुनर्वसुर्नक्षत्रं पुनर्वसू वा । लोके तु द्विवचनमेव ॥

३३८७–वेदमें पुनर्वसु शब्दसे द्विवचन स्थलमें विकल्प करके एक वचन हो, यथा–पुनर्वसुः नक्षत्रम् पुनर्वसू वा । लौकिकमें तो द्विवचन ही होगा, यथा–पुनर्वसू ॥

३३८८ विशाखयोश्च । १ । २ । ६२ ॥

प्राग्वत् । विशाखा नक्षत्रं विशाखे वा ॥

३३८८–वेदमें विशाखा शब्दसे द्विवचन स्थलमें विकल्प करके एकवचन हो, यथा–विशाखा नक्षत्रम् विशाखे वा ॥

३३८९ षष्ठीयुक्तश्छन्दसि वा । १ । ४ । ९ ॥

षष्ठ्यन्तेन युक्तः पतिशब्दश्छन्दसि घिसंज्ञो वा स्यात् । क्षेत्रस्य पतिना वयम् । इह वेति योगं विभज्य छन्दसीत्यनुवर्तते । तेन सर्वे विधयश्छन्दसि वैकल्पिकाः । बहुलं छन्दसीत्यादिरस्यैव प्रपञ्चः ॥ यचि भम् ॥ नभोङ्गिरोमनुषां वत्युपसंख्यानम् ॥ * ॥ नभसा तुल्यं नभस्वत् । भत्वाद्रुत्वाभावः । अङ्गिरस्वदङ्गिरः । मनुष्वदग्ने । जनेरुसीति विहित उसिप्रत्ययो मनेरपि बाहुलकात् ॥ वृषण्वस्वश्वयोः ॥ * ॥ वृष वर्षकं वसु यस्य स वृषण्वसुः । वृषा अश्वो यस्य वृषणश्वः । इहान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वे सति नलोपः प्राप्तो भत्वाद्वार्यते । अत एव पदान्तस्येति णत्वनिषेधोपि न । अल्लोपोऽन इत्यल्लोपो न अनङ्गत्वात् ॥

३३८९–वेदमें षष्ठी विभक्त्यन्त पदके साथ युक्त पति शब्द विकल्प करके घिसंज्ञक हो, यथा–क्षेत्रस्य पतिना वयम् । इस सूत्रमें वा शब्दका पृथक् ग्रहण करके 'छन्दसि' इस पदकी अनुवृत्ति आती है, इससे वेदमें सब विधि विकल्प करके होते हैं । "बहुलं छन्दसि ३४०१ " इत्यादि वक्ष्यमाण सूत्र इसका ही प्रपञ्च है । "यचिभम् २३१" यादि अजादि कप् प्रत्ययावधि स्वादि असर्वनाम स्थान परे रहते पूर्वको भ संज्ञा हो ॥

नभस्, अङ्गिरस् और मनुष् शब्दको भ संज्ञा हो वत् प्रत्यय परे रहते * यथा–नभसा तुल्यम्=नभस्वत् । इस स्थानमें भत्व होनेसे रुत्वाभाव होताहै । अङ्गिरसा तुल्यम्=अङ्गिरस्वदङ्गिरः । मनुषा तुल्यम्=मनुष्वदग्ने । यहां "जनेरुसि" इस सूत्रसे विहित उसि प्रत्यय केवल जन धातुके उत्तर (नहीं, किन्तु बाहुलकबलसे मन् धातुके उत्तर) भी हुआ । वसु और अश्व शब्द परे रहते वृषन् शब्दकी भ संज्ञा हो * यथा–वृष वर्षकं वसु यस्य सः=वृषण्वसुः । वृषा अश्वो यस्य=वृषणश्वः । इस स्थलमें अन्तर्वर्त्ती विभक्तिको आश्रय करके पदत्व होनेसे नलोपकी प्राप्ति हुई, परन्तु वह भत्वके कारण निवारित होताहै । अत एव " पदान्तस्य १९८ " इस सूत्रसे णत्वनिषेध भी नहीं होताहै । अङ्गसंज्ञा न होनेके कारण "अल्लोपोऽनः २३४" इस सूत्रसे अकारका लोप नहीं हुआ ॥

३३९० अयस्मयादीनि च्छन्दसि । १ । ४ । २० ॥

एतानि च्छन्दसि साधूनि । भपदसंज्ञाधिकाराद्यथायोगं संज्ञाद्वयं बोध्यम् । तथा च वार्तिकम् ॥ उभयसंज्ञान्यपीति वक्तव्यमिति ॥ * ॥ स सुष्टुभा स ऋक्वता गणेन । पदत्वात्कुत्वम् । भत्वाज्जश्त्वाऽभावः । जश्त्वविधानार्थाया: पदसंज्ञाया भत्वसामर्थ्येन बाधात् । नैनं हिन्वन्त्यपि वाजिनेषु । अत्र पदत्वाद् जश्त्वम् । भत्वात्कुत्वाभावः ॥ ते प्राग्धातोः ॥

३३९०–वेदमें अयस्मयादि शब्द निपातनसे सिद्ध हों । भ और पद संज्ञाधिकार होनेके कारण उक्त दोनों संज्ञा यथायोग समझनी चाहियें। इस विषयमें वृत्तिकारने कहाहै कि–वेदमें दोनों संज्ञा कहनी चाहियें * यथा–स सुष्टुभा स ऋक्वता गणन, इस स्थलमें पदत्वके कारण कुत्व हुआ है और भत्वके कारण जश्त्व नहीं हुआ क्यों कि, भत्व सामर्थ्यके कारण जश्त्वविधानार्थक पदसंज्ञाका बाध अर्थात् निषेध होताहै । नैनं हिन्वन्त्यपि वाजिनेषु (वाचामिनाःभवस्तेष्वप्येनं विद्वांसं न हिन्वन्ति विवदितुं न गच्छन्ति इत्यर्थः) इस स्थलमें पदत्वके कारण जश्त्व हुआहै और भत्वके कारण कुत्व नहीं हुआ । गतिसंज्ञक और उपसर्गसंज्ञक शब्द धातुओंके पूर्वमें ही प्रयुक्त हों ॥

३३९१ छन्दसि परेऽपि । १ । ४ । ८१ ॥

३३९१–वेदमें गतिसंज्ञक और उपसर्गसंज्ञक शब्द धातुके परेभी प्रयुक्त हों ॥

३३९२ व्यवहिताश्च । १ । ४ । ८२ ॥

हरिभ्यां याह्योक आ । आ मन्द्रैरिन्द्र हरिभिर्याहि ॥

३३९२–धातुसे व्यवहित भी गतिसंज्ञक और उपसर्गसंज्ञक शब्द प्रयुक्त हों, हरिभ्यां याह्योक आ । आ मन्द्रैरिन्द्र हरिभिर्याहि ॥

३३९३ इन्धिभवतिभ्यां च । १ । २ । ६ ॥

आभ्यां परो लिट् कित् । समीधे दस्युहन्तमम् । पुत्र ईधे अथर्वणः। बभूव। इदं प्रत्याख्यातम् ॥ इन्धेश्छन्दोविषयत्वाद्भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यमिति ॥

॥ इति प्रथमोऽध्यायः ॥

३३९३-वेदमें इन्ध् और भू धातुके उत्तर लिट् प्रत्यय कित् हो, यथा-समीधे दस्युहन्तमम् । पुत्र ! ईधे अथर्वणः । इस स्थलमें कित्वके कारण नकारका लोप हुआ है । बभूव । इस स्थलमें कित्वके कारण गुण नहीं हुआ । इन्धि धातुके छन्दोविषयत्वके कारण और भू धातुके वुक् आगमके नित्यत्वके कारण इन्ध और भू धातुके उत्तर लिट्को कित्वविधान करना निरर्थक है ॥

॥ इति प्रथमोऽध्यायः ॥

३३९४ तृतीया च होश्छन्दसि।२।३।३॥

जुहोतेः कर्मणि तृतीया स्याद्द्वितीया च। यवाग्वाऽग्निहोत्रं जुहोति । अग्निहोत्रशब्दोऽत्र हविषि वर्तते । यस्याग्निहोत्रमधिश्रितममेध्यमापद्येतेत्यादिप्रयोगदर्शनात्।अग्नये हूयत इति व्युत्पत्तेश्च । यवाग्वाख्यं हविर्देवतोद्देशेन त्यक्त्वा प्रक्षिपतीत्यर्थः ॥

३३९४-वेदमें हु धातुके कर्म्ममें तृतीया और द्वितीया विभक्ति हों, यथा-यवाग्वा अग्निहोत्रं जुहोति, अर्थात् यवागू नामक हवि देवतोद्देशसे अर्पण करताहै । 'यस्याग्निहोत्रमधिश्रितममेध्यमापद्येत ' इत्यादि प्रयोगदर्शनके कारण और "अग्नये हूयते " इस व्युत्पत्तिके कारण इस स्थानमें अग्निहोत्र शब्द हविर्वाचक है ॥

३३९५ द्वितीया ब्राह्मणे । २ । ३।६० ॥

ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि द्वितीया स्यात् । षष्ठ्यपवादः । गामस्य तदहः सभायां दीव्येयुः ॥

३३९५-ब्राह्मण विषयमें अर्थात् मंत्रभिन्न वैदिक प्रयोगोंमें द्यूतार्थक और क्रयविक्रय व्यवहारार्थक दिव् धातुके कर्म्ममें द्वितीया विभक्ति हो, यह षष्ठीविभक्तिकी अपवादक है, यथा-गामस्य तदहः सभायां दीव्येयुः ॥

३३९६ चतुर्थ्यर्थे बहुलं छन्दसि । २ । ३ । ६२ ॥

षष्ठी स्यात् । पुरुषमृगश्चन्द्रमसे गोधाकालकादार्वाघाटस्ते वनस्पतीनाम् । वनस्पतिभ्य इत्यर्थः ॥ षष्ठ्यर्थे चतुर्थीति वाच्यम् ॥ * ॥ या खर्वेण पिबति तस्यै खर्वः ॥

३३९६-वेदमें चतुर्थ्यर्थमें बहुल करके षष्ठी विभक्ति हो, यथा-पुरुषमृगश्चन्द्रमसे गोधाकालकादार्वाघाटस्ते वनस्पतीनाम्, इस स्थानमें ' वनस्पतिभ्यः ' के स्थलमें ' वनस्पतीनाम् ' हुआहै ।

षष्ठ्यर्थमें चतुर्थी हो, यह कहना चाहिये*यथा-या खर्वेण पिबति तस्यै खर्वः ॥

३३९७ यजेश्च करणे । २ । ३ । ६३ ॥

इह छन्दसि बहुलं षष्ठी । घृतस्य घृतेन वा यजते ॥

३३९७-वेदमें यज् धातुके करणमें विकल्प करके षष्ठी विभक्ति हो, यथा-घृतस्य घृतेन वा यजते ॥

३३९८ बहुलं छन्दसि ।२। ४ । ३९ ॥

अदो घस्लादेशः स्यात् । घस्तान्नूनम् । लुङि मन्त्रे घसेति च्लेर्लुक् अधभावः । सग्धिश्च मे ॥

३३९८-वेदमें अद् धातुके स्थानमें विकल्प करके घस्लृ आदेश हो, यथा-घस्तान्नूनम् । लुङ् परे रहते " मंत्रे घसह्वर ३४०२ " इत्यादि वक्ष्यमाण सूत्रसे च्लिको लुक् और अडागमाभाव हुआ । "सग्धिश्चमे" यहां अद् धातुसे क्तिन्, घस्लादेश, "घसिभसोर्हलि च ३५५० " इस सूत्रसे उपधालोप, "झलो झलि २२८१ " इस सूत्रसे सकारलोप, "झषस्तथोः० २२८० " इस सूत्रसे धत्व, घके स्थानमें ज, पश्चात् समान शब्दके साथ समास और समानको स आदेश हुआहै ॥

३३९९ हेमन्तशिशिरावहोरात्रे च च्छन्दसि । २ । ४ । २८ ॥

द्वन्द्वः पूर्ववल्लिंगः । हेमन्तश्च शिशिरं च हेमन्तशिशिरौ । अहोरात्रे । अदिप्रभृतिभ्यः शपः ॥

३३९९-वेदमें हेमन्तशिशिरौ और अहोरात्रे यह दो पद द्वन्द्व समासमें पूर्ववत् लिङ्गको प्राप्त हों, यथा-हेमन्तश्च शिशिरश्च=हेमन्तशिशिरौ । अहश्च रात्रिश्च=अहोरात्रे । " अदिप्रभृतिभ्यः शपः २४२२ " अदादि धातुके परे स्थित शप्का लुक् हो ॥

३४०० बहुलं छन्दसि । २ । ४।७३ ॥

वृत्रं हनति वृत्रहा । अहिः शयत उपपृक् पृथिव्याः । अत्र लुङ् न । अदादिभिन्नेऽपि क्वचिल्लुक् । त्राध्वं नो देवाः । जुहोत्यादिभ्यः श्लुः ॥

३४००-वेदमें बहुल करके अदादि गणीय धातुओंके उत्तर शप्का लुक् हो, यथा-वृत्रं हनति वृत्रहा । अहिः शयत उपपृक् पृथिव्याः । इस स्थानमें शप्का लुक् नहीं हुआ। अदादिभिन्न स्थलमें भी कहीं २ लुक् होगा, यथा-त्राध्वं नो देवाः । इस स्थलमें भ्वादिगणीय त्रै धातुके उत्तर शप्का लुक् हुआहै । "२४८९" जुहोत्यादिगणीय धातुओंके उत्तर शप्के स्थानमें श्लु आदेश हो, यह सूत्र यहां स्मरणार्थ उल्लिखित है ॥

३४०१ बहुलं छन्दसि । २ । ४ । ७६॥

दाति प्रियाणि चिद्वसु । अन्यत्रापि । पूर्णां विवष्टि ॥

३४०१-वेदमें जुहोत्यादिगणीय धातुके उत्तर बहुल करके शप्के स्थानमें श्लु आदेश हो, यथा-दाति प्रियाणि चिद्वसु । जुहोत्यादिभिन्न धातुके उत्तर भी श्लु आदेश होगा, यथा-

पूर्णा विवष्टि, यहां अदादिगणीय वश् धातुके उत्तर शप्को लुक्, पश्चात् द्वित्व, "भृञामित् २४९६" बहुलं छन्दसि इस सूत्रसे अभ्यासको इकार "व्रश्च० २९४" इस सूत्रसे शके स्थानमें ष और तके स्थानमें ट हुआ ॥

३४०२ मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः । २ । ४ । ८० ॥

लिरिति च्लेः प्राचां संज्ञा । एभ्यो लेर्लुक् स्यान्मन्त्रे । अक्षन्नमी मदन्त हि । घस्लादेशस्य गमहनेत्युपधालोपे शासिवसीति षः । माह्वर्मित्रस्य । धूर्तिः प्रणङ्मर्त्यस्य । नशेर्वेति कुत्वम् । सुरुचो वेन आवः । मा न आधक् । आदित्याकारान्तग्रहणम् । आप्रा द्यावापृथिवी । परावर्ग्भारभृद्यथा । अक्रन्नुषसः । त्वे रयिं जागृवांसो अनुग्मन् । मन्त्रग्रहणं ब्राह्मणस्याप्युपलक्षणम् । अज्ञत वा अस्य दन्ताः । विभाषानुवृत्तेर्नेह । न ता अगृभ्णन्नजनिष्ट हि षः ॥

॥ इति द्वितीयोऽध्यायः ॥

३४०२-मंत्रमें घस् (अद धातुके स्थानमें आदिष्ट) ह्वर (ह्वृ कौटिल्ये) णश (णश अदर्शने) वृ (वृञ् वरणे) वृङ् (वृङ् सम्भक्तौ) दह (दह भस्मी करणे) आत् (आकारान्त प्रा-पूरणे इत्यादि) वृज् (वृजी वर्जने) कृ (डुकृञ् करणे) गम और जन् धातुओंके परे स्थित लिं अर्थात् च्लिका लुक् हो, यथा-अक्षन्नमीमदन्त हि, यहां अद+लुङ्+झि-घस्लादेश, "गमहन २३६३" इस सूत्रसे उपधालोप, "शासिवसि० २४१०" इस सूत्रसे सके स्थानमें ष-हुआहै । माह्वर्मित्रस्य (माङ् पूर्वक ह्वृ+लुङ्+तिप् "इतश्च २२०७" इस सूत्रसे इकार लोप, च्लिका लुक्+सार्वधातुकत्वके कारण गुण, रपरत्व और "हल्ङ्याप्० २५२" इस सूत्रसे लोप हुआ है । धूर्तिः प्रणङ्मर्त्यस्य । प्र+णश्+लुङ्, तिप्, "हल्ङ्याप्०" इस सूत्रसे लोप, "उपसर्गादसमासे (२२८७)" इस सूत्रसे णत्व, शकारके स्थानमें ककार, कके स्थानमें ङ् होकर प्रनङ्) । सुरुचो वेन आवः । (आवृ+लुङ्+सिप्=आवः) । मान आधक् । (आदह "दादेर्धातोः० ३२५" इस सूत्रसे घ आदेश, "एकाचो बशो० ३२६" से भष्भाव) । "आप्रा द्यावा पृथिवी" परावर्ग्भारभृद् यथा । अक्रन्नुषसः । त्वे रयिं जागृवांसोऽनुग्मन् । मंत्र शब्द ग्रहण ब्राह्मणका भी उपलक्षण अर्थात् ग्राहक होताहै । यथा-"अज्ञत वा अस्य दन्ताः" । लोकमें यथा-अघसत् । अह्वार्षीत् । अनशत् । अवारीत् । अधाक्षीत् । आप्रासीः । अवर्जीत् । अकार्षीत् । अगमत् । अजनि, अजनिष्ट । विभाषाकी अनुवृत्तिके कारण यहां च्लिका लुक् नहीं होगा, यथा-"न ता अगृभ्णन्नजनिष्ट हि षः" ॥

॥ इति द्वितीयोऽध्यायः ॥

३४०३ अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्निति च्छन्दसि । ३ । १ । ४२ ॥

आद्येषु चतुर्षु लुङि आम् अक इत्यनुप्रयोगश्च । अभ्युत्सादयामकः । अभ्युदसीषददिति लोके । प्रजनयामकः । प्राजीजनदित्यर्थः । चिकयामकः । अचैषीदित्यर्थे चिनोतेराम् द्विर्वचनं कुत्वं च । रमयामकः । अरीरमत् । पावयांक्रियात् । पाव्यादिति लोके । विदामक्रन् । अवेदिषुः ॥

३४०३-वेदमें अभ्युत्सादयामकः, प्रजनयामकः, चिकयामकः, रमयामकः, पावयांक्रियात् और विदामक्रन् इत्यादि पद निपातनसे सिद्ध हों, इस स्थलमें प्रथम चार पदोंमें लुङ् परे आम्, और अक्का अनुप्रयोग हो, यथा-अभ्युत्सादयामकः । लोकमें अभ्युदसीषदत् । इसी प्रकार प्रजनयामकः । लोकमें, प्राजीजनत् । चिकयामकः । अचैषीत् । इस अर्थमें चि धातुके उत्तर आम्, द्वित्व और कुत्व हुआ है । रमयामकः । लोकमें, अरीरमत् । पावयांक्रियात् । लोकमें, पाव्यात् । विदामक्रन् । लोकमें, अवेदिषुः ॥

३४०४ गुपेश्छन्दसि । ३ । १ । ५० ॥

च्लेश्चङ् । अजूगुपतं युवम् । अगोप्तमित्यर्थः ॥

३४०४-गुप् धातुके उत्तर च्लिके स्थानमें विकल्प करके चङ् आदेश हो, यथा-अजूगुपतं युवम् । अगोप्तमित्यर्थः ॥

३४०५ नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः । ३ । १ । ५१ ॥

च्लेश्चङ् न । मा त्वायतो जरितुः काममूनयीः । मा त्वामिर्ध्वनयीत् ॥

३४०५-वेदमें ऊन धातु, ध्वन धातु, इल धातु, अर्द धातुके उत्तर च्लिके स्थानमें चङ् आदेश न हो, यथा-मा त्वायतो जरितुः काममूनयीः (त्वायतः त्वामिच्छतः जरितुः, स्तोतुः । मम काममभिलाषं मा ऊनयीः ऊनं मा कार्षीः) लोकमें औनः "मा त्वामिर्ध्वनयीत्" । भाषामें अदध्वनत् । ऐलयीत् । आर्दयीत् । लोकमें ऐलिलत् । आर्दिदत् ॥

३४०६ कृमृदृरुहिभ्यश्छन्दसि । ३ । १ । ५९ ॥

च्लेरङ् वा । इदं तेभ्योकरं नमः । अमरत् । अदरत् । यत्सानोः सानुमारुहत् ॥

३४०६-वेदमें कृ, मृ, दृ, और रुह धातुके उत्तर च्लिके स्थानमें विकल्प करके अङ् हो, यथा-"इदं तेभ्योऽकरं नमः" । अमरत् । अदरत् । यत्सानोः सानुमारुहत् । लोकमें, अकार्षीत् । अमृत । अदारीत् । अरुक्षत् ॥

३४०७ छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि ।३।१।१२३॥

कृन्ततेर्निसपूर्वात् क्यपि प्राप्ते ण्यत् । आद्यन्तयोर्विपर्यासः निसः षत्वं च। निष्टर्क्यं चिन्वीत पशुकामः । देवशब्दे उपपदे ह्वयतेर्जुहोतेर्वा क्यप् दीर्घश्च । स्पर्द्धन्ते वा उ देवहूये । प्र उत् आभ्यां नयतेः क्यप् । प्रणीयः । उन्नीयः । उत्पूर्वाच्छिषेः क्यप् । उच्छिष्यः । मृङ्स्तृञ्ध्वृभ्यो यत् । मर्यः । स्तर्या । स्त्रियामेवायम् । ध्वर्यः । खनेर्यण्यतौ खन्यः । खान्यः । यजेर्यः। शुन्धध्वं दैव्याय कर्मणे देवयज्यायै । आङ्पूर्वात्पृच्छेः क्यप् । आपृच्छ्यं धरुणं वा ज्यर्षति। सीव्यतेः क्यप् षत्वं च । प्रतिषीव्यः । ब्रह्मणि वदेर्ण्यत् । ब्रह्मवाद्यम्। लोके तु वदः सुपि क्यप् चेति क्यब्यतौ।भवतेः स्तौतेश्च ण्यत् । भाव्यः। स्ताव्यः। उपपूर्वाच्चिनोतर्ण्यदायादेशश्च पृड उत्तरपदे । उपचाय्यपृडम् ॥ हिरण्य इति वक्तव्यम् ॥ * ॥ उपचेयपृडमेवान्यत् । मृड सुखने पृड चेत्यस्मादिगुपधलक्षणः कः ॥

३४०७-वेदमें निष्टर्क्य, देवहूय, प्रणीय, उन्नीय, उच्छिष्य, मर्य्य, स्तर्य्या, ध्वर्य्य, खन्य, खान्य, देवयज्य, आपृच्छ्य, प्रतिषीव्य, ब्रह्मवाद्य, भाव्य, स्ताव्य, उपचाय्य पृड, यह पद निपातनसे सिद्ध हों। निस्पूर्वक कृन्त धातुसे क्यप् प्राप्त होनेपर ण्यत् प्रत्यय हुआ, आदि और अन्तका विपर्य्यास और निस्‌को षत्व होकर नैष्टर्क्यं चिन्वीत पशुकामः । देवपूर्वक ह्वे अथवा हु धातुके उत्तर क्यप्, पूर्वस्वरको दीर्घ होकर-स्पर्द्धन्ते वा उ देवहूये । प्रपूर्वक नी धातुसे क्यप्= प्रणीयः । उत्पूर्वक नी धातुसे क्यप्=उन्नीयः । उत्पूर्वक शिष् धातुसे क्यप्=उच्छिष्यः । मृङ्, स्तृञ्, ध्वृ धातुके उत्तर यत् प्रत्यय होकर-मर्य्यः । स्तर्य्या, यह पद स्त्रीलिङ्गमें ही हो, ध्वर्य्यः । खन+यत्=खन्यः । खन+ण्यत्=खान्यः । देवशब्दपूर्वक यज्+यत्=शुन्धध्वं दैव्याय कर्म्मणे देवयज्यायै । आङ्पूर्वक प्रच्छ्+क्यप्=आपृच्छ्यं धरुणं वा ज्यर्षति । प्रति+सिव+क्यप्+षत्व=प्रतिषीव्यः । ब्रह्मपूर्वक वद्+ण्यत्=ब्रह्मवाद्यम् । लोकमें तो "वदः सुपि क्यप् च २८५४" इस सूत्रसे वद् धातुके उत्तर क्यप् और यत् प्रत्यय होगा । भू स्तु धातुसे ण्यत्=भाव्यः । स्ताव्यः। पृड शब्द परे रहते उपपूर्वक चि धातुके उत्तर ण्यत् प्रत्यय और आयादेश होकर-उपचाय्य पृडम् ।

हिरण्यवाच्यमें 'उपचाय्य पृडम्' यह हो ऐसा कहना चाहिये * (इससे अन्य वाच्यमें) 'उपचेयपृडम्' ऐसा होगा, यहां 'मृड सुखने पृड च' इस पृड् धातुके उत्तर " इगुपधज्ञाप्रीकिरः कः २८९७ " इस सूत्रसे क प्रत्यय हुआ है ॥

३४०८ छन्दसि वनसनरक्षिमथाम् । ३ । २ । २७ ॥

एभ्यः कर्मण्युपपदे इन् स्यात् । ब्रह्मवनिं त्वा क्षत्रवनिम् । उत नो गोषणिं धियम् । ये पथां पथिरक्षयः । चतुरक्षौ पथिरक्षी । हविर्मथीनामभि ॥

३४०८-वेदमें कर्म्म पद पूर्वमें रहते वन्, सन्, रक्ष् और मन्थ् धातुओंके उत्तर इन् हो, यथा-ब्रह्मवनिं त्वा क्षत्रवनिम् । उत नो गोषणिं धियम् । ये पथां पथिरक्षयः । चतुरक्षौ पथिरक्षी । हविर्मथीनामभि ॥

३४०९ छन्दसि सहः । ३ । २ । ६३ ॥

ण्विः स्यात् । पृतनाषाट् ॥

३४०९-वेदमें कर्म्म पद पूर्वमें रहते सह धातुके उत्तर ण्वि प्रत्यय हो, यथा-पृतनाषाट्, लोकमें 'तुराषाहं पुरोधाय' इस प्रकार प्रयोग देखाजाताहै उस स्थलमें णिजन्त सह धातुके उत्तर क्विप् प्रत्यय हुआहै ॥

३४१० वहश्च । ३ । २ । ६४ ॥

प्राग्वत् । दित्यवाट् । योगविभाग उत्तरार्थः॥

३४१०-वेदमें कर्म्म पद पूर्वमें रहते वह धातुके उत्तर ण्वि प्रत्यय हो, यथा-दित्यवाट् । भिन्नसूत्रकरण उत्तरार्थ है ॥

३४११ कव्यपुरीषपुरीष्येषु ञ्युट् । ३ । २ । ६५ ॥

एषु वहेर्ञ्युट् स्याच्छन्दसि । कव्यवाहनः । पुरीषवाहनः । पुरीष्यवाहनः ॥

३४११-वेदमें कव्य पुरीष और पुरीष्य शब्दके परे स्थित वह धातुके उत्तर ञ्युट् प्रत्यय हो, यथा-कव्यवाहनः । पुरीषवाहनः । पुरीष्यवाहनः ॥

३४१२ हव्येऽनन्तः पादम् । ३ ।२।६६॥

अग्निर्नो हव्यवाहनः । पादमध्ये तु वहश्चेति ण्विरेव । हव्यवाळग्निरजरः पिता नः ॥

३४१२-वेदमें हव्य शब्दके परे स्थित वह धातुके उत्तर ञ्युट् प्रत्यय हो, यदि पादके मध्यमें नः हो, यथा-अग्निर्नो हव्यवाहनः । पादके मध्यमें होनेपर तो "वहश्च" इस पूर्वसूत्रसे ण्वि प्रत्यय ही होगा, यथा-हव्यवाळग्निरजरः पिता नः । दोस्वरोंके मध्यमें प्राप्त हो तो डकारको ळकार होताहै, ऐसा प्रातिशाख्यमें प्रसिद्ध है ॥

३४१३ जनसनखनक्रमगमो विट्। ३।२।६७॥

विड्वनोरित्यात्त्वम्। अब्जा। गोजाः। गोषा इन्द्रो नृषा असि। सनोतेरन इति षत्वम्। इयं शुष्मेभिर्विसखा इवारुजत्। आ दधिक्राः शवसा पञ्च कृष्टीः। अग्रेगाः॥

३४१३–वेदमें उपसर्गपूर्वक जन् सन् खन् क्रम् और गम् धातुके उत्तर विट् प्रत्यय हो, "विड्वनोः० २९९२" इस सूत्रसे आत्व होकर अब्जा गोजाः। 'गोषा इन्द्रो नृषा असि' इस स्थलमें "सनोतेरनः ३६४५" इस सूत्रसे सन् धातुके सकारको षत्व हुआहै। इयं शुष्मेभिर्विसखा इवारुजत्। आ दधिक्राः शवसा पञ्च कृष्टीः। अग्रेगाः॥

३४१४ मंत्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्। ३।२।७१॥

श्वेतवहादीनां डस्पदस्येति वक्तव्यम्॥ * ॥ यत्र पदत्वं भावि तत्र ण्विनोपवादो डस्वक्तव्य इत्यर्थः। श्वेतवाः। श्वेतवाहौ। श्वेतवाहः। उक्थानि उक्थैर्वा शंसति उक्थशा यजमानः। उक्थशासौ। उक्थशासः। पुरो दाश्यते दीयते पुरोडाः॥

३४१४–मंत्रमें श्वेत, उक्थ, पुरस् शब्द पूर्वमें रहते क्रमसे वह्, शंसु, दाशृ धातुओंके उत्तर ण्विन् प्रत्यय हो अर्थात् कर्तृवाचक श्वेत शब्द पूर्वमें रहते वह् धातुके उत्तर कर्म्मकारकमें ण्विन् प्रत्यय हो। कर्म्म और करणवाचक उक्थ शब्दके परे स्थित शंस धातुके उत्तर ण्विन् प्रत्यय और धातुके नकारका लोप हो। पुरस् शब्द पूर्वक दाशृ धातुके उत्तर कर्म्मकारकमें ण्विन् प्रत्यय और दके स्थानमें ड हो।

जिस स्थानमें श्वेतवाहादि शब्दोंको पदत्व होनेवाला हो उस स्थानमें ण्विन्का विशेषक डस् प्रत्यय हो * यथा–श्वेता एनं वहन्ति=श्वेतवाः। श्वेतवाहौ। श्वेतवाहः। उक्थानि उक्थैर्वा शंसति, इस वाक्यमें उक्थशाः, अर्थात् यजमानः। उक्थशासौ। उक्थशासः। पुरो दाश्यते, दीयते इस वाक्यमें पुरोडाः, अर्थात् हविः॥

३४१५ अवे यजः। ३।२।७२॥

अवयाः। अवयाजौ। अवयाजः॥

३४१५–मंत्रमें अवपूर्वक यज् धातुके उत्तर ण्विन् प्रत्यय हो, यथा–अवयाः। अवयाजौ। अवयाजः। योगविभाग उत्तरार्थ है "पुरोडाशावयजोण्विन्" इस प्रकार एक सूत्र करनेपर तो परसूत्रमें श्वेतवाहादिकी भी अनुवृत्ति होजाती, और अवपूर्वक ही यज् धातुकी अनुवृत्ति होजाती इष्ट तो केवलका ही है, इसलिये योगविभाग है॥

३४१६ अवयाः श्वेतवाः पुरोडाश्च। ८।२।६७॥

एते सम्बुद्धौ कृतदीर्घा निपात्यन्ते। चादुक्थशाः॥

३४१६–मंत्रमें अवयाः, श्वेतवाः और पुरोडाः यह संबोधनमें कृतदीर्घ निपातनसे सिद्ध हों। चकारसे 'उक्थशाः' पद भी निपातनसे सिद्ध हो। सम्बोधनमें 'अत्वसन्तस्य' इसकी प्राप्ति न होगी, कारण कि, उसमें असम्बुद्धिकी अनुवृत्ति आती है, इस कारण सम्बोधनमें निपातनसे दीर्घ कियाहै॥

३४१७ विजुपे छन्दसि। ३।२।७३॥

उपे उपपदे यजेर्विच्। उपयट्॥

३४१७–वेदमें उपपूर्वक यज् धातुके उत्तर विच् प्रत्यय हो, यथा–उपयट्॥

३४१८ आतो मनिन्क्वनिब्वनिपश्च। ३।२।७४॥

सुप्युपसर्गे चोपपदे आदन्तेभ्यो धातुभ्यश्छन्दसि विषये मनिनादयस्त्रयः प्रत्ययाः स्युः। चाद्विच्। सुदामा। सुधीवा। सुपीवा। भूरिदावा। घृतपावा। विच्। कीलालपाः॥

३४१८–वेदमें सुबन्त और उपसर्ग उपपद रहते आकारान्त धातुके उत्तर मनिन्, क्वनिप् और वनिप् प्रत्यय हो, और चकारनिर्देशके कारण विच् प्रत्यय भी हो, यथा–सु+दा+मनिन्=सुदामा। सु+धा+क्वनिप्=सुधीवा। सु+पा+क्वनिप्=सुपीवा। भूरिदावा। घृतपावा। विच् प्रत्ययमें यथा–कीलालपाः॥

३४१९ बहुलं छन्दसि। ३।२।८८॥

उपपदान्तरेपि हन्तेर्बहुलं क्विप् स्यात्। मातृहा। पितृहा॥ छन्दसि लिट्। ३। २। १०५। भूतसामान्ये। अहं द्यावापृथिवी आ ततान॥ लिटः कानज्वा। ३। २। १०६। क्वसुश्च। ३। २। १०७॥ छन्दसि लिटः कानच्क्वसू वा स्तः। चक्राणा वृष्णिम्। यो नो अग्ने अररिवाँ अघायुः॥ छन्दसि परेच्छायामपि क्यच्वक्तव्यः॥ * ॥ क्याच्छन्दसि। ३। २। १७०॥ उप्रत्ययः स्यात्। अघायुः॥ एरजधिकारे जवसवौ छन्दसि वाच्यौ॥ * ॥ ऊर्वोस्तु मे जवः। देवस्य सवितुः सवे॥

३४१९–वेदमें ब्रह्म, भ्रूण, वृत्रभिन्न भी उपपद रहते हन् धातुके उत्तर बहुल करके क्विप् प्रत्यय हो, यथा–मातृ+हन्+क्विप्=मातृहा। पितृहा।

वेदमें भूतसामान्यमें धातुके उत्तर लिट् प्रत्यय हो, (३०९३) यथा–अहं द्यावापृथिवी आ ततान।

वेदमें धातुओंके उत्तर लिट्के स्थानमें विकल्प करके कानच् और क्वसु प्रत्यय हो (३०९४। ३०९५) यथा–चक्राणा वृष्णिम्। यो नो अग्ने अररिवाँ अघायुः।

वेदमें परकी इच्छा होनेपर भी धातुके उत्तर क्यच् प्रत्यय हो *॥

वेदमें क्यच् प्रत्ययान्त धातुके उत्तर उ प्रत्यय हो(३१५०) यथा-अघ शब्द+क्यच्+अघाय धातु+उ=अघायुः यहां परस्याघमिच्छति, इस अर्थमें क्यच् प्रत्यय, "अश्वाघस्यात्" इस वक्ष्यमाण सूत्रसे अकारादेश, तदन्तसे उ प्रत्यय हुआहै।

'एरच्' इस अधिकारमें वेदमें जव, सव यह दो पद निष्पन्न हों * अर्थात् जु और सू धातुके उत्तर "ऋदोरप्" इस सूत्रसे अप् प्रत्यय प्राप्त होनेपर अच् प्रत्यय हो, यथा-ऊर्वोस्तु मे जवः। देवस्य सवितुः सवे ॥

३४२० मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः। ३। ३। ९६॥

वृषादिभ्यः क्तिन् स्यात्स चोदात्तः। वृष्टिं दिवः। सुम्नमिष्टये। पचात्पक्तीरुत। इयं ते नव्यसी मतिः। वित्तिः। भूतिः। अग्न आ याहि वीतये। रातौ स्यामोभयासः॥

३४२०-मंत्रमें वृष्, इष्, पच्, मन्, विद्, भू, वी और रा धातुके उत्तर क्तिन् प्रत्यय हो और वह उदात्त हो, यथा-वृष्टिन्दिवः। सुम्नमिष्टये। पचत्पक्तीरुत। इयं ते नव्यसी मतिः। वित्तिः। भूतिः। अग्न आयाहि वीतये। रातौ स्यामोभयासः॥

३४२१ छन्दसि गत्यर्थेभ्यः। ३। ३। १२९॥

ईषदादिषूपपदेषु गत्यर्थेभ्यो धातुभ्यश्छन्दसि युच् स्यात्। खलोऽपवादः। सूपसदनोऽग्निः॥

३४२१-वेदमें ईषत् इत्यादि शब्दोंके परे स्थित गत्यर्थ धातुके उत्तर युच् (अन्) प्रत्यय हो, यह सूत्र खल प्रत्ययका अपवाद है, यथा-सूपसदनोऽग्निः॥

३४२२ अन्येभ्योपि दृश्यते। ३। ३। १३०॥

गत्यर्थेभ्यो येन्ये धातवस्तेभ्योपि छन्दसि युच् स्यात्। सुवेदनामकृणोद्ब्रह्मणे गाम्॥

३४२२-गत्यर्थकसे भिन्नार्थक धातुके उत्तर भी वेदमें युच् (अन्) प्रत्यय हो, यथा-सुवेदनामकृणोद् ब्रह्मणे गाम्॥

३४२३ छन्दसि लुङ्लङ्लिटः। ३। ४। ६॥

धात्वर्थानां सम्बन्धे सर्वकालेष्वेते वा स्युः। पक्षे यथास्वं प्रत्ययाः। लुङ्। देवो देवेभिरागमत्। लोडर्थे लुङ्। इदं तेभ्योकरं नमः। लङ्। अग्निमद्य होतारमवृणीतायं यजमानः। लिट्। अद्य ममार। अद्य म्रियत इत्यर्थः॥

३४२३-वेदमें धात्वर्थसंबन्धमें भूत, भविष्यत्, वर्त्तमानमें धातुओंके उत्तर विकल्प करके लुङ्, लङ् और लिट् लकार हो, विकल्पपक्षमें यथाप्राप्त प्रत्यय होंगे। लुङ् यथा-देवो देवेभिरागमत् यहां 'आगच्छतु' इस लोडर्थमें लुङ् हुआहै। "इदन्तेभ्योऽकरन्नमः" यहां "कृमृदृरुहिभ्यश्छन्दसि" इससे जिसको अङ् 'ऋदृशोऽङि' इससे गुण हुआ है। लङ् यथा-"अग्निमद्य होतारमवृणीतायं यजमानः" लिट् यथा-अद्य ममार। अद्य म्रियते इत्यर्थः॥

३४२४ लिङर्थे लेट्। ३। ४। ७॥

विध्यादौ हेतुहेतुमद्भावादौ च धातोर्लेट् स्याच्छन्दसि॥

३४२४-वेदमें लिङर्थमें अर्थात् विधि आदि और हेतुहेतुमद्भावादिमें धातुके उत्तर विकल्प करके लेट् प्रत्यय हो॥

३४२५ सिब्बहुलं लेटि। ३। १। ३४॥

३४२५-लेट् परे रहते धातुके उत्तर सिप् प्रत्यय हो, विकल्प करके-॥

३४२६ इतश्च लोपः परस्मैपदेषु। ३। ४। ९७॥

लेटस्तिङामितो लोपो वा स्यात्परस्मैपदेषु॥

३४२६-वेदमें परस्मैपदी धातुओंके उत्तर लेट् लकारके तिङ्के इकारका विकल्प करके लोप हो॥

३४२७ लेटोऽडाटौ। ३। ४। ९४॥

लेटः अट् आट् एतावागमौ स्तस्तौ च पितौ॥ सिब्बहुलं णिद्वक्तव्यः॥ *॥ वृद्धिः। प्रण आयूंषि तारिषत्। सुपेशसस्करति जोषिषद्धि। आ साविषदर्शसानाय। सिप इलोपस्य चाभावे। पताति विद्युत्। प्रियः सूर्ये प्रियो अग्ना भवाति॥

३४२७-वेदमें लेट् प्रत्ययको अट् और आट् यह दो आगम हों, और यह आगम पित् हों।

सिप् प्रत्यय बहुलकरके णित् हो*इस कारण सिप् परे वृद्धि होगी, यथा-प्रण आयूंषि तारिषत्। यहां तॄ धातुके उत्तर लेट् उसको तिप्, इकारका लोप, तिप् परे धातुसे सिप्, इट्, वृद्धि और अट्का आगम हुआहै। सुपेशसस्करति जोषिषद्धि। जुषी धातुसे परस्मैपदमें पूर्ववत् कार्य्य और गुणमात्र विशेष जानना। आसाविषत् अर्शसानाय। यहां आङ्पूर्वक सु धातुके उत्तर पूर्ववत् समस्त कार्य्य वृद्धिमात्र विशेष हुआहै। सिप् और इकारके लोपका अभाव पक्षमें यथा-पताति विद्युत्। (पत+तिप्-आट्)। प्रियः सूर्य्ये प्रियो अग्ना भवाति॥

३४२८ स उत्तमस्य। ३। ४। ९८॥

लेडुत्तमसकारस्य वा लोपः स्यात्। करवाव-करवावः। टेरेत्वम्॥

३४२८--लेट् लकारके उत्तमपुरुषके सकारका विकल्प करके लोप हो, यथा-करवाव, करवावः। टिको एकार होकर-॥

३४२९ आत ऐ। ३। ४। ९५॥

लेट आकारस्य ऐ स्यात्। सुतेभिः सुप्रयसा मादयैते। आतामित्याकारस्य ऐकारः। विधि-

सामर्थ्यादाट ऐत्वं न । अन्यथा हि ऐटमेव विदध्यात् । यो यजाति यजात इत् ॥

३४२९–लेट् लकारसम्बन्धी आकारके स्थानमें ऐकार आदेश हो, यथा–सुतेभिः सुप्रयसा, मादयैते । यहां 'आताम्' इस आकारके स्थानमें ऐकार आदेश हुआहै । विधिसामर्थ्यके कारण आट् आगमके आकारके स्थानमें ऐ नहीं होताहै, नहीं तो ऐट् आगम ही विधान करते । यथा–यो यजाति यजात इत् ॥

३४३० वैतोऽन्यत्र । ३ । ४ । ९६ ॥

लेट एकारस्य ऐ स्याद्वा । आत ऐ इत्यस्य विषयं विना । पशूनामीशै । ग्रहा गृह्यान्तै । अन्यत्र किम् । सुप्रयसा मादयैते ॥

३४३०–लेट् विभक्तिके एकारके स्थानमें विकल्प करके ऐकार हो, "आत ऐ३४२९" इस सूत्रका विषय न होनेपर, यथा–पशूनामीशैः । ग्रहा गृह्यान्तैः । अन्यत्र क्यों कहा ? तो 'सुप्रयसा मादयैते' यहां ऐत्व विकल्प करके न हो ॥

३४३१ उपसंवादाशङ्कयोश्च ।३।४।८ ॥

पणबन्धे आशंकायां च लेट् स्यात् । अहमेव पशूनामीशै । नेज्जिह्मायन्तो नरकं पताम॥ हलः श्नः शानज्झौ ॥

३४३१–उपसंवाद अर्थात् पणबन्ध और आशंकामें धातुके उत्तर लेट् प्रत्यय हो, यथा–अहमेव पशूनामीशै । यह त्रिपुरविजयके समय देवताओंसे प्रार्थित रुद्रका वाक्य है । अर्थात् मैं समस्त पशु अर्थात् जीवोंका अधिपति हूँ। नेज्जिह्मायन्तो नरकं पताम । "हलः श्नः शानज्झौ २५५७" अर्थात् हि परे रहते हल्वर्णके ` स्थित श्नके स्थानमें शानच् आदेश हो ॥

३४३२ छन्दसि शायजपि ।३।१।८४ ॥

अपिशब्दाच्छानच् । हृग्रहोर्भश्छन्दसीति हस्य भः । गृभाय जिह्वया मधु । बधान देव सवितः । अनिदितामिति बध्नातेर्नलोपः । गृभ्णामि ते । मध्वा जभार ॥

३४३२–वेदमें हि विभक्ति परे रहते श्नके स्थानमें शायच् और शानच् यह दो आदेश हों, "हृग्रहोर्भश्छन्दसि" इससे हृ और ग्रह धातुके हके स्थानमें भ होकर–यथा–गृभाय जिह्वया मधु । बधान देव सवितः । यहां "अनिदिताम्० ४१५" इस सूत्रसे बन्ध धातुके नकारका लोप हुआहै । गृभ्णामि ते । मध्वा जभार ॥

३४३३ व्यत्ययो बहुलम् ।३।१।८५ ॥

विकरणानां बहुलं व्यत्ययः स्याच्छन्दसि । आण्डा शुष्मस्य भेदति । भिनत्तीति प्राप्ते । जरसा मरते पतिः । म्रियत इति प्राप्ते । इन्द्रो वस्तेन नेषतु । नयतेर्लोट् शप्सिपौ द्वौ विकरणौ । इन्द्रेण युजा तरुषेम वृत्रम् । तरेमेत्यर्थः । तरतेर्विध्यादौ लिङ् । उः सिप् शप् चेति त्रयो विकरणाः ॥

सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च॥ व्यत्ययमिच्छति शास्त्रकृदेषां सोपि च सिध्यति बाहुलकेन ॥ १ ॥

धुरि दक्षिणायाः । दक्षिणस्यामिति प्राप्ते । चषालं ये अश्वयूपाय तक्षति । तक्षन्तीति प्राप्ते । उपग्रहः परस्मैपदात्मनेपदे । ब्रह्मचारिणमिच्छते । इच्छतीति प्राप्ते । प्रतीपमन्य ऊर्मिर्युध्यति । युध्यत इति प्राप्ते । मधोस्तृप्ता इवासते । मधुन इति प्राप्ते । नरः पुरुषः । अधा स वीरैर्दशभिर्वियूयाः । वियूयादिति प्राप्ते । कालः कालवाची प्रत्ययः । श्वोऽग्नीनाधास्यमानेन । लुटो विषये लट् । तमसो गा अदुक्षत् । अधुक्षदिति प्राप्ते । मित्र वयं च सूरयः । मित्रा वयमिति प्राप्ते । स्वरव्यत्ययस्तु वक्ष्यते । कर्तृशब्दः कारकमात्रपरः । तथा च तद्वाचिनां कृत्तद्धितानां व्यत्ययः । अन्नादाय । अण्विषये अच् । अवग्रहे विशेषः । यङो यशब्दादारभ्य लिङ्याशिष्यङिति ङकारेण प्रत्याहारः । तेषां व्यत्ययो भेदतीत्यादिरुक्त एव ॥

३४३३–वेदमें विकरणोंको अर्थात् आर्धधातुक स्थलमें स्य और तास् आदिओंको और सार्वधातुक स्थलमें शप् आदिओंको बहुल करके व्यत्यय हो, यथा–"आण्डा शुष्मस्य भेदति" यहां 'भिनत्ति' ऐसा प्राप्त था, परन्तु वेदमें वैसा होकर शप् होनेसे उक्त रूप सिद्ध हुआ । जरसा मरते पतिः–इस स्थलमें प्राणत्यागार्थक तुदादिगणीय मृङ् धातुके उत्तर 'तुदादिभ्यः शः' से श, रिङ्शयग्लिङ्क्षु' इससे रिङ् आदेश और इयङ्,होकर'म्रियते'ऐसा प्रयोग प्राप्त था किन्तु वेदमें शप् होकर 'मरते' पद हुआहै । इन्द्रो वस्तेन नेषतु । यहां नी धातुसे लोट् लकार और शप् सिप् दो विकरण हुये हैं । इन्द्रेण युजा तरुषेम वृत्रम् । तरेमेत्यर्थः । यहां तॄ धातुसे विध्यादिमें लिङ् और उ, सिप् और शप् यह तीन विकरण होकर 'तरुषेम' पद हुआ है ॥

व्याकरण शास्त्रकार महर्षि पाणिनिने सुप्, तिङ्, उपग्रह (आत्मनेपद और परस्मैपद) लिङ्ग, पुरुष, काल, व्यञ्जनवर्ण, स्वरवर्ण, स्वर कर्तृ (कारक सब और तद्वाचक कृत् और तद्धित) और यङ्के य शब्दसे लेकर "लिङ्याशिष्यङ् ३४३४" इस सूत्रोक्त ङकारसे यङ् प्रत्याहार है । उसके व्यत्ययकी इच्छा करते हैं, वह भी व्यत्यय बाहुलकबलसे सिद्ध होते हैं ॥

सुप्का व्यत्यय यथा–'धुरि दक्षिणायाः' इस स्थलमें 'दक्षिणस्याम्' ऐसा प्राप्त था । तिङ्का व्यत्यय यथा–"च-

षालं ये अश्वयूपाय तक्षति'' इस स्थलमें 'तक्षन्ति' ऐसा प्राप्त था। उपग्रह अर्थात् परस्मैपद, आत्मनेपद व्यत्यय यथा-'ब्रह्मचारिणमिच्छते' इस स्थलमें 'इच्छति' ऐसा प्राप्त था 'प्रतीपमन्य ऊर्म्मिर्युध्यति' इस स्थलमें 'युध्यते' ऐसा प्राप्त था। लिंगव्यत्यय यथा-'मधोस्तृप्ता इवासेत' इस स्थलमें 'मधुनः' ऐसा पद प्राप्त था। नर अर्थात् पुरुष प्रत्यय यथा-''अधास वीरैर्दशभिर्वियूयाः'' इस स्थलमें 'वियूयात्' पद प्राप्त था। काल अर्थात् कालवाचक प्रत्ययका व्यत्यय यथा-''श्वोऽग्नीनाधास्यमानेन'' इस स्थलमें लुट् विषयमें लृट् हुआ है। व्यञ्जनवर्ण व्यत्यय यथा-'तमसो गा अदुक्षत्' इस स्थलमें 'अधुक्षत्' ऐसा प्राप्त था। स्वरवर्णव्यत्यय यथा-'मित्र वयञ्च सूरयः' इस स्थलमें 'मित्रा वयम्' ऐसा पद प्राप्त था। स्वरव्यत्यय आगे कहेंगे। कर्तृ शब्द कारकमात्रपरक है तद्वाचक कृत् और तद्धितका व्यत्यय यथा-'अन्नादाय' इस स्थलमें अण् प्रत्ययके विषयमें अच् प्रत्यय हुआहै। अवग्रहमें विशेष होगा। यङ्के य शब्दसे आरम्भ करके 'लिङ्याशिष्यङ्'' इस सूत्रोक्त ङकारके साथ यङ् प्रत्याहार जानना, उनके व्यत्ययका उदाहरण भेदति इत्यादि पहिले कहदियाहै ॥

३४३४ लिङ्याशिष्यङ् ।३।१।८६॥

आशीर्लिङि परे धातोरङ् स्याच्छन्दसि। वच उम्। मन्त्रं वोचेमाग्नये॥ दृशेरग्वक्तव्यः॥*॥ पितरं च दृशेयं मातरं च। आङि तु ऋदृशोऽङीति गुणः स्यात्॥

३४३४-वेदमें आशीर्लिङ् परे रहते धातुके उत्तर अङ् प्रत्यय हो, "वच उम् २४५४" से वच्को उम् होकर, यथा-मंत्रं वोचेमाग्नये।

दृश् धातुके उत्तर अक् प्रत्यय हो आशीर्लिङ् परे रहते * यथा-पितरञ्च दृशेयं मातरञ्च। अङ् परे रहते तो "ऋदृशो- ङि० २४०६" इस सूत्रसे गुण होजाता॥

३४३५ छन्दस्युभयथा। ३।४।११७॥

धात्वधिकारे उक्तः प्रत्ययः सार्वधातुकार्धधातुकोभयसंज्ञः स्यात्। वर्धन्तुत्वा सुष्टुतयः। वर्धयन्त्वित्यर्थः। आर्धधातुकत्वाण्णिलोपः। विशृण्विरे। सार्वधातुकत्वात् श्नुः श्नुभावश्च। हुश्नुवोरिति यण्॥ आदृगमहनजनः किकिनौ लिट् च। ३। २। १७१॥ आदन्तादृवर्णान्ताद्गमादेश्च किकिनौ स्तस्तौ च लिड्वत्। बभ्रिर्वज्रम्। पपिः सोमम्। ददिर्गाः। जग्मिर्युवा। जघ्निर्वृत्रममित्रियम्। जज्ञिः। लिड्वद्भावादेव सिद्धे ऋच्छत्यृतामिति गुणबाधनार्थं कित्त्वम्। बहुलं छन्दसीत्युत्वम्। ततुरिः। जगुरिः॥

३४३५-वेदमें धात्वधिकारमें उक्त प्रत्ययकी सार्वधातुक और आर्धधातुक दोनों संज्ञा हों, यथा-वर्द्धन्तु त्वा सुष्टुतयः, अर्थात् वर्द्धयन्तु। आर्धधातुकत्वके कारण णिका लोप हुआहै। विशृण्विरे, यहां सार्वधातुकत्वके कारण श्नु प्रत्यय और श्नु आदेश और "हुश्नुवोः० ३३८७" इस सूत्रसे यण् हुआहै॥

वेदमें आकारान्त, ऋवर्णान्त, गम्, हन्, जन् धातुओंके उत्तर कि और किन् प्रत्यय हो, और प्रत्यय लिट्की समान हो, ३१५१ बभ्रिर्वज्रम्। पपिः सोमम्। ददिर्गाः। जग्मिर्युवा। जघ्निर्वृत्रममित्रियम्। जज्ञिः। लिटवद्भावसे ही सिद्ध होनेपर भी "ऋच्छत्यृताम् २३८३" इस सूत्रसे गुणबाधनार्थ कित्त्व कियाहै। "बहुलं छन्दसि" इससे उत्त्व होकर-ततुरिः। जगुरिः॥

३४३६ तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैनशध्यैशध्यैन्तवैतवेङ्तवेनः। ३। ४। ९॥

से। वक्षे रायः। सेन्। ता वामेषे। असे। शरदो जीवसे धाः। असेन्नित्त्वादाद्युदात्तः। क्से। प्रेषे। कसेन्। गवामिव श्रियसे। अध्यै। अध्यैन्। जठरं पृणध्यै। पक्षे आद्युदात्तम्। कध्यै। कध्यैन्। आहुवध्यै। पक्षे नित्स्वरः। शध्यै। राधसः सह मादयध्यै। शध्यैन्। वायवे पिबध्यै। तवै। दातवा उ। तवेङ्। सूतवे। तवेन्। कर्तवे॥

३४३६-वेदमें तुमर्थमें अर्थात् भावमें (भावार्थमें "कर्त्तरि कृत् २८३२" इस सूत्रसे कर्तामें तुमुन् विधानके कारण किस प्रकारसे भावार्थ है अत एव इस स्थलमें "अव्ययकृतो भावे" इस सूत्रसे भावमें तुमुन् विधान हुआ है। धातुके उत्तर से, सेन्, असे, असेन्, क्से, कसेन्, अध्यै, अध्यैन्, कध्यै, कध्यैन्, शध्यै, शध्यैन्, तवै, तवेङ् और तवेन् यह १५ प्रत्यय हों, यथा-से-"वक्षे रायः" वचः से-कुत्व और षत्व। (लोकमें वक्तुम्) सेन्-"तावामेषे" (एतुम्) असे "शरदो जीवसे धाः" (जीवितुम्) असेन्-प्रत्यय होनेपर आदि उदात्त होगा। क्से-प्रेषे (प्रैतुम्) कसेन्-गवामिव श्रियसे (श्रयितुम्)। अध्यै-अध्यैन्-"जठरं पृणध्यै" (पृणितुम्)। पक्षमें आदि वर्ण उदात्त होगा। कध्यै-कध्यैन्-आहुवध्यैहु+उवङ् (आहोतुम्) पक्षमें निस्वर। शध्यै-"राधसः। सहमादयध्यै" मदी+ण्यन्त+शध्यै प्रत्यय (मादयितुम्) शध्यैन्-वायवे पिबध्यै पा+श+(२३६०) (पातुम्) तवै-दातवा उ दा+तवै आय आदेश "लोपः शाकल्यस्य" इससे यकारका लोप होगा। (दातुम्) तवेङ् सूतवे (सोतुम्) तवेन्-कर्त्तवे। (कर्त्तुम्)॥

३४३७ प्रयै रोहिष्यै अव्यथिष्यै। ३।४।१०॥

एते तुमर्थे निपात्यन्ते। प्रयातुं रोढुमव्यथितुमित्यर्थः॥

३४३७-वेदमें प्रयै, रोहिष्यै और अव्यथिष्यै यह पद तुमर्थमें निपातनसे सिद्ध हों। लोकमें प्रयातुम्, रोढुम्, अव्यथितुम्। प्रयै=प्र+या+कै॥

३४३८ दृशे विख्ये च।३।४।११॥

द्रष्टुं विख्यातुमित्यर्थः॥

३४३८-दृशे विख्ये यह दो पद वेदमें तुमर्थमें निपातनसे सिद्ध हों, लोकमें-द्रष्टुम्। विख्यातुम्। दृश्+क-कित् होनेसे गुण न हुआ॥

३४३९ शकि णमुल्कमुलौ।३।४।१२॥

शक्नोतावुपपदे तुमर्थे एतौ स्तः। विभाजं नाशकत्। अपलुपं नाशकत्। विभक्तुमपलोप्तुमित्यर्थः॥

३४३९-वेदमें शक धातु उपपद रहते तुमर्थमें धातुके उत्तर णमुल् और कमुल् प्रत्यय हो, यथा-"विभाजम् नाशकत्"। "अपलुपम् नाशकत्"। लोकमें विभक्तुम्। अपलोप्तुम्। विभाजम्=वि+भज+णमुल् "अत उपधायाः" इससे वृद्धि होगी॥

३४४० ईश्वरे तोसुन्कसुनौ।३।४।१३॥

ईश्वरो विचरितोः। ईश्वरो विलिखः। विचरितुं विलेखितुमित्यर्थः॥

३४४०-वेदमें ईश्वर शब्द उपपद रहते धातुके उत्तर तुमर्थमें तोसुन् और कसुन् प्रत्यय हों, यथा-"ईश्वरो विचरितोः"।"ईश्वरो विलिखः"। लोकमें विचरितुम्। विलेखितुम्। विचरितोः=वि+चर+इट्+तोसुन्। विलिखः=वि+लिख+कसुन् कित्व होनेसे गुणका निषेध। "क्त्वातो० (४५०)" इससे अव्यय "अव्ययादाप्सुपः" इससे विभक्तिका लोप "न लुमता० (२६३)" इस निषेधसे "अत्वसन्त० (४२५)" इससे दीर्घ न हुआ॥

३४४१ कृत्यार्थे तवैकेन्केन्यत्वनः। ३।४।१४॥

न म्लेच्छितवै। अवगाहे। दिदृक्षेण्यः। भूर्यस्पष्टकर्त्वम्॥

३४४१-वेदमें कृत्य प्रत्ययके अर्थमें अर्थात् भाव और कर्ममें धातुके उत्तर तवै, केन्, केन्य और त्वन् प्रत्यय हों, यथा-"न म्लेच्छितवै" (म्लेच्छितव्यम्) अवगाहे (अवगाह्यम्)। दिदृक्षेण्यः। भूर्यस्पष्ट कर्त्वम्। कार्य्यम्। दृश्+सन्+केन्य+ "अतो लोपः"॥

३४४२ अवचक्षे च।३।४।१५॥

रिपुणा नावचक्षे। अवख्यातव्यमित्यर्थः॥

३४४२-कृत्यार्थमें अर्थात् भाव और कर्ममें अवपूर्वक चक्ष धातुके उत्तर निपातनसे एश् प्रत्यय हो, शित्वके कारण सार्वधातुक संज्ञा होगी, इस कारण चक्ष धातुके स्थानमें ख्याञादेश नहीं होगा, यथा-रिपुणा नावचक्षे। लोकमें अवख्यातव्यम्॥

३४४३ भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्।३।४।१६॥

आसंस्थातोः सीदन्ति। आसमाप्तेः सीदन्तीत्यर्थः। उदेतोः। अपकर्तोः। प्रवदितोः। प्रचरितोः। होतोः। आतमितोः। काममाविजनितोः संभवामः॥

३४४३-इस स्थलमें कृत्यार्थकी निवृत्ति हुई। भावलक्षणार्थमें वर्त्तमान स्था, इण्, कृञ्, वद, चर, हु, तम और जन धातुके उत्तर तुमर्थमें तोसुन् प्रत्यय हो, यथा-आसंस्थातोः-सीदन्ति (आसंस्थातुम्) अर्थात् समाप्ति पर्य्यन्त अवसन्न होता है। इसी प्रकार उदेतोः (उदेतुम्) अपकर्त्तोः (अपकर्तुम्) अवदितोः (अवदितुम्) प्रचरितोः (प्रचरितुम्) होतोः (होतुम्)। आतमितोः (आतमितुम्) "काममाविजनितोः सम्भवामः" (जनितुम्)॥

३४४४ सृपितृदोः कसुन्।३।४।१७॥

भावलक्षणे इत्येव। पुरा क्रूरस्य विसृपो विरप्शिन्। पुरा जत्रुभ्य आतृदः॥

॥ इति तृतीयोऽध्यायः॥

३४४४-भावलक्षणार्थमें वर्त्तमान (गत्यर्थ) सृप और (हिंसार्थ) तृद धातुके उत्तर तुमर्थमें कसुन् प्रत्यय हो, यथा-पुरा क्रूरस्य विसृपो विरप्शिन्-यजु० १।२८। (विसृप्तुम्) (गमनावधि) पुरा जत्रुभ्य आतृदः। (आतर्तुम्) (हिंसापर्य्यन्त) इत्यादि॥

इति तृतीयोऽध्यायः समाप्तः॥

३४४५ रात्रेश्चाऽजसौ।४।१।३१॥

रात्रिशब्दान्ङीप्स्यात् अजस्विषये छन्दसि। रात्री व्यख्यदायती। लोके तु कृदिकारादिति ङीष्यन्तोदात्तः॥

३४४५-वेदमें अजस्विषयमें अर्थात् प्रथमाके बहुवचनसे भिन्न विभक्तिविषयमें रात्रि शब्दके उत्तर नित्य ङीप् प्रत्यय हो, यथा-"रात्री व्यख्यदायती" किन्तु लौकिक प्रयोगमें विकल्प करके "कृदिकारात्०" इस सूत्रसे ङीष् प्रत्यय होनेपर अन्तोदात्त होगा॥

३४४६ नित्यं छन्दसि।४।१।४६॥

बह्वादिभ्यश्छन्दसि विषये नित्यं ङीष्। बह्वीषु हित्वा। नित्यग्रहणमुत्तरार्थम्॥

३४४६-बहु आदि शब्दोंके उत्तर वैदिक प्रयोगमें नित्य ङीष् हो, यथा-"बह्वीषु हित्वा" उत्तर सूत्रमें अनुवृत्तिके निमित्त इस स्थलमें नित्य शब्दका ग्रहण कियाहै॥

३४४७ भुवश्च । ४ । १ । ४७ ॥

ङीष् स्यात् छन्दसि । विभ्वी । प्रभ्वी । विप्रसंभ्य इति डुप्रत्ययान्तं सूत्रेऽनुक्रियते उत इत्यनुवृत्तेः । उवङादेशस्तु सौत्रः ॥ मुद्गलाच्छन्दसि लिच ॥*॥ ङीषो लित्वमानुक् चागमः । लित्स्वरः । रथीरभून्मुद्गलानी ॥

३४४७-वेदमें भू धातुनिष्पन्न शब्दके उत्तर नित्य ङीष् हो, यथा-विभ्वी । प्रभ्वी । वि+प्र+' सम्पूर्वक भू धातुके उत्तर डु प्रत्यय हो, क्योंकि सूत्रके द्वारा डु प्रत्ययान्त पदका ही अनुसरण होताहै । "वोतो गुणवचनात् (५०२)" इस सूत्रसे उत् पदकी अनुवृत्तिके कारण उवङ् आदेश सूत्रके अनुसार ही होताहै ॥

"मुद्गलाच्छन्दसि लिच" मुद्गल शब्दसे वेदमें नित्य ङीष् हो, और आनुक्का आगम हो वह ङीष् लित् हो * यह "इन्द्रवरुण०"इत्यादि मूलका वार्त्तिक है । अत एव इस सूत्रके अनुसार नित्य ङीष् होगा, और ङीष्के स्थानमें नित्य लित्व और आनुक् आगम होगा, लित् परे रहते आनुक्के आकारको उदात्त स्वर होगा । यथा-"रथीरभून्मुद्गलानी" ॥

३४४८ दीर्घजिह्वी च च्छन्दसि । ४ । १ । ५९ ॥

संयोगोपधत्वादप्राप्तो ङीष्विधीयते । आसुरी वै दीर्घजिह्वी देवानां यज्ञवाट् ॥

३४४८-वेदमें दीर्घजिह्वी पद निपातनसे सिद्ध हो । संयोगोपधत्वके कारण दीर्घजिह्व शब्दके उत्तर ङीष्की अप्राप्ति हुई थी । किन्तु इस स्थलमें वह पुनः विहित हुआ है । यथा-"आसुरी वै दीर्घजिह्वी देवानां यज्ञवाट्" ॥

३४४९ कद्रुकमण्डल्वोश्छन्दसि । ४ । १ । ७१ ॥

ऊङ् स्यात् । कद्रूश्च वै कमण्डलूः ॥ गुग्गुलुमधुजतुपतयालूनामिति वक्तव्यम् ॥ * ॥ गुग्गुलूः । मधूः । जतूः । पतयालूः ॥ अव्ययात्त्यप् ॥ आविष्टयस्योपसंख्यानं छन्दसि ॥*॥ आविष्ट्यो वर्धते ॥

३४४९-वेदमें कद्रु और कमंडलु शब्दके उत्तर स्त्रीलिङ्गमें ऊङ् हो, यथा-"कद्रूश्च वै कमंडलूः" ॥

गुग्गुलु, मधु, जतु और पतयालु शब्दके उत्तर स्त्रीलिंगमें ऊङ् हो * यथा-गुग्गुलूः, मधूः, जतूः और पतयालूः । "अव्ययात्त्यप् (१३२४)" इस सूत्रमें त्यप् प्रत्ययका उल्लेख किया है, तथापि इस स्थानमें अनुवृत्ति प्रदर्शनार्थ उसका स्मरण कराया है ॥

वेदमें आविष्ट्य पदका उपसंख्यान हो * । यथा-"आविष्ट्यो वर्धते" आविर्भूत इत्यर्थः ॥

३४५० छन्दसि ठञ् । ४ । ३ । १९ ॥

वर्षाभ्यष्ठकोपवादः । स्वरे भेदः । वार्षिकम् ॥

३४५०-वेदमें वर्षादि शब्दोंके उत्तर ठञ् प्रत्यय हो, यह "वर्षाभ्यष्ठक्" इस सूत्रसे सामान्यतः प्राप्त ठक् प्रत्ययका अपवाद है । ठक् और ठञ् इन दोनों प्रत्ययोंका विशेष क्या है, इस कारण कहते हैं, स्वरविषयमें कुछ भेद होगा। अर्थात् ठञ् करनेपर "ञ्नित्यादिर्नित्यम्" इस सूत्रके अनुसार आदि उदात्त और ठक् करनेपर "कितः" इस सूत्रसे अन्तोदात्त होगा । यही विशेष है, यथा-वार्षिकम् । ठ प्रत्ययको इक् हुआ ॥

३४५१ वसन्ताच्च । ४ । ३ । २० ॥

ञ् स्याच्छन्दसि । वासन्तिकम् ॥

३४५१-वेदमें वसन्त शब्दके उत्तर ठञ् प्रत्यय हो । यथा-वासन्तिकम् ॥

३४५२ हेमन्ताच्च । ४ । ३ । २१ ॥

छन्दसि ठञ् । हैमन्तिकम् । योगविभाग उत्तरार्थः ॥ शौनकादिभ्यश्छन्दसि । ४ । ३ । १०६ ॥ णिनिः प्रोक्तेर्थे । छाणोरपवादः । शौनकेन प्रोक्तमधीयते शौनकिनः । वाजसनेयिनः । छन्दसि किम् । शौनकीया शिक्षा ॥

३४५२-वेदमें हेमन्त शब्दके उत्तर ठञ् प्रत्यय हो, यथा-हैमन्तिकम् । इस स्थानमें "वसन्तहेमन्ताभ्याम्" इस प्रकार एक सूत्र न करके भिन्न २ सूत्र करण केवल परसूत्रमें अनुवृत्तिके निमित्त है ॥

वेदमें प्रोक्त अर्थात् तत्कर्तृक कथित अर्थमें शौनकादि शब्दोंके उत्तर नित्य णिनि प्रत्यय हो (१४८६) यह सूत्र छ और अण् प्रत्ययका अपवाद है, यथा-शौनकेन प्रोक्तमधीयते=शौनकिनः । (१४८३) वाजसनेयिनः । लौकिकमें शौनकीया (वृद्धाच्छः) अर्थात् शिक्षा ॥

३४५३ द्व्यचश्छन्दसि ।४।३। १५० ॥

विकारे वा मयट् स्यात् । शरमयं बर्हिः । यस्य पर्णमयी जुहूः ॥

३४५३-वेदमें दो स्वरविशिष्ट शब्दके उत्तर विकारार्थमें विकल्प करके मयट् प्रत्यय हो, यथा-शरमयं बर्हिः । "यस्य पर्णमयी जुहूः" ॥

३४५४ नोत्वद्वर्ध्रबिल्वात् ।४।३।१५१॥

उत्वान् उकारवान् । मौञ्जं शिक्यम् । वर्ध्रं चर्म तस्य विकारो वार्ध्री रज्जुः । बैल्वो यूपः ॥ सभायायः ॥

३४५४-वेदमें उकार विशिष्ट प्रातिपदिक और वर्ध्र तथा बिल्व शब्दके उत्तर पूर्व सूत्रसे प्राप्त मयट् प्रत्यय न हो, यथा-मौञ्जम् । (मुञ्ज+अण्) अर्थात् शिक्य । वर्ध्रं चर्म्म तस्य विकारो वार्ध्री अर्थात् रज्जुः । बैल्वः । अर्थात् यूपः । सभा शब्दके उत्तर य प्रत्यय हो (१६५७) ॥

३४५५ ढश्छन्दसि । ४ । ४ । १०६ ॥

सभेयो युवा ॥

३४५५-वेदमें सप्तम्यन्त सभा शब्दके उत्तर ढ प्रत्यय हो, यथा-सभेयः अर्थात् युवा ॥

३४५६ भवे छन्दसि ।४।४ । ११० ॥

सप्तम्यन्ताद्भवार्थे यत् । मेध्याय च विद्युत्याय च । यथायथं शैषिकाणामणादीनां च घादीनामपवादोयं यत् । पक्षे तेऽपि भवन्ति । सर्वविधीनां छन्दसि वैकल्पिकत्वात् । तद्यथा । मुञ्जवान्नाम पर्वतः तत्र भवो मौञ्जवतः । सोमस्येव मौञ्जवतस्य भक्षः । आचतुर्थसमाप्तेश्छन्दोऽधिकारः ॥

३४५६-वेदमें सप्तम्यन्त शब्दके उत्तर भवार्थमें यत् प्रत्यय हो, यथा-" मेध्याय च विद्युत्याय च " यजु० १६ । ३८ । यह यत् प्रत्यय यथायोग्य शैषिक का और अणादि प्रत्ययका और घादि प्रत्ययका अपवाद है । विकल्प पक्षमें यह समस्त प्रत्यय भी यथा क्रमसे होंगे । वेदमें सब विधिको ही वैकल्पिकत्व है । यथा-मुञ्जवान् नाम पर्वतः तत्र भवः मौञ्जवतः । मुञ्जवत्+अण् "सोमस्येव मौञ्जवतस्य भक्षः" । चतुर्थाध्यायकी समाप्ति पर्य्यन्त छन्दोऽधिकार अर्थात् छन्दः इस शब्दकी अनुवृत्ति होगी ॥

३४५७ पाथोनदीभ्यां ड्यण् ।४।४।१११।

तमु त्वा पाथ्यो वृषा । चनो दधीत नाद्यो गिरो मे । पाथसि भवः पाथ्यः । नद्यां भवो नाद्यः ॥

३४५७-वेदमें सप्तम्यन्त पाथस् और नदी शब्दके उत्तर भवार्थमें ड्यण् प्रत्यय हो, यथा-"तमुत्वा पाथ्यो वृषा" । "चनो दधीतनाद्यो गिरो मे" पाथसि भवः=पाथ्यः । नद्यां भवो नाद्यः ॥

३४५८ वेशन्तहिमवद्भ्यामण् । ४ । ४ । ११२ ॥

भवे । वैशन्तीभ्यः स्वाहा । हैमवतीभ्यः स्वाहा ॥

३४५८-वेदमें वेशन्त और हिमवत् शब्दोंके उत्तर भवार्थमें अण् प्रत्यय हो, यथा-"वैशन्तीभ्यः स्वाहा" । "हैमवतीभ्यः स्वाहा" । विश+झच्=वेशन्त (पल्वल) तत्र भवा आपः वैशन्त्यः ॥

३४५९ स्रोतसो विभाषा ड्यड्ड्यौ । ४ । ४ । ११३ ॥

पक्षे यत् । ड्यड्ड्ययोस्तु स्वरे भेदः । स्रोतसि भवः स्रोत्यः-स्रोतस्यः ॥

३४५९-वेदमें सप्तम्यन्त स्रोतस् शब्दके उत्तर भवार्थमें विकल्प करके ड्यत् ड्य प्रत्यय हों, और विकल्प करके ड्यत् ड्य न होनेपर यत् प्रत्यय होगा, ड्यत् और ड्य प्रत्ययके स्वरमें भेद होगा, यथा-स्रोतसि भवः=स्रोत्यः, स्रोतस्यः ॥

३४६० सगर्भसयूथसनुताद्यन् । ४ । ४ । ११४ ॥

अनुभ्राता सगर्भ्यः । अनुसखा सयूथ्यः । यो नः सनुत्य उत वा जिघत्नुः । नुतिर्नुतम् । नपुंसके भावे क्तः । सगर्भादयस्त्रयोपि कर्मधारयाः । समानस्य छन्दसीति सः । ततो भवार्थे यन् । यतोपवादः ॥

३४६०-वेदमें सप्तम्यन्त सगर्भ, सयूथ और सनुत शब्दके उत्तर भवार्थमें यत् प्रत्यय हो, अनुभ्राता सगर्भ्यः । अनुसखा सयूथ्यः । यो नः सनुत्य उत वा जिघत्नुः । नुतिः अर्थात् नुतम् । क्लीव लिङ्गमें भवार्थमें क्त प्रत्यय हुआ । सगर्भादि तीनों ही कर्म्मधारय समास निष्पन्न हैं । "समानस्य छन्दसि" इस सूत्रसे समान शब्दको स आदेश हुआ तत्पश्चात् भवार्थमें यन् प्रत्यय होगा । यह यन् प्रत्यय यत् प्रत्ययका अपवाद है । गर्भः='अतिगृभ्यां भन्' गिरति गीर्य्यते वा गर्भः । युता भवन्त्यस्मिन्निति यूथम् । समानश्चासौ गर्भश्च तत्र भवः सगर्भ्यः ॥

३४६१ तुग्राद् घन् । ४ ४ । ११५॥

भवेऽर्थे । पक्षे यदपि । आ वः शर्मं वृषभं तुग्र्यास्विति बह्वृचाः । तुग्रियास्विति शाखान्तरे । घनाकाशयज्ञवरिष्ठेषु तुग्रशब्द इति वृत्तिः ॥

३४६१-वेदमें तुग्र शब्दके उत्तर भवार्थमें विकल्प करके घन् प्रत्यय हो, विकल्प करके घन्के अभाव पक्षमें यत् प्रत्यय होगा । यथा-"आवः समं वृषभं तुग्र्यासु" यह बह्वृच अर्थात् ऋग्वेदके जाननेवाले कहतेहैं । शाखान्तरमें "तुग्रियासु" । तुग्र शब्दसे घन, आकाश, यज्ञ और वरिष्ठ अर्थ समझना ॥

३४६२ अग्राद्यत् । ४ । ४ । ११६ ॥

३४६२-अग्र शब्दके उत्तर भवार्थमें यत् प्रत्यय हो ॥

३४६३ घच्छौ च । ४ । ४ । ११७ ॥

चाद्यत् । अग्रे भवोऽग्र्यः । अग्रियः । अग्रीयः ॥

३४६३-अग्र शब्दके उत्तर भवार्थमें घ, छ और चकार निर्देशके कारण यत् प्रत्यय होगा, यथा-अग्रे भवः=अग्र्यः । अग्रियः । अग्रीयः ॥

३४६४ समुद्राभ्राद्घः । ४ । ४ ।११८ ॥

समुद्रिया अप्सरसो मनीषिणम् । नानदतो अभ्रियस्येव घोषाः ॥

३४६४-वेदमें समुद्र और अभ्र शब्दके उत्तर भवार्थमें घ प्रत्यय हो, यथा-"समुद्रिया अप्सरसो मनीषिणम्" नान-

दतोऽग्रियस्येव घोषाः । समुदतीति समुद्रः 'स्फायितञ्चि०' इससे रक् । अपो बिभर्त्ति इत्यभ्रम् ॥

३४६५ बर्हिषि दत्तम् । ४ । ४।११९॥

प्राग्घिताद्यदित्येव।बर्हिष्येषु निधिषु प्रियेषु ॥

३४६५-वेदमें दत्त अर्थात् अर्पित इस अर्थमें बर्हिष् शब्दके उत्तर यत् प्रत्यय हो, "प्राग्घिताद्यत् (१६२६)" इस सूत्रसे हित शब्दके पूर्व सूत्र पर्य्यन्त समस्त सूत्रोंसे यत् प्रत्यय होगा। यथा-"बर्हिष्येषु निधिषु प्रियेषु"। बर्हिष्य शब्द वृह धातुके नकारका लोप करके इस भागान्त शब्दके उत्तर यत् प्रत्ययसे सिद्ध हुआहै ॥

३४६६ दूतस्य भागकर्मणी।४।४।१२०॥

भागोंऽशः । दूत्यम् ॥

३४६६-षष्ठ्यन्त दूत शब्दके उत्तर भाग (अंश) और कर्म्म अर्थ होनेपर यत् प्रत्यय हो, भागार्थमें "तस्येदं (१५००)" इस सूत्रके अनुसार अण् प्रत्ययकी प्राप्ति होतीहै और कर्म्म होनेपर "दूतवणिग्भ्याञ्च" । इस सूत्रसे उपसंख्यानिक य प्रत्यय होताहै । किन्तु इस स्थलमें वह नहीं होगा । यथा-दूतस्य भागो दूत्यः । दूतस्य कर्म्म दूत्यम् ॥

३४६७ रक्षोयातूनां हननी।४।४।१२१॥

या ते अग्ने रक्षस्या तनूः । यातव्या ॥

३४६७-हननी इस अर्थमें रक्षस् और यातु शब्दके उत्तर यत् प्रत्यय हो, यथा-(रक्ष+असुन्=रक्षः) "कमितानिमनि०" इत्यादि सूत्रसे (या+तुन्=यातु) (हन्यते अनया= हन्+ल्युट्=हननी) । रक्षसां हननी=रक्षस्या । इसी प्रकार यातूनां हननी=यातव्या । यथा-"या ते अग्ने रक्षस्या (राक्षस नाशिनी) तनूः" ॥

३४६८ रेवतीजगतीहविष्याभ्यः प्रशस्ये । ४ । ४ । १२२ ॥

प्रशंसने यत्स्यात् । रेवत्यादीनां प्रशंसनं रेवत्यम् । जगत्यम् । हविष्यम् ॥

३४६८-प्रशस्य अर्थात् प्रशंसार्थमें रेवती, जगती और हविष्या शब्दोंके उत्तर यत् प्रत्यय हो, यथा (प्र+शंस्+भावे क्यप्) (रयि शब्दात् मतुप्+ङीप्=रेवती) (गम्+शतृ+ङीप्=जगती) । (हविषे हिता=हविस्+यत्=हविष्या) यथा-" रेवत्यादीनां प्रशंसनम्" इस अर्थमें रेवत्यम् । इसी प्रकार जगत्यम् । हविष्यम् ॥

३४६९ असुरस्य स्वम्।४।४। १२३ ॥

असुर्यं देवेभिर्धायि विश्वम् ॥

३४६९-वेदमें असुरको स्व अर्थात् धन इस अर्थमें असुर शब्दके उत्तर यत् प्रत्यय हो, यथा-असुर्यं देवेभिर्धायि विश्वम् । असेरुरन् ॥

३४७० मायायामण् ।४ । ४ । १२४ ॥

आसुरी माया ॥

३४७०-("मीयतेऽनया") इस अर्थमें माङ्+उणादिक+य) । असुरकी माया अर्थ होनेपर असुर शब्दके उत्तर अण् प्रत्यय हो, यह पूर्वसूत्रका अपवाद है । यथा-आसुरी माया । आसुरी "टिड्ढाणञ्०" इससे ङीप् ॥

३४७१ तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः ।४।४।१२५॥

वर्चस्वानुपधानो मन्त्र आसामिष्टकानां वर्चस्याः । ऋतव्याः ॥

३४७१-मत्वन्त प्रथमान्त शब्दके उत्तर आसाम् इस षष्ठ्यर्थमें यत् प्रत्यय हो, वह प्रथमान्तार्थ उपधान मन्त्र यदि हो, और आसाम् इस षष्ठ्यर्थ करके निर्दिष्ट यदि इष्टका हो, और मतुका लुक् हो, यथा-वर्चस्वानुपधानो मंत्र आसामिष्टकानाम् इति=वर्चस्याः । ऋतव्याः । वर्चस्वान् अर्थात् वर्चस् शब्दविशिष्ट कुम्भादिके आरोपणमंत्र विशेषका नाम ऋतव्याः। उपधीयते अनेन उपधानम् । ऋतव्या ऋतुशब्दो यस्मिन्मन्त्रेस्ति स ऋतुमान् मधुश्च माधवश्च इत्यादि । (यजु० १३।२५) ॥

३४७२ अश्विमानण् ।४ ।४ । १२६ ॥

आश्विनीरुपदधाति ॥

३४७२-जिस मंत्रमें अश्वि शब्द है उसका नाम अश्विमान् मंत्र है, इस मंत्रवाचक प्रथमान्त अश्विमत् शब्दके उत्तर आसाम् अर्थात् इस षष्ठ्यर्थमें इष्टकादिका आरोपणमंत्र होनेपर उसके उत्तर अण् प्रत्यय हो, और मतु प्रत्ययका लुक् हो, आश्विनीरुपदधाति । ध्रुवक्षिति० (यजु० १४ । १) यह मन्त्र है, आश्विनीः । "अत इनिठनौ"इससे इनि मतु० और लुक् "इनण्यनपत्ये" इससे प्रकृतिभाव ॥

३४७३ वयस्यासु मूर्ध्नो मतुप् ।४। ४ । १२७ ॥

तद्वानासामिति सूत्रं सर्वमनुवर्तते । मतोरिति पदमावर्त्य पञ्चम्यन्तं बोध्यम् । मतुबन्तो यो मूर्धशब्दस्ततो मतुप्स्यात्प्रथमस्य मतोर्लुक्च वयश्शब्दवन्मन्त्रोपधेयास्विष्टकासु । यस्मिन्मन्त्रे मूर्द्धवयःशब्दौ स्तस्तेनोपधेयासु मूर्द्धन्वतीरुपदधातीति प्रयोगः ॥

३४७३-तद्वानासाम् इत्यादि सूत्र समस्त ही अनुवर्त्तित होतेहैं । मतोः इस पदकी आवृत्ति करके षष्ठीके स्थानमें पञ्चमी विभक्ति विपरिणामसे होगी । वयस् शब्दविशिष्ट मंत्रसे उपधेय अर्थात् आरोप्य इष्टकादि विषयमें मतुप् प्रत्ययान्त जो मूर्द्धन् शब्द उसके उत्तर मतुप् प्रत्यय हो, और प्रथम मतुप् प्रत्ययका लुक् हो, अर्थात् जिसमें मूर्द्धन् और वयस् शब्द हैं उस मंत्रद्वारा ही आरोपित इष्टकादि विषयमें मतुप् प्रत्यय हो और प्रथम मतुप्का लुक् हो, यथा-"मूर्द्धन्वतीरुपदधाति" इत्यादि ॥ अनो नुट् इससे नुट्का आगम ॥

३४७४ मत्वर्थे मासतन्वोः।४।४।१२८॥

नभोऽभ्रम् । तदस्मिन्नस्तीति नभस्यो मासः। ओजस्या तनूः ॥

३४७४–वेदमें मास और तनू अर्थ होनेपर जिस अर्थमें मतुप् विहित हुआहै उस अर्थमें ही प्रथमान्त पदके उत्तर यत् प्रत्यय हो, यथा–नभोऽभ्रम् तदस्मिन्नस्ति इति नभस्यः। अर्थात् मासविशेष। इसी प्रकार ओजोऽस्त्यस्याम् अस्याः=वा ओजस्या अर्थात् तनूः॥

३४७५ मधोर्ञ च।४।४।१२९॥

माधवः। मधव्यः॥

३४७५–वेदमें मत्वर्थमें मधु शब्दके उत्तर ञ और यत् प्रत्यय हो, यथा–मधु अस्यास्ति इति मधु+ञ=माधवः। मधु+यत्=माधव्यः। "ओर्गुणः" "वान्तो यि प्रत्यये" इससे अवादेश हुआ॥

३४७६ ओजसोऽहनि यत्खौ। ४।४।१३०॥

ओजस्यमहः। ओजसीनं वा॥

३४७६वेदमें अहन् अर्थात् दिन अर्थ होनेपर मत्वर्थमें ओजस् शब्दके उत्तर यत् और ख प्रत्यय हो, यथा–ओजस्+यत्=ओजस्यम् अर्थात् दिन। ओजस्+ख=ओजसीनं वा॥

३४७७ वेशोयशआदेर्भगाद्यल्।४। ४।१३१॥

यथासंख्यं नेष्यते। वेशो बलं तदेव भग इति कर्मधारयः। वेशोभग्यः यशोभग्यः॥

३४७७–वेदमें वेशस् और यशस् शब्दके परे स्थित भग शब्दके उत्तर मत्वर्थमें यल् प्रत्यय हो। प्रत्ययका लकार स्वरार्थ है। (वेशो बलं तदेव भग ऐसे कर्म्मधारय समासमें) यथा–वेशोभग्यः। यशोभग्यः॥

३४७८ ख च।४।४।१३२॥

क्रमनिरासार्थश्च वेशोभगीनः। यशोभगीनः॥

३४७८–वेदमें वेशस् और यशस् शब्दके उत्तर जो भग तदन्तके उत्तर ख प्रत्यय हो, भिन्न सूत्रकरण परवर्त्ती सूत्रमें अनुवृत्तिके और क्रमभङ्गके निमित्त है। यथा–वेशोभगीनः। यशोभगीनः (ख)॥

३४७९ पूर्वैः कृतमिनयौ च। ४।४।१३३॥

गम्भीरेभिः पथिभिः पूर्विणेभिः। ये ते पन्थाः सवितः पूर्व्यासः॥

३४७९–वेदमें तृतीयान्त पूर्व शब्दसे कृतम् इस अर्थमें इन् और इय प्रत्यय हो। और चकारनिर्देशके कारण यत् और ख प्रत्यय होगा, यथा–"गम्भीरेभिः पथिभिः पूर्विणेभिः"। "ये ते पन्थाः सवितः पूर्व्यासः"। (पूर्वैः कृताः पूर्विणा तैः)॥

३४८० अद्भिः संस्कृतम्।४।४।१३४॥

यस्येदमप्यं हविः॥

३४८०–वेदमें तृतीयान्त अप् शब्दके उत्तर संस्कृतम् इस अर्थमें यत् प्रत्यय हो, यथा–"यस्येदमप्यं हविः"॥

३४८१ सहस्रेण सम्मितौ घः। ४।४।१३५॥

सहस्रियासो अपां नोर्मयः। सहस्रेण तुल्या इत्यर्थः॥

३४८१–वेदमें तृतीयान्त सहस्र शब्दके उत्तर सम्मिति इस अर्थमें घप्रत्यय हो, सम्मिति शब्दसे तुल्य समझना।यथा–सहस्रियासो अपां नोर्मयः। अर्थात् सहस्रकी तुल्य॥

३४८२ मतौ च।४।४।१३६॥

सहस्रशब्दान्मत्वर्थे घः स्यात्। सहस्रमस्यास्तीति सहस्रियः॥

३४८२–वेदमें सहस्र शब्दके उत्तर मत्वर्थमें घ प्रत्यय हो, सहस्रमस्यास्तीति=सहस्रियः॥

३४८३ सोममर्हति यः।४।४।१३७॥

सोम्यो ब्राह्मणः। यज्ञार्ह इत्यर्थः॥

३४८३–द्वितीयाविभक्त्यन्त सोम शब्दके उत्तर अर्हति अर्थमें य प्रत्यय हो, यथा–सोम्यो ब्राह्मणः। अर्थात् यज्ञार्हः॥

३४८४ मये च।४।४।१३८॥

सोमशब्दाद्यः स्यान्मयडर्थे। सोम्यं मधु। सोममयमित्यर्थः॥

३४८४–वेदमें सोमशब्दके उत्तर मयडर्थमें य प्रत्यय हो, यथा–सोम्यं मधु। सोम्य अर्थात् सोममय॥

३४८५ मधोः।४।४।१३९॥

मधुशब्दान्मयडर्थे यत्स्यात्। मधव्यः। मधुमय इत्यर्थः॥

३४८५–वेदमें मधु शब्दके उत्तर मयट् प्रत्ययार्थमें यत् प्रत्यय हो, यथा–मधव्यः। अर्थात् मधुमयः॥

३४८६ वसोः समूहे च।४।४।१४०॥

चान्मयडर्थे यत्। वसव्यः॥ अक्षरसमूहे छन्दस उपसंख्यानम्॥ *॥ छन्दःशब्दादक्षरसमूहे वर्तमानात्स्वार्थे यदित्यर्थः। आश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं येयजामह इति पञ्चाक्षरं यजेति द्व्यक्षरं द्व्यक्षरो वषट्कार एष वै सप्तदशाक्षरश्छन्दस्यः॥

३४८६–वेदमें वसु शब्दके उत्तर समूहार्थमें और चकारनिर्देशके कारण मयडर्थमें यत् प्रत्यय हो, यथा–वसव्यः अर्थात् वसु समूह। लोकमें, वसुमयः।

अक्षर समूहार्थमें वर्त्तमान छन्दस शब्दके उत्तर स्वार्थमें

यत् प्रत्यय हो * यथा-छन्दस्यः। "आश्रावयेति चतुरक्षरम्" अस्तु श्रौषडिति चतुरक्षरम्, यजेति द्व्यक्षरम्, ये यजामह इति पञ्चाक्षरम्, यजेति द्व्यक्षरम्, द्व्यक्षरो वषट्कारः "एष वै सप्तदशाक्षरश्छन्दस्यः" यह सप्तदशाक्षर विशिष्ट वैदिक मंत्र प्रजापति यज्ञमें विहित हुआहै ॥

३४८७ नक्षत्राद्घः । ४ । ४ । १४१ ॥

स्वार्थे । नक्षत्रियेभ्यः स्वाहा ॥

३४८७-वेदमें नक्षत्र शब्दके उत्तर स्वार्थमें घ प्रत्यय हो, यथा-नक्षत्रियेभ्यः स्वाहा ॥

३४८८ सर्वदेवात्तातिल् । ४ । ४ । १४२ ॥

स्वार्थे । सविता नः सुवतु सर्वतातिम् । प्रदक्षिणिद्देवतातिमुराणः ॥

३४८८-वेदमें सर्व शब्द और देव शब्दके उत्तर स्वार्थमें तातिल् प्रत्यय हो, यथा-"सविता नः सुवतु सर्वतातिम्" प्रदक्षिणिद्देवतातिमुराणः" ॥

३४८९ शिवशमरिष्टस्य करे । ४ । ४ । १४३ ॥

करोतीति करः । पचाद्यच् । शिवं करोतीति शिवतातिः । याभिः शन्ताती भवथो ददाशुषे । अथो अरिष्टतातये ॥

३४८९-वेदमें "करोति" इस अर्थमें शिव, शम् और अरिष्ट शब्दके उत्तर तातिल् प्रत्यय हो, यथा-शिवतातिः। शन्तातिः। अरिष्टतातिः। करोति (कृ+अच्)=करः। शिवं करोति=शिवतातिः। "याभिः शन्ताती भवथो ददाशुषे"। अथो अरिष्टतातये ॥

३४९० भावे च । ४ । ४ । १४४ ॥

शिवादिभ्यो भावे तातिः स्याच्छन्दसि । शिवस्य भावः शिवतातिः । शन्तातिः । अरिष्टतातिः ॥

॥ इति चतुर्थोऽध्यायः ॥

३४९०-वेदमें शिवादि शब्दोंके उत्तर भाव अर्थमें ताति प्रत्यय हो, यथा-शिवस्य भावः=शिवतातिः। शन्तातिः। अरिष्टतातिः ॥

॥ इति चतुर्थोऽध्यायः ॥

३४९१ सप्तनोऽञ्छन्दसि । ५ । १ । ६१ ॥

तदस्य परिमाणमिति वर्गे इति च । सप्तसाप्तानि असृजत् ॥ शनशतोर्डिनिश्छन्दसि तदस्य परिमाणमित्यर्थे वाच्यः ॥ * ॥ पञ्चदशिनोऽर्धमासाः । त्रिंशिनो मासाः ॥ विंशतेश्चेति वाच्यम् ॥ * ॥ विंशिनोऽङ्गिरसः ॥ युष्मदस्मदोः सादृश्ये वतुब्वाच्यः ॥ * ॥ त्वावतः पुरुवसो ॥ न त्वावाम् अन्यः यज्ञं विप्रस्य मावतः ॥

३४९१-वेदमें प्रथमान्त सप्तन् शब्दके उत्तर अस्य परिमाणम् इस अर्थमें वर्ग अर्थ होनेपर अञ् प्रत्यय हो, (सप्तन्+अञ्) "नस्तद्धिते ६७९" इस सूत्रसे टिका लोप, तद्धितान्तत्वके कारण प्रातिपदिक संज्ञासे जस्, "जश्शसोः शिः ३१२"। "नपुंसकस्य० ३१४" नुम् उपधाको दीर्घ, यथा-"सप्तसाप्तानि असृजत्"। अर्थात् सप्तवर्गान् असृजत् ।

वेदमें तदस्य परिमाणम् । इस अर्थमें शन और शत भागके उत्तर डिनि प्रत्यय हो, यथा-पञ्चदशिनोऽर्द्धमासाः, पञ्चदशाहानि परिमाणमेषामिति । डिनि टिलोप, त्रिंशिनो मासाः। विंशति शब्दके उत्तर भी डिनि प्रत्यय हो, यथा-विंशिनोऽङ्गिरसः। डिति 'यस्येति च' से अल्लोप ॥

सादृश्य होनेपर युष्मद् और अस्मद् शब्दोंके उत्तर वतुप् प्रत्यय हो * । यथा-"त्वावतः पुरूवसोः" "नत्वावाँ अन्यः" "यज्ञं विप्रस्य मावतः" त्वावत-"प्रत्योत्तरपदयोश्च" "से त्वमादेश" "आ सर्वनाम्नः" इस सूत्रसे आत्व ॥

३४९२ छन्दसि च । ५ । १ । ६७ ॥

प्रातिपदिकमात्रात्तदर्हतीति यत् । सादन्यं विदथ्यम् ॥

३४९२-वेदमें "तदर्हति" इस अर्थमें प्रातिपदिक मात्रके उत्तर यत् प्रत्यय हो, यथा-"सादन्यम् विदथ्यम्" सादन्य अर्थात् यज्ञके योग्य ॥

३४९३ वत्सरान्ताच्छश्छन्दसि । ५ । १ । ९१ ॥

निर्वृत्तादिष्वर्थेषु । इद्वत्सरीयः ॥

३४९३-वेदमें निर्वृत्तादि (निर्वृत्त, अधीष्ट, भूत, भावी) अर्थमें वत्सरान्त (इद्वत्सर, इदावत्सर, संवत्सर, परिवत्सर) शब्दोंके उत्तर छ प्रत्यय हो, यथा-इद्वत्सरीयः। इत्यादि ॥

३४९४ संपरिपूर्वात्ख च । ५ । १ । ९२ ॥

चाच्छः । संवत्सरीणः । संवत्सरीयः । परिवत्सरीणः । परिवत्सरीयः ॥

३४९४-वेदमें सम् और परि पूर्वक वत्सरान्त शब्दोंके उत्तर निर्वृत्तादि अर्थमें ख और छ प्रत्यय हो, यथा-संवत्सरीणः, संवत्सरीयः। परिवत्सरीणः, परिवत्सरीयः ॥

३४९५ छन्दसि घस् । ५ । १ । १०६ ॥

ऋतुशब्दात्तदस्य प्राप्तमित्यर्थे । भागऋत्वियः ॥

३४९५-वेदमें "तदस्य प्राप्तम्" इस अर्थमें ऋतु शब्दके उत्तर घ प्रत्यय हो, यथा-"भागऋत्वियः" ॥

३४९६ उपसर्गाच्छन्दसि धात्वर्थे । ५ । १ । ११८ ॥

धात्वर्थविशिष्टे साधने वर्तमानात्स्वार्थे वतिः स्यात् । यदुद्वतो निवतः । उद्गतान्निर्गतानित्यर्थः ॥

३४९६-वेदमें धात्वर्थ विशिष्ट साधनमें वर्त्तमान उपसर्गके उत्तर स्वार्थमें वति प्रत्यय हो, यथा-यदुद्वतो निवतः। उद्गतान्निर्गतान् इत्यर्थः ॥

३४९७ थट् च च्छन्दसि । ५।२।५०॥

नान्तादसंख्यादेः परस्य डटस्थट् स्यान्मट् च। पञ्चथम् । पञ्चमम् ॥ छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि। ५ । २ । ८९ ॥ अपत्यं परिपन्थिनम्। मा त्वा परिपरिणो विदन् ॥

३४९७-वेदमें संख्यावाचक शब्द पूर्वमें न हो ऐसे नकारान्त संख्यावाचक शब्दोंके परे स्थित डट् प्रत्ययको थट् और मट्का आगम हो, यथा-पञ्चथम् । पञ्चमम ।

वेदमें प्रतिपक्ष अर्थात् शत्रु वाच्य होनेपर परिपन्थिन् और परिपरिन् शब्द निपातनसे सिद्ध हों (१८८९) यथा--अपत्यं परिपन्थिनम्। मा त्वा परिपरिणो विदन् ॥

३४९८ बहुलं छन्दसि । ५ ।२।१२२॥

मत्वर्थे विनिः स्यात्॥ छन्दोविन्प्रकरणेऽष्टामेखलाद्वयोभयरुजा हृदयानां दीर्घश्चेति वक्तव्यम् ॥ * ॥ इति दीर्घः । मंहिष्ठमुभयाविनम्। शुनमष्ट्राव्यचरत्॥छन्दसीवनिपौ च वक्तव्यौ॥*॥ ई । रथीरभूत्। सुमङ्गलीरियं वधूः । मघवानमीमहे ॥

३४९८-वेदमें मत्वर्थमें बहुल करके विनि प्रत्यय हो। वेदमें विन् प्रकरणमें अष्ट्रामेखला, द्वय, उभय, रुजा, हृदय शब्दोंके उत्तर विनि प्रत्यय हो, और पूर्वस्वरको दीर्घ हो*यथा-मंहिष्ठमुभयाविनम्। शुनमष्ट्राव्यचरत् ।

वेदमें मत्वर्थमें ई और वनिप् प्रत्यय हो* यथा-ई-रथीरभूत्। सुमङ्गलीरियं वधूः । मघवानमीमहे ॥

३४९९ तयोर्दार्हिलौ च च्छन्दसि। ५ । ३ । २० ॥

इदंतदोर्यथासंख्यं स्तः । इदा हि व उपस्तुतिम्। तर्हि ॥

३४९९--वेदमें इदम् शब्दके उत्तर दा और तद् शब्दके उत्तर र्हिल् प्रत्यय हो, यथा-इदा हि व उपस्तुतिम्। तर्हि ॥

३५०० थाहेतौ च च्छन्दसि।५।३।२६॥

किमस्था स्याद्धेतौ प्रकारे च। कथा ग्रामं न पृच्छसि । कथा दाशेम ॥

३५००-वेद्में हेत्वर्थमें और प्रकारार्थमें किम् शब्दके उत्तर थाल् प्रत्यय हो, था-कथा ग्रामं न पृच्छासि । कथा दाशेम ॥

३५०१ पश्चपश्चा च च्छन्दसि।५।३।३३

अवरस्य अस्तात्यर्थे निपातौ । पश्च हि सः । नो ते पश्चा ॥ तुश्छंदसि । ५ । ३ ।५९॥ तृजन्तात्तृन्नन्ताच्च इष्ठनीयसुनौ स्तः । आसुतिं करिष्ठः । दोहीयसी धेनुः ॥

३५०१-वेदमें अस्ताति प्रत्ययके अर्थमें अवर शब्दके स्थान में निपातनसे पश्च और पश्चा आदेश हो, यथा-पश्च हि नो ते पश्चा । वेदमें तृजन्त और तृन्नन्त शब्दके उत्तर इष्ठन् और ईयसुन् प्रत्यय हो, (२००७) । यथा-आसुतिं करिष्ठः दोहीयसी धेनुः ॥

३५०२ प्रत्नपूर्वविश्वेमात्थाल् छन्दसि ५ । ३। १११ ॥

इवार्थे। तं प्रत्नथा पूर्वथा विश्वथेमथा ॥

३५०२-वेदमें इवार्थमें प्रत्न, पूर्व, विश्व और इम शब्दके उत्तर थाल् प्रत्यय हो, यथा-तं प्रत्नथा पूर्वथा विश्वथेमथा ॥

३५०३ अमु च च्छन्दसि। ५।४। १२ ॥

किमेत्तिङव्ययघादित्येव । प्र तं नय प्रतरम् ॥

३५०३-वेदमें द्रव्यप्रकर्षमें वर्तमान किम् शब्द, एकारान्तशब्द, तिङन्त, अव्यय और घ (तरप् तमप्) प्रत्ययान्त शब्दके उत्तर अमु प्रत्यय हो, यथा-"प्रतं नय प्रतरम्"॥

३५०४ वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि। ५ । ४ । ४१ ॥

स्वार्थे। यो नो दुरेवो वृकतिः । ज्येष्ठतातिं बर्हिषदम् ॥

३५०४-वेदमें वृक और ज्येष्ठ शब्दके उत्तर यथाक्रम स्वार्थमें तिल् और तातिल् प्रत्यय हो, यथा-यो नो दुरेवो वृकतिः । ज्येष्ठतातिं बर्हिषदम् ॥

३५०५ अनसन्तान्नपुंसकाच्छन्दसि। ५ । ४ । १०३ ॥

तत्पुरुषाट्टच् स्यात्समासान्तः । ब्रह्मसामं भवति। देवच्छन्दसानि ॥

३५०५-वेदमें नपुंसक अन्नन्त और असन्त तत्पुरुषके उत्तर समासान्त टच् प्रत्यय हो, यथा-ब्रह्मसामं भवति। देवच्छन्दसानि ॥

३५०६ बहुप्रजाश्छन्दसि।५ ।४।१२३॥

बहुप्रजा निर्ऋतिमा विवेश ॥

३५०६-वेदमें बहुप्रजा शब्द निपातनसे सिद्ध हो। बहवः प्रजा यस्य इस बहुव्रीहि समासमें असिच् प्रत्यय प्रजा शब्दके आकारका 'यस्येति च' इस सूत्रसे लोप, "अत्वसन्तस्य" इस सूत्रसे दीर्घ होकर-बहुप्रजा निर्ऋतिमा विवेश ॥

३५०७ छन्दसि च। ५ । ४ । ६७ ॥

दन्तस्य दतृ स्याद्बहुव्रीहौ । उभयतोदतः प्रतिगृह्णाति ॥

३५०७-वेदमें दन्त शब्दके स्थानमें दतृ आदेश हो, बहुव्रीहि समासमें यथा-उभयतो दन्ता यस्य, इस वाक्यमें उभयतोदतः प्रतिगृह्णाति ॥

३५०८ ऋतश्छन्दसि । ५।४ । १५८ ॥

ऋदन्ताद्बहुव्रीहेर्न कप्। हता माता यस्य हतमाता ॥

॥ इति पञ्चमोध्यायः ॥

३५०८-वेदमें ऋदन्त बहुव्रीहिके उत्तर कप् प्रत्यय न हो, यथा-हता माता यस्य, इस वाक्यमें हतमाता ॥

॥ इति पञ्चमोध्यायः ॥

एकाचो द्वे प्रथमस्य। छन्दसि वेति वक्तव्यम् ॥ * ॥ यो जा गार । दाति प्रियाणि ॥

धात्ववयव प्रथम एकाच्को द्वित्व हो और आदिभूत अच्से परे द्वितीय एकाच्को द्वित्व हो ।

वेदमें धातुको विकल्प करके द्वित्व हो, यथा-"यो जागार" "दाति प्रियाणि" । लोकमें जजागार । ददाति ॥

३५०९ तुजादीनां दीर्घोऽभ्यासस्य। ६ । १ । ७ ॥

तुजादिराकृतिगणः । प्र भरा तूतुजानः । सूर्यं मामहानम् । दाधार यः पृथिवीम् । स तूताव ॥

३५०९-वेदमें तुजादि धातुओंके अभ्यासको दीर्घ हो, यथा-"प्र भरा तूतुजानः" (तुज+लिट्+कानच्) । "सूर्यं मामहानम्" (मह+कानच्) "दाधार यः पृथिवीम्" (धृ+लिट्) । "स तूताव" (तु+लिट्) । लोकमें ह्रस्व होगा,यथा-तुतुजानः । ममहानम् । दधार । तुताव ॥

३५१० बहुलं छन्दसि ।६ । १ । ३४ ॥

ह्वः संप्रसारणं स्यात् । इन्द्रमा हुव ऊतये ॥ ऋचि त्रेरुत्तरपदादिलोपश्च छन्दसि ॥ * ॥ ऋच्शब्दे परे त्रेः संप्रसारणमुत्तरपदादेर्लोपश्चेति वक्तव्यम् । तृचं साम । छन्दसि किम् । त्र्यृचानि ॥ रयेर्मतौबहुलम् ॥ * ॥ रेवान् । रयिमान् पुष्टिवर्धनः ॥

३५१०-वेदमें आङ्पूर्वक ह्वेञ् धातुको सम्प्रसारण हो, यथा-" इन्द्रमा हुव ऊतये " ।

वेदमें ऋक् शब्द परे रहते त्रिशब्दको सम्प्रसारण और उत्तर पदादिका लोप हो*यथा-तृचम् साम । यहां तिस्रः ऋचो यस्मिन्, इस विग्रहमें " ऋक् पूरब्धूः० ९४०" इस सूत्रसे समासान्त अ प्रत्यय हुआहै । वेदसे भिन्न अर्थात् लोकमें तो त्र्यृचानि ।

वेदमें मतुप् प्रत्यय परे रहते रयि शब्दको बहुल करके सम्प्रसारण हो*यथा-रेवान्। यहां "छन्दसीरः ३६००" इस सूत्रसे वत्व हुआहै । सूत्रमें बहुलशब्दग्रहण करनेसे "रयिमान् पुष्टिवर्द्धनः " इस स्थलमें सम्प्रसारण और वत्व न हुआ ॥

३५११ चायः की । ६ । १ । ३५ ॥

न्य १ न्यं चिकयुर्न निचिक्युरन्यम् । लिटि उसि रूपम् । बहुलग्रहणानुवृत्तेर्नेह । अग्निं ज्योतिर्निचाय्य ॥

३५११-वेदमें चाय् धातुको बहुल करके कि आदेश हो, यथा-" न्यन्यञ्चिक्युर्न निचिक्युरन्यम् " । ' निचिक्युः ' यह लिट्के उस्का रूप है । बहुल शब्दकी अनुवृत्तिके कारण " अग्निं ज्योतिर्निचाय्य " । इस स्थलमें कि आदेश न हुआ ॥

३५१२ अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताश्रितमाशीराशीर्ताः । ६ । १ । ३६ ॥

एते छन्दसि निपात्यन्ते । इन्द्रश्च विष्णो यदपस्पृधेथाम् । स्पर्धेर्लङि आथाम् । अर्कमानृचुः । वसून्यानृहुः । अर्चेरर्हेश्च लिट्युसि । चिच्युषे । च्युङो लिटि थासि । यस्तित्याज । त्यजेर्णलि । श्रातास्त इन्द्र सोमाः । श्रिता नो ग्रहाः । श्रीञ् पाके निष्ठायाम् । नाशिरं दुहे । मध्यत आशीर्तः। श्रीञ एव क्विपि निष्ठायां च॥

३५१२-वेदमें अपस्पृधेथाम्, आनृचुः,आनृहुः, चिच्युषे, तित्याज, श्राता, श्रितम्, आशीर और आशीर्त यह पद निपातनसे सिद्ध हों, यथा-"इन्द्रश्च विष्णो यदपस्पृधेथाम्"स्पृध्+लङ्+आथाम् । " अर्कमानृचुः " । " वसून्यानृहुः " अर्च, अर्ह+लिट् उस् । चिच्युषे । च्युङ् लिट् थास् । " यस्तित्याज" । त्यज्+णल् । " श्रातास्त इन्द्र सोमाः " । " श्रिता नो ग्रहाः " श्रिञ् पाके+क्त । " नाशिरं दुहे " । मध्यत आशीर्तः । आङ्पूर्वक श्री धातुका ही क्विप् प्रत्यय और क्त प्रत्यय करनेपर उक्त दोनों रूप सिद्ध हुए हैं ॥

३५१३ खिदेश्छन्दसि । ६ । १ । ५२॥

खिद दैन्ये । अस्यैच आ स्यात् । चिखाद । चिखेदेत्यर्थः ॥

३५१३-वेदमें दैन्यार्थक खिद् धातुके एकारके स्थानमें आकार हो, यथा-चिखाद । चिखेदेत्यर्थः । खिद+लिट्+णल् ॥

३५१४ शीर्षश्छन्दसि । ६ ।१ । ६० ॥

शिरःशब्दस्य शीर्षन् स्यात् । शीर्ष्णः शीर्ष्णो जगतः ॥

३५१४-वेदमें शिरस् शब्दके स्थानमें शीर्षन् आदेश हो, यथा-शीर्ष्णः शीर्ष्णो जगतः ॥

३५१५ वा छन्दसि । ६ । १ ।१०६॥

दीर्घाज्जसि इचि च पूर्वसवर्णदीर्घो वा स्यात्। वाराही । वाराह्यौ । मानुषीरीळते विशः । उत्तरसूत्रद्वयेऽपीदं वाक्यभेदेन संबध्यते । तेनामिपूर्वत्वं वा स्यात् । शमी च शम्यं च । सूर्मि

सूर्म्यं सुषिरामिव । संप्रसारणाच्चेति पूर्वरूपमपि वा । इज्यमानः । यज्यमानः ॥

३५१५–वेदमें दीर्घके उत्तर जस् और इच् परे रहते विकल्प करके पूर्वसवर्ण दीर्घ हो, यथा–वाराही । वाराह्यौ । " मानुषीरीलते विशः " । वराहस्य विकारः, इस वाक्यमें " प्राणिरजतादिभ्योऽञ् १५३२ " इससे अञ्, ङीप् । द्विवचनमें पूर्वसवर्ण दीर्घाभावमें यणादेश होगा । 'मानुषीः' यह प्रथमाका बहुवचन है । मनु शब्दके उत्तर जातार्थमें अञ् और षुक्का आगम हुआहै । उत्तरके दोनों सूत्रोंमें भी यह वाक्यभेदसे सम्बद्ध होताहै, इस कारण अम् परे रहते विकल्प करके पूर्वरूप होगा, यथा–शमीञ्च शम्यञ्च। सूर्म्मिम् सूर्म्यं सुषिरामिव । " सम्प्रसारणाच्च ३३० " इस सूत्रसे पूर्वरूप भी विकल्प करके होगा, इज्यमानः । यज्यमानः । (यज्+लिटः शानच्, यक् । " ग्रहिज्या० " इस सूत्रसे सम्प्रसारण, पूर्वसूत्रके वैकल्पिकत्वके कारण यण्) ॥

३५१६ शेश्छन्दसि बहुलम् ।६।१।७०॥

लोपः स्यात् । या ते गात्राणाम् । ताता पिण्डानाम् ॥ एमन्नादिषु छन्दसि पररूपं वक्तव्यम् ॥ * ॥ अपां त्वेमन् ।अपां त्वोद्मन् ॥

३५१६–वेदमें शिका बहुल करके लोप हो, यथा–"या ते गात्राणाम् " । "ताता पिंडानाम् " । यहां यत् शब्दके परे शिका लोप होनेपर प्रत्ययलक्षणसे " त्यदादीनामः " इससे अत्व, " नपुंसकस्य झलचः " इससे नुमागम " सर्वनामस्थाने च० " इससे दीर्घ, " न लोपः प्रातिपदिकान्तस्य " इससे नलोप हुआहै ॥

एमन् आदि शब्द परे रहते वेदमें पररूप कहना चाहिये* यथा–"अपां त्वेमन् । अपां त्वोद्मन्" ॥

३५१७ भय्यप्रवय्ये च च्छन्दसि । ६ । १ । ८३ ॥

बिभेत्यस्मादिति भय्यः । वेतेः प्रवय्या इति स्त्रियामेव निपातनम् । प्रवेयमित्यन्यत्र । छन्दसि किम् । भेयम् । प्रवेयम् ॥ हृदय्या उपसंख्यानम् ॥ * ॥ हृदे भवा हृदय्या आपः । भवे छन्दसि यत् ॥

३५१७–वेदमें यत् प्रत्यय परे रहते भी धातु और प्रपूर्वक वी धातुको निपातनसे य आदेश हो, बिभेति अस्मात् इति=भय्यः। प्रपूर्वक वी धातुका प्रवय्या यह पद स्त्रीलिङ्गमें ही निपातनसे हो । लोकमें प्रवेयम् । छन्दसि क्यों कहा ? तो भेयम् प्रवेयम् यहां यादेश निपातन न हो ।

'हृदय्या' इस स्थलमें यादेशका उपसंख्यान करना चाहिये * हृदे भवाः=हृदय्या आपः, यहां भवार्थमें वेदमें यत् प्रत्यय हुआ है ॥

३५१८ प्रकृत्यान्तःपादमव्यपरे । ६ । १ । ११५ ॥

ऋक्पादमध्यस्थ एङ् प्रकृत्या स्यात् अति परे न तु वकारयकारपरेति । उपप्रयन्तो अध्वरम् । सुजाते अश्वसूनृते । अन्तःपादं किम् । एतास एतेऽर्चन्ति । अव्यपरे किम् । तेऽवदन् । तेऽयजन् ॥

३५१८–वेदमें वकार यकारपरमें न हो ऐसे अति अर्थात् अकार परे रहते ऋक्पादमध्यस्थ एङ् (एकार ओकार) प्रकृतिके अनुसार हो अर्थात् संधिरूप विकारको प्राप्त न हो, यथा–"उपप्रयन्तो अध्वरम्" । "सुजाते अश्वसूनृते" पादमध्यस्थित होनेपर यथा–"एतास एतेऽर्चन्ति" । अत्पूर्वक वकार और यकार परे रहते यथा–"तेऽवदन् । 'तेऽयजन्" ॥

३५१९ अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च । ६ । १ । ११६ ॥

एषु व्यपरेऽप्यति एङ् प्रकृत्या । वसुभिर्नो अव्यात् । मित्रमहो अवद्यात् । मा शिवासो अवक्रमुः । ते नो अव्रत। शतधारो अयं मणिः। ते नो अवन्तु । कुशिकासो अवस्यवः । यद्यपि बह्वृचैस्तेनोऽवन्तु रथतूः । सोऽयमागात् । तेरुणेभिरित्यादौ प्रकृतिभावो न क्रियते तथापि बाहुलकात्समाधेयम् । प्रातिशाख्ये तु वाचनिक एवायमर्थः ॥

३५१९–वेदमें अव्यात्, अवद्यात्, अवक्रमुः, अव्रत, अयम्, अवन्तु और अवस्यु एतत्सम्बन्धी यकार और वकार परकभी परे रहते एङ् प्रकृतिसे ही रहे अर्थात् संधिद्वारा विकृत न हो, यथा–" वसुभिर्नो अव्यात् " । " मित्रमहो अवद्यात्" । "मा शिवासो अवक्रमुः" ।" ते नो अव्रतः" । "शतधारो अयं मणिः " । " ते नो अवन्तु " । " कुशिकासो अवस्यवः ". । यद्यपि बह्वृच अर्थात् ऋग्वेदज्ञ पण्डितलोग "ते नोऽवन्तु रथतः " " सोऽयमागात् " "तेऽरुणेभिः" इत्यादि स्थलमें प्रकृतिभाव अर्थात् संधिनिषेध नहीं करतेहैं, तथापि यह सब बाहुलकबलसे सिद्ध होतेहैं । प्रातिशाख्यमें तो यह अर्थ वाचनिक ही है ॥

३५२० यजुष्युरः । ६ । १ । ११७ ॥

उरःशब्द एङन्तोऽति प्रकृत्या यजुषि । उरो अन्तरिक्षम् । यजुषि पादाभावादनन्तःपादार्थं वचनम् ॥

३५२०–यजुर्वेदमें अकार परे रहते एङन्त उरस् शब्द संधिद्वारा विकृत न हो, यथा–"उरो अन्तरिक्षम् " । इस स्थलमें " प्रकृत्यान्तः० ३५१८" इस सूत्रसे उक्त पद सिद्ध होजाते पुनः सूत्रकरणकी आवश्यकता क्या ? इस शंकापर

कहतेहैं कि,-यजुर्वेदमें पादके अभावके कारण पूर्वसूत्रसे सिद्ध न होनेके कारण पृथक् सूत्र कियाहै ॥

३५२१ आपोजुषाणोवृष्णोवर्षिष्ठेऽम्बेऽम्बालेऽम्बिके पूर्वे । ६ । १ । ११८ ॥

यजुषि अति प्रकृत्या । आपो अस्मान्मातरः । जुषाणो अग्निराज्यस्य । वृष्णो अंशुभ्याम् । वर्षिष्ठे अधि नाके । अम्बे अम्बाले अम्बिके । अस्मादेव वचनादम्बार्थेति ह्रस्वो न ॥

३५२१-यजुर्वेदमें अत् परे रहते आपो, जुषाणो, वृष्णो, वर्षिष्ठे, अम्बे, अम्बाले, अम्बिके, इन पदोंका एङ् प्रकृतिसे रहे यथा-" आपो अस्मान्मातरः " । " जुषाणो अग्निराज्यस्य" । "वृष्णो अंशुभ्याम्" । "वर्षिष्ठे अधिनाके" । "अम्बे,अम्बाले, अम्बिके"इस स्थलमें इसी वचनसे"अम्बार्थनद्योः०" इससे ह्रस्व नहीं हुआ, इस सूत्रमें आपः यह पद जस्विभक्त्यन्त है । जुषाणो पद सुविभक्त्यन्त है । तीसरा शसन्त है । चौथा ङ्यन्त और शेष सम्बोधनान्त है ॥

३५२२ अङ्ग इत्यादौ च । ६।१।११९॥

अङ्गशब्दे य एङ् तदादौ अकारे च य एङ्पूर्वः सोऽति प्रकृत्या यजुषि । प्राणो अंगे अंगे अदीव्यत् ॥

३५२२-यजुर्वेदमें अकार परे रहते अंग शब्दमें जो एङ् और उसके आदिभूत अकारके परे पूर्व जोएङ् वह दोनो एङ् विकृत न हों, यथा-"प्राणो अंगे अंगे अदीव्यत्" ॥

३५२३अनुदात्ते च कुधपरे।६।१।१२०॥

कवर्गधकारपरे अनुदात्तेऽति परे एङ् प्रकृत्या यजुषि । अयं सो अग्निः । अयं सो अध्वरः । अनुदात्ते किम् । अधोऽग्रे रुद्रे । अग्रशब्द आद्युदात्तः । कुधपरे किम् । सोऽयमग्निमितः ॥

३५२३-यजुर्वेदमें कवर्ग और धकार परे है, ऐसा अनुदात्त अत् परे रहते एङ् विकृत न हो, यथा-"अयं सो अग्निः" । "अयं सो अध्वरः" । अनुदात्त न होनेपर यथा-"अधोऽग्रे रुद्रे" इस स्थानमें अग्र शब्दका प्रथम वर्ण उदात्त है । कवर्ग और धकार परे न रहते तो एङ् विकृत होगा, यथा-"सोयमग्निमितः" ॥

३५२४ अवपथासि च । ६।१।१२१॥

अनुदात्ते अकारादौ अवपथाःशब्दे परे यजुषि एङ् प्रकृत्या । त्रीरुद्रेभ्यो अवपथाः।वपेस्थासि लङि तिङ्ङतिङ इत्यनुदात्तत्वम् । अनुदात्ते किम् । यद्रुद्रेभ्योऽवपथाः । निपातैर्यद्यदीति निघातो न ॥

३५२४-यजुर्वेदमें अनुदात्त अकारादि अवपथाः शब्द परे रहते एङ् प्रकृतिसे रहै, यथा-"त्रीरुद्रेभ्यो अवपथाः" यहां वप् धातुसे लङ् थास् करनेपर "तिङ्ङतिङः ३९३५" इस सूत्रसे अनुदात्तत्व हुआ । अनुदात्त न होनेपर एङ् विकृत होगा, यथा-"यद्रुद्रेभ्योऽवपथाः" यहां "निपातैर्यद्यदि३९३७"इस वक्ष्यमाण सूत्रसे निघातस्वर नहीं हुआ॥

३५२५ आङोऽनुनासिकश्छन्दसि । ६ । १ । १२६ ॥

आङोऽचि परेऽनुनासिकः स्यात् स च प्रकृत्या- अभ्र आँ अपः । गभीर आँ उग्रपुत्रे ॥ ईषाअक्षादीनां छन्दसि प्रकृतिभावो वक्तव्यः ॥ * ॥ ईषा अक्षो हिरण्ययः।ज्या इयम् । पूषा अविष्टु॥

३५२५-वेदमें अच् परे रहते आङ् अनुनासिक हो, और वह प्रकृतिसे रहै, अर्थात् संधिद्वारा विकृत न हो, यथा-"अभ्र आँ अपः" यहां आङ् सप्तम्यर्थद्योतक है । "गभीर आँ उग्रपुत्रे" ॥

वेदमें ईषा अक्षादि शब्दोंको प्रकृतिभाव हो ऐसा कहना चाहिये * यथा-"ईषा अक्षो हिरण्ययः" । "ज्या इयम्" "पूषा अविष्टुः" ॥

३५२६स्यश्छन्दसि बहुलम्।६।१।१३३।

स्य इत्यस्य सोर्लोपः स्याद्धलि।एष स्य भानुः॥

३५२६-वेदमें हल् अर्थात् व्यञ्जन वर्ण परे रहते स्य इसके उत्तर सु विभक्तिका लोप हो, यथा-"एष स्य भानुः" ॥

३५२७ ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे । ६ । १ । १५१ ॥

ह्रस्वात्परस्य चन्द्रशब्दस्योत्तरपदस्य सुडागमः स्यान्मन्त्रे । हरिश्चन्द्रो मरुद्गणः । सुश्चन्द्र दस्म ॥

३५२७-मंत्रमें ह्रस्वके उत्तर उत्तरपदभूत चन्द्र। शब्दको सुडागम हो, यथा-" हरिश्चन्द्रो मरुद्गणः " सुश्चन्द्र दस्म ॥

३५२८ पितरामातरा च च्छन्दसि । ६ । ३ । ३३ ॥

द्वन्द्वे निपातः । आ मा गन्तां पितरामातरा च । चाद्विपरीतमपि मातरापितरा नू चिदिष्टौ॥ समानस्य छन्दस्य मूर्धप्रभृत्युदर्केषु । ६ । ३।८४॥ समानस्य सः स्यान्मूर्धादिभिन्ने उत्तरपदे । सगर्भ्यः ॥ छन्दसि स्त्रियां बहुलम् ॥ * ॥ विष्वग्देवयोरद्र्यादेशः । विश्वाची च घृताची च । देवद्रीचीं नयत देवयन्तः । कद्रीची ॥

३५२८-वेदमें द्वन्द्वसमासमें पितरामातरा यह पद निपातनसे सिद्ध हो, यथा-"आ मा गंतां पितरामातरा च" । सूत्रमें चकार द्वारा विपरीत भी होगा, यथा-"मातरापितरा नू चिदिष्टौ" ॥

वेदमें मूर्द्धादि भिन्न उत्तरपद परे रहते समान शब्दके स्थानमें स आदेश हो, (१०१२) यथा-"सगर्भ्यः" ॥

वेदमें स्त्रीलिङ्गमें बहुल करके अद्र्यादेश हो *। "विष्वग्देवयोः०" से अद्र्यादेश न होकर यथा-"विश्वाची च घृताची च देवद्रीचीं । नयत देवयन्तः" । अद्र्यादेश होकर-कद्रीची ॥

३५२९ सध मादस्थयोश्छन्दसि । ६ । ३ । ९६ ॥

सहस्य सधादेशः स्यात् । इन्द्र त्वास्मिन्त्सधमादे । सोमः सधस्थम् ॥

३५२९-वेदमें माद और स्थ शब्द परे रहते सह शब्दके स्थानमें सध आदेश हो, यथा-"इन्द्र त्वास्मिन्त्सधमादे" । "सोमः सधस्थम्" ॥

३५३० पथि च च्छन्दसि।६।३।१०८॥

पथिशब्दे उत्तरपदे कोः कवं कादेशश्च । कवपथः । कापथः । कुपथः ॥

३५३०-वेदमें उत्तरपदभूत पथिन् शब्द परे रहते कु शब्दके स्थानमें कव और का आदेश हो, यथा-कवपथः । कापथः । कुपथः ॥

३५३१ साढ्यै साढ्वा साढेति निगमे। ६ । ३ । ११३ ॥

सहेः क्त्वाप्रत्यये आद्यं द्वयं तृनि तृतीयं निपात्यते । मरुद्भिरुग्रः पृतनासु साह्ळा । अचोर्मध्यस्थस्य डस्य ळः ढस्य ह्ळश्च प्रातिशाख्ये विहितः । आह हि । " द्वयोश्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो ळकारः । ह्ळकारतामेति स एव चास्य ढकारः सन्नूष्मणा सम्प्रयुक्ते " ॥ इति ॥

३५३१-वेद (निगम) में सह धातुके उत्तर क्त्वा प्रत्यय करके निपातनसे साढ्यै, साढ्वा यह दो पद और तृन् प्रत्यय करके 'साढा' यह पद सिद्ध हों, यथा-"मरुद्भिरुग्रः पृतनासु साह्ळा" । प्रातिशाख्यमें दो अच्के मध्यस्थित डकारके स्थानमें ळ और ढके स्थानमें ह्ळ आदेश विहित है। कहा है कि, इस आचार्यके मतसे दो स्वरके मध्यवर्त्ती डकार ळकार रूपसे परिणत होताहै और वही डकार ऊष्मवर्णसंयुक्त होनेसे ढकार होकर दो अच्के मध्यमें ह्ळकार होताहै ॥

३५३२ छन्दसि च । ६ । ३।१२६॥

अष्टन आत्वं स्यादुत्तरपदे । अष्टापदी ॥

३५३२-वेदमें उत्तर पद परे रहते अष्टन् शब्दको आकार हो, "अष्टापदी" यहां अष्टौ पादा अस्याः, इस विग्रहमें "संख्यासुपूर्वस्य ८७९" इससे पादका लोप करनेपर "पादोऽन्यतरस्याम् ४५७" इससे ङीप् हुआ ॥

३५३३ मन्त्रे सोमाऽश्वेन्द्रियविश्वदेव्यस्य मतौ । ६ । ३ । १३१ ॥

दीर्घः स्यान्मन्त्रे । अश्वावतीं सोमावतीम् । इन्द्रियावान्मदिन्तमः । विश्वकर्मणा विश्वदेव्यावता ॥

३५३३-मंत्रमें मतुप् प्रत्यय परे रहते सोम, अश्व, इन्द्रिय, विश्व और देव्य शब्दको दीर्घ हो, यथा-अश्वावतीम् सोमावतीम् । "इन्द्रियावान् मदिन्तमः" । "विश्वकर्मणा विश्वदेव्यावता" ॥

३५३४ ओषधेश्च विभक्तावप्रथमायाम् । ६ । ३ । १३२ ॥

दीर्घः स्यामन्त्रे । यदोषधीभ्य अदधात्योषधीषु ॥

३५३४-मंत्रमें प्रथमाभिन्न विभक्ति परे रहते ओषधि शब्दके इकारको दीर्घ हो, यथा-"यदोषधीभ्य अदधात्योषधीषु" ॥

३५३५ ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् । ६ । ३ । १३३ ॥

दीर्घः स्यात् । आ तू न इन्द्र । नू मर्तः । उत वा घा स्यालात् । मक्षू गोमन्तमीमहे । भरता जातवेदसम् । तङिति थादेशस्य ङित्त्वपक्षे ग्रहणम् । तेनेह न । शृणोत ग्रावाणः । कूमनाः । अत्रा ते भद्रा । यत्रा नश्चक्रा । उरुष्याणः ॥

३५३५-ऋग्विषयमें तु, नु, घ, मक्षु, तङ्, कु, त्र, उरुष्य शब्दके स्वरको दीर्घ हो, यथा-"आ तू न इन्द्र" । "नू मर्तः" । "उत वा घा स्यालात्" । "मक्षू गोमन्तमीमहे" । "भरता जातवेदसम्" । तङ् यह ङित्वपक्षमें थकारादेशका ग्रहण है, इस कारण 'शृणोत ग्रावाणः' इस स्थानमें दीर्घ नहीं हुआ । "कूमनाः" । "अत्रा ते भद्रा" । "यत्रा नश्चक्रा" । उरुष्याणः ॥

३५३६ इकः सुञि । ६ । ३ १३४ ॥

ऋचि दीर्घ इत्येव । अभीषुणः सखीनाम् । सुञ इति षः । नश्च धातुस्थोरुषुभ्य इति णः ॥

३५३६-ऋक्विषयमें सुञ् धातु परे रहते इगन्त अर्थात् इ, उ, ऋ, ऌकारान्त शब्दोंको दीर्घ हो यथा-"अभीषुणः सखीनाम् " यहां "सुञः ३६४४" इस वक्ष्यमाण सूत्रसे पूर्वपदस्थ निमित्तके परे सुञ् धातुके सकारको षत्व हुआ, और "नश्च धातुस्थोरुषुभ्यः ३६४९" इस वक्ष्यमाण सूत्रसे णत्व हुआ ॥

३५३७ द्व्यचोऽतस्तिङः । ६। ३।१३५॥

मन्त्रे दीर्घः । विद्मा हि चक्रा जरसम् ॥

३५३७-ऋक् विषयमें दो स्वरविशिष्ट तिङ्प्रत्ययान्त पदके अकारको दीर्घ हो, यथा-"विद्मा हि चक्रा जरसम्"॥

३५३८ निपातस्य च । ६ । ३ । १३६॥

एवा हि ते ॥

३५३८-ऋग्विषयमें निपातको दीर्घ हो, "एवा हि ते" । इस स्थानमें एव शब्दको चादिमें पाठके कारण निपात संज्ञा हुई है ॥

३५३९ अन्येषामपि दृश्यते।६।३।१३७।

अन्येषामपि पूर्वपदस्थानां दीर्घः स्यात् । पूरुषः । दण्डादण्डि॥

३५३९-वेदमें पूर्वपदस्थ अन्यको भी दीर्घ हो, यथा-पूरुषः । दण्डादण्डि ॥

३५४० छन्दस्युभयथा । ६ । ४ । ५॥

नामि दीर्घो वा । धाता धातॄणामिति बह्वृचाः । तैत्तिरीयास्तु ह्रस्वमेव पठन्ति ॥

३५४०-वेदमें आम् विभक्ति परे रहते पूर्वस्वरको विकल्प करके दीर्घ हो, यथा-"धाता धातॄणाम्" यह बह्वृचलोग कहते हैं, तैत्तरीयशाखाध्यायी लोग तो दीर्घके स्थानमें ह्रस्वपाठ करते हैं ॥

३५४१ वाषपूर्वस्य निगमे ।६।४ । ९॥

षपूर्वस्यान उपधाया वा दीर्घोऽसंबुद्धौ सर्वनामस्थाने परे । ऋभुक्षाणम् । ऋभुक्षणम् । निगमे किम् । तक्षा । तक्षाणौ ॥

३५४१-निगममें सम्बोधनभिन्न सर्वनाम स्थान परे रहते षकार पूर्वक अन्की उपधाको विकल्प करके दीर्घ हो, यथा-" ऋभुक्षाणम्, ऋभुक्षणम् " । निगम भिन्न स्थलमें अर्थात् लोकमें तो नित्य दीर्घ होगा, यथा-तक्षा । तक्षाणौ ॥

३५४२ जनिता मन्त्रे ।६ । ४ । ५३ ॥

इडादौ तृचि णिलोपो निपात्यते । यो नः पिता जनिता ॥

३५४२-वेदमें मंत्रविषयमें इडादि (इट् आदिमें है ऐसे) तृच् प्रत्यय परे रहते 'जनिता' इसमें निपातनसे णि अर्थात् णिच्का लोप हो, यथा-"यो नः पिता जनिता" ॥ लोकमें जनयिता ॥

३५४३ शमिता यज्ञे । ६ । ४ । ५४ ॥

शमयितेत्यर्थः ॥

३५४३-वेदमें यज्ञ वाक्य होनेपर इट् आदिमें है जिसके ऐसा तृच् प्रत्यय परे रहते निपातनसे शम धातुके उत्तर णिच्का लोप हो, यथा-शमिता । अन्यत्र अर्थात् लोकमें शमयिता ॥

३५४४ युप्लुवोर्दीर्घश्छन्दसि।६।४।५८॥

ल्यपीत्यनुवर्तते । वियूय । विप्लूय । आङजादीनाम् । ६ । ४ । ७२ ॥

३५४४-वेदमें ल्यप् प्रत्यय परे रहते यु और प्लु धातुके उकारको दीर्घ हो, यथा-वियूय । विप्लूय । वेदभिन्न अर्थात् लोकमें यथा-आयुत्य । आप्लुत्य ॥

" आडजादीनाम् २२४४ " लुङादि विभक्ति परे रहते अजादि धातुको आट्का आगम हो ॥

३५४५ छन्दस्यपि दृश्यते ।६।४।७३॥

अनजादीनामित्यर्थः । आनट् । आवः । "न माङ्योगे । ६ । ४ । ७४" ॥

३५४५-वेदमें अनजादि अर्थात् स्वरवर्ण आदिमें न हो ऐसे धातुओंको भी आट्का आगम हो,यथा-आनट् । आवः। 'आनक्' यहां नश् धातुसे लुङ् 'मन्त्रे घस० ३४०२' इससे च्लिका लुक् 'नशेर्वा ४३१' इसकी प्रवृत्ति न होनेपर "व्रश्च० २९४" इससे षत्व, जश्त्व और चर्त्व हुआ । 'आवः' यहां वृञ् धातुसे लुङ्, च्लिका लुक् गुण, रेफको विसर्ग हुआ ॥

माङ् शब्दके योगमें अट् और आट्का आगम न हो (२२२८) ॥

३५४६ बहुलं छन्दस्यमाङ्योगेऽपि । ६ । ४ । ७५ ॥

अडाटौ न स्तः माङ्योगेपि स्तः ॥ जनिष्ठा उग्रः सहसे तुरायः । मा वः क्षेत्रे परबीजान्यवाप्सुः ॥

३५४६-वेदमें माङ् शब्दका योग हो अथवा न हो तथापि धातुको बहुल करके अट् और आट् आगम हो, अर्थात् माङ् शब्दका योग न होनेपर भी नहीं हो और माङ् शब्दके योग होनेपर भी हो,यथा-"जनिष्ठा उग्रः सहसे तुरायः" यहां जन् धातुसे लुङ्+थास्+अडागमाभाव हुआ । माङ्योगमें भी अडागमका उदाहरण, यथा-"मा वः क्षेत्रे परबीजान्यवाप्सुः" । वो युष्माकं क्षेत्रे भार्य्यायां परबीजानि अन्येषां वीर्य्याणि मा अवाप्सुः उप्तानि मा भूवन् इत्यर्थः । 'अवाप्सुः' यहां वप् धातुसे कर्ममें लुङ् अडागम और व्यत्ययसे परस्मैपद हुआ । और च्लिके स्थानमें सिच् "वदव्रज० २२६७" से वृद्धि हुई । यह उदाहरण काशिकाके अनुरोधसे है, क्यों कि, अध्ययनमें 'वाप्सुः' ऐसा ही पाठ देखाजाताहै । माङ्योगमें अडागमका उदाहरणान्तर अन्वेषण करलेना ॥

३५४७ इरयोरे । ६ । ४ । ७६ ॥

प्रथमं दध्र आपः । रेभावस्याभीयत्वेनासिद्धत्वादालोपः। अत्र रेशब्दस्येटि कृते पुनरपि रेभावः। तदर्थं च सूत्रे द्विवचनान्तं निर्दिष्टमिरयोरिति ॥

३५४७-वेदमें धातुके उत्तर 'इरे' इसके स्थानमें रे आदेश हो, यथा-"प्रथमं दध्र आपः" यहां आभीयत्वके कारण रे भावकी असिद्धि होनेसे आकारका लोप हुआ । इस स्थानमें रे शब्दको इट् करनेपर फिर रेभाव हुआ, इसकारण सूत्रमें "इरयोः" । ऐसा द्विवचनान्त निर्देश कियाहै । नहीं तो लक्षणप्रतिपदोक्त परिभाषासे पुनर्वार रे आदेश नहीं होता ॥

३५४८ छन्दस्युभयथा । ६ । ४ । ८६ ॥

भूसुधियोर्यण् स्यादियङुवङौ च। वनेषु चित्रं विभ्वम् । विभुवं वा । सुध्यो नव्यमग्ने । सुधियो वा ॥ तन्वादीनां छन्दसि बहुलम् ॥ * ॥ तन्वं पुषेम तनुवं वा । त्र्यम्बकम् । त्रियम्बकम् ॥

३५४८–वेदमें भू और सुधी शब्दको यण् और इयङ् और उवङ् यह दो आदेश हों, यथा–"वनेषु चित्रम् विभ्वम्"। विभुवं वा "सुध्यो तव्यमग्ने"। सुधियो वा।

तन्वादि शब्दोंको वेदमें उक्त आदेश बहुलकरके हो * यथा–तन्वं पुषेम। तनुवं वा । त्र्यम्बकम् । त्रियम्बकम्। (त्रीणि अम्बकानि नेत्राणि अस्य असौ त्र्यम्बको रुद्रः) ॥

३५४९ तनिपत्योश्छन्दसि । ६।४।९९॥

एतयोरुपधालोपः क्ङिति प्रत्यये । वितत्निरे कवयः । शकुना इव पप्तिम ॥

३५४९–वेदमें कित् और ङित् प्रत्यय परे रहते तन् धातु और पत् धातुकी उपधाका लोप हो,यथा–"वितत्निरे कवयः"। इस स्थलमें अकारलोपके असिद्धत्व होनेपर भी लोप विधानकी सामर्थ्यके कारण "अत एकहल्मध्ये० २२६०" इस सूत्रसे एत्व और अभ्यासका लोप नहीं हुआ। "शकुना इव पप्तिम"। पत+लिट्+म=पप्तिम लोकमें वितेनिरे । पेतिम इस प्रकार होंगे ॥

३५५० घसिभसोर्हलि च । ६।४।१००॥

सग्धिश्च मे। बब्धां ते हरी धानाः। "हुझल्भ्यो हेर्धिः ६।४।१०१" ॥

३५५०–वेदमें हलादि और अजादि कित् और ङित् प्रत्यय परे रहते घस् और भस् धातुकी उपधाका लोप हो, यथा–"सग्धिश्चमे"। अद धातुसे क्तिन् प्रत्यय "बहुलं छन्दसि" इस सूत्रसे अद धातुके स्थानमें घस आदेश और उपधाका लोप, "झलो झलि २२८१" इस सूत्रसे सकारका लोप, तकारके स्थानमें धकार, घको जश्त्व, पश्चात् 'समान ग्धिः सग्धिः' इस प्रकार समास करके "समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु १०१२" इस सूत्रसे समान शब्दके स्थानमें स आदेश होकर सग्धिः। "बब्धान्ते हरी धानाः" यहां भस्+लोट् ताम्+श्लु पश्चात् पर और नित्य भी उपधालोपको बाध करके बाहुलकबलसे "श्लौ" इस सूत्रसे द्वित्व, पश्चात् उपधाका लोप, सकारलोप, घत्व और जश्त्व करके 'बब्धाम्' पद सिद्ध हुआ है। हु धातु और झलन्त धातुके उत्तर हिके स्थानमें धि आदेश हो २४२५ ॥

३५५१ श्रुशृणुपॄकृवृभ्यश्छन्दसि । ६ । ४ । १०२ ॥

श्रुधी हवम् । शृणुधी गिरः । रायस्पूर्धि । उरुणस्कृधि । अपावृधि ॥

३५५१–वेदमें श्रु, शृणु, पॄ, कृ और वृ धातुके उत्तर हिके स्थानमें धि आदेश हो, यथा–"श्रुधी हवम्" यहां "बहुलं छन्दसि" इस सूत्रसे शप्का लुक्, "अन्येषामपि० ३५३९" इस सूत्रसे दीर्घ हुआ । "शृणुधी गिरः"। श्रु धातुको श्नुभाव विधान सामर्थ्यके कारण "उतश्च प्रत्ययात्० १३३४" इस सूत्रसे हिका लुक् न हुआ और पूर्ववत् दीर्घ और हिके स्थानमें धि हुआ। "रायस्पूर्द्धि"। यहां शप्का लुक् "उदोष्ठ्यपूर्वस्य २४९४" इस सूत्रसे ऋके स्थानमें उकार और "हलि च ३५४" इस सूत्रसे दीर्घ हुआ । "उरुणस्कृधि" यहां "नश्चधातुभ्योरुषुभ्यः" इस सूत्रसे णत्व, "कः करत्० ३६३५" इस सूत्रसे विसर्गके स्थानमें सत्व हुआ "अपावृधि"। इस स्थलमें पूर्ववत् दीर्घ हुआ ॥

३५५२ वा छन्दसि । ६ । ४ । ८८॥

हिरपिद्वा ॥

३५५२–वेदमें हि विभक्ति विकल्प करके अपित् हो ।

३५५३ अङितश्च । ६ । ४ । १०३ ॥

हेर्धिः स्यात्। रारन्धि । रमेर्व्यत्ययेन परस्मैपदम् । शपः श्लुरभ्यासदीर्घश्च । अस्मे प्रयन्धि । युयोधि जातवेदः । यमेः शपो लुक् । यौतेः शपः श्लुः ॥

३५५३–वेदमें अङित् हिके स्थानमें धि आदेश हो, यथा रारन्धि । यहां रम् धातुको व्यत्ययसे परस्मैपद हुआ, शप्के स्थानमें श्लु आदेश और अभ्यासको दीर्घ हुआ। "अस्मे प्रयन्धि" "युयोधि जातवेदः" यहां यम् धातुके उत्तर शप्का लुक् हुआ । यु धातुके उत्तर शप्के स्थानमें श्लु आदेश हुआ ॥

३५५४ मन्त्रेष्वाङ्यादेरात्मनः । ६ । ४ । १४१ ॥

आत्मनशब्दस्यादेर्लोपः स्यादाङि । त्मना देवेषु ॥

३५५४–वेदमें आङ् प्रत्यय परे रहते आत्मन् शब्दके आदिभागका लोप हो, यथा–"त्मना देवस्य"। लोकमें आत्मना ॥

३५५५ विभाषर्जोश्छन्दसि। ६।४।१६२॥

ऋजुशब्दस्य ऋतः स्थाने रः स्याद्वा इष्ठेमेयस्सु । त्वं रजिष्ठमनुनेषि । ऋजिष्ठं वा ॥

३५५५–वेदमें इष्ठ इमन् और ईयसुन् प्रत्यय परे रहते ऋजु शब्दके ऋकारके स्थानमें विकल्प करके र आदेश हो, यथा–" त्वं रजिष्ठमनुनेषि "। ऋजिष्ठं वा ॥

३५५६ ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसि । ६ । ४ । १७५॥

ऋतौ भवमृत्व्यम्। वास्तुनि भवं वास्त्व्यम्। वास्त्वं च। मधुशब्दस्याणि स्त्रियां यणादेशो निपात्यते। माध्वीर्नः सन्त्वोषधीः । हिरण्य

शब्दाद्विहितस्य मयटो मशब्दस्य लोपो निपात्यते । हिरण्येन सविता रथेन ॥

॥ इति षष्ठोऽध्यायः ॥

३५५६-वेदमें ऋत्व्य, वास्त्व्य, वास्त्व, माध्वी, हिरण्यय, यह निपातनसे सिद्ध हों, यथा-ऋतौ भवम्, इस विग्रहमें निपातनसे यत् प्रत्यय परे यणादेश होकर-ऋत्व्यम्। वास्तुनि भवम्, इस विग्रहमें यत् और अण् प्रत्यय परे निपातनसे यणादेश होकर वास्त्व्यम् । वास्त्वम् च । मधु शब्दको स्त्रीलिङ्गमें निपातनसे यण् आदेश होकर-यथा-"माध्वीर्नः सन्त्वोषधीः" । हिरण्य शब्दके उत्तर विहित मयट् प्रत्ययके मकारका निपातनसे लोप होकर-" हिरण्येन सविता रथेन" ॥

॥ इति षष्ठोऽध्यायः ॥

" शीङो रुट् । ७ । १ । ६ । "

शीङ् धातुके परे झादेश अत्को रुट्का आगम हो२४४२॥

३५५७ बहुलं छन्दसि । ७ । १ । ८ ॥

रुडागमः स्यात् । लोपस्त आत्मनेपदेष्विति पक्षे तलोपः । धेनवो दुहे । लोपाभावे घृतं दुहते ।अदृश्रमस्य। "अतो भिस ऐस् ।७।१।९" ॥

३५५७-वेदमें शीङ् धातुके परे झादेश अत्को बहुल करके रुट्का आगम हो, " लोपस्त आत्मनेपदेषु ३५६३ " इस सूत्रसे पक्षमें तकारका लोप होकर-यथा-"धेनवो दुहे" (दुह्+लट्, टेरेत्व, झको अत् आदेश, रुट्, तकारका लोप) लोपाभावमें घृतं दुहते । " अदृश्रमस्य " यहां दृश् धातुसे+लुङ्, व्यत्ययसे प्रथमपुरुषके बहुवचन स्थानमें उत्तम पुरुषका एकवचन और उसको रुडागम हुआहै । अदन्त अङ्गके उत्तर भिस्के स्थानमें ऐस् हो २०३-॥

३५५८ बहुलं छन्दसि । ७ । १ ।१०॥

अग्निर्देवेभिः ॥

३५५८-वेदमें भिस्के स्थानमें बहुल करके ऐस् हो, यथा-" अग्निर्देवेभिः " ॥

३५५९ नेतराच्छन्दसि । ७ ।१। २६ ॥

स्वमोरदड् न । वार्त्रघ्नमितरम् । छन्दसि किम् । इतरत्काष्ठम् ॥ "समासेऽनञ्पूर्वे क्त्वो ल्यप् । ७ । १ । ३७॥

३५५९-वेदमें इतर शब्दके परे सु और अम्के स्थानमें अदड् आदेश न हो, यथा-"वार्त्रघ्नमितरम्" । लोकमें तो 'इतरत् काष्ठम्' ऐसा होगा। अनञ् पूर्वक समासमें क्त्वाके स्थानमें ल्यप् आदेश हो ३३३२-॥

३५६० क्त्वापि च्छन्दसि । ७।१।३८ ॥

यजमानं परिधापयित्वा ॥

३५६०-अनञ् पूर्वक समासमें क्त्वा आदेश भी हो अपि शब्दसे ल्यप् भी समास और असमासमें हो इस स्थलमें अपि शब्द अप्राप्त ल्यप्का प्रापक है, यथा-"यजमानं परिधापयित्वा" यहां णिजन्त परिपूर्वक धा धातुके उत्तर क्त्वा प्रत्यय, उसके स्थानमें ल्यबादेश प्राप्त होनेपर क्त्वा आदेश हुआ ॥

३५६१ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः । ७ । १ । ३९ ॥

ऋजवः सन्तु पन्थाः । पन्थान इति प्राप्ते सुः। परमे व्योमन् व्योमनि इति प्राप्ते ङेर्लुक्। धीती। मती। सुष्टुती। धीत्या मत्या सुष्टुत्येति प्राप्ते पूर्वसवर्णदीर्घः । या सुरथा रथीतमा दिविस्पृशा अश्विना। यौ सुरथौ दिविस्पृशावित्यादौ प्राप्ते आ । नताद्ब्राह्मणम् । नतमिति प्राप्ते आत् । यादेव विद्म तात्वा । यमिति प्राप्ते । न युष्मे वाजबन्धवः। अस्मे इन्द्राबृहस्पती । युष्मासु अस्मभ्यमिति प्राप्ते शे । उरुया । धृष्णुया। उरुणा धृष्णुनेति प्राप्ते या । नाभा पृथिव्याः। नाभाविति प्राप्ते डा । ता अनुष्ठयोच्यावयतात् । अनुष्ठानमनुष्ठा । व्यवस्थावदङ्। आङो ड्या । साधुया । साध्विति प्राप्ते याच् । वसन्ता यजेत । वसन्ते इति प्राप्ते आल् ॥ इयाडियाजीकाराणामुपसंख्यानम् ॥*॥ उर्विया । दार्विया। उरुणा दारुणेति प्राप्ते इया। सुक्षेत्रिया।सुक्षेत्रिणेति प्राप्ते डियाच्।दृतिं न शुष्कं सरसी शयानम्। ङेरीकार इत्याहुः । तत्राद्युदात्ते पदे प्राप्ते व्यत्ययेनान्तोदात्तता । वस्तुतस्तु ङीषन्तात् ङेर्लुक् । ईकारादेशस्य तूदाहरणान्तरं मृग्यम् ॥ आङ्याजयारामुपसंख्यानम् ॥ * ॥ प्रबाहवा सिसृतम् । प्रबाहुनेति प्राप्ते आङादेशः । घेर्ङितीति गुणः । स्वप्नया । स्वप्नेनेति प्राप्ते अयाच् । स नः सिन्धुमिव नावया । ना वेति प्राप्ते अयार् । रित्स्वरः ॥

३५६१-वेदमें सुप्के स्थानमें सु, सुप्का लुक्, पूर्वसवर्णदीर्घ, आ, आत्, शे, या, डा, ड्या, याच् और आल् आदेश हों, यथा-"ऋजवः सन्तु पन्थाः" । इस स्थलमें 'पन्थानः' ऐसा प्राप्त होनेपर सु हुआ है । "परमे व्योमन्"। इस स्थानमें 'व्योमनि' इस प्रकार प्राप्त होनेपर ङिका लुक् हुआहै । 'धीती मती सुष्टुती' इन स्थलोंमें 'धीत्या मत्या सुष्टुत्या' इस प्रकार प्राप्त होनेपर पूर्वसवर्ण दीर्घ हुआ है । "या सुरथा रथीतमा दिवि स्पृशा अश्विना" इस स्थलमें यौ सुरथौ दिविस्पृशौ ऐसे प्राप्त होनेपर आ हुआ है । "नताद् ब्राह्मणम्" इस स्थानमें 'नतम्' ऐसे प्राप्त होनेपर आत् हुआ है । "यादव विद्म तात्वा" यहां 'यम्' ऐसे प्राप्तमें आत् हुआ है "न युष्मे वाज बन्धवः॥ अस्मे इन्द्रा बृहस्पति" इस स्थानमें युष्मासु और अस्मभ्यम् ऐसा प्राप्त होनेपर शे हुआ है ।

"उरुया । धृष्णुया" इस स्थानमें 'उरुणा' और 'धृष्णुना' ऐसे प्राप्त होनेपर या हुआ है । "नाभा पृथिव्याः" इस स्थानमें नाभौ ऐसा प्राप्त होनेपर डा हुआहै । "ता अनुष्ठोच्यावयतात्" इस स्थलमें अनुष्ठानम्, इस विग्रहमें 'अनुष्ठा' पद हुआ, यहां 'व्यवस्था' पदकी समान अङ् आङ्के स्थानमें ड्या और डित्वके कारण टिका लोप हुआ है 'साधुया' इस स्थानमें 'साधु' ऐसे प्राप्त होनेपर याच् हुआ है । "वसन्ता यजेत" इस स्थानमें 'वसन्ते' ऐसे प्राप्त होनेपर आल् हुआ है ॥

सुपोंके स्थानमें इया, डियाच् और ईकार आदेश भी हो * यथा-"उर्विया दार्विया" यहां उरुणा और 'दारुणा' ऐसा प्राप्त होनेपर इया हुआ है । 'सुक्षेत्रिया' यहां 'सुक्षेत्रिणा' ऐसा प्राप्त होनेपर डियाच् हुआहै । "दृतिं न शुष्कं सरसीशयानम्" इस स्थलमें ङिके स्थानमें ईकार हुआहै । इस स्थलमें आद्युदात्त प्राप्त होनेपर व्यत्ययसे अन्तोदात्तता हुई है। वास्तविक तो ङीप् प्रत्ययान्तके परे ङिका लुक् हुआहै, तब ईकारादेशका उदाहरण अन्वेष्टव्य है ।

सुपोंके स्थानमें आङ्, अयाच् और अयार् आदेश भी हो* यथा-"प्रबाहवा सिसृतम्" इस स्थानमें प्रबाहुना ऐसा प्राप्त होनेपर आङ् आदेश हुआहै, और "घेर्ङिति २४५" इस सूत्रसे उकारको गुण हुआहै । 'स्वप्नया' इस स्थानमें 'स्वप्नेन' ऐसी प्राप्त होनेपर अयाच्-हुआ है । "स नः सिन्धुमिव नावया" इस स्थानमें 'नावा' ऐसा प्राप्त होनेपर अयार् हुआ और "रिति" इस सूत्रसे रित्स्वर हुआ ॥

३५६२ अमो मश् । ७ । १ । ४० ॥

मिबादेशस्यामो मश् स्यात् । अकार उच्चारणार्थः । शित्त्वात्सर्वादेशः । अस्तिसिच इति ईट् । वधीं वृत्रम् । अवधिषमिति प्राप्ते ॥

३५६२-वेदमें मिबादेश अम्के स्थानमें मश् आदेश हो, मशका अकार उच्चारणार्थ है मशका शकार इत् होनेके कारण सर्वादेश होगा । यथा-"वधीं वृत्रम्" यहां 'अवधिषम्' ऐसा प्राप्त था । इस स्थानमें हन् धातुसे लुङ् "हनो वध "लिङि लुङि च" इससे वधादेश, च्लिको सिच् "तस्थस्थ०" इससे मिप्को अम्भाव उसको मशादेश, "अस्तिसिचः २२२५" इससे अपृक्त मको इट् "इट ईटि" इससे सिच्का लोप, सवर्णदीर्घ, "बहुलं छन्दसि" इससे अडागमका अभाव हुआ है ॥

३५६३ लोपस्त आत्मनेपदेषु ७।१।४१॥

छन्दसि । देवा अदुह । अदुहतेति प्राप्ते । दक्षिणतः शये । शेते इति प्राप्ते । आत्मेति किम् । उत्सं दुहन्ति ॥

३५६३-वेदमें आत्मनेपदका जो तकार उसका लोप हो, यथा-"देवा अदुह" यहां अदुहत ऐसा प्राप्त था यहां दुह्+लङ् त "आत्मनेपदेष्वनतः" इससे झको अत् आदेश, "बहुलं छन्दसि" इससे रुट् तकारका लोप, दोनो अकारको "अतो गुणे" इससे पररूप हुआ । "दक्षिणतः शये" इस स्थलमें 'शेते' ऐसा प्राप्त था परन्तु तलोप करके अय् आदेश होनेपर 'शये' हुआ है । आत्मनेपद न होनेपर तकारका लोप नहीं होगा,यथा-"उत्सं दुहन्ति" ॥

३५६४ ध्वमो ध्वात् । ७ । १ । ४२ ॥

अन्तरेवोष्माणं वारयध्वात् । वारयध्वमिति प्राप्ते ॥

३५६४-वेदमें ध्वम् प्रत्ययके स्थानमें ध्वात् आदेश हो, यथा-"अन्तरे वोष्माणं वारयध्वात्" यहां 'वारयध्वम्' ऐसा प्राप्त था ॥

३५६५ यजध्वैनमिति च । ७।१।४३ ॥

एनमित्यस्मिन्परे ध्वमोन्त्यलोपो निपात्यते । यजध्वैनं प्रियमेधाः । वकारस्य यकारो निपात्यत इति वृत्तिकारोक्तिः प्रामादिकी ॥

३५६५-वेदमें 'एनम्' यह पद परे रहते ध्वम् प्रत्ययके अन्तभागका निपातनसे लोप हो, यथा-"यजध्वैनं प्रियमेधाः" वकारके स्थानमें निपातनसे यकार आदेश हो, ऐसी जो वृत्तिकारकी उक्ति है, वह प्रामादिकी है ॥

३५६६ तस्य तात् । ७ । १ । ४४ ॥

मध्यमपुरुषबहुवचनस्य स्थाने तात्स्यात् । गात्रमस्यानूनं कृणुतात् । कृणुतेति प्राप्ते । सूर्यं चक्षुर्गमयतात् । गमयतेति प्राप्ते ॥

३५६६-वेदमें त अर्थात् मध्यम पुरुष सम्बन्धी बहुवचनके स्थानमें तात् आदेश हो, यथा-"गात्रमस्या नूनं कृणुतात्" 'कृणुत' ऐसा प्राप्त होनेपर कृणुतात् हुआ है "सूर्यं चक्षुर्गमयतात्" 'गमयत' ऐसा प्राप्तमें गमयतात् हुआ है।

३५६७ तप्तनप्तनथनाश्च ।७।१ । ४५ ॥

तस्येत्येव । शृणोत ग्रावाणः । शृणुतेति प्राप्ते तप् । सुनोतन पचत ब्रह्मवाहसे । दधातन द्रविणं चित्रमस्मै । तनप् । मरुतस्तज्जुजुष्टन । जुषध्वमिति प्राप्ते व्यत्ययेन परस्मैपदं श्लुश्च । विश्वे देवासो मरुतो यतिष्ठन । यत्संख्याकाः स्थेत्यर्थः । यच्छब्दाच्छान्दसो डतिः । अस्तेस्तस्य थनादेशः ॥

३५६७-वेदमें तके स्थानमें तप्, तनप्, तन और थन आदेश हों, यथा-"शृणोत ग्रावाणः" इस स्थानमें 'शृणुत' ऐसा प्राप्त होनेपर तप् आदेश और अङित् होनेसे गुण होकर 'शृणोत' ऐसा हुआ है । "सुनोतन पचत ब्रह्मवाहसे" "दधातन द्रविणं चित्रमस्मै" इन स्थलोंमें तनप् हुआ है । "मरुतस्तज्जुजुष्टन" यहां 'जुषध्वम्' ऐसा प्राप्त होनेपर व्यत्ययसे परस्मैपद और श्लु प्रत्यय हुआ है । "विश्वे देवासो मरुतो यतिष्ठन" यत् संख्याकाः स्थ इत्यर्थः । यत् शब्दके उत्तर छान्दस डति प्रत्यय हुआ है । अस धातुके उत्तर तके स्थानमें थनादेश हुआहै । 'स्थ' यह आत्रभक्तिक निर्देश है । इकार उच्चारणार्थ है ॥

३५६८ इदन्तो मसि । ७ । १ । ४६ ॥

मसीत्यविभक्तिको निर्देशः । इकार उच्चारणार्थः । मस् इत्ययमिकाररूपचरमावयवविशिष्टः स्यात् । मस इगागमः स्यादिति यावत् । नमो भरन्त एमसि । त्वमस्माकं तव स्मसि । इमः स्म इति प्राप्ते ॥

३५६८-वेदमें मस् यह इकाररूप अन्तावयवविशिष्ट हो अर्थात् मस् इस सकारान्त प्रत्ययको इम्का आगम हो । यथा-"नमो भरन्त एमसि" । "त्वमस्माकं तव स्मसि" । यहां 'इमः' और 'स्म' ऐसा प्राप्त होनेपर 'एमसि' और 'स्मसि' हुआ है ॥

३५६९ क्त्वो यक् । ७ । १ । ४७ ॥

दिवं सुपर्णो गत्वाय ॥

३५६९-वेदमें क्त्वा प्रत्ययको यक्का आगम हो, यथा-"दिवं सुपर्णो गत्वाय" ॥

३५७० इष्ट्वीनमिति च । ७ । १ । ४८ ॥

क्त्वाप्रत्ययस्य ईनम् अन्तादेशो निपात्यते । इष्ट्वीनं देवान् । इष्ट्वा इति प्राप्ते ॥

३५७०-वेदमें क्त्वा प्रत्ययको निपातनसे 'ईनम्' अन्तादेश हो, यथा-"इष्ट्वीनं देवान्" यहां इष्ट्वा ऐसा प्राप्त था 'इष्ट्वीनम्' यहां यज्+क्त्वा "वचिस्वपि०" इससे सम्प्रसारण, "व्रश्च०" इससे षत्व, ष्टुत्व, अकारको 'ईनम्' आदेश हुआ ॥

३५७१ स्नात्व्यादयश्च । ७ । १ । ४९ ॥

आदिशब्दः प्रकारार्थः । आकारस्य ईकारो निपात्यते । स्विन्नः स्नात्वी मलादिव । पीत्वी सोमस्य वावृधे । स्नात्वा पीत्वेति प्राप्ते ॥

३५७१-यहां आदि शब्द प्रकारार्थक है । वेदमें स्नात्वी इत्यादि शब्द निपातनसे सिद्ध हों । अर्थात् क्त्वा प्रत्ययके आकारके स्थानमें निपातनसे ईकार हो, यथा-"स्विन्नः स्नात्वी मलादिव" "पीत्वी सोमस्य वावृधे" यहां 'स्नात्वा' और 'पीत्वा' ऐसा प्राप्त होनेपर स्नात्वी और पीत्वी हुआ है ॥

३५७२ आज्जसेरसुक् । ७ । १ । ५० ॥

अवर्णान्तादङ्गात्परस्य जसोऽसुक् स्यात् । देवासः । ब्राह्मणासः ॥

३५७२-वेदमें अवर्णान्त अङ्गके उत्तर जस्को असुक्का आगम हो, यथा-देवासः । ब्राह्मणासः । लोकमें तो देवाः । ब्राह्मणाः ऐसा होगा ॥

३५७३ श्रीग्रामण्योश्छन्दसि । ७ । १ । ५६ ॥

आमो नुट् । श्रीणामुदारो धरुणो रयीणाम् । सूतग्रामणीनाम् ॥

३५७३-वेदमें श्री और ग्रामणी शब्दोंके उत्तर आम्को नुट्का आगम हो, यथा-"श्रीणामुदारो धरुणो रयीणाम्" । "सूतग्रामणीनाम्" । 'श्रीणाम्' यह "वामि" इससे नदी संज्ञाके अभाव पक्षमें उदाहरण है, नदीसंज्ञापक्षमें तो "ह्रस्वनद्यापः" इसीसे सिद्ध है ॥

३५७४ गोः पादान्ते । ७ । १ । ५७ ॥

विद्मा हि त्वा गोपतिं शूर गोनाम् । पादान्ते किम् । गवां शता पृक्षयामेषु । पादान्तेऽपि क्वचिन्न । छन्दसि सर्वेषां वैकल्पिकत्वात् । विराजं गोपतिं गवाम् ॥

३५७४-वेदमें पाद(चरण)के अन्तमें स्थित गो शब्दके उत्तर आम्को नुट्का आगम हो, यथा-" विद्मा हि त्वा गोपतिं शूर गोनाम् " । पदान्तमें न होनेपर " गवां शता पृक्षयामेषु " इस स्थानमें नुट्का आगम न हुआ । वेदमें आगम और प्रत्ययादि सबके वैकल्पिकत्वके कारण कहीं २ पदान्तमें भी नुट्का आगम न होगा, यथा- 'विराजं गोपतिं गवाम् ' पादसे इस स्थलमें ऋचाका चरण जानना कारण कि, यहां ' छन्दसि' इसका अधिकार है ॥

३५७५ छन्दस्यपि दृश्यते । ७ । १ । ७६ ॥

अस्थ्यादीनामनङ् । इन्द्रो दधीचो अस्थभिः ॥

३५७५-वेदमें टादि हलादि विभक्ति परे रहते भी अस्थ्यादि शब्दोंको अनङ् आदेश हो, यथा-" इन्द्रो दधीचोऽस्थभिः" इस स्थानमें 'अस्थिभिः' ऐसा प्राप्त होनेपर ' अस्थभिः ' हुआहै । इस स्थलमें " छन्दसि च " ऐसा सूत्र करनेसे ही सिद्ध होनेपर "अपि दृश्यते " यह सर्वोपाधिका व्यभिचारार्थ है, इससे टादि अजादिविभक्ति परे विहित अनङादेश हलादिविभक्ति परे भी होताहै, यथा 'अस्थभिः' और विभक्तिके परे उक्त अनङादेश अविभक्तिके परे भी होताहै, यथा-' अस्थन्वन्तं यदनस्था बिभर्त्ति ' । 'अस्थन्वन्तम् ' यहां अस्थिशब्दसे मतुप् अनङादेश करनेपर " अनो नुट् " इससे मतुप्को नुट् और अनङ्के नकारका लोप हुआ ॥

३५७६ ई च द्विवचने । ७ । १ । ७७ ॥

अस्थ्यादीनामित्येव । अक्षीभ्यां ते नासिकाभ्याम् ॥

३५७६-वेदमें द्विवचन विभक्ति परे रहते अस्थ्यादि शब्दोंके इकारके स्थानमें दीर्घ ईकार हो, यथा-"अक्षीभ्यां ते नासिकाभ्याम्" ॥

३५७७ दृक्स्ववस्स्वतवसां छन्दसि । ७ । १ । ८३ ॥

एषां नुम् स्यात्सौ । कीदृङिन्द्रः । स्ववान् । स्वतवान् ॥ " उदोष्ठ्यपूर्वस्य । ७।१।१०२॥"

३५७७-वेदमें सुविभक्ति परे रहते दृक्, स्ववस् और स्वतवस् शब्दोंको नुमागम हो, यथा-कीदृङिन्द्रः । स्ववान् । स्वतवान् " उदोष्ठ्यपूर्वस्य २४९४ " यह सूत्र यहां स्मरणार्थ है ॥

३५७८ बहुलं छन्दसि । ७ ।१।१०३॥

ततुरिः ॥

३५७८-वेदमें अङ्गावयव ओष्ठ्यपूर्वक जो ॠत् तदन्त अङ्गको बहुल करके उत्व हो, यथा-ततुरिः ॥

३५७९ हु ह्वरेश्छन्दसि । ७ । २ ।३१॥

ह्वरेर्निष्ठायां हु आदेशः स्यात् । अहुतमसि हविर्धानम् ॥

३५७९-वेदमें ह्वृ धातुको निष्ठा प्रत्यय परे रहते हु आदेश हो, यथा-" अहुतमसि हविर्धानम् " ॥

३५८० अपरिह्वृताश्च । ७ । २ । ३२ ॥

पूर्वेण प्राप्तस्यादेशस्याभावो निपात्यते । अपरिह्वृताः सनुयाम वाजम् ॥

३५८०-वेदमें नञ् परिपूर्वक ह्वृ धातुको निष्ठा प्रत्यय परे रहते निपातनसे पूर्वसूत्रोक्त आदेश न हो, यथा-"अपरिह्वृताः सनुयाम वाजम्" ॥

३५८१ सोमे ह्वरितः । ७ । २ । ३३ ॥

इड्गुणौ निपात्येते। मा नः सोमो ह्वरितः ॥

३५८१-वेदमें सोम अर्थ होनेपर और निष्ठा प्रत्यय परे रहते ह्वृ धातुको निपातनसे इट् और गुण हो, यथा-"मा नः सोमो ह्वरितः " ॥

३५८२ ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च । ७।२।३४॥

अष्टादश निपात्यन्ते । तत्र ग्रसु स्कम्भु स्तम्भु एषामुदित्त्वान्निष्ठायामिट्प्रतिषेधे प्राप्ते इण्निपात्यते । युवं शचीभिर्ग्रसिताममुञ्चतम । विष्कभिते अजरे । येन स्वः स्तभितम् । सत्येनोत्तभिता भूमिः । स्तभितेत्येव सिद्धे उत्पूर्वस्य पुनर्निपातनमन्योपसर्गपूर्वस्य मा भूदिति। चते याचने । कस गतौ । आभ्यां क्तस्येडभावः। चत्ता इतश्चत्तामुतः । त्रिधा ह श्यावमश्विना विकस्तम् । उत्तानाया हृदयं यद्विकस्तम् । निपातनबहुत्वापेक्षया सूत्र बहुवचनं विकस्ता इति तेनैकवचनान्तोऽपि प्रयोगः साधुरेव । शसु शंसु शासु एभ्यस्तृच इडभावः । एकस्त्वष्टुरश्वस्याविशस्ता । ग्रावग्राभ उत शंस्ता । प्रशास्ता पोता । तरतेर्वृङ्वृञोश्च तृच उट् ऊट् एतावागमौ निपात्येते । तरुतारं रथानाम्।तरूतारम् । वरुतारम् वरूतारम् । वरूत्रीभिः सुशरणो नो अस्तु । अत्र ङीबन्तनिपातनं प्रपञ्चार्थम् । वरूतृशब्दो हि निपातितः । ततो ङीपा गतार्थत्वात् । उज्ज्वलादिभ्यश्चतुर्भ्यः शप इकारादेशो निपात्यते । ज्वल दीप्तौ । क्षर संचलने । टुवम उद्गिरणे । अम गत्यादिषु । इह क्षरितीत्यस्यानन्तरं क्षमितीत्यपि केचित्पठन्ति । तत्र क्षमूष् सहने इति धातुर्बोध्यः । भाषायां तु ग्रस्तस्कब्धस्तब्धोत्तब्धचतितविकसिताः । विशसिता-शंसिता-शासिता । तरीता-तरिता । वरीता-वरिता । उज्ज्वलति । क्षरति । पाठान्तरे क्षमति । वमति । अमति ॥ " बभूथाऽऽततन्थजगृम्भववर्थेति निगमे । ७।२।६४ " ॥ विद्मा तमुत्सं यत आबभूथ । येनान्तरिक्षमुर्वाततन्थ । जगृम्भा ते दक्षिणमिन्द्र हस्तम् । त्वं ज्योतिषा वि तमो ववर्थ । भाषायां तु । बभूविथ। आतेनिथ । जगृहिम । ववरिथेति ॥

३५८२-वेदमें ग्रसित, स्कभित, स्तभित, उत्तभित, चत्त, विकस्त, विशस्तृ, शंस्तृ, शास्तृ, तरुतृ, तरूतृ, वरुतृ, वरूतृ, वरूत्री, उज्ज्वलिति, क्षरिति, वमिति और अमिति यह अठारह पद निपातनसे सिद्ध हों । उनमें ग्रसु, स्कम्भु और स्तम्भु इन धातुओंका उकार इत् होनेके कारण निष्ठा प्रत्यय परे इटका प्रतिषेध प्राप्त होनेपर निपातनसे इट् होगा, यथा-" युवं शचीभिर्ग्रसितामुञ्चतम् " "विस्कभिते अजरे" "येन स्वः स्तभितम् " । " सत्येनोत्तभिता भूमिः " 'स्तभिता' इसीसे सिद्ध होनेपर भी उत्पूर्वक स्तम्भ धातुको ' उत्तभित ' ऐसा निपातन केवल उत्से भिन्न उपसर्ग पूर्वमें रहते तादृश निपातन नहीं हो इस निमित्त है । 'चते याचने' और ' कस गतौ ' इन दो धातुओंके उत्तर क्त प्रत्ययको इट्का आगम न होकर-यथा-" चत्ता इतश्चत्तामुतः " । "त्रिधा ह श्यावमश्विना विकस्तम् " । " उत्तानाया हृदयं यद्विकस्तम् " । सूत्रमें 'विकस्ताः' ऐसा बहुवचन निपातनगत बहुत्वकी अपेक्षासे है, अत एव एकवचनान्त प्रयोग भी साधु ही है । शसु, शंसु और शासु धातुके उत्तर तृच् प्रत्ययको इट् आगम न होकर-यथा-" एकस्त्वष्टुरश्वस्याविशस्ता " " ग्रावग्राभ उत शंस्ता " । " प्रशास्ता पोता" । तॄ, वृङ्, और वृञ् धातुके उत्तर तृच् प्रत्ययको निपातनसे उट् और ऊट् यह दो आगम होकर-यथा-" तरुतारं रथानाम् " तरूतारम् । वरुतारम् । वरूतारम् । "वरूत्रीभिः सुशरणो नो अस्तु " इस स्थलमें ङीप्प्रत्ययान्त निपातन प्रपञ्चार्थ है, क्यों कि, वरूतृ शब्द निपातनसिद्ध है, उसके उत्तर ङीप् प्रत्यय करके गतार्थ होजाताहै । उज्ज्वलादि चार धातुओंके अर्थात् ज्वल दीप्तौ, क्षर संचलने, टुवम् उद्गिरणे, अम् गत्यादिषु, इन धातुओंके उत्तर शप्के स्थानमें निपातनसे इकारादेश हुआहै । कोई २ ' क्षरिति ' इस पदके आगे 'क्षमिति' ऐसे पदका भी पाठ करतेहैं, उस स्थलमें ' क्षमूष्

सहने ' यह धातु जाननी चाहिये । लोकमें तो निष्ठा प्रत्ययान्त धातुका, ग्रस्तः । स्कम्भु–स्कब्धः । स्तम्भु–स्तब्धः । उत्तम्भु–उत्तब्धः । चते–चतितः । विकस–विकसितः । शसु–विशसिता । शंसु–शंसिता । शासु–शासिता । तॄ–तरीता–तरिता,वृङ्, वृञ्–वरीता वरिता । उत्पूर्वक ज्वल–उज्ज्वलति। क्षर–क्षरति । पाठान्तरमें क्षम-क्षमति । वम–वमति । अम–अमति । ऐसे पद होंगे ॥

वेदमें बभूथ, आततन्थ, जगृम्म और ववर्थ यह पद निपातनसे सिद्ध हों, अर्थात् इनको वेदमें निपातनसे इट् न हो, २५२७ यथा–" विश्वा तमुत्सं यत आवभूथ " । " येनान्तरिक्षमुर्वाततन्थ " " जगृम्भा ते दक्षिणमिन्द्र हस्तम् " " त्वं ज्योतिषा वितमो ववर्थ " । लोकमें तो ' बभूविथ । आतेनिथ । जगृहिम । ववरिथ ' इस प्रकार होंगे ॥

३५८३ सनिंससनिवांसम् । ७ । २ । ६९ ॥

सनिमित्येतत्पूर्वात्सनतेः सनोतेर्वा क्वसोरिट् । एत्वाभ्यासलोपाभावश्च निपात्यते ॥

पावकादीनां छन्दसि प्रत्ययस्थात्कादित्वं नेति वाच्यम् ॥ * ॥ हिरण्यवर्णाः शुचयः पावकाः ॥

३५८३–वेदमें निपातनसे सनिम्पूर्वक भौवादिक सन् धातु अथवा तानादिक सन धातुके उत्तर क्वसु प्रत्ययको इट् हो, और एत्व और अभ्यास लोपका अभाव हो, यथा–सनिं ससनिवांसम् ॥

वेदमें पावकादि शब्दोंके उत्तर प्रत्ययस्थ ककारसे पूर्व अकारको इत्व न हो*यथा–"हिरण्यवर्णाः शुचयः पावकाः" लोकमें प्रत्ययस्थ ककारके पूर्ववर्त्ती अकारके स्थानमें इकार होगा, यथा–पाविकाः ॥

३५८४ घोर्लोपो लेटि वा । ७।३।७० ॥

दधद्रत्नानि दाशुषे । सोमो ददद्गन्धर्वाय । यदग्निरग्नये ददात् ॥

३५८४–वेदमें लेट् परे रहते घुसंज्ञक धातुके आकारका विकल्प करके लोप हो, यथा–" दधद्रत्नानि दाशुषे"यहां धा धातुसे लेट्, श्लु, द्वित्व होकर–'दधाति ' इस प्रकार होनेपर आकारका लोप और " लेटोऽडाटौ ३४२७ " इस सूत्रसे अडागम और " इतश्च लोपः परस्मैपदेषु ३४२६ " इससे इकार लोप हुआ । " सोमो ददद् गन्धर्वाय" । "यदग्निरग्नये ददात्"। पूर्व दोनों स्थलोंमें आकारका लोप हुआहै और पर स्थलमें लोपाभाव हुआहै ॥

३५८५ मीनातेर्निगमे । ७ । ३ । ८१ ॥

शिति ह्रस्वः । प्रमिणन्ति व्रतानि । लोके प्रमीणाति । "अस्तिसिचोऽपृक्ते । ७ ।३।९६"॥

३५८५–वेदमें शित् प्रत्यय परे रहते मी धातुके ईकारको ह्रस्व हो, यथा–" प्रमिणन्ति व्रतानि " इस स्थलमें "हिनुमीना २५३०" इस सूत्रसे णत्व हुआहै । लोकमें प्रमीणाति । " अस्तिसिचोऽपृक्ते २२२५ " यह सूत्र यहां स्मरणार्थक है–॥

३५८६ बहुलं छन्दसि । ७ । ३ । ९७ ॥

सर्वमा इदम् ॥

ह्रस्वस्य गुणः । जसि च । जसादिषु छन्दसि वा वचनं प्राङ् णौ चङ्युपधायाः ॥ * ॥ अधा शतक्रत्वो यूयम् । शतक्रतवः । पश्वे नृभ्यो यथा गवे । पशवे । नाभ्यस्तस्याचीति निषेधे बहुलं छन्दसीति वक्तव्यम् ॥ * ॥ आनुषग्जुजोषत् ॥

३५८६–वेदमें बहुल करके विद्यमान सिच् और अस् धातुके उत्तर अपृक्तसंज्ञक हल्को ईट् हो, यथा– "सर्वामा इदम्" यहां अस धातुके उत्तर लङ्, तिप्, "आडजादीनाम् २२५४ " इस सूत्रसे आट्, शप्का लुक् " अस्तिसिच० २२२५ " इस सूत्रसे ईट्का अभाव होनेपर अपृक्तत्वके कारण " हल्ङ्याप्० "से तका लोप रुत्व और विसर्ग हुआ । ह्रस्वको गुण हो सुम्बद्धि परे रहते "जसि च २४१" ह्रस्वको गुण हो जस् प्रत्यय परे रहते ॥

जसादि प्रत्यय परे रहते वेदमें ' णौ चङ्युपधायाः' इस शास्त्रसे पूर्व शास्त्रविहित कार्य्य विकल्प करके हो * यथा– " अधा शतक्रत्वो यूयम् " । " शतक्रतवः " पश्वेनृभ्यो यथागवे" "पशवे" ॥

" नाभ्यस्तस्याचि २५०३ " इस गुणनिषेध शास्त्रमें 'बहुलं छन्दसि' ऐसा कहना चाहिये, अर्थात् " नाभ्यस्तस्याचि० " इसमें गुणनिषेध वेदमें विकल्प करके हो*"जुजोषत् " यहां प्रीति और सेवनार्थक जुष् धातुसे लेट् व्यत्ययसे परस्मैपद, तिप्, इकारका लोप, "लेटो " इस सूत्रसे अट्, व्यत्ययसे शप्के स्थानमें श्लु और द्वित्व हुआहै ॥

३५८७ नित्यं छन्दसि । ७ । ४ । ८ ॥

छन्दसि विषये चङ्युपधाया ऋवर्णस्य ऋन्नित्यम् । अवीवृधत् ॥

३५८७–वेदमें चङ् परे रहते उपधाभूत ऋवर्णके स्थानमें नित्य ऋकार हो, यथा–"अवीवृधत् " ॥

३५८८ न च्छन्दस्यपुत्रस्य ।७।४।३५॥

पुत्रभिन्नस्यादन्तस्य क्यचि ईत्वदीर्घौ न । मित्रयुः । क्याच्छन्दसीति उः । अपुत्रस्य किम्। पुत्रीयन्तः सुदानवः । अपुत्रादीनामिति वाच्यम् ॥ * ॥ जनीयन्तो न्वग्रवः । जनमिच्छन्त इत्यर्थः ॥

३५८८–क्यच् प्रत्यय परे रहते पुत्रभिन्न अकारान्त शब्दोंके अकारके स्थानमें ईकार और दीर्घ न हो, यथा– "मित्रायुः" यहां " क्याच्छन्दसि ३१५०" इस सूत्रसे उकार हुआ 'अपुत्रस्य' यह क्यों कहा ? तो " पुत्रीयन्तः सुदानवः" इस स्थलमें ईत्व और दीर्घ न हो ॥

'अपुत्रादीनाम्' अर्थात् पुत्रादिभिन्नको क्यच् परे ईत्व,दीर्घ न हो ऐसा कहना चाहिये * यथा–"जनीयन्तोऽन्वग्रवः " अर्थात् जनको इच्छा करतेहैं ॥

३५८९ दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति । ७ । ४ । ३६ ॥

एते क्यचि निपात्यन्ते । भाषायां तु उप्रत्ययाभावाद् दुष्टीयति । द्रविणीयति । वृषीयति । रिष्टीयति ॥

३५८९–क्यच् प्रत्यय परे दुरस्युः, द्रविणस्युः, वृषण्यति, रिषण्यति, यह पद निपातनसे सिद्ध हों । लोकमें तो उ प्रत्ययके अभावके कारण 'दुष्टीयति । द्रविणीयति । वृषीयति । रिष्टीयति' इस प्रकार होंगे । 'दुरस्युः' इत्यादिमें दुष्ट शब्दको दुरस् भाव,द्रविणको द्रविणस्,वृषको वृषण्, रिष्टको रिषण् भाव निपातनसे हुआहै ॥

३५९० अश्वाघस्यात् । ७ । ४ । ३७ ॥

अश्व अघ एतयोः क्यचि आत्स्याच्छन्दसि । अश्वायन्तो मघवन् । मा त्वा वृका अघायवः । न च्छन्दसीति निषेधो न ईत्वमात्रस्य किंतु दीर्घस्यापीति । अत्रेदमेव सूत्रं ज्ञापकम् ॥

३५९०–वेदमें क्यच् प्रत्यय परे रहते अश्व और अघ शब्दके अकारको आत् हो, "अश्वायन्तो मघवन्" मा त्वा वृका अघायवः" । "न च्छन्दसि" इस सूत्रसे केवल ईत्वमात्रका निषेध नहीं होगा, किन्तु दीर्घका भी निषेध होगा, इसमें यह सूत्र ही ज्ञापक है ॥

३५९१ देवसुम्नयोर्यजुषि काठके । ७ । ४ । ३८ ॥

अनयोः क्यचि आत्स्याद्यजुषि कठशाखायाम् । देवायन्तो यजमानाः । सुम्नायन्तो हवामहे । इह यजुःशब्दो न मन्त्रमात्रपरः किंतु वेदोपलक्षकः । तेन ऋगात्मकेऽपि मन्त्रे यजुर्वेदस्थे भवति। किं च ऋग्वेदेपि भवति।स चेन्मन्त्रो यजुषि कठशाखायां दृष्टः।यजुषीति किम् । देवाञ्जिगाति सुम्नयुः । बह्वृचानामप्यस्ति कठशाखा ततो भवति प्रत्युदाहरणमिति हरदत्तः॥

३५९१–यजुर्वेदीय कठशाखा विषयमें क्यच् परे रहते देव और सुम्न शब्दोंके अकारको आत् हो, यथा–"देवायन्तो यजमानाः" । "सुम्नायन्तो हवामहे" । इस स्थलमें यजुः शब्द केवल मंत्रमात्रपरक नहीं है, किन्तु वेदोपलक्षक है । इस कारण युजुर्वेदान्तर्गत ऋगात्मक मंत्रोंमें भी यह कार्य होगा । और ऋग्वेदमें भी होसकता है, यदि वही मंत्र यजुर्वेद विषयक कठशाखामें दृष्ट हो तो । यजुर्वेदीय कठ शाखा न होनेपर "देवाञ्जिगातिसुम्नयुः" ऐसा होगा।बह्वृचोंके भी कठशाखा होतीहै, इस कारण यह प्रत्युदाहरण है, ऐसा हरदत्त कहतेहैं ॥

३५९२ कव्यध्वरपृतनस्यर्चि लोपः । ७ । ४ । ३९ ॥

स पूर्वया निविदा कव्यतायोः । अध्वर्युं वा मधुपाणिम् । मदयन्तं पृतन्युम् ॥ "दधातेर्हिः । ७ । ४ । ४२ ।" "जहातेश्च क्त्वि । ७ । ४ । ४३" ॥

३५९२–ऋक् विषयमें क्यच् परे रहते कवि, अध्वर और पृतना शब्दोंके अन्त्यका लोप हो, मृगय्वादि गणमें अध्वर्यु शब्द पठित है, इससे उसकी व्युत्पत्त्यन्तर समझना "स पूर्वया निविदा कव्यतायोः"। "अध्वर्युं वा मधुपाणिम्" "मदयन्तं पृतन्युम्" । "दधातेर्हिः ३०७६" "जहातेश्च क्त्वि ३३३१" यह दोनों सूत्र यहां स्मरणार्थ हैं ॥

३५९३ विभाषा छन्दसि । ७ । ४।४४॥

हित्वा शरीरम् । हीत्वा वा ॥

३५९३–वेदमें हा धातुके स्थानमें विकल्प करके हि आदेश हो, हि आदेशाभाव पक्षमें "घुमास्था०" इस सूत्रसे ईकार होगा, यथा–हित्वा शरीरम् । हीत्वा वा ॥

३५९४ सुधितवसुधितनेमधितधिष्वधिषीय च । ७ । ४ । ४५ ॥

सु वसु नेम एतत्पूर्वस्य दधातेः क्ते प्रत्यये इत्वं निपात्यते । गर्भं माता सुधितं वक्षणासु । वसुधितमग्नौ । नेमधिता न पौंस्या ॥ क्तिन्यपि दृश्यते । उत श्वेतं वसुधितिं निरेके । धिष्व वज्रं दक्षिण इन्द्र हस्ते । धत्स्वेति प्राप्ते । सुरेता रेतो धिषीय । आशीर्लिङि । इट् । इटोऽत् । धासीयेति प्राप्ते ॥

अपोभि ॥ मासश्छन्दसीति वक्तव्यम् ॥*॥ माद्भिः शरद्भिः ॥स्ववस्वतवसोरुषसश्चेष्यते॥*॥ स्ववद्भिः । अवतेरसुन् । शोभनमवो येषां ते स्ववसस्तैः । तु इति सौत्रो धातुस्तस्मादसुन् । स्वं तवो येषां तैः स्वतवद्भिः । सम्मुषद्भिरजायथाः । मिथुनेऽसिः । वसेः किच्चेत्यसिप्रत्यय इति हरदत्तः । पञ्चपादीरीत्या तु उषः किदिति प्राग्व्याख्यातम् ॥ "न कवतेर्यङि ॥७।४।६३।"

३५९४–वेदमें सु वसु और नेम शब्दपूर्वक धा धातुके आकारके स्थानमें क्त प्रत्यय परे रहते निपातनसे इत्व हो, यथा–"गर्भं माता सुधितं वक्षणासु" । "वसुधितमग्नौ" । "नेमधिता न पौंस्या" क्तिन् प्रत्यय परे भी इत्व देखेजातेहैं, यथा–"उत श्वेतं वसुधितिं निरेके" । "धिष्व वज्रं दक्षिण इन्द्र हस्ते" यहां 'धत्स्व' ऐसा प्राप्त था परन्तु निपातनसे 'धिष्व' हुआ । "सुरेता रेतो धिषीय" यहां आशीर्लिङ्में इट्, उसके स्थानमें अत् होकर 'धासीय' ऐसा प्राप्त था

"अपो भि ४४२" अप् शब्दके पकारके स्थानमें त हो, भादि प्रत्यय परे रहते ॥

"मासश्छन्दसीति वक्तव्यम्" अर्थात् भादि प्रत्यय परे रहते वेदमें मास् शब्दके सके स्थानमें तकार हो, ऐसा कहना चाहिये * माद्भिः शरद्भिः ।

स्ववस्, स्वतवस् और उषस् शब्दोंके सके स्थानमें तकार हो * "स्ववद्भिः" यहां अव धातुके उत्तर असुन् प्रत्यय पश्चात् सुष्ठोमनम् अवो येषां ते=स्ववसः तैः, इस विग्रहमें, 'स्ववद्भिः' पद सिद्ध हुआहै । तु यह सूत्रान्तर्गत धातु है, उसके उत्तर असुन् प्रत्यय हुआ पश्चात् स्व तवो येषां तैः इस विग्रहमें "स्वतवद्भिः" हुआ । "समुषद्भिरजायथाः" यहां मिथुनेसिः "वसः किच" इस सूत्रसे असि प्रत्यय हुआहै, यह हरदत्तका मत है । पञ्चपादीरीत्यनुसार उष धातुके उत्तर कित् प्रत्यय होकर उक्त रूप हुआहै यह पूर्वमें व्याख्या की है । "न कवतेर्यङि" यह सूत्र यहां स्मरणार्थ है ॥

३५९५ कृपेश्छन्दसि । ७ । ४ । ६४ ॥

यङि अभ्यासस्य चुत्वं न । करीकृष्यते ॥

३५९५-वेदमें कृप् धातुके अभ्यासको यङ्परे रहते चुत्व न हो अर्थात् कके स्थानमें चकार न हो, यथा-करीकृष्यते ॥

३५९६ दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतःसरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च । ७ । ४ । ६५ ॥

एतेऽष्टादश निपात्यन्ते । आद्यास्त्रयो धृञो धारयतेर्वा । भवतेर्यङ्लुगन्तस्य गुणाभावः । तेन भाषायां गुणो लभ्यते । तिजेर्यङ्लुगन्तात्तङ् इयर्तेर्लिटि हलादिःशेषापवादो रेफस्य लत्वमित्त्वाभावश्च निपात्यते । अलर्षियुध्म खजकृत्पुरन्दरः । सिपा निर्देशो न तन्त्रम् । अलर्ति दक्ष उत । फणतेराङ्पूर्वस्य यङ्लुगन्तस्य शतरि अभ्यासस्य नीगागमो निपात्यते । आपनीफणत् । स्यन्देः संपूर्वस्य यङ्लुकि शतरि अभ्यासस्य निक् । धातुसकारस्य षत्वम् । करोतेर्यङ्लुगन्तस्याभ्यासस्य चुत्वाभावः । क्रन्देर्लुङि च्लेरङ् द्विर्वचनमभ्यासस्य चुत्वाभावो निगागमश्च । कनिक्रदज्जनुषम् । अक्रन्दीदित्यर्थः । बिभर्तेरभ्यासस्य जश्त्वाभावः । वि यो भरिभ्रदोषधीषु । ध्वरतेर्यङ्लुगन्तस्य शतरि अभ्यासस्य विगागमो धातोर्ऋकारलोपश्च । दविध्वतो रश्मयः सूर्यस्य । द्युतेरभ्यासस्य संप्रसारणाभावोऽत्वं विगागमश्च । दविद्युतदीद्यच्छोशुचानः । तरतेः शतरि श्लौ अभ्यासस्य रिगागमः । सहोर्जा तरित्रतः । सृपेः शतरि श्लौ द्वितीयैकवचने रीगागमोऽभ्यासस्य । वृजेः शतरि श्लावभ्यासस्य रीक् । मृजेर्लिटि णल् अभ्यासस्य रुक् धातोश्च युक् । दमेराङ्पूर्वस्य लटि श्लावभ्यासस्य चुत्वाभावो नीगागमश्च । वक्ष्यन्ती वेदा गनीगन्ति कर्णम् ॥

३५९६-दाधर्ति, दर्धर्ति, दर्धर्षि, बोभूतु, तेतिक्ते, अलर्षि, आपनीफणत्, संसनिष्यदत्, करिक्रत्, कनिक्रदत्, भरिभ्रत्, दविध्वत्, दविद्युतत्, तरित्रतः, सरीसृपतम्, वरीवृजत्, मर्मृज्या, आगनीगन्ति, यह अठारह पद वेदमें निपातनसे सिद्ध हों, उनमें पहिलेका तीन धृ अथवा धारि धातुके रूप हैं । यङ्लुगन्त भू धातुको गुणभाव हुआ, इस कारण लोकमें गुण होगा, यङ् लुगन्त तिज् धातुके उत्तर तङ् हुआहै ऋ धातुके उत्तर विट् परे हलादिः शेषापवाद रेफके स्थानमें लकार, इत्वाभाव निपातनसे होकर-"अलर्षि युध्म खजकृत् पुरन्दरः" सिप् करके निर्देश शास्त्रसम्मत नहीं है इससे "अलर्ति दक्ष उत" यह हुआ । आङ् पूर्वक यङ्लुगन्त फण धातुसे शतृ प्रत्यय होनेपर अभ्यासको नीक्का आगम निपातनसे होकर, आपनीफणत् । संपूर्वक स्यन्द धातुके उत्तर यङ्का लुक्, और शतृ प्रत्यय होनेपर अभ्यासको नीक्का आगम और धातुके सकारको षत्व हुआ । यङ्लुगन्त कृ धातुके अभ्यासको चुत्वाभाव अर्थात् "कुहोश्चुः" इस सूत्रसे प्राप्त कके स्थानमें चकार न हुआ । क्रन्द धातुके उत्तर लुङ् परे च्लिके स्थानमें अङ्, पश्चात् द्वित्व, अभ्यास कवर्गको चवर्गका अभाव और निक्का आगम होकर-"कनिक्रदज्जनुषम्" अर्थात् रोदन कियाथा । भृ धातुके उत्तर शतृ प्रत्यय करके अभ्यासको जश्त्वका अभाव और रिगागम होकर यथा "वि यो भरिभ्रदोषधीषु" । यङ् लुगन्त ध्वृ धातुके उत्तर शतृ प्रत्यय परे अभ्यासको विक्का आगम और धातुके ऋकारका लोप होकर-यथा-"दविध्वतो रश्मयः सूर्यस्य" । यङ्लुगन्त द्युत् धातुके उत्तर शतृ प्रत्यय परे अभ्यासको "द्युतिस्वाप्योः संप्रसारणम् २३४४" इस सूत्रसे प्राप्त सम्प्रसारण का अभाव और अत्त्व अर्थात् अकार और विगागम होकर-यथा-"दविद्युतद्दीद्यच्छोशुचानः" तृ धातुके उत्तर शतृ, श्लु प्रत्यय और अभ्यासको रिगागम होकर-यथा-"सहोर्जा तरित्रतः" । सृप् धातुके उत्तर शतृ और श्लु प्रत्यय द्वितीयैकवचनमें अभ्यासको रीगागम हुआ । वृज् धातुसे शतृ और श्लु, अभ्यासको रीगागम हुआ । मृज् धातुके उत्तर लिट्, णल् अभ्यासको रुक् और धातुको युक्का आगम हुआ । आङ्पूर्वक दम् धातुके उत्तर लट् और श्लु अभ्यासको चुत्वाभाव और नीक्का आगम होकर-यथा-"वक्ष्यन्ती वेदा गनीगन्ति कर्णम्" ॥

३५९७ ससूवेति निगमे । ७ । ४ । ७४ ॥

सूतेर्लिटि परस्मैपदं युगागमोऽभ्यासस्य चात्वं निपात्यते । गृष्टिः ससूव स्थविरम् । सुषुव इति भाषायाम् ॥

३५९७-वेदमें लिट् लकारमें सू धातुसे परस्मैपद और वुगागम और अभ्यासको आत्व अर्थात् ऊकारके स्थानमें आकार निपातनसे हो, यथा-"गृष्टिः ससूव स्थविरम्"। भाषामें "सुषुवे" ऐसा पद होगा ॥

३५९८ बहुलं छन्दसि ।७।४।७८॥

अभ्यासस्य इकारः स्याच्छन्दसि । पूर्णां विवष्टि । विशेरेतद्रूपम् ॥

॥ इति सप्तमोऽध्यायः ॥

३५९८-वेदमें धातुसम्बन्धी अभ्यासको इकार हो, यथा-"पूर्णां विवष्टि" यह विश् धातुका रूप है । विश् धातुसे लिट्, तिप्,शप्के स्थानमें श्लु, द्वित्व, अभ्यासको इत्व "व्रश्च०" इससे षत्व और ष्टुत्व होकर 'विवष्टि' यह पद सिद्ध हुआ है ॥

इति सप्तमोऽध्यायः ।

३५९९ प्रसमुपोदः पादपूरणे ।८।१।६॥

एषां द्वे स्तः पादपूरणे । प्रप्रायमग्निः । संसमिद्युवसे । उपोप मे परामृश । किं नोदुद्ध हर्षसे ॥

३५९९-वेदमें पादपूरण होनेपर प्र,सम्, उप और उत् इन अव्यय शब्दोंको द्वित्व हो, यथा-"प्रप्रायमग्निः"। "संसमिद्युवसे" । "उपोप मे परामृश" । "किं नोदुदु हर्षसे" ॥

३६०० छन्दसीरः ।८।२।१५॥

इवर्णान्ताद्रेफान्ताच्च परस्य मतोर्मस्य वः स्यात् । हरिवते हर्यश्वाय । गीर्वान् ॥

३६००-वेदमें इवर्णान्त और रेफान्त शब्दके परवर्ती मतुप्के मकारके स्थानमें वकार हो, यथा-"हरिवते हर्यश्वाय" गीर्वान् । "र्वोरुपधाया दीर्घ इकः" इससे दीर्घ ॥

३६०१ अनो नुट् ।८।२।१६॥

अनन्तान्मतोर्नुट् स्यात् । अक्षण्वन्तः कर्णवन्तः । अस्थन्वन्तं यदनस्था ॥

३६०१-वेदमें अन् भागान्त शब्दके उत्तर मतुप्को नुट् आगम हो, यथा-"अक्षण्वन्तः, कर्णवन्तः" । अस्थन्वन्तं यदनस्था बिभार्त्ति ॥

३६०२ नाद्घस्य ।८।२।१७॥

नान्तात्परस्य घस्य नुट् । सुपथिन्तरः ॥ भूरिदाव्नस्तुड्वाच्यः ॥ * ॥ भूरिदावत्तरो जनः । ईद्रथिनः ॥ * ॥ रथीतरः । रथीतमं रथीनाम् ॥

३६०२-वेदमें नकारान्त शब्दोंके परे स्थित घको नुट्का आगम हो । यथा, "सुपथिन्तरः" ।

भूरिदावन् शब्दके उत्तर घको तुट्का आगम हो * "भूरिदावत्तरो जनः" दा+वनिप्+तरप्+ "न लोपः प्रातिपदिकान्तस्य" इससे नकारका लोप, तुडागम ।

रथिन् शब्दको घ परे रहते इत् हो*। रथीतरः।"रथीतमं रथीनाम्" ॥

३६०३ नसत्तनिषत्ताऽनुत्तप्रतूर्तसूर्तगूर्तानि च्छन्दसि ।८।२।६१॥

सदेर्नञ्पूर्वान्निपूर्वाच्च निष्ठाया नत्वाभावो निपात्यते । नसत्तमञ्जसा । निषत्तमस्य चरतः । असन्नं निषण्णमिति प्राप्ते । उन्देर्नञ्पूर्वस्यानुत्तम् । प्रतूर्तमिति त्वरतेः । तुर्वीत्यस्य वा । सूर्तमिति सृ इत्यस्य । गूर्तमिति गुरी इत्यस्य ॥

३६०३-वेदमें नसत्त, निषत्त, अनुत्त, प्रतूर्त्त, सूर्त, गूर्त्त यह पद निपातनसे सिद्ध हों । नसत्त और निषत्त इस स्थलमें नञ्पूर्वक और निपूर्वक सद् धातुके उत्तर निष्ठा प्रत्यय होकर निपातनसे नत्वाभाव हुआहै । यथा-"नसत्तमञ्जसा" । "निषत्तमस्य चरतः" लौकिक प्रयोग, असन्नम् निषण्णम् इस प्रकार होगा । नञ्पूर्वक उन्द धातुके उत्तर निष्ठा प्रत्यय करके अनुत्तम् पद सिद्ध हुआहै । भाषामें अनुन्नम् । प्रपूर्वक त्वर अथवा तुर्व्व धातुके उत्तर निष्ठा प्रत्यय करके प्रतूर्त्त पद सिद्ध हुआहै । "ज्वरत्वर० २६५४" इत्यादिसे ऊठ् । लोकमें प्रतूर्णम् । सृ धातुके उत्तर निष्ठा प्रत्यय करनेपर सूर्त्तम् । "उरण् रपरः" गुरी धातुसे निष्ठा प्रत्यय करनेपर गूर्त्तम् इत्यादि पद सिद्ध हुएहैं । लोकमें गूर्णम् । इस प्रकार होगा ॥

३६०४ अम्नरूधरवरित्युभयथा छन्दसि ।८।२।७०॥

रुर्वा रेफो वा । अम्न एव । अम्नरेव । ऊध एव-ऊधरेव । अव एव-अवरेव ॥

३६०४-वेदमें अम्न, ऊध और अव शब्दके उत्तर विकल्प करके निपातनसे रु, अथवा रेफ हो, यथा-अम्न-एव, रुत्वपक्षमें "भोभगो० १६७" इससे रुको यकार"लोपः शाकल्यस्य"से लोप । अम्नरेव । ऊध एव=ऊधरेव । अव एव=अवरेव । अम्नर् ऊधर् और अवर् शब्द विकल्प करके रु अथवा र् होकर निपातनसे सिद्ध हुए हैं ॥

३६०५ भुवश्च महाव्याहृतेः ।८।२।७१॥

भुव इति । भुवरिति ॥

३६०५-वेदमें महाव्याहृति अर्थमें भुव शब्दके उत्तर रु अथवा र् हो, यथा-भुव+इति=भुवरिति । भूः भुवः स्वः यह तीन महाव्याहृति पृथिवी अन्तरिक्ष और स्वर्गकी वाचक हैं ॥

३६०६ ओमभ्यादाने ।८।२।८७॥

ओंशब्दस्य प्लुतः स्यादारम्भे । ओ३म् अग्निमीळे पुरोहितम् । अभ्यादाने किम् । ओमित्येकाक्षरम् ॥

३६०६-अभ्यादान अर्थात् आरम्भ होनेपर अथवा वेदादिमंत्रोंके प्रथममें ओं शब्द प्लुत स्वर हो, यथा-"ओ३म्

अग्निमीळे पुरोहितम्" । आरम्भ न होनेपर "ओमित्येकाक्षरं ब्रह्म" । इस स्थलमें प्लुत स्वर नहीं हुआ ॥

३६०७ ये यज्ञकर्मणि । ८ । २।८८ ॥

ये ३ यजामहे । यज्ञेति किम् । ये यजामहे॥

३६०७–यज्ञकर्म्म होनेपर वेदमें "ये" इस पदको प्लुत स्वर हो, यथा–"ये ३ यजामहे" । यज्ञ कर्म्म न होनेपर प्लुत स्वर नहीं होगा । यथा–"ये यजामहे" ॥

३६०८ प्रणवष्टेः । ८ । २ । ८९ ॥

यज्ञकर्मणि टेरोमित्यादेशः स्यात् । अपां रेतांसि जिन्वतो३म् । टेः किम् । हलन्तेऽन्त्यस्य मा भूत् ॥

३६०८–यज्ञकर्म्म होनेपर टिके स्थानमें प्लुत "ओम्" आदेश हो, यथा–"अपां रेतांसि जिन्वतो३म्" । टिभिन्न अन्य स्थल होनेपर हलन्त शब्दके अन्त्य वर्णके स्थानमें ओमादेश नहीं होगा ॥

३६०९ याज्यान्तः । ८ । २ । ९० ॥

ये याज्यान्ता मन्त्रास्तेषामन्त्यस्य टेः प्लुतो यज्ञकर्मणि । जिह्वामग्ने चकृषे हव्यवाहा३म् । अन्तः किम् । याज्यानामृचां वाक्यसमुदायरूपाणां प्रतिवाक्यं टेः स्यात् सर्वान्तस्य चेष्यते ॥

३६०९–याज्यानुवाक्यकांडनामक प्रकरणमें जो सम्पूर्ण मंत्र है यज्ञकर्म्म होनेपर उनकी अन्त्य टिके स्थानमें प्लुत स्वर हो, यथा–"जिह्वामग्ने चकृषे हव्यवाहा३म्" । याज्यका अन्त्य न होनेपर वाक्य समुदाय रूप याज्य मंत्रके प्रति वाक्यमें टिके स्थानमें प्लुत स्वर होगा, और सर्वान्त टिके स्थानमें प्लुत स्वर इष्ट है ॥

३६१० ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः । ८ । २ । ९१ ॥

एषामादेः प्लुतो यज्ञकर्मणि । अग्नयेनुब्रू ३ हि । अग्नये गोमयानि प्रे३ष्य । अस्तु श्रौ ३ षट् । सोमस्याग्ने वीही ३ वौ ३ षट् । अग्निमा ३ वह ॥

३६१०–वेदमें यज्ञकर्म्म होनेपर ब्रूहि, प्रेष्य, श्रौषट्, वौषट् और आवह पदके आदि वर्णको प्लुत स्वर हो, यथा–"अग्नये नुब्रू३हि।अग्नये गोमयानि प्रे३ष्य"।"अस्तु श्रौ३षट्"। "सोमस्याग्ने वीही३वौ३षट्" । "अग्निमा३वह" ॥

३६११ अग्नीत्प्रेषणे परस्य च । ८ । २ । ९२ ॥

अग्नीधः प्रेषणे आदेः प्लुतस्तस्मात्परस्य च। ओ ३ श्रा ३ वय । नेह । अग्नीदग्नीन्विहर। बर्हिस्तृणीहि ॥

३६११–वेदमें यज्ञकर्म्म होनेपर अग्नीत्प्रेषणार्थमें आदि वर्ण और उसके परवर्त्ती वर्णको प्लुत स्वर हो, यथा–"ओ३ श्रा३वय" । किन्तु "अग्नीदग्नीन्विहर" और "बर्हिस्तृणीहि"। इन दो स्थलोंमें नहीं होगा ॥

३६१२ विभाषा पृष्टप्रतिवचने हेः । ८ । २ । ९३ ॥

प्लुतः । अकार्षीः कटम् । अकार्षं हि ३ । अकार्षं हि । पृष्टेति किम् । कटं करिष्यति हि । हेः किम् । करोमि ननु ॥

३६१२–वेदमें पृष्ट विषयका प्रतिवचन होनेपर "हि" शब्दको विकल्प करके प्लुत स्वर हो, यथा–"अकार्षीः कटम्"। "अकार्षं हि३" । "अकार्षं हि" । पृष्ट प्रतिवचन न होनेपर यथा–"कटं करिष्यति हि" हि शब्द न होनेपर "करोमि ननु" ॥

३६१३ निगृह्यानुयोगे च । ८ ।२।९४॥

अत्र यद्वाक्यं तस्य टेः प्लुतो वा । अद्यामावास्येत्यात्थ ३। अमावास्येत्येवं वादिनं युक्त्या स्वमतात्प्रच्याव्य एवमनुयुज्यते ॥

३६१३–निग्रहपूर्वक अनुयोग अर्थमें वर्तमान जो वाक्य उसकी टिके स्थानमें विकल्प करके प्लुत स्वर हो, यथा–"अद्यामावास्येत्यात्थ३" । अर्थात् आज अमावास्या है इस प्रकार कहनेवालेको युक्तिसे उसके निज मतसे प्रच्यावित करके ऐसा अनुयोग करना होताहै ॥

३६१४ आम्रेडितं भर्त्सने । ८ ।२।९५॥

दस्योदस्यो ३ घातयिष्यामि त्वाम् । आम्रेडितग्रहणं द्विरुक्तोपलक्षणम् । चौरचौर ३ ॥

३६१४–भर्त्सनार्थमें आम्रेडित अर्थात् दो तीन बार उक्त जो पद उसके अन्तकी टिके स्थानमें प्लुत स्वर हो, यथा–दस्योदस्यो३घातयिष्यामि त्वाम्" । इस स्थलमें आम्रेडित शब्दग्रहणसे द्विरुक्त जानना चाहिये । "चौरचौर ३" इस स्थलमें भी प्लुत हुआ ॥

३६१५ अङ्गयुक्तं तिङाकाङ्क्षम् । ८ । २ । ९६ ॥

अङ्गेत्यनेन युक्तं तिङन्तं प्लवते । अङ्ग कूज ३ इदानीं ज्ञास्यसि जाल्म । तिङ् किम् । अङ्ग देवदत्त मिथ्या वदसि । आकाङ्क्षं किम् । अङ्ग पच । नैतदपरमाकाङ्क्षति । भर्त्सन इत्येव । अङ्गाधीष्व भक्तं तव दास्यामि ॥

३६१५–आकांक्षा होनेपर अङ्ग शब्द करके युक्त तिङन्त पदके अन्त वर्णको प्लुत स्वर हो, यथा–"अङ्ग कूज३इदानीं ज्ञास्यसि जाल्म" तिङन्त न होनेपर अङ्ग देवदत्त मिथ्या वदसि यहाँ प्लुत न हुआ । आकांक्षा न होनेपर यथा–"अङ्ग" । "पच" । यह तिङन्त अन्यका आकांक्षा नहीं करताहै । इस सूत्रसे भर्त्सन अर्थमें ही प्लुत होताहै, यथा–"अङ्गाधीष्व भक्तं तव दास्यामि" यहाँ प्लुत न हुआ ॥

३६१६ विचार्यमाणानाम् । ८।२।९७॥

वाक्यानां टेः प्लुतः । होतव्यं दीक्षितस्य गृहा ३ इ । न होतव्य३मिति । होतव्यं न होतव्यमिति विचार्यते । प्रमाणैर्वस्तुतत्त्वपरीक्षणं विचारः ॥

३६१६-विचार्य्यमाण वाक्यकी टिके स्थानमें प्लुत स्वर हो, यथा-"होतव्यं दीक्षितस्य गृहा ३इ"। "न होतव्य३ मिति"। अर्थात् होम करना उचित है कि, नहीं यो विचार करताहै। प्रमाणसे बस्तुतत्वकी परीक्षा करनेको विचार कहतेहैं ॥

३६१७ पूर्वं तु भाषायाम् । ८।२।९८॥

विचार्यमाणानां पूर्वमेव प्लवते । अहिर्नु ३ रज्जुर्नु । प्रयोगापेक्षत्वं पूर्वत्वम् । भाषाग्रहणात्पूर्वयोगश्छन्दसीति ज्ञायते ॥

३६१७-भाषाविषयमें विचार्य्यमाण शब्दोंके पूर्व शब्दकी टिको प्लुत स्वर हो, यथा-" अहिर्नु ३ रज्जुर्नु "। प्रयोगापेक्षासे पूर्वत्व जानना। इस स्थलमें भाषा शब्दका ग्रहण करनेसे पूर्वयोग वेदमें जानना चाहिये ॥

३६१८ प्रतिश्रवणे च । ८ । २ । ९९॥

वाक्यस्य टेः प्लुतोऽभ्युपगमे प्रतिज्ञाने श्रवणाभिमुख्ये च। गां मे देहि भो३ः । हन्त ते ददामि ३। नित्यः शब्दो भवितुमर्हति ३। दत्त किमात्थ ३ ॥

३६१८-अभ्युपगम, प्रतिज्ञा और श्रवणकी आकांक्षा होनेपर वाक्यकी टिके स्थानमें प्लुत हो, यथा-" गां मे देहि भो३ः "। "हन्त ते ददामि३"। "नित्यः शब्दो भवितुमर्हति३"। " दत्त किमात्थ ३" ॥

३६१९ अनुदात्तं प्रश्नान्ताभिपूजितयोः । ८ । २ । १०० ॥

अनुदात्तः प्लुतः स्यात् । दूराद्धूतादिषु सिद्धस्य प्लुतस्यानुदात्तत्वमात्रमनेन विधीयते । अग्निभूत ३ इ । पट ३ उ । अग्निभूते पटो एतयोः प्रश्नान्ते टेरनुदात्तः प्लुतः । शोभनः खल्वसि माणवक ३ ॥

३६१९-प्रश्नान्त और अभिपूजित अर्थ होनेपर अनुदात्त वर्णको प्लुत स्वर हो, दूरसे हूतादि अर्थमें सिद्ध प्लुतको अनुदात्त मात्र विधानार्थक सूत्रहै। यथा-" अग्निभूत ३ इ"। "पट ३ उ"। " अग्निभूते " " पटो "। इन दो पदोंके प्रश्नान्तमें टिको अनुदात्त स्वर प्लुत हुआहै। "शोभनः खल्वसि माणवक ३ " ॥

३६२० चिदिति चोपमार्थे प्रयुज्यमाने । ८ । २ । १०१ ॥

वाक्यस्य टेरनुदात्तः प्लुतः। अग्निचिद्भाया३त् । अग्निचिदिव भाया३त् । उपमार्थे किम्। कथंचिदाहुः। प्रयुज्यमाने किम्। अग्निर्माणवको भायात् ॥

३६२०-उपमार्थ प्रयुज्यमान होनेपर " चित् " इस वाक्यकी टिको अनुदात्त स्वरकी प्लुत संज्ञा हो, यथा-" अग्निचिद्भाया३त् "। अग्निचिदिव भाया३त् "। उपमार्थ न होनेपर " कथंचिदाहुः " इस प्रकार होगा। प्रयुज्यमान न होनेपर " अग्निर्माणवको भायात् "। इस स्थलमें उपमार्थ गम्यमान होनेपर भी चित् शब्दके प्रयोगके कारण प्लुत नहीं हुआ ॥

३६२१ उपरिस्विदासीदिति च । ८ । २ । १०२ ॥

टेः प्लुतोऽनुदात्तः स्यात्। उपरि स्विदासी३त्। अधःस्विदासी३दित्यत्र तु विचार्यमाणानामित्युदात्तः प्लुतः ॥

३६२१-उपरिस्विदासीत् इस पदकी टिके प्लुत स्वरकी अनुदात्त संज्ञा हो, यथा-"उपरि स्विदासी३त्"। "अधः स्विदासी३त्"। इस स्थलमें "विचार्य्यमाणानाम्"। इस सूत्रसे उदात्त स्वर प्लुत हुआ ॥

३६२२ स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु । ८ । २ । १०३ ॥

स्वरितः प्लुतः स्यादाम्रेडिते परेऽसूयादौ गम्ये। असूयायाम्। अभिरूपक३ अभिरूपक रिक्तं त आभिरूप्यम्। संमतौ। अभिरूपक ३-अभिरूपक शोभनोऽसि। कोपे। अविनीतक३ अविनीतक इदानीं ज्ञास्यसि जाल्म। कुत्सने। शाक्तीक ३ शाक्तीक रिक्ता ते शक्तिः ॥

३६२२-असूया, सम्मति, कोप और कुत्सनार्थ गम्यमान होनेपर आम्रेडित परे रहते स्वरित वर्ण प्लुत हो, असूयार्थमें यथा-" अभिरूपक ३ अभिरूपक रिक्तं त आभिरूप्यम् "। संम्मति अर्थमें यथा-"अभिरूपक ३ अभिरूपक शोभनोऽसि"। कोपार्थमें यथा-" अविनीतक ३ अविनीतक इदानीं ज्ञास्यसि जाल्म "। कुत्सार्थमें यथा-"शाक्तीक ३ शाक्तीक रिक्ता ते शक्तिः " ॥

३६२३ क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् । ८ । २ । १०४ ॥

आकाङ्क्षस्य तिङन्तस्य टेः स्वरितः प्लुतः स्यात्। आचारभेदे। स्वयं ह रथेन याति ३ उपाध्यायं पदातिं गमयति । प्रार्थनायाम् । पुत्रांश्च लप्सीष्ट ३ धनं च तात । व्यापारणे । कटं कुरु ३ ग्रामं गच्छ । आकांक्षं किम् । दीर्घायुरसि । अग्नीदग्नीन्विहर ॥

३६२३-आचारभेद आशीरर्थ और प्रैषार्थ गम्यमान होनेपर आकाङ्क्षित जो तिङन्त पद उसकी टिके स्वरित स्वरको प्लुत हो, यथा-" स्वयं ह रथेन याति ३ " "उपाध्यायं पदातिं गमयति " । प्रार्थनामें यथा-" पुत्रांश्च लप्सीष्ट ३ धनं च तात " । प्रैष अर्थात् व्यापारार्थमें यथा-" कटं कुरु ३ ग्रामं गच्छ " । आकांक्षा न होनेपर दीर्घायुरसि । अग्निदग्नीन्विहर ॥

३६२४ अनन्त्यस्यापि प्रश्नाख्यानयोः । ८ । २ । १०५ ॥

अनन्त्यस्यान्त्यस्यापि पदस्य टेः स्वरितः प्लुत एतयोः । अगम३ः । पूर्वा३न् ग्रामा३न् सर्वपदानामयम् । आख्याने । अगम३म् पूर्वान् ग्रामा३न् ॥

३६२४-प्रश्न और आख्यानार्थमें अन्त्य पदकी मध्य पदकी टिके स्वरित स्वरको प्लुत स्वर हो, प्रश्नार्थमें यथा-" अगम३ः पूर्वा३न् ग्रामा३न् " । यह उदाहरण सब पदोंका है । आख्यानार्थमें यथा-अगम३म् पूर्वा३न् ग्रामा३न् ॥

३६२५ प्लुतावैच इदुतौ । ८ । २ । १०६ ॥

दूराद्धूतादिषु प्लुतो विहितस्तत्रैव ऐचः प्लुतप्रसङ्गे तदवयवाविदुतौ प्लवेते । ऐ३तिकायन औ३पगव । चतुर्मात्रावत्र ऐचौ सम्पद्येते ॥

३६२५-दूरसे आह्वानादि अर्थमें जो प्लुत स्वर विहित हुआहै उस अर्थमें ही ऐच्के प्लुतके प्रसङ्गमें तदवयवीभूत जो इकार और उकार वह दोनों प्लुतसंज्ञक हों, ऐ३तिकायन । औ३पगव । इस स्थलमें ऐच् चतुर्मात्र है । प्लुत इवर्ण उवर्णकी तीन और एक अकारकी ऐसी चारमात्रा हुई ॥

३६२६ एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्याऽऽदुत्तरस्येदुतौ । ८ । २ । १०७ ॥

अप्रगृह्यस्य एचोऽदूराद्धूते प्लुतविषये पूर्वस्यार्धस्याकारः प्लुतः स्यादुत्तरस्य त्वर्धस्य इदुतौ स्तः ॥ प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्वेव ॥ * ॥ प्रश्नान्ते । अगम३ः पूर्वा३न् ग्रामा३न् । अग्निभूत ३ इ । अभिपूजिते । भद्रं करोषि पट ३ उ । विचार्यमाणे । होतव्यं दीक्षितस्य गृहा ३ इ । न होतव्य ३ मिति । प्रत्यभिवादे । आयुष्मानेधि अग्निभूत ३ इ । याज्यान्ते । स्तोमैर्विधेमाग्नय ३ इ । परिगणनं किम् । विष्णुभूते ३ घातयिष्यामि त्वाम् । अदूराद्धूत इति न वक्तव्यम् । पदान्तग्रहणं तु कर्तव्यम् । इह मा भूत् । भद्रं करोषि गौरिति । अप्रगृह्यस्य किम् । शोभने माले ॥ आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्यः ॥ * ॥ अग्ना ३ इ पत्नी वः ॥

३६२६-अप्रगृह्य जो एच् उसके निकटाह्वानार्थमें विहित प्लुत विषयमें पूर्वके अर्द्ध भाग स्थानमें आकार प्लुत हो, और उत्तरार्द्धका इकार और उकार प्लुत हो ।

प्रश्नान्त, अभिपूजन, विचार्य्यमाण, प्रत्यभिवाद और याज्यान्तार्थमें पूर्वोक्त कार्य हो* प्रश्नान्तमें यथा-" अगम३ः पूर्वा३न् ग्रामा३न् । अग्निभूत३इ । अभिपूजितार्थमें यथा-"भद्रं करोषि पट ३ उ " । विचार्य्यमाणार्थमें यथा-" होतव्यं दीक्षितस्य गृहा३ इ "। "न होतव्य३मिति" । प्रत्यभिवादनार्थमें यथा-"आयुष्मानेधि अग्निभूत ३ इ" । याज्यान्तमें यथा-"स्तोमैर्विधेमाग्नय ३ इ" । परिगणन न होनेपर, विष्णुभूते३ घातयिष्यामि त्वाम् । अदूराद्धूते यह वक्तव्य नहीं है, किन्तु पदान्त ग्रहण करना उचित है, भद्रं करोषि गौरिति । इस स्थलमें नहीं होगा । अप्रगृह्य न होनेपर । शोभने माले ॥

आमंत्रितार्थमें और वेदमें यह प्लुत विकार हो * अग्ना ३ इ पत्नी वः ॥

३६२७ तयोर्य्वावचि संहितायाम् । ८ । २ । १०८ ॥

इदुतोर्यकारवकारौ स्तोऽचि संहितायाम् । अग्न३याशा । पट३वाशा । अग्न३यिन्द्रम् । पट३वुदकम् । अचि किम् । अग्ना३वरुणौ । संहितायां किम् । अग्न ३ इ इन्द्रः । संहितायामित्यध्यायसमाप्तेरधिकारः । इदुतोरसिद्धत्वादयमारम्भः सवर्णदीर्घत्वस्य शाकल्यस्य च निवृत्त्यर्थम् । यवयोरसिद्धत्वादुदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येत्यस्य बाधनार्थो वा ॥

३६२७-संहितार्थमें अच् परे रहते इकार और उकारके स्थानमें क्रमसे यकार और वकार हो, अग्न३याशा । पट३वाशा । अग्न३यिन्द्रम् । पट३वुदकम् । अच् परे न रहते, अग्ना ३ वरुणौ । संहिता न होनेपर, अग्न ३ इ इन्द्रः । इस अध्यायकी समाप्तितक संहिता शब्दका अधिकार चलेगा । इकार और उकारके असिद्धत्वके कारण इसका आरम्भ है । अथवा सवर्णदीर्घके और शाकल्यके निवृत्त्यर्थ है यकार और वकारके असिद्धत्वके कारण " उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ३६५९ " इस सूत्रके बाधनार्थ वा आरम्भ समझना चाहिये ॥

३६२८ मतुवसो रु संबुद्धौ छन्दसि । ८ । ३ । १ ॥

रु इत्यविभक्तिको निर्देशः । मत्वन्तस्य वस्वन्तस्य च रुः स्यात् । अलोन्त्यस्येति परिभाषया

नकारस्य । इन्द्र मरुत्व इह पाहि सोमम् । हरिवो मेदिनं त्वा । छन्दसीर इति वत्वम् ॥

३६२८-रु यह अविभक्तिक निर्देश है वेदमें संबोधन अर्थ होनेपर मतुप् प्रत्ययान्त और वसु प्रत्ययान्त पदके उत्तर रु हो, "अलोन्त्यस्य ४२" इस परिभाषा सूत्रसे नकारके स्थानमें रु हो, "इन्द्र मरुत्व इह पाहि सोमम्" । "हरिवो मेदिनं त्वा" । "छन्दसीरः ३६००" इस सूत्रसे वकार हुआ मरुत्व मरुतो यस्य सन्तीति मतुप्-"झयः" इससे वत्व । हरिवः=हरयो विद्यन्ते यस्य इति मतुप् सम्बुद्धिके एकवचनमें "उगिदचाम्० ३६१" इससे नुम् "हल्ङ्याभ्यो० २५२" से लोप संयोगान्त लोप करनेपर नकारको रु, रुको "हशि च" करके उत्व ॥

३६२९ दाश्वान्साह्वान्मीढ्वांश्च । ६ । १ । १२ ॥

एते क्वस्वन्ता निपात्यन्ते । मीढ्वस्तोकाय तनयाय ॥ वन उपसंख्यानम् ॥ * ॥ क्वनिब्वनिपोः सामान्यग्रहणम् । अनुबन्धपरिभाषा तु नोपतिष्ठते । अनुबन्धस्येहानिर्देशात् । यस्त्वायन्तं वसुना प्रातरित्वः । इणः क्वनिप् ॥

३६२९-दाश्वान्, साह्वान्, मीढ्वान् यह तीन क्वसु प्रत्ययान्त निपातनसे सिद्ध हों । "मीढ्वस्तोकाय तनयाय" । वन् प्रत्ययान्त पद भी निपातनसे सिद्ध हो * इस स्थलमें केवल वर्णके ग्रहणके कारण क्वनिप् और वनिप्का सामान्यतः ग्रहण होताहै । इस स्थलमें अनुबन्धके अनिर्देशके कारण अनुबन्ध सम्बन्धी परिभाषा उपस्थित नहीं होतीहै । "यस्त्वायन्तं वसुना प्रातरित्वः" इस स्थलमें इण् धातुके उत्तर क्वनिप् प्रत्यय हुआहै ॥

३६३० उभयथर्क्षु । ८ । ३ । ८ ॥

अम्परे छवि नकारस्य रुर्वा । पशूंस्तांश्चक्रे-पशून्तांश्चक्रे ॥

३६३०-अम् परे है जिससे ऐसा छव् परे रहते नकारके स्थानमें विकल्प करके रु हो, यथा-पशूंस्तांश्चक्रे । पशून्तांश्चक्रे ॥

३६३१ दीर्घादटि समानपादे । ८ । ३ । ९ ॥

दीर्घान्नकारस्य रुर्वा स्यादटि तौ चेन्नाटौ एकपादस्थौ स्याताम् । देवाँ अच्छा सुमती । महाँ इन्द्रो य ओजसा । उभयथेत्यनुवृत्तेर्नेह । आदित्यान्याचिषामहे ॥

३६३१-अट् परे रहते दीर्घ स्वरके उत्तर नकारके स्थनमें विकल्प करके रु हो, यदि वह नकार और अट् एक पादस्थ हो, यथा-"देवाँ अच्छा सुमती" । "महाँ इन्द्रो य ओजसा" । "उभयथा" इस पदकी अनुवृत्तिके कारण "आदित्यान् याचिषामहे" इस स्थलमें रु नहीं हुआ ॥

३६३२ आतोऽटि नित्यम् । ८ । ३ । ३ ॥

अटि परतो रोः पूर्वस्यातः स्थाने नित्यमनुनासिकः । महाँ इन्द्रः । तैत्तिरीयास्तु अनुस्वारमधीयते । तत्र च्छान्दसो व्यत्यय इति प्राञ्चः । एवं च सूत्रस्य फलं चिन्त्यम् ॥

३६३२-अट् परे रहते रुके पूर्व आकारके स्थानमें नित्य अनुनासिक वर्ण हो, यथा-"महाँ इन्द्रः" तैत्तिरीय शाखाध्यायी लोग उस स्थानमें अनुस्वार पाठ करतेहैं, प्राचीन लोग कहतेहैं कि, उस स्थलमें जो व्यत्यय वह वैदिक प्रकरणमें ही हो, अन्यत्र न हो, ऐसा सूत्रका फल चिन्तनीय है ॥

३६३३ स्वतवान्पायौ । ८ । ३ । ११ ॥

रुर्वा । भुवस्तस्य स्वतवाँ पायुरग्ने ॥

३६३३-पायु शब्द परे रहते स्वतवत् शब्दको विकल्प करके रु हो, यथा-"भुवस्तस्य स्वतवाँ पायुरग्ने" ॥

३६३४ छन्दसि वाऽप्राम्रेडितयोः । ८ । ३ । ४९ ॥

विसर्गस्य सो वा स्यात् कुप्वोः प्रशब्दमाम्रेडितं च वर्जयित्वा । अग्ने त्रातर्ऋतस्कविः । गिरिर्न विश्वतस्पृथुः । नेह । वसुनः पूर्व्यः पतिः। अग्नेत्यादि किम् । अग्निः प्र विद्वान् । पुरुषः-पुरुषः ॥

३६३४-वेदमें प्र शब्द और आम्रेडित अर्थात् पुनरुक्ति भिन्न प्र शब्द भिन्न अन्य कवर्ग और पवर्ग परे रहते विसर्गके स्थानमें विकल्प करके स हो, यथा-"अग्ने त्रातर्ऋतस्कविः" "गिरिर्न विश्वतस्पृथुः" । "वसुनः पूर्व्यः पतिः" । इस स्थलमें स् नहीं हुआ । प्र शब्द और आम्रेडित होनेपर यथा-"अग्निः प्र विद्वान्" । "पुरुषःपुरुषः" ॥

३६३५ कःकरत्करतिकृधिकृतेष्वनदितेः । ८ । ३ । ५० ॥

विसर्गस्य सः स्यात् । प्रदिवो अपस्कः । यथा नो वस्यसस्करत् । सुपे शसस्करति । उरुणस्कृधि । सोमं न चारुं मघवत्सु नस्कृतम् । अनदितेरिति किम् । यथा नो अदितिः करत् ॥

३६३५-कः, करत्, करति, कृधि और कृत शब्द परे रहते विसर्गके स्थानमें स हो, अदिति शब्दके उत्तर न हो, यथा-"प्रदिवो अपस्कः" । "नो वस्यसस्करत्" । "सुपे शस्करति" । "उरुणस्कृधि" सोमं न चारुं मघवत्सु नस्कृतम् । अदिति शब्दके उत्तर होनेपर विसर्गको सकार न हुआ, यथा-"नो अदितिः करत्" । करत्=कृञ्+लुङ् "कृमृदृरुहिभ्यश्छन्दसि" इससे च्लिको अङ् "ऋदृशोऽङि" इससे गुण । करति लट् व्यत्ययसे शप् । कृधि=कृ+लोट्सिको हि "श्रुशृणुपृकृवृभ्यश्छन्दसि" इससे हिको धि आदेश होकर कृधि हुआ ॥

३६३६ पञ्चम्याः परावध्यर्थे । ८ । ३ । ५१ ॥

पञ्चमीविसर्गस्य स स्यादुपरिभावार्थे परिशब्दे परतः । दिवस्परिप्रथमं जज्ञे । अध्यर्थे किम् । दिवस्पृथिव्याः पर्योजः ॥

३६३६–उपरिभावार्थ परि शब्द परे रहते पञ्चमीके विसर्गके स्थानमें स हो । यथा–"दिवस्परिप्रथमं जज्ञे" । अध्यर्थ न होनेपर "दिवस्पृथिव्याः पर्योजः" ॥

३६३७ पातौ च बहुलम् । ८ । ३ । ५२ ॥

पञ्चम्या इत्येव । सूर्यो नो दिवस्पातु ॥

३६३७–पातु शब्द परे रहते पञ्चमीके विसर्गके स्थानमें स हो, यथा–"सूर्यो नो दिवस्पातु" ॥

३६३८ षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु । ८ । ३ । ५३ ॥

वाचस्पतिं विश्वकर्माणम् । दिवस्पुत्राय सूर्याय । दिवस्पृष्ठं भन्दमानः । तमसस्पारमस्य । परिवीत इळस्पदे । दिवस्पयो दिधिषाणाः । रायस्पोषं यजमानेषु ॥

३६३८–पति, पुत्र, पृष्ठ, पार, पद, पयस् और पोष शब्द परे रहते षष्ठी विभक्तिके विसर्गके स्थानमें स हो, यथा–"वाचस्पतिं विश्वकर्म्माणम्" । "दिवस्पुत्राय सूर्याय" । "दिवस्पृष्ठं भन्दमानः" । "तमसस्पारमस्य" । "परिवीत इळस्पदे" । "दिवस्पयो दिधिषाणाः" । "रायस्पोषं यजमानेषु" ॥

३६३९ इडाया वा । ८ । ३ । ५४ ॥

पतिपुत्रादिषु परेषु । इळायास्पुत्रः । इळायाः पुत्रः । इळायास्पदे । इळायाः पदे । "निसस्तपतावनासेवने । ८ । ३ । १०२ ॥" निसः सकारस्य मूर्द्धन्यः स्यात् । निष्टप्तं रक्षो निष्टप्ता अरातयः । अनासेवने किम् । निस्तपति । पुनःपुनस्तपतीत्यर्थः ॥

३६३९–पति, पुत्र, पृष्ठ, पार, पद, पयस् और पोष शब्द परे रहते इडा शब्दके उत्तर विसर्गके स्थानमें स् हो, यथा, "इळायास्पुत्रः" । "इळायाः पुत्रः" । "इळायास्पदे" । "इळायाः पदे" । "निसस्तपतावनासेवने २४०३" इस सूत्रसे निस्के सकारको षत्व हो, यथा–"निष्टप्तं रक्षः" "निष्टप्ता अरातयः" । आसेवनार्थमें "निस्तपति" । अर्थात् पुनःपुनस्तपतीत्यर्थः ॥

३६४० युष्मत्तत्ततक्षुष्वन्तःपादम् । ८ । ३ । १०३ ॥

पादमध्यस्थस्य सस्य मूर्धन्यः स्यात्तकारादिष्वेषु परेषु । युष्मदादेशाः त्वंत्वातेतवाः । त्रिभिष्ट्वं देव सवितः । तेभिष्ट्वा आभिष्टे । अप्स्वग्ने सधिष्टव । अग्निष्टद्विश्वम् । द्यावापृथिवी निष्टतक्षुः । अन्तःपादं किम् । तदग्निस्तदर्यमा । यन्म आत्मनो मिन्दाभूदग्निस्तत्पुनराहार्जातवेदा विचर्षणिः । अत्राग्निरितिपूर्वपादस्यान्तो न तु मध्यः ॥

३६४०–तकारादि युष्मद् शब्दके स्थानमें आदिष्ट त्वं, त्वा, ते और तव और ततक्षु शब्द परे रहते पाद मध्यस्थ जो सकार उसको षत्व हो, यथा–"त्रिभिष्ट्वं देव सवितः" "तेभिष्ट्वा आभिष्टे" । "अप्स्वग्ने सधिष्टव" । "अग्निष्टद्विश्वम्" । "द्यावापृथिवी निष्टतक्षुः" । पादमध्यस्थ न होनेपर । "तदग्निस्तदर्य्यमा" । "यन्म आत्मनो मिन्दाभूदग्निस्तत्पुनराहार्जातवेदा विचर्षणिः ।" इस स्थलमें अग्नि शब्द पूर्वपद के अन्तमें है मध्यमें नहीं है ॥

३६४१ यजुष्येकेषाम् । ८ । ३ । १०४ ॥

युष्मत्तत्ततक्षुषु परतः सस्य मूर्धन्यो वा । अर्चिभिष्ट्वम् । अग्निष्टे अग्रम् । अर्चिभिष्टतक्षुः । पक्षे अर्चिभिस्त्वमित्यादि ॥

३६४१–युष्मद्, तद्, ततक्षु शब्द परे रहते पदमध्यस्थित सकारको विकल्प करके षत्व हो, यथा–"अर्चिभिष्ट्वम्" । "अग्निष्टेऽग्रम्" । "अर्चिभिष्टतक्षुः" । विकल्प पक्षमें "अर्चिभिस्त्वम्" इत्यादि ॥

३६४२ स्तुतस्तोमयोश्छन्दसि । ८ । ३ । १०५ ॥

नृभिष्टुतस्य । नृभिः स्तुतस्य । गोष्टोमम् । गोस्तोमम् । पूर्वपदादित्येव सिद्धे प्रपञ्चार्थमिदम् ॥

३६४२–वेदमें स्तुत और स्तोम शब्दके सकारको विकल्प करके षत्व हो, यथा–"नृभिष्टुतस्य"–"नृभिः स्तुतस्य" । "गोष्टोमम्"–"गोस्तोमम्" इस स्थलमें "पूर्वपदात्" इस वक्ष्यमाण सूत्रसे उक्त पद सिद्ध होजाता, तथापि विस्तारार्थ यह सूत्र किया है ॥

३६४३ पूर्वपदात् । ८ । ३ । १०६ ॥

पूर्वपदस्थान्निमित्तात्परस्य सस्य षो वा । यदिन्द्राग्नी दिवि ष्ठः । युवं हि स्थः स्वर्पती ॥

३६४३–पूर्व पदस्थ निमित्तके परे स्थित स्थ शब्दके सकारको विकल्प करके षत्व हो । यथा–"यदिन्द्राग्नी दिविष्ठः" "युवं हि स्थः स्वर्पती" ॥

३६४४ सुञः । ८ । ३ । १०७ ॥

पूर्वपदस्थान्निमित्तात्परस्य सुञो निपातस्य सस्य षः । ऊर्ध्व ऊ षु णः । अभीषु णः ॥

३६४४–पूर्व पदस्थ निमित्तके परे स्थित निपात संज्ञक सुञ्के सकारको षत्व हो, यथा–"ऊर्ध्व ऊ षु णः" । "अभिषु णः" । ऊ षु णः "इकः सुञि" इससे पूर्व पदको दीर्घ "नश्च धातुस्थोरुषुभ्यः" इससे णत्व ॥

३६४५ सनोतेरनः । ८ । ३ । १०८ ॥

गोषा इन्द्रो नृषा असि । अनः किम् । गोसनिः ॥

३६४५–पूर्वपदस्थ निमित्तके परे अनन्त सन् धातुके सकारको षत्व हो । यथा–"गोषा इन्द्रो नृषा असि" । अन् प्रत्ययान्त सन् धातु न होनेपर तो "गोसनिः" । गोषा– यहां "जनसनखनक्रमगमो विट्" इससे विट् "विड्वनो० २९८२" इससे आत्व हुआहै ॥

३६४६ सहेः पृतनर्ताभ्यां च । ८ । ३ । १०९ ॥

पृतनाषाहम् । ऋताषाहम् । चात् ऋतीषाहम् ॥

३६४६–पृतना और ऋत शब्दके उत्तर सह धातुके सकारको षत्व हो, यथा–"पृतनाषाहम्" । "ऋताषाहम्" । चकारसे ऋती शब्दके उत्तर भी सहधातुके सकारको षत्व होगा, "ऋतीषाहम्" ॥

३६४७ निव्यभिभ्योऽड्व्यवाये वा छन्दसि । ८ । ३ । ११९ ॥

सस्य मूर्धन्यः । न्यषीदत्–न्यसीदत् । व्यषीदत्–व्यसीदत् । अभ्यष्टौत्–अभ्यस्तौत् ॥

३६४७–वेदमें नि, वि और अभि उपसर्गके उत्तर धातुके सकारको विकल्प करके अट्व्यवायमें षत्व हो, यथा– "न्यषीदत्, न्यसीदत्" । "व्यषीदत्, व्यसीदत्" । "अभ्यष्टौत् । अभ्यस्तौत्" ॥

३६४८ छन्दस्यृदवग्रहात् । ८ । ४ । २६ ॥

ऋकारान्तादवग्रहात्परस्य नस्य णः । नृमणाः । पितृयाणम् ॥

३६४८–वेदमें ऋकारान्त अवग्रहके उत्तर नकारको णत्व हो, यथा–"नृमणा पितृयाणम्" ॥

३६४९ नश्च धातुस्थोरुषुभ्यः । ८ । ४ । २७ ॥

धातुस्थात् । अग्ने रक्षा णः । शिक्षा णो अस्मिन् । उरु णस्कृधि । अभीषु णः । मो षु णः ॥

॥ इत्यष्टमोऽध्यायः ॥

३६४९–वेदमें धातुस्थ निमित्तके परे ऊरु शब्द और षु शब्दके उत्तर नस्के नकारको णत्व हो, यथा–"अग्ने रक्षा णः" । "शिक्षा णो अस्मिन्" । "उरु णस्कृधि" । "अभीषु णः" । "मोषु णः" ॥

इति श्रीमत्कान्यकुब्जकुलतिलकायमानपण्डितसुखानंद-
मिश्रात्मजपण्डितज्वालाप्रसादमिश्रकृतसिद्धान्त-
कौमुदी–भाषाटीकायां वैदिकप्रकरणे-
ऽष्टमोऽध्यायः ॥

॥ श्रीः ॥

॥ श्रीगणेशाय नमः ॥

अथ स्वरप्रक्रिया ।

३६५० अनुदात्तं पदमेकवर्जम् । ६ । १ । १५८ ॥

परिभाषेयं स्वरविधिविषया । यस्मिन्पदे यस्योदात्तः स्वरितो वा विधीयते तमेकमचं वर्जयित्वा शेषं तत्पदमनुदात्ताच्कं स्यात् । गोपायतं नः । अत्र सनाद्यन्ता इति धातुत्वे धातुस्वरेण यकाराकार उदात्तः शिष्टमनुदात्तम् । सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वाच्यम् ॥ * ॥ तेनोक्तोदाहरणे गुपेर्धातुस्वर आयस्य प्रत्ययस्वरश्च न शिष्यते । अन्यत्रेति किम् । यज्ञंयज्ञमभिवृधे गृणीतः । अत्र सतिशिष्टोऽपि श्ना इत्यस्य स्वरो न शिष्यते किं तु तस एव ॥

३६५०-यह स्वरविधि विषयकी परिभाषा है । जिस पद में जिस वर्णको उदात्त वा स्वरित विहित हो, उस अच्को त्यागकर शेष जो अच् रहैं, उन सबको अनुदात्तस्वर हो, यथा-"गोपायतं नः" । इस स्थलमें "सनाद्यन्ताः०२३०४" इस सूत्रसे धातुत्व होनेपर धातुस्वरसे यकारके अकारको उदात्त स्वर और अवशिष्टोंको अनुदात्तस्वर हुआ ।

विकरणोंसे अन्यत्र सतिशिष्टस्वर बलवान् हो ऐसा कहना चाहिये * इस कारण उक्त उदाहरणमें गुप्को धातु स्वर और आयको प्रत्यय स्वर अवशिष्ट नहीं होताहै । अन्यत्र कहनेसे "यज्ञं यज्ञमभिवृधे गृणीतः" इस स्थलमें सतिशिष्ट होनेपर भी श्ना प्रत्ययका स्वर शिष्ट नहीं होताहै, किन्तु तसका ही स्वर शिष्ट होताहै ॥

३६५१ अनुदात्तस्य च यत्रोदात्तलोपः । ६ । १ । १६१ ॥

यस्मिन्ननुदात्ते परे उदात्तो लुप्यते तस्योदात्तः स्यात् । देवीं वाचम् । अत्र ङीबुदात्तः ॥

३६५१-जिस अनुदात्तस्वर परे रहते पूर्ववर्त्ती उदात्तस्वरका लोप हो, उसको उदात्तस्वर हो, यथा-"देवीं वाचम्" । इस स्थलमें ङीप् उदात्त है, क्यों कि, "अनुदात्तौ सुप्पितौ" इस सूत्रसे ङीप्को अनुदात्तत्व होनेपर वह परे रहते देव शब्दके उदात्तस्वरका लोप हुआहै ॥

३६५२ चौ । ६ । १ । १२२ ॥

लुप्ताकारेऽञ्चतौ परे पूर्वस्यान्तोदात्तः स्यात् । उदात्तनिवृत्तिस्वरापवादः । देवद्रीचीं नयत देवयन्तः ॥ अतद्धित इति वाच्यम् ॥ * ॥ दाधीचः । माधूचः । प्रत्ययस्वर एवात्र ॥

३६५२-जिसका अकार लुप्त हुआहो, ऐसा अञ्च धातु परे रहते पूर्वपदके अन्त्यवर्णको उदात्तस्वर हो, यह सूत्र उदात्तनिवृत्तिस्वरका अपवाद है, यथा-"देवद्रीचीं नयत देवयन्तः" ॥

तद्धित प्रत्यय परे न रहते लुप्तनकारक अञ्च् धातु परे पूर्वस्वरको उदात्त हो ऐसा कहना चाहिये * यथा-दाधीचः । माधूचः । इस स्थलमें केवल प्रत्ययस्वर ही होताहै ॥

३६५३ आमन्त्रितस्य च । ६ । १ । १९८ ॥

आमन्त्रितस्यादिरुदात्तः स्यात् । अग्न इन्द्र वरुण मित्र देवाः ॥

३६५३--आमंत्रित अर्थात् संबोधनविभक्त्यन्त पदके आदिवर्णको उदात्तस्वर हो, यथा-"अग्न इन्द्र वरुण मित्र देवाः" ॥

३६५४ आमन्त्रितस्य च । ८ । १ । १९ ॥

पदात्परस्यापादादिस्थितस्यामन्त्रितस्य सर्वस्यानुदात्तः स्यात् । प्रागुक्तस्य षाष्ठस्यापवादोऽयमाष्टमिकः । इमं मे गंगे यमुने सरस्वति । अपादादौ किम् । शुतुद्रि स्तोमम् ॥ आमन्त्रितं पूर्वमविद्यमानवत् ॥ अग्न इन्द्र । अत्रेन्द्रादीनां निघातो न । पूर्वस्याविद्यमानत्वेन पदात्परत्वाभावात् ॥ नामन्त्रिते समानाधिकरणे समान्यवचनम् ॥ समानाधिकरणे आमन्त्रिते परे विशेष्यं पूर्वमविद्यमानवन्न । अग्ने तेजस्विन् । अग्ने त्रातः । सामान्यवचनं किम् । पर्यायेषु मा भूत् । अघ्न्ये देवि सरस्वति ॥

३६५४-पदके परे हो और पादके आदिमें स्थित न हो ऐसे आमन्त्रित पदोंको अनुदात्तस्वर हो, यह आष्टमिक सूत्र प्रागुक्त षाष्ठ सूत्रका अपवाद है, यथा-इमं मे गङ्गे यमुने सरस्वति । पादके आदिमें स्थित होनेपर तो? "शुतुद्रि स्तोमम्" यहां पूर्व सूत्रसे आदि उदात्त हुआ । आमंत्रित पूर्वपद अविद्यमानवत् हो (४१२) यथा-"अग्न इन्द्र" इस स्थलमें इन्द्रादि शब्दोंको निघातस्वर नहीं हुआ, क्यों कि, पूर्वको अविद्यमानत्वके कारण पदसे पर नहीं है । समानाधिकरण आमंत्रित पद परे रहते पूर्वस्थित विशेष्यवाचक पद अविद्यमानवत् न हो, यथा-"अग्ने तेजस्विन्" "अग्ने त्रातः" । सामान्यवचन क्यों कहा? तो पर्य्यायमें नहीं हो, यथा-"अघ्न्ये देवि सरस्वति" ॥

३६५५ सामान्यवचनं विभाषितं विशेषवचने । ८ । १ । ७४ ॥

अत्र भाष्यकृता बहुवचनमिति पूरितम् । सामान्यवचनमिति च पूर्वसूत्रे योजितम् । आमन्त्रितान्ते विशेषणे परे पूर्वं बहुवचनान्तमविद्यमानवद्वा । देवीः षडुर्वीरुरु नः कृणोत । अत्र देवीनां विशेषणं षडिति । देवाः शरण्याः । इह द्वितीयस्य निघातो वैकल्पिकः ॥

३६५५–इस सूत्रमें भाष्यकारने 'बहुवचनम्' यह पूरित किया है और 'सामान्यवचनम्' यह पद पूर्वसूत्रमें योजित किया है । आमंत्रितान्त विशेषणवाचक पद परे रहते पूर्वस्थित बहुवचनान्तपद विकल्प करके अविद्यमानवत् हो, यथा–"देवीः षडुर्वीरुरु नः कृणोत" यहां देवीका विशेषण षट् यह है । "देवाः शरण्याः" इस स्थलमें दूसरेको विकल्प करके निघातस्वर हुआ ॥

३६५६ सुबामन्त्रिते पराङ्गवत्स्वरे । २ । १ । २ ॥

सुबन्तमामन्त्रिते परे परस्याङ्गवत्स्यात्स्वरे कर्तव्ये । द्रवत्पाणीशुभस्पती । शुभ इति शुभेः क्विबन्तात्षष्ठ्यन्तस्य । परशरीरानुप्रवेशे षाष्ठिकमामन्त्रिताद्युदात्तत्वम् । न चाष्टमिको निघातः शंक्यः । पूर्वामन्त्रितस्याविद्यमानत्वेन पादादित्वात् । यत्ते दिवो दुहितर्मर्तभोजनम् । इह दिवःशब्दस्याष्टमिको निघातः । परशुना वृश्चन् । षष्ठ्यामन्त्रितकारकवचनम् ॥ * ॥ षष्ठ्यन्तमामन्त्रितान्तं प्रति यत्कारकं तद्वाचकं चेति परिगणनं कर्तव्यमित्यर्थः । तेनेह न । अयमग्ने जरिता । एतेनाग्ने ब्रह्मणा । समर्थानुवृत्त्या वा सिद्धम् ॥ पूर्वाङ्गवच्चेति वक्तव्यम् ॥ * ॥ आ ते पितर्मरुताम् । प्रति त्वा दुहितर्दिवः ॥ अव्ययानां न ॥ * ॥ उच्चैरधीयान ॥ अव्ययीभावस्य त्विष्यते ॥ * ॥ उपाग्न्यधीयान ॥

३६५६–सुबन्त–आमंत्रित पद परे रहते स्वरविधिकर्त्तव्य रहते परवर्तीपदके अङ्ग (एकदेश) के समान हो, यथा–"द्रवत्पाणी शुभस्पती" इस स्थलमें 'शुभः' यह पद क्विबन्त शुभ धातुके षष्ठीविभक्त्यन्तका रूप है यहां परशरीरानुप्रवेशविषयमें षष्ठाध्यायस्थसूत्रविहित आमंत्रितपदके आदिवर्णको उदात्तस्वर हुआ । इस स्थलमें आष्टमिक निघातस्वर नहीं हो सकताहै कारण कि, पूर्ववर्त्ती आमंत्रित पदको अविद्यमानत्व होनेसे पादके आदिमें स्थितहोजाताहै । "यत्ते दिवो दुहितर्मर्तभोजनम्" इस स्थलमें दिवस् शब्दको आष्टमिक निघातस्वर होताहै । "परशुना वृश्चन्" ॥

"षष्ठ्यामंत्रितकारकवचनम्" अर्थात् षष्ठीविभक्त्यन्त और आमंत्रितान्तके प्रति जो कारक तद्वाचक पद आमन्त्रितसंज्ञकपद परे रहते पराङ्गवत् हो इस प्रकार परिगणन करना चाहिये । इस कारण "अयमग्ने जरिता" "एतेनाग्ने ब्रह्मणा" । इन स्थलोंमें नहीं हुआ । अथवा समर्थानुवृत्तिसे सिद्ध हुआहै ॥

"पूर्वाङ्गवच्चेति वक्तव्यम्" अर्थात् सुबन्त पराङ्गवत् न होकर पूर्वाङ्गवत् हो ऐसा कहना चाहिये * यथा–"आ ते पितर्मरुताम्" । "प्रति त्वा दुहितर्दिवः" ॥

अव्ययको पूर्वाङ्गवद्भाव न हो * यथा–"उच्चैरधीयान" ॥

अव्ययीभावसंज्ञकको पूर्वाङ्गवद्भाव इष्ट है * यथा–"उपाग्न्यधीयान" ॥

३६५७ उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य । ८ । २ । ४ ॥

उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्यानुदात्तस्य स्वरितः स्यात् । अभ्यभि हि स्वरितस्य यणः । खलप्व्याशा । अस्य स्वरितस्य त्रैपादिकत्वेनासिद्धत्वाच्छेषनिघातो न ॥

३६५७–उदात्तस्थानमें और स्वरितस्थानमें जो यण् उसके परे स्थित अनुदात्तस्वरको स्वरितस्वर हो, उदात्तस्थानीय यण्का यथा–अभ्यभि हि । स्वरितस्थानीययण्का उदाहरण यथा–"खलप्व्याशा" । 'अभ्यभि हि'यहां अभि शब्द "उपसर्गाश्चाभिवर्जम्" इससे उदात्तनिषेध होनेसे फिट्स्वरसे अन्तोदात्त हुआ, पश्चात् अभि शब्दको द्वित्व"तस्य परमाम्रेडितम्" "अनुदात्तञ्च" इससे परको अनुदात्तत्व, वह परे रहते उदात्तस्थानमें यण् होनेपर उदात्त यण्के परे होनेके कारण स्वरितस्वर हुआ। खलपू शब्द कृदुत्तर पदप्रकृतिस्वरसे अन्तोदात्त है, उसके स्थानमें "ओः सुपि" इस सूत्रसे यण् हुआ वह यण् उदात्त है,उसके परे ङि प्रत्यय सुप्त्वके कारण अनुदात्त है, उसको इस वर्त्तमानसूत्रसे स्वरितस्वर हुआ, उस स्वरित इकारको यण् होनेपर उसके परे आशा शब्दके आकारको इसीसूत्रसे स्वरित हुआ, क्यों कि, आशा शब्द "आशाया अदिगाख्या चेत्" इससे अन्तोदात्त होनेसे अनुदात्तादि है । इस स्वरितस्वरके त्रैपादिकत्वके कारण असिद्ध होनेसे शेषको निघातस्वर नहीं हुआ ॥

३६५८ एकादेश उदात्तेनोदात्तः । ८ । २ । ५ ॥

उदात्तेन सहैकादेश उदात्तः स्यात् । वोश्वाः । क्वावरं मरुतः ॥

३६५८–उदात्तस्वरके साथ एकादेशको उदात्तस्वर हो, यथा–"वोश्वाः" । "क्वावरं मरुतः" ॥

३६५९ स्वरितो वानुदात्ते पदादौ । ८ । २ । ६ ॥

अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः स्वरितो वा स्यात् । पक्षे पूर्वसूत्रेणोदात्तः । वी३–

दं ज्योतिर्हृदये । अस्य श्लोको दिवीयते । व्यवस्थितविभाषात्वादिकारयोः स्वरितः । दीर्घप्रवेशे तूदात्तः । किं च एङः पदान्तादिति पूर्वरूपे स्वरित एव । तेऽवदन् । सो३ यमागात् । उक्तं च प्रातिशाख्ये । इकारयोश्च प्रश्लेषे क्षेप्राभिनिहतेषु चेति ॥

३६५९-अनुदात्त पदादि परे रहते उदात्तके साथ एकादेश विकल्प करके स्वरित हो, विकल्प पक्षमें पूर्व सूत्रसे उदात्तस्वर होगा, यथा-"वी३दं ज्योतिर्हृदये"। "अस्य श्लोको दिवीयते"। व्यवस्थितविभाषाके कारण दोनों इकारोंको स्वरित हुआ॥ दीर्घ प्रवेश होनेपर तो उदात्त होगा । "एङः पदान्तात्० ८६" इस सूत्रसे पूर्वरूप होनेपर तो स्वरित ही होगा ।"तेऽवदन्"। "सो३यमागात्"। प्रातिशाख्यमें यह उक्त भी है, यथा-ह्रस्व दो इकारोंके स्थानमें सवर्ण दीर्घको प्रश्लेष कहतेहैं, उदात्त और स्वरित स्थानमें जो यण् उसको क्षेप्रसंधि कहतेहैं, और "एङः पदान्तादति" से पूर्वरूपको अभिनिहितसन्धि कहतेहैं उन सबमें स्वरित स्वर हो ॥

३६६० उदात्तादनुदात्तस्य स्वरितः । ८ । ४ । ६६ ॥

उदात्तात्परस्यानुदात्तस्य स्वरितः स्यात् । अग्निमीळे । अस्याप्यसिद्धत्वाच्छेषनिघातो न । तमीशानासः ॥

३६६०-उदात्तस्वरके परे स्थित अनुदात्तस्वरको स्वरित स्वर हो, यथा-"अग्निमीळे"। इसको भी असिद्धत्वके कारण शेषनिघात नहीं हुआ । "तमीशानासः"। 'अग्निमीळे' यहां अग्नि शब्द फिट् सूत्रसे वा प्रत्यय स्वरसे अन्तोदात्त है। अम् प्रत्यय सुप्त्वके कारण अनुदात्त है, पश्चात् "अमि पूर्वः" इस सूत्रसे एकादेश उदात्त हुआ । ईळे यह पद ईड् धातुका लट् सम्बन्धी उत्तम पुरुषका एकवचनमें है । यहां 'द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो ळकारः' इस वक्ष्यमाण प्रातिशाख्यसे डकारको ळकार हुआ ॥

३६६१ नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् । ८ । ४ । ६७ ॥

उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात् । गार्ग्यादिमते तु स्यादेव । प्र य आरुः । वोऽश्वाः । क्व ३ भीशवः ॥

३६६१-उदात्त और स्वरित परे रहते अनुदात्तको स्वरित न हो, गार्ग्यादिमुनिके मतसे तो होहीगा, "प्र य आरुः" "वोऽश्वाः"। "क्व ३ भीशवः" ॥

३६६२ एकश्रुति दूरात्सम्बुद्धौ । १ । २ । ३३ ॥

दूरात्सम्बोधने वाक्यमेकश्रुतिः स्यात् । त्रैस्वर्यापवादः । आगच्छ भो माणवक ॥

३६६२-दूरसे संबोधन विषयक जो वाक्य उसको एकश्रुति हो, यह त्रैस्वर्यापवाद है, यथा-आगच्छ भो माणवक । उदात्तादिस्वरोंका विभागरहित होकर स्थितिको एकश्रुति कहतेहैं ॥

३६६३ यज्ञकर्मण्यजपन्यूङ्खसामसु । १ । २ । ३४ ॥

यज्ञक्रियायां मन्त्र एकश्रुतिः स्याज्जपादीन्वर्जयित्वा । अग्निर्मूर्धा दिवः ककुत् । यज्ञेति किम् । स्वाध्यायकाले त्रैस्वर्यमेव । अजपेति किम् । ममाग्ने वर्चो विहवेष्वस्तु । जपो नाम उपांशुप्रयोगः । यथा जले निमग्नस्य । न्यूङ्खा नाम षोडश ओकाराः । गीतिषु सामाख्या ॥

३६६३-जप, न्यूंख और सामको छोडकर यज्ञक्रियामें जो मंत्र उसको एकश्रुतिस्वर हो । वेदमें उदात्त, अनुदात्त और स्वरित इन तीन स्वरोंसे सब मंत्र पढे जातेहैं, उनको यज्ञक्रियामें भी उसी प्रकार प्रयोगोंकी प्राप्ति होनेपर एकश्रुति स्वर विहित होताहै । इस स्थलमें मंत्र 'अजप' इस पर्युदाससे लब्ध होताहै, इस कारण ऊहादिमें नहीं होगा, अत एव "वाहन्द्रे शत्रुर्वर्द्धस्व" इस स्थलमें समासान्तोदात्तत्व कर्तव्य होनेपर आद्युदात्तका प्रयोग किया, इस प्रकारकी प्रसिद्धि है । "अग्निर्मूर्द्धा दिवः ककुत्" यज्ञक्रिया न होनेपर तो स्वाध्यायकालमें त्रैस्वर्यही होताहै । अजपादि क्यों कहा ? तो "ममाग्ने वर्चो विहवेष्वस्तु"। मंत्रादिके उपांशु प्रयोगको जप कहतेहैं, जैसे-जलमें निमग्नव्यक्तिको होताहै । षोडश ओकारात्मक मंत्रको न्यूंखा कहतेहैं । वह गीतमें समाख्यात होताहै ॥

३६६४ उच्चैस्तरां वा वषट्कारः । १ । २ । ३५ ॥

यज्ञकर्मणि वौषट्शब्द उच्चैस्तरां वा स्यादेकश्रुतिर्वा ॥

३६६४-यज्ञकर्ममें वौषट् शब्द विकल्प करके उच्चैस्तराम् अर्थात् उदात्ततर हो अथवा एकश्रुति हो, इस स्थलमें वषट् शब्दसे वौषट् शब्द लक्षित होताहै, क्यों कि, दोनोंका अर्थ समान है । यह दोनों शब्द देवतासम्प्रदानक दानका द्योतक हैं । प्रतिपत्तिका लाघवार्थ वौषट् शब्दका ही ग्रहण क्यों न किया ? तो महर्षि पाणिनिकी सूत्रनिर्माणकी चतुराई अतिचमत्कारक है, उन्होंने सूत्रका कहीं अक्षरलाघव और कहीं प्रतिपत्तिलाघवका आश्रयण कियाहै ॥

३६६५ विभाषा छन्दसि । १ । २ । ३६ ॥

छन्दसि विभाषा एकश्रुतिः स्यात् । व्यवस्थितविभाषेयम् । संहितायां त्रैस्वर्यम् । ब्राह्मणे एकश्रुतिर्बह्वृचानाम् । अन्येषामपि यथासंप्रदायं व्यवस्था ॥

३६६५-वेदमें विकल्प करके एकश्रुतिस्वर हो । इस सूत्रमें वाग्रहणकी अनुवृत्ति होनेसे सिद्ध होनेपर भी विभाषापदका ग्रहण "अच्छन्दसि" ऐसा पदच्छेद करके तंत्रादिके

अनुसार भाषामें भी विधानके निमित्त है, अत एव "श्वेतो धावति"। "अलम्बुसानां याता" यह वाक्य व्यर्थ हैं, ऐसा पस्पशान्तमें भाष्य है, उस स्थलमें श्वेत यह प्रातिपदिकस्वरसे अन्तोदात्त है, अलं शब्द निपातसंज्ञक होनेके कारण आद्युदात्त है और बुस शब्द प्रातिपदिकस्वरसे अन्तोदात्त है। और अलंबुस शब्द फिट्सूत्रसे अन्तोदात्त है, यदि उस स्थलमें विभाषासे एकश्रुति न हो, तो स्वरभेद होनेसे एकवाक्यकी व्यर्थता क्यों होती। यह व्यवस्थितविभाषा है इससे संहिताविषयमें त्रैस्वर्य होगा। ऋग्वेदीय ब्राह्मणविषयमें एकश्रुति होगा। औरोंके भी यथा सम्प्रदाय व्यवस्था जानना॥

३६६६ न सुब्रह्मण्यायां स्वरितस्य तूदात्तः। १। २। ३७॥

सुब्रह्मण्याख्ये निगदे यज्ञकर्मणीति विभाषा छन्दसीति च प्राप्ता एकश्रुतिर्न स्यात्स्वरितस्योदात्तस्य स्यात्। सुब्रह्मण्यो३ म्॥ असावित्यन्तः॥ *॥ तस्मिन्नेव निगदे प्रथमान्तस्यान्त उदात्तः स्यात्। गार्ग्यो यजते। ञित्त्वात्प्राप्त आद्युदात्तोऽनेन बाध्यते॥ अमुष्येत्यन्तः॥*॥ षष्ठ्यन्तस्यापि प्राग्वत्। दाक्षेः पिता यजते॥ स्यान्तस्योपोत्तमं च॥ *॥ चादन्तस्तेन द्वावुदात्तौ। गार्ग्यस्य पिता यजते॥ वा नामधेयस्य॥ *॥ स्यान्तस्य नामधेयस्य उपोत्तममुदात्तं वा स्यात्। देवदत्तस्य पिता यजते॥

३६६६–सुब्रह्मण्यनामक निगद अर्थात् ऊँचेस्वरसे पठित पादबन्धरहित (गद्यात्मक) यजुरात्मक मंत्रवाक्यमें "यज्ञकर्मणि०" और "विभाषा छन्दसि" इन दो सूत्रोंसे प्राप्त एकश्रुति नहीं हो, और स्वरितस्वरके स्थानमें उदात्तस्वर हो, यथा–"सुब्रह्मण्यो३म्"॥

"असावित्यन्तः" अर्थात् उसी निगदमें प्रथमान्तपदको अन्त उदात्त हो * यथा–"गार्ग्यो यजते" इस स्थलमें ञित्वके कारण प्राप्त आद्युदात्त इस सूत्रसे निषिद्ध होताहै।

"अमुष्येत्यन्तः" अर्थात् उसी निगदमें षष्ठ्यन्त पदको भी अन्त उदात्त हो * यथा–"दाक्षेः पिता यजते"।

"स्यान्तस्योपोत्तमञ्च" स्यशब्दान्त पदके उपोत्तम और चकारसे अन्त्य वर्ण उदात्त हो * यथा–"गार्ग्यस्य पिता यजते"॥

"वा नामधेयस्य" स्यशब्दान्त नामधेय वाचक शब्दको उपोत्तम विकल्प करके उदात्त हो * यथा–"देवदत्तस्य पिता यजते"॥

३६६७ देवब्रह्मणोरनुदात्तः। १।२।३८॥

अनयोः स्वरितस्यानुदात्तः स्यात्सुब्रह्मण्यायाम्। देवा ब्रह्माण आगच्छत॥

३६६७–सुब्रह्मण्याख्य निगदमें देव और ब्रह्मन् शब्दके स्वरितस्वरको अनुदात्त स्वर हो, यथा–"देवा ब्रह्माण आगच्छत"॥

३६६८ स्वरितात्संहितायामनुदात्तानाम्। १। २। ३९॥

स्वरितात्परेषामनुदात्तानां संहितायामेकश्रुतिः स्यात्। इमं मे गंगे यमुने सरस्वति॥

३६६८–संहिताविषयमें स्वरितस्वरके परवर्ती अनुदात्त स्वरको एकश्रुतिस्वर हो, यथा–"इमं मे गङ्गे यमुने सरस्वति"॥

३६६९ उदात्तस्वरितपरस्य सन्नतरः। १। २। ४०॥

उदात्तस्वरितौ परौ यस्मात्तस्यानुदात्ततरः स्यात्। सरस्वति शुतुद्रि। व्यचक्षयत्स्वः॥ "तस्य परमाम्रेडितम्॥ ८। १। २।"

३६६९–सन्न शब्दका नीचैः अर्थ है, उससे अनुदात्तत्व लक्षित होताहै। उदात्त और स्वरितस्वर परमें हैं जिससे ऐसे अनुदात्तस्वरके स्थानमें अनुदात्ततर स्वर हो, यथा–"सरस्वति शुतुद्रि"। "व्यचक्षयत्स्वः"। द्विरुक्तको परवर्ती रूप आम्रेडितसंज्ञक हो॥

३६७० अनुदात्तं च। ८। १। ३॥

द्विरुक्तस्य परं रूपमनुदात्तं स्यात्। दिवेदिवे॥

॥ इति साधारणस्वराः॥

३६७०–द्विरुक्तको परवर्ती रूप अनुदात्त हो, यथा–"दिवे दिवे"॥

इति साधारणस्वराः।

प्रकृति दो प्रकारकी है, धातु और प्रातिपदिक, उसमें पहले धातुस्वर कहतेहैं॥

३६७१ धातोः। ६। १। १६२॥

अन्त उदात्तः स्यात्। गोपायतं नः। असि सत्यः॥

३६७१–धातुके अन्त्य वर्णको उदात्तस्वर हो, यथा–"गोपायतं नः"। "असि सत्यः" यहां "कर्षात्वतः० ३६८०" इस पूर्वोक्त से "अन्त उदात्तः" इस पदकी अनुवृत्ति आतीहै॥

३६७२ स्वपादिहिंसामच्यनिटि। ६। १। १८८॥

स्वपादीनां हिंसेश्चानिटयजादौ लसार्वधातुके परे आदिरुदात्तो वा स्यात्। स्वपादिरुदाद्यन्तर्गणः। स्वपन्ति। श्वसन्ति। हिंसन्ति। पक्षे प्रत्ययस्वरेण मध्योदात्तता। ङित्येवेष्यते। नेह। स्वपानि। हिनसानि॥

१ एकपदमें और दो पदोंमें भी वर्त्तमानके कारण यह साधारण स्वर है, "आद्युदात्तश्च"। "ञ्नित्यादिर्नित्यम्" इत्यादि तो एक ही पदमें वर्त्तमानके कारण साधारण स्वर नहीं है।

३६७२-अनिट् अजादि लस्थानिक सार्वधातुक प्रत्यय परे रहते स्वपादि धातुओंका और हिंस् धातुका आदि वर्ण विकल्प करके उदात्त हो, स्वपादि अदाद्यन्तर्गण है, यथा-स्वपन्ति । श्वसन्ति। हिंसन्ति । विकल्प पक्षमें प्रत्यय स्वरसे मध्य वर्णको उदात्तस्वर होगा । कित् ङित् तादृश सार्वधातुक परे ही उक्त स्वर इष्ट है, इस कारण "स्वपानि, हिनसानि"यहां न हुआ, यह वृत्तिकारका मत है, भाष्यमें तो प्रायः ऐसा नहीं देखा जाताहै, इसलिये 'हिनसानि' इस स्थलमें आद्युदात्त भी पक्षमें होताहै (यदि पक्षमें आद्युदात्त स्वर इष्ट न हो तो व्यवस्थित विभाषाश्रयणसे न होगा) ॥

३६७३ अभ्यस्तानामादिः।६।१।१८९॥

अनिटचजादौ लसार्वधातुके परे अभ्यस्तानामादिरुदात्तः । ये ददति प्रिया वसु । परत्वाच्चित्स्वरमयं बाधते । दधाना इन्द्रे ॥

३६७३-अनिट् अजादि लस्थानिक सार्वधातुक विभक्ति परे रहते अभ्यस्तसंज्ञक धातुका आदिवर्ण उदात्त हो, यथा-"ये ददति प्रिया वसु" । यह परत्वके कारण चित्स्वरको अर्थात् "चितः" इस सूत्रसे विहित अन्तोदात्तस्वरको बाधा देताहै, यथा-"दधाना इन्द्रे" ॥

३६७४ अनुदात्ते च । ६ । १ । १९० ॥

अविद्यमानोदात्ते लसार्वधातुके परेऽभ्यस्तानामादिरुदात्तः।दधासि रत्नं द्रविणं च दाशुषे ॥

३६७४-जिसमें उदात्तस्वर न हो ऐसा ल सार्वधातुक विभक्ति परे रहते अभ्यस्तसंज्ञक धातुका आदिवर्ण उदात्त हो, यथा-"दधासि रत्नं द्रविणं च दाशुषे" ॥

३६७५ भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति ।६।१।१९२॥

भीप्रभृतीनामभ्यास्तानां पिति लसार्वधातुके परे प्रत्ययात्पूर्वमुदात्तं स्यात् । योऽग्निहोत्रं जुहोति। ममत्तु नः परिज्मा । माता यद्वीरं दधनत् । जागर्षि त्वम् ॥

३६७५-पित् लसार्वधातुक विभक्ति परे रहते अभ्यस्तसंज्ञक भी, ह्री, भृ, हु, मद, जन, धन, दरिद्रा और जागृ धातुके प्रत्ययका पूर्व वर्ण उदात्त हो, यथा-" योऽग्निहोत्रं जुहोति" "ममत्तु नः परिज्मा" । "माता यद्वीरं दधनत्" "जागर्षि त्वम्" ॥

३६७६ लिति । ६ । १ । १९३ ॥

प्रत्ययात्पूर्वमुदात्तम् । चिकीर्षकः ॥

३६७६-लित् प्रत्यय परे रहते प्रत्ययका पूर्ववर्ण उदात्त हो, यथा-"चिकीर्षकः" ॥

३६७७ आदिर्णमुल्यन्यतरस्याम् । ६ । १ । १९४ ॥

अभ्यस्तानामादिरुदात्तो वा णमुलि परे । लोलूयंलोलूयम् । पक्षे लित्स्वरः ॥

३६७७-णमुल् प्रत्यय परे रहते अभ्यस्तसंज्ञक धातुका आदिवर्ण विकल्प करके उदात्त हो, यथा-"लोलूयंलोलूयम्" यहां यङन्त लू धातुसे णमुल्, "नित्यवीप्सयोः" इससे द्वित्व हुआ यहां प्रथम लोलूय शब्द आद्युदात्त है । विकल्प पक्षमें लित्स्वर होगा ॥

३६७८ अचः कर्तृयकि । ६।१।१९५ ॥

उपदेशेऽजन्तानां कर्तृयकि परे आदिरुदात्तो वा । लूयते केदारः स्वयमेव ॥

३६७८-कर्तृवाच्यमें विहित यक् प्रत्यय परे रहते उपदेशावस्थामें अजन्त धातुके आदिवर्णको विकल्प करके उदात्तस्वर हो, यथा-"लूयते केदारः स्वयमेव" ॥

३६७९ चङ्यन्यतरस्याम्।६।१।२१८॥

चङन्ते धातावुपोत्तममुदात्तं वा । मा हि चीकरताम् । धात्वकार उदात्तः । पक्षान्तरे चङुदात्तः ॥

॥ इति धातुस्वराः ॥

३६७९-चङन्त धातुमें उपोत्तम अर्थात् आदिके अन्त्यका समीपवर्ण विकल्प करके उदात्त हो, यथा-"मा हि चीकरताम्" यहां धातुका अकार उदात्त हुआ । पक्षान्तरमें चङ् उदात्त होगा ॥

इति धातुस्वराः ।

३६८० कर्षाऽऽत्वतो घञोन्त उदात्तः । ६ । १ । १५९ ॥

कर्षतेर्धातोराकारवतश्च घञन्तस्यान्त उदात्तः स्यात् । कर्षः शपा निर्देशात्तुदादेराद्युदात्त एव । कर्षः । पाकः ॥

३६८०-घञ् प्रत्ययान्त कर्ष धातु और आकारवान् (आकारविशिष्ट) धातुका अन्त उदात्त हो, यथा-"कर्षः"। शप्द्वारा निर्देशके कारण तुदादिगणीय धातुका आदि उदात्त ही होगा, यथा-कर्षः । पाकः ॥

३६८१ उञ्छादीनां च।६।१।१६०॥

अन्त उदात्तः स्यात् । उञ्छादिषु युगशब्दो घञन्तोऽगुणो निपात्यते कालविशेषे रथाद्यवयवे च । वैश्वानरः कुशिकेभिर्युगेयुगे । अन्यत्र योगेयोगे तवस्तरम् । भक्षशब्दो घञन्तः। गावः सोमस्य प्रथमस्य भक्षः। उत्तमशश्वत्तमावपि । उदुत्तमं वरुण। शश्वत्तममीळते॥

३६८१-उञ्छादि (उञ्छ, म्लेच्छ, जञ्ज, जल्प, जप, वध, युग, गरो दूष्ये, वेगवेदवेष्टबन्धाः करणे, स्तुयुद्रुवश्छन्दसि, वर्त्तनि स्तोत्रे, श्वभ्रे दरः, साम्बतापौ भावगर्हायाम्, उत्तमशश्वत्तमौ, सर्वत्र भक्षमन्थभोगमन्थाः, इनका अन्त वर्ण उदात्त हो, उञ्छादिमें घञ् प्रत्ययान्त,"युग शब्द कालविशे

और रथादिके अवयव विशेषमें गुणाभाव निपातनसे सिद्ध हुआहै। यथा-"वैश्वानरः कुशिकेभिर्युगेयुगे" । अन्यत्र (अन्यार्थमें) "योगेयोगे तवस्तरम्" । भक्ष शब्द घञ्-प्रत्ययान्त है। "गावः सोमस्य प्रथमस्य भक्षः"। उत्तम और शश्वत्तम शब्द भी अन्तोदात्त हों, यह तमप्प्रत्ययान्त हैं, "उदुत्तमं वरुण"। "शश्वत्तममीळते"॥

३६८२ चतुरः शसि।६।१।१६७॥

चतुरोऽन्त उदात्तः शसि परे। चतुरः कल्पयन्तः। अचिरा इति रादेशस्य पूर्वविधौ स्थानिवत्त्वान्नेह। चतस्रः पश्य। चतेरुरन्। नित्त्वादाद्युदात्तता॥

३६८२-शस् विभक्ति परे रहते चतुर् शब्दका अन्त वर्ण उदात्त हो, यथा-"चतुरः कल्पयन्तः"। "अचि रः० २९९" इस सूत्रसे ऋकारस्थानमें रकारादेशकी पूर्वविधिमें स्थानिवत्त्वके कारण "चतस्रः पश्य" इस स्थलमें अन्तोदात्त नहीं हुआ। यहां चत् धातुके उत्तर उरन् प्रत्यय हुआ। उसके नित्वके कारण आद्युदा[illegible] ई॥

३६८३ झल्युपोत्तमम्।६।१।१८०॥

षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं स्यात्। अध्वर्युभिः पञ्चभिः। नवभिर्वाजैर्नवती च। सप्तभ्यो जायमानः। आदशभिर्विवस्वतः। उपोत्तमं किम्। आ षड्भिर्हूयमानः। वि[illegible]भिः। झलि किम्। नवानां नवतीनाम्॥

३६८३-षट्, त्रि और चतुर् शब्दके उत्तर जो झलादि विभक्ति तदन्त पद परे रहते उपोत्तम वर्ण उदात्त हो, यथा-"अध्वर्युभिः पञ्चभिः"। "नवभिर्वाजैर्नवती च"। "सप्तभ्यो जायमानः"। "आ दशभिर्विवस्वतः"। उपोत्तम न होनेपर "आ षड्भिर्हूयमानः"। "विश्वेदेवैस्त्रिभिः"। झल् परे न होनेपर "नवानां नवतीनाम्॥

३६८४ विभाषा भाषायाम्।६।१।१८१॥

उक्तविषये॥

३६८४-भाषामें षट्, त्रि, चतुर् शब्दके परे जो झलादि विभक्ति, तदन्त पद परे रहते उपोत्तमवर्ण विकल्प करके उदात्त हो-॥

३६८५ सर्वस्य सुपि।६।१।१९१॥

सुपि परे सर्वशब्दस्यादिरुदात्तः स्यात्। सर्वे नन्दन्ति यशसा॥

३६८५-सुप् प्रत्यय परे रहते सर्व शब्दका आदिवर्ण उदात्त हो, यथा-"सर्वे नन्दन्ति यशसा"॥

३६८६ ञ्नित्यादिर्नित्यम्।६।१।१९७॥

ञिदन्तस्य निदन्तस्य चादिरुदात्तः स्यात्। यस्मिन्विश्वानि पौंस्या। पुंसः कर्मणि ब्राह्मणादित्वात् ष्यञ्। सुते दधिष्व नश्चनः। चायतेरसुन्। चायेरन्ने ह्रस्वश्चेति चकारादसुनो नुडागमश्च॥

३६८६-ञिदन्त और निदन्त शब्दोंका आदि वर्ण उदात्त हो, यथा-"यस्मिन् विश्वानि पौंस्या"। पुंस् शब्दसे कर्मवाच्यमें ब्राह्मणादित्वके कारण ष्यञ् प्रत्यय होकर 'पौंस्या' पद सिद्ध हुआहै। "सुते दधिष्व नश्चनः" यह चाय् धातुके उत्तर असुन् प्रत्यय और "चायेरन्ने ह्रस्वश्च" इस सूत्रसे चकारसे असुन् प्रत्ययको नुडागम हुआहै॥

३६८७ पथिमथोः सर्वनामस्थाने।६।१।१९९॥

आदिरुदात्तः स्यात्। अयं पन्थाः। सर्वनामस्थाने किम्। ज्योतिष्मतः पथो रक्ष। उदात्तनिवृत्तिस्वरेणान्तोदात्तं पदम्॥

३६८७-सर्वनामस्थान अर्थात् सु, औ, जस्, अम्, औट् विभक्ति परे रहते पथिन् और मथिन् शब्दोंका आदि वर्ण उदात्त हो, यथा-"अयं पन्थाः"। सर्वनाम स्थानविभक्तिभिन्न विभक्ति परे होनेपर "ज्योतिष्मतः पथोरक्ष" इस स्थलमें उदात्त निवृत्ति स्वरसे अर्थात् "अनुदात्तस्य च यत्रोदात्तलोपः" इससे विभक्ति उदात्त होनेसे अन्तोदात्त यह पद हुआ॥

३६८८ अन्तश्च तवै युगपत्।६।१।२००॥

तवैप्रत्ययान्तस्याद्यन्तौ युगपदाद्युदात्तौ स्तः। हर्षसे दातवा उ॥

३६८८-तवैप्रत्ययान्त पदका आदि और अन्त वर्ण एकसाथ आद्युदात्त हो, यथा-"हर्षसे दातवा उ"। 'दातवा उ' इस स्थलमें दा धातुके उत्तर कृतार्थमें "तवैकेन्केन्यत्वनः" इस सूत्रसे तवै प्रत्यय हुआ। सूत्रमें युगपत् शब्दका ग्रहण पर्याय(क्रम)निरासार्थ है, अर्थात् तवै प्रत्ययान्त पदके आदि और अन्त वर्ण दोनों यथेच्छ आद्युदात्त हों, क्रम २ से नहीं, इस निमित्त है, अन्यथा "अनुदात्तं पदमेकवर्जम्" इस सूत्रमें 'एकवर्जम्' पदका ग्रहण करनेके कारण इस स्थलमें भी यौगपद्य नहीं होता॥

३६८९ क्षयो निवासे।६।१।२०१॥

आद्युदात्तः स्यात्। स्वे क्षये शुचिव्रत॥

३६८९-निवास अर्थ होनेपर क्षय शब्द आद्युदात्त हो, यथा-"स्वे क्षये शुचिव्रत"। क्षि धातु निवास और गतिमें है, क्षयन्ति यस्मिन्, इस विग्रहमें अधिकरण वाच्यमें "पुंसि संज्ञायां घः प्रायेण" इससे घ प्रत्यय हुआहै। निवास भिन्न अर्थ अर्थात् नाश अर्थ होनेपर आद्युदात्त नहीं होगा, यथा-"व्याधेः क्षयः" इस स्थलमें "एरच्" इस सूत्रसे क्षयार्थक क्षि धातुके उत्तर अच् प्रत्यय हुआ है, इस कारण अन्तोदात्त होगा॥

३६९० जयः करणम् । ६ । १ । २०२ ॥

करणवाची जयशब्द आद्युदात्तः स्यात् । जयत्यनेन जयोऽश्वः ॥

३६९०-करणवाचक जय शब्द आद्युदात्त हो, यथा-"जयोऽश्वः" इस स्थलमें जयति अनेन, इस विग्रहमें "पुंसि०" इस सूत्रसे जि धातुके उत्तर करणवाच्यमें घ प्रत्यय हुआ है । करणवाच्यमें न होनेपर तो "जयो ब्राह्मणानाम्" इस स्थलमें भाववाच्यमें जि धातुके उत्तर अच् प्रत्यय होनेसे आद्युदात्तत्व नहीं हुआ ॥

३६९१ वृषादीनां च । ६ । १ । २०३ ॥

आदिरुदात्तः । आकृतिगणोऽयम् । वाजेभिर्वाजिनीवती । इन्द्रं वाणीः ॥

३६९१-वृषादि शब्दोंका आदिवर्ण उदात्त हो, वृषादि आकृतिगण हैं, यथा-"वाजेभिर्वाजिनीवती" । "इन्द्रं वाणीः" । सेवनार्थक वृष धातुके उत्तर इगुपध लक्षणमें क प्रत्यय होकर वृष शब्द सिद्ध हुआहै । वज्+घञ्=वाजः यहां "कर्षात्वतः०" इस पूर्वोक्त सूत्रसे अन्तोदात्त स्वरकी प्राप्ति होनेपर वृषादि आकृति गण होनेके कारण इस सूत्रसे आद्युदात्त हुआ ॥

३६९२ संज्ञायामुपमानम् । ६ । १ । २०४ ॥

उपमानशब्दः संज्ञायामाद्युदात्तः । चञ्चेव चञ्चा । कनोऽत्र लुप् । एतदेव ज्ञापयति क्वचित्स्वरविधौ प्रत्ययलक्षणं नेति । संज्ञायां किम् । अग्निर्माणवकः । उपमानं किम् । चैत्रः ॥

३६९२-संज्ञा होनेपर उपमानवाचक शब्द आद्युदात्त हो, यथा-"चञ्चेव चञ्चा" इस स्थलमें "इवे प्रतिकृतौ २५०१" इससे विहित कन् प्रत्ययको "लुम् मनुष्ये" इससे लुप् हुआहै । प्रत्यय लक्षणसे नित्वके कारण "ञ्नित्यादि०" इसीसे सिद्ध होनेपर यह सूत्र क्यों किया ? तो इसपर कहतेहैं यही सूत्र ज्ञाप न करताहै कि, कहीं स्वरविधिमें प्रत्ययलक्षण नहीं हो । संज्ञा न होनेपर तो "अग्निर्माणवकः" । उपमान वाचक न होनेपर तो "चैत्रः" ॥

३६९३ निष्ठा च द्व्यजनात् । ६ । १ । २०५ ॥

निष्ठान्तस्य द्व्यचः संज्ञायामादिरुदात्तो न त्वाकारः । दत्तः । द्व्यच् किम् । चिन्तितः । अनात्किम् । त्रातः । संज्ञायामित्यनुवृत्तेर्नेह कृतम् । हृतम् ॥

३६९३-संज्ञा होनेपर निष्ठा प्रत्ययान्त दो अचोंसे युक्त शब्दका आदि उदात्त हो, परन्तु आदिभूत आकार उदात्त न हो, यथा-"दत्तः" । दो अच् न होनेपर तो "चिन्तितः" । आकार होनेपर तो त्रातः । "संज्ञायाम्" इस पदकी अनुवृत्तिके कारण "कृतम्" । "हृतम्" । इस स्थलमें आद्युदात्तत्व नहीं हुआ ॥

३६९४ शुष्कधृष्टौ । ६ । १ । २०६ ॥

एतावाद्युदात्तौ स्तः । असंज्ञार्थमिदम् । अतप्तं न शुष्कम् ॥

३६९४-शुष्क और धृष्ट शब्द आद्युदात्त हों, यह सूत्र असंज्ञार्थ है, संज्ञा होनेपर तो "निष्ठा च द्व्यजनात्" इस पूर्वोक्त सूत्रसे ही आद्युदात्त सिद्ध होगा । यथा-"अतप्तं न शुष्कम्" ॥

३६९५ आशितः कर्ता । ६ । १ । २०७ ॥

कर्तृवाची आशितशब्द आद्युदात्तः । कृषन्नित्फाल आशितम् ॥

३६९५-कर्तृवाचक आशित शब्द आद्युदात्त हो, यथा-"कृषन्नित्फालु आशितम्" यहां आङ् पूर्वक भोजनार्थक अश् धातुके उत्तर कर्तृवाच्यमें क्त प्रत्यय इसी सूत्रमें निपातनसे हुआ है, अन्यमतसे सूत्रस्थ "कर्ता" इस पदसे भूतपूर्वगतिके अनुसार जो अणिजन्तकालमें कर्ता णिजन्त कालमें कर्म्मीभूत हो वही विवक्षित है, वैसे होनेसे णिजन्त अश धातुके प्रयोज्यकर्त्ताको "गतिबुद्धिप्रत्यवसानार्थ० ५४०" इस सूत्रसे कर्म्म संज्ञा विहित होकर निष्ठा प्रत्ययसे 'आशितः' पद सिद्ध हुआ है ॥

३६९६ रिक्ते विभाषा । ६ । १ । २०८ ॥

रिक्तशब्दे वादिरुदात्तः। रिक्तः । संज्ञायां तु निष्ठा च द्व्यजनादिति नित्यमाद्युदात्तत्वं पूर्वविप्रतिषेधेन ॥

३६९६-रिक्त शब्दका आदिवर्ण विकल्प करके उदात्त हो, यथा-"रिक्तः" । यह सूत्र असंज्ञा विषयक है। संज्ञा होनेपर तो "निष्ठा च द्व्यजनात्" इस सूत्रसे नित्य आद्युदात्तत्व पूर्वविप्रतिषेधसे होगा ॥

३६९७ जुष्टार्पिते च च्छन्दसि । ६ । १ । २०९ ॥

आद्युदात्ते वा स्तः ॥

३६९७-जुष्ट और अर्पित यह दो शब्द वेदमें विकल्प करके आद्युदात्त हों. प्रीति और सेवनार्थक जुष् धातुके उत्तर क्त प्रत्यय और "आदितो निष्ठायाम् ३०३९" इस सूत्रसे इट् होकर जुष्टः । ऋ धातुसे णिच् क्त प्रत्यय होनेपर "अर्त्ति० २४९३" इस सूत्रसे पुक्का आगम होकर "अर्पितः" ॥

३६९८ नित्यं मन्त्रे । ६ । १ । २१० ॥

एतत्सूत्रं शक्यमकर्तुम् । जुष्टो दमूनाः । षळर आहुरर्पितमित्यादेः पूर्वेणैव सिद्धेः । छन्दसि पाठस्य व्यवस्थिततया विपरीतापादनायोगात् । अर्पिताः षष्टिर्न चलाचलास इत्यत्रान्तोदात्तदर्शनाच्च ॥

३६९८-जुष्ट और अर्पित शब्द मंत्र विषयमें नित्य आद्युदात्त हों, यह सूत्र न करनेपर भी काम होजाताहै, कारण कि, "जुष्टोदमूनाः" । "षळर आहुरर्पितम्" इत्यादि प्रयोगोंमें आद्युदात्त पूर्वसूत्रसे ही सिद्ध है यदि कहो कि पक्षमें अन्तोदात्तत्व भी प्राप्त होगा, तो इस शंकापर कहतेहैं कि,

वेदमें पाठके व्यवस्थितत्वके कारण विपरीत उच्चारण नहीं होनेसे अन्तोदात्त नहीं होगा । और सूत्रको करनेपर "अर्पितः पृष्ठिनं चलाचङ्गासः" इस स्थलमें अन्तोदात्त दृष्ट होताहै वह न होनेसे दोष भी होगा ॥

३६९९ युष्मदस्मदोर्ङसि ।६।१।२११॥

आदिरुदात्तः स्यात् । महिषस्तव नो मम ॥

३६९९-ङस् विभक्ति परे रहते युष्मद् और अस्मद् शब्दका आदिवर्ण उदात्त हो, यथा-"महिषस्तवनो मम"। युष् और अस् धातुके उत्तर मदिक् प्रत्यय होकर युष्मद् और अस्मद् शब्द सिद्ध हुएहैं ॥

३७०० ङयि च । ६ । १ । २१२॥

तुभ्यं हिन्वानः । मह्यं वातः पवताम् ॥

३७००-ङे विभक्ति परे रहते युष्मद् और अस्मद् शब्दोंका आदिवर्ण उदात्त हो, यथा-"तुभ्यं हिन्वानः"। "मह्यं वातः पवताम्"। इस स्थलमें योगविभाग यथासंख्य-निवृत्त्यर्थ है,नहीं तो युष्मद् शब्दको ङस परे, अस्मद् शब्दको ङे परे ही आद्युदात्त होता ॥

३७०१ यतोऽनावः । ६ । १ । २१३॥

यत्प्रत्ययान्तस्य द्व्यच आदिरुदात्तो नावं विना । युञ्जन्त्यस्य काम्या । कमेर्णिङन्तादचो यत् ॥

३७०१-यत्प्रत्ययान्त दो स्वरयुक्त शब्दका आदिवर्ण उदात्त हो, नौ शब्दको छोडकर यथा-"युञ्जन्त्यस्य काम्या" यहां णिङन्त कम धातुके उत्तर यत् प्रत्यय होकर 'काम्या' पद सिद्ध हुआहै यह सूत्र "तित्स्वरितम् ३७२९" इस पूर्वोक्त सूत्रका बाधक है । इस सूत्रमें "निष्ठा च द्व्यजनात्" इस सूत्रसे "द्व्यच्" पदकी अनुवृत्ति आतीहै । इस स्थलमें 'अनावः' यह 'नवति नाव्यानाम्' निषेध जनाताहै कि, स्वरविधिमें व्यञ्जन वर्ण अविद्यमानवत् हो, नहीं तो जो आदिस्थित नकार वह स्वरयोग्य नहीं है, और जो स्वरयोग्य आकार है वह आदिस्थ नहीं है, तो फिर प्रतिषेध अनर्थक ही होजाता । नौ शब्द होनेपर तो "नावा तार्य्यम्=नाव्यम्" इस स्थलमें नौ शब्दके उत्तर "नौवयोधर्म्म० १६४३"इस सूत्रसे यत् प्रत्यय हुआ । द्व्यच् न होनेपर तो चिकीर्ष्यम् । नाव्यम् और चिकीर्ष्यम् इन दोनों स्थलोंमें तित् स्वर होताहै ॥

३७०२ ईडवन्दवृशंसदुहां ण्यतः । ६ । १ । २१४ ॥

एषां ण्यदन्तानामादिरुदात्तः । ईड्यो नूतनैरुत । आजुह्वान ईड्यो वन्द्यश्च । श्रेष्ठं नो धेहि वार्यम् । उक्थमिन्द्राय शंस्यम् ॥

३७०२-ण्यत्प्रत्ययान्त ईड, वृन्द्, वृ, शंस् और दुह् धातुका आदिवर्ण उदात्त हो, यथा-"ईड्यो नूतनैरुत"। "आजुह्वान ईड्यो वन्द्यश्च"। "श्रेष्ठं नो धेहि वार्य्यम्"। "उक्थमिन्द्राय शंस्यम्"। पूर्वसूत्रमें निरनुबन्ध यत् प्रत्ययके ग्रहणके कारण ण्यत्प्रत्ययान्तमें सूत्रकी अप्रसक्ति होनेसे यह सूत्रआरंभ कियाहै । ईड धातु स्तुतिमें है । वदि धातु अभिवादन और स्तुतिमें है । वृङ् धातु संभक्तिमें है । शंस धातु स्तुतिमें है । दुह धातु प्रपूरणमें है ईड धातुके उत्तर "ऋहलोः २८७२" इस सूत्रसे ण्यत् होकर ईड्यः । वार्य्यः यहां वृङ् धातुके उत्तर ण्यत् प्रत्यय है । वृङ् धातुके उत्तर "एतिस्तुशासि० ३८५७" इस विशेष सूत्रसे क्यप् प्रत्यय तो नहीं होगा, कारण कि, क्यप्विधिमें वृञ् धातुका ही ग्रहण है, ऐसा मूलमें ही स्पष्ट है ॥

३७०३ विभाषा वेण्विन्धानयोः । ६ । १ । २१५ ॥

आदिरुदात्तो वा । इन्धानो अग्निम् ॥

३७०३-वेणु और इन्धान शब्दका आदिवर्ण विकल्प करके उदात्त हो, यथा-"इन्धानो अग्निम्"। वेणुशब्दसे "अजिवृरीभ्यो निच" इससे णु प्रत्ययको नित्त्व विधान होनेके कारण नित्य आद्युदात्त प्राप्त होनेपर और इन्धान शब्द चानश्प्रत्ययान्त होनेसे चित्त्वके कारण अन्तोदात्त प्राप्त होनेपर तन्निवारणार्थ यह सूत्र है ॥

३७०४ त्यागरागहासकुहश्वठक्रथानाम् । ६ । १ । २१६ ॥

आदिरुदात्तो वा । आद्यास्त्रयो घञन्ताः । त्रयः पचाद्यजन्ताः ॥

३७०४-त्याग, राग, हास, कुह, श्वठ और क्रथ शब्दका आदिवर्ण विकल्प करके उदात्त हो, यथा-[illegible] : । रागः । हासः । यह तीन शब्द घञ्प्रत्ययान्त और कुहः । श्वठः । क्रथः । यह तीन पचाद्यच्प्रत्ययान्त हैं ॥

३७०५ मतोः पूर्वमात्संज्ञायां स्त्रियाम् । ६ । १ । २१९ ॥

मतोः पूर्वमाकार उदात्तः स्त्रीनाम्नि । उदुम्बरावती । शरावती ॥

३७०५-स्त्रीका नाम होनेपर मतुप् प्रत्ययके पूर्ववर्त्ती आकार उदात्त हो, यथा-उदुम्बरावती । शरावती ॥

३७०६ अन्तोऽवत्याः । ६ । १ ।२२०॥

अवतीशब्दस्यान्त उदात्तः । वेत्रवती।ङीपः पित्त्वादनुदात्तत्वं प्राप्तम् ॥

३७०६-अवती शब्दका अन्तवर्ण उदात्त हो, यथा-"वेत्रवती" इस स्थलमें ङीप्का पकार इत् होनेसे अनुदात्तत्व प्राप्त था,परन्तु इस सूत्रसे वह न होकर अन्तोदात्त हुआहै ॥

३७०७ ईवत्याः । ६ । १ । २२१ ॥

ईवत्यन्तस्यापि प्राग्वत् । अहीवती।मुनीवती॥

॥ इति शब्दस्वराः ॥

३७०७-ईवती अन्तमें है जिसके ऐसे शब्दका भी पूर्ववत् अर्थात् अन्तवर्ण उदात्त हो यथा-अहीवती । मुनीवती ॥

इति शब्दस्वराः ।

अथ फिट्सूत्राणि।

१ 'फिषोऽन्त उदात्तः' ॥ प्रातिपदिकं फिट् तस्यान्त उदात्तः स्यात् । उच्चैः ॥

१-फिट् शब्दसे प्रातिपदिक समझना, यह पूर्वाचार्योंने कहाहै, उसके अन्तको उदात्तस्वर हो, यथा-उच्चैः ॥

२ 'पाटलापालङ्काम्बासागरार्थानाम्'॥एतदर्थानामन्त उदात्तः। पाटला, फलेरुहा, सुरूपा, पाकलेति पर्यायाः । लघावन्त इति प्राप्ते । अपालङ्क, व्याधिघात, आरेवत, आरग्वधेति पर्यायाः । अम्बार्थः । माता । उनर्वन्नन्तानामित्याद्युदात्तत्वे प्राप्ते । सागरः । समुद्रः ॥

२-पाटला, अपालङ्क, अम्बा और सागरार्थक शब्दका अन्तवर्ण उदात्त हो, पाटला, फलेरुहा, सुरूपा, पाकला, इतने पर्य्याय हैं । इस स्थलमें "लघावन्ते" अर्थात् अन्तमें लघु हो और दो लघुवर्ण हों ऐसे बहुस्वरविशिष्ट शब्दका गुरुवर्ण उदात्त हो, इस सूत्रसे गुरुवर्णकी उदात्तता प्राप्त थी, परन्तु इस सूत्रसे नहीं हुई । अपालङ्क, व्याधिघात, आरेवत, आरग्वध, यह पर्य्याय हैं । अम्बार्थक यथा-"माता" यहां "उनर्वन्नन्तानाम्" इस सूत्रसे आदिवर्णको उदात्त प्राप्त था परन्तु इस सूत्रसे वह नहीं हुआ । सागरार्थक यथा-सागरः । समुद्रः ॥

३ 'गेहार्थानामस्त्रियाम्' ॥ गेहम् । नब्विषयस्येति प्राप्ते । अस्त्रियां किम् । शाला । आद्युदात्तोऽयम् । इहैव पर्युदासाज्ज्ञापकात् ॥

३-गेहवाचक शब्दका अन्तवर्ण उदात्त हो, परन्तु स्त्रीलिङ्ग होनेपर न हो, यथा-"गेहम्" यहां "नब्विषयस्य" इस वक्ष्यमाण सूत्रसे आदिवर्णकी उदात्तता प्राप्त थी परन्तु इस सूत्रसे उसका प्रतिषेध हुआ । स्त्रीलिङ्ग गेहार्थक शब्द होनेपर तो "शाला" इस स्थलमें अन्तोदात्तत्व नहीं हुआ, किन्तु इसी सूत्रमें पर्युदासज्ञापक बलसे आद्युदात्तत्व हुआ ॥

४ 'गुदस्य च' ॥ अन्त उदात्तः स्यान्न तु स्त्रियाम्। गुदम्। अस्त्रियां किम् । आन्त्रेभ्यस्ते गुदाभ्यः । स्वांगशिटामदन्तानामित्यन्तरङ्गमाद्युदात्तत्वम् । ततष्टाप् ॥

४-गुद शब्दका अन्तवर्ण उदात्त हो परन्तु स्त्रीलिङ्गमें न हो, यथा-गुदम् । स्त्रीलिङ्गमें तो, "अन्त्रेभ्यस्ते गुदाभ्यः" इस स्थलमें "स्वाङ्गशिटामदन्तानाम्" इस वक्ष्यमाण सूत्रसे अन्तरंग आद्युदात्तत्व हुआ, पश्चात् स्त्रीलिंगमें टाप् प्रत्यय होकर सिद्ध हुआहै ॥

५'ध्यपूर्वस्य स्त्रीविषयस्य'॥ धकारयकारपूर्वो योऽन्त्योऽच् स उदात्तः । अन्तर्धा । स्त्रीविषयवर्णनाम्नामिति प्राप्ते । छाया । माया । जाया । यान्तस्यान्त्यात्पूर्वमित्याद्युदात्तत्वे प्राप्ते । स्त्रीति किम् । वाह्यम् । यजन्तत्वादाद्युदात्तत्वम् । विषयग्रहणं किम् । इभ्या । क्षत्रिया । यतोऽनाव इत्याद्युदात्त इभ्यशब्दः । क्षत्रियशब्दस्तु यान्तस्यान्त्यात्पूर्वमिति मध्योदात्तः ॥

५-स्त्रीविषयक नित्यस्त्रीलिंग शब्दका धकार और यकार पूर्वक जो अन्त्य अच् वह उदात्त हो, यथा-"अन्तर्धा" इस स्थलमें "स्त्रीविषयवर्णनाम्नाम्" इस वक्ष्यमाण सूत्रसे आद्युदात्त प्राप्त था, परन्तु इस सूत्रसे उसका बाध हुआ । छाया । माया । जाया । यहां "यान्तस्यान्त्यात्पूर्वम्" इस वक्ष्यमाण सूत्रसे आद्युदात्त प्राप्त था परन्तु इस सूत्रसे उसका बाध हुआ । स्त्रीविषयक न होनेपर यथा-"वाह्यम्" इस स्थलमें यजन्तत्वके कारण आद्युदात्तत्व हुआ । विषयग्रहण क्यों किया ? तो "इभ्या । क्षत्रिया" यहां अन्त्य अच् उदात्त न हो, इस स्थलमें "यतोनावः ३७०१" इस सूत्रसे इभ्य शब्द आद्युदात्त और क्षत्रिय शब्द "यान्तस्यान्त्यात्पूर्वम्" इस सूत्रसे मध्योदात्त है ॥

६ 'खान्तस्याश्मादेः'॥नखम् । उखा। सुखम् । दुःखम् । नखस्य स्वांगशिटामित्याद्युदात्तत्वे प्राप्ते । उखा नाम भाण्डविशेषः । तस्य कृत्रिमत्वात्खय्युवर्ण कृत्रिमाख्याचेदित्युवर्णस्योदात्तत्वे प्राप्ते । सुखदुःखयोर्नब्विषयस्येति प्राप्ते । अश्मादेः किम्। शिखा । मुखम् । मुखस्य स्वांगशिटामिति नब्विषयस्येति वा आद्युदात्तत्वम् । शिखायास्तु शीङः खो निद्ध्रस्वश्चेति उणादिषु निस्वोक्तेरन्तरङ्गत्वाट्टापः प्रागेव स्वांगशिटामिति वा बोध्यम् ॥

६-शकारादि और मकारादि भिन्न शब्द उसका अन्तवर्ण उदात्त हो, यथा-नखम् । उखा । सुखम् । दुःखम् । "नखम्" इस स्थानमें "स्वाङ्गशिटाम्०" इस वक्ष्यमाण सूत्रसे आद्युदात्त प्राप्त था,परन्तु यह सूत्र उसका बाधक हुआ। उखा शब्दसे भाण्डविशेष समझना, उसको कृत्रिमत्वके कारण "खय्युवर्ण कृत्रिमा चेत्" इस वक्ष्यमाण सूत्रसे उवर्णको उदात्तत्व प्राप्त होनेपर और सुख और दुःख शब्दको "नब्विषयस्य" इस वक्ष्यमाण सूत्रसे आद्युदात्त प्राप्त होनेपर उसका इस सूत्रसे बाध हुआ । श्मादि होनेपर अर्थात् शकारादि और मकारादि होनेपर तो "शिखा । मुखम्" यहां खशब्दान्तोदात्त नहीं हुआ इस स्थलमें मुख शब्दको "स्वाङ्गशिटाम्०" अथवा "नब्विषयस्य" इस सूत्रसे आद्युदात्तत्व होताहै । शिखा शब्दको तो "शीङः खो निद्ध्रस्वश्च" इससे उणादिमें निस्वोक्तिसे वा अन्तरङ्गत्वके कारण टापसे पहले "स्वाङ्गशिटाम्०" इससे आद्युदात्तत्व होताहै ॥

७ 'हिष्ठवत्सरतिशत्थान्तानाम्' ॥ एषामन्त उदात्तः स्यात । अतिशयेन बहुलो बंहिष्ठः । निस्वादाद्युदात्तत्वे प्राप्ते । बंहिष्ठैरश्वैः सुवृता रथेन यद्वंहिष्ठं नातिविधे इत्यादौ व्यत्ययादा-

द्युदात्तः । संवत्सरः। अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यत इत्याहुः । सप्ततिः । अशीतिः । लघावन्त इति प्राप्ते । चत्वारिंशत् । इहापि प्राग्वत् । अभ्यूर्ण्वाना प्रभृथस्यायोः । अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यत इत्याहुः । थाथादिसूत्रेण गतार्थमेतत् ॥

७–इष्ठ, वत्सर, ति, शत्, थ शब्दान्त पदोंके अन्तवर्ण उदात्त हों, "अतिशयेन बहुलो बंहिष्ठः" | इष्ठन् प्रत्ययका नकार इत् होनेके कारण तदन्त शब्दको आद्युदात्तत्व प्राप्त था, परन्तु इस सूत्रसे उसका बाध होकर अन्तोदात्त हुआहै। "बंहिष्ठैरश्वैः सुवृता रथेन" । "यद्वांहिष्ठं नातिविधे" इत्यादि स्थलमें तो व्यत्ययसे आद्युदात्तत्व होताहै । "संवत्सरः" इस स्थलमें अव्यय पूर्वपद प्रकृतिस्वरका बाध होताहै । "सप्ततिः । अशीतिः" । इन स्थलोंमें "लघावन्त०" इस सूत्रसे उदात्त प्राप्त था । "चत्वारिंशत्" इस स्थलमेंभी उसी सूत्रसे उदात्त प्राप्त था "अभ्यूर्ण्वाना प्रभृथस्यायोः" इस स्थलमें अव्यय पूर्वपद प्रकृतिस्वरका बाध होताहै । यह पंडितोंने कहाहै । थाथादि सूत्रसे यह सूत्र गतार्थ है ॥

८ 'दक्षिणस्य साधौ' ॥ अन्त उदात्तः स्यात् । साधुवाचित्वाभावे तु व्यवस्थायां सर्वनामतया स्वाङ्गशिटामित्याद्युदात्तः । अर्थान्तरे तु लघावन्त इति गुरुरुदात्तः । दक्षिणः सरलोदारपरच्छन्दानुवर्तिष्विति कोशः ॥

८–साधु अर्थात् प्रावीण्यार्थमें दक्षिण शब्दके अन्तवर्णको उदात्तस्वर हो, जिस स्थानमें साधु अर्थ न होकर तद्भिन्न अर्थात् व्यवस्था अर्थ है, उस स्थानमें सर्वनामता होनेसे "स्वाङ्गशिटाम्०" इस सूत्रसे आदिवर्ण उदात्त होगा । अर्थान्तर होनेपर तो "लघावन्ते०" इससे गुरुवर्ण उदात्त होगा । दक्षिण शब्दसे सरल, उदार और परच्छन्दानुवर्ती समझना ॥

९ 'स्वांगाख्यायामादिर्वा' ॥ इह दक्षिणस्याद्यन्तौ पर्यायेणोदात्तौ स्तः । दक्षिणो बाहुः । आख्याग्रहणं किम् । प्रत्यङ्मुखस्यासीनस्य वामपाणिर्दक्षिणो भवति ॥

९–स्वाङ्गाख्या होनेपर (स्वाङ्गवाचक होनेपर) दक्षिण शब्दके आदि और अन्त वर्ण पर्य्यायसे उदात्त हों, यथा– "दक्षिणो बाहुः" इस स्थलमें आदि और अन्त दोनों उदात्त है । सूत्रमें आख्या शब्दके ग्रहणका प्रयोजन क्या है ? इसपर कहतेहैं कि, "प्रत्यङ् मुखस्यासीनस्य वामपाणिर्दक्षिणो भवति" (जो पुरुष पश्चिमकी तरफको मुख करके बैठताहै, उसका बांया हाथ दक्षिणकी तरफ रहताहै) इस स्थलमें दोनों वर्ण उदात्त नहीं हों ॥

१० 'छन्दसि च' ॥ अस्वाङ्गार्थमिदम् । दक्षिणः । इह पर्यायेणाद्यन्तावुदात्तौ ॥

१०–वेदमें स्वाङ्गवाचक न होनेपर भी दक्षिण शब्दका आदि और अन्तवर्ण पर्य्याय (क्रम) से उदात्त हो, यथा– "दक्षिणः" यहां क्रमसे आदि और अन्तवर्ण उदात्त हुआहै ॥

११ 'कृष्णस्यामृगाख्या चेत्' ॥ अन्त उदात्तः । वर्णानां तणेत्याद्युदात्तत्वे प्राप्ते अन्तोदात्तो विधीयते । कृष्णानां व्रीहीणाम् । कृष्णो नोनाव वृषभः । मृगाख्यायां तु । कृष्णो राज्यै ॥

११–मृग अर्थात् पशु अर्थ न होनेपर कृष्ण शब्दका अन्तवर्ण उदात्त हो, "वर्णानां तण०" इस सूत्रसे आद्युदात्तकी प्राप्ति थी, परन्तु इस सूत्रसे वह न होकर अन्तोदात्त हुआ, यथा–"कृष्णानां व्रीहिणाम्" । "कृष्णो नोनाव वृषभः" । मृगाख्या होनेपर तो "कृष्णो राज्यै" ॥

१२ 'वा नामधेयस्य' ॥ कृष्णस्येत्येव । अयं वा कृष्णो अश्विना । कृष्ण ऋषिः ॥

१२–नामधेयवाचक कृष्ण शब्दका अन्तवर्ण उदात्त हो, यथा–"अयं वा कृष्णो अश्विना" । कृष्ण ऋषिः ॥

१३ 'शुक्लगौरयोरादिः' ॥ नित्यमुदात्तः स्यादित्येके । वेत्यनुवर्त्तत इति तु युक्तम् । सरो गौरो यथा पिबेत्यत्रान्तोदात्तदर्शनात् ॥

१३–वेदमें शुक्ल और गौर शब्दका आदिवर्ण नित्य उदात्त हो, ऐसा कोई २ कहतेहैं । (इस सूत्रमें वा शब्दकी अनुवृत्ति होती है यह युक्त नहीं है क्योंकि, "सरो गौरो यथा पिब" इस स्थलमें गौर शब्दका अन्तवर्ण उदात्त देखा जाताहै ॥

१४ 'अङ्गुष्ठोदकबकवशानां छन्दस्यन्तः' ॥ अङ्गुष्ठस्य स्वांगानामकुर्वादीनामिति द्वितीयस्योदात्तत्वे प्राप्तेऽन्तोदात्तार्थ आरम्भः । वशाग्रहणं नियमार्थं छन्दस्येवेति । तेन लोक आद्युदात्तेत्याहुः ॥

१४–वेदमें अंगुष्ठ, उदक, बक और वशा शब्दका अन्तवर्ण उदात्त हो, अंगुष्ठ शब्दका "स्वाङ्गानामकुर्वादीनाम्" इस वक्ष्यमाण सूत्रसे दूसरे वर्णकी उदात्तस्वरकी प्राप्ति होनेपर अन्तोदात्तार्थ सूत्रारम्भ कियाहै । सूत्रमें वशा शब्दग्रहण नियमार्थक है, कि, वेदमें ही वशा शब्दका अन्तवर्ण उदात्त हो इससे लोकमें आद्युदात्त ही होगा ॥

१५ 'पृष्ठस्य च' ॥ छन्दस्यन्त उदात्तः स्याद्वा भाषायाम् । पृष्ठम् ॥

१५–वेदमें पृष्ठ शब्दका अन्तवर्ण उदात्त हो और भाषामें विकल्प करके उदात्त हो, यथा–पृष्ठम् ॥

१६ 'अर्जुनस्य तृणाख्या चेत्' ॥ उनर्वन्नन्तानामित्याद्युदात्तस्यापवादः ॥

१६–तृणका नाम होनेपर अर्ज्जुन शब्दका अन्तवर्ण विकल्प करके उदात्त हो, "उनर्वन्नन्तानाम्" इस वक्ष्यमाण सूत्रसे आदि वर्ण उदात्त होता, किन्तु उसके प्रतिषेधके निमित्त भिन्न सूत्रको विधान कियाहै ॥

१७'अर्यस्य स्वाम्याख्या चेत्'॥यान्तस्यान्त्यात्पूर्वमिति यतोऽनाव इति वाद्युदात्ते प्राप्ते वचनम्॥

१७–वेदमें स्वामी अर्थ होनेपर अर्य शब्दका अन्त वर्ण उदात्त हो, स्वामीसे भिन्न अन्य अर्थमें न हो, " यान्तस्यान्त्यात्पूर्वम्"। अर्थात् यकारान्त शब्दके अन्तवर्णसे पूर्व वर्ण उदात्त हो, इस वक्ष्यमाण सूत्र और "यतोऽनाव ३७०१" अर्थात् यत्प्रत्ययान्त दो स्वरयुक्त शब्दका आदि वर्ण उदात्त हो, नौ शब्दका न हो, इस पूर्व सूत्रसे आदि वर्णको उदात्तता ही सिद्ध होती, इस कारण उसका बाधक भिन्न सूत्र कियाहै ॥

१८'आशाया अदिगाख्या चेत्' ॥ दिगाख्याव्यावृत्त्यर्थमिदम् । अत एव ज्ञापकाद्दिक्पर्यायस्याद्युदात्तता । इन्द्र आशाभ्यस्परि ॥

१८–वेदमें यदि दिक् अर्थ न हो तो आशा शब्दका अंत वर्ण उदात्त हो, दिग्वाचक शब्दकी व्यावृत्तिके निमित्त यह सूत्र कियाहै । अत एव दिक्पर्य्यायवाचक जो सम्पूर्ण (आशा, काष्ठा,इत्यादि) शब्द उनका आदि वर्ण उदात्त होगा । यथा– "इन्द्र आशाभ्यस्परि" ॥

१९ 'नक्षत्राणामाब्विषयाणाम्'॥अन्त उदात्तः स्यात् । आश्लेषाऽनुराधादीनां लघावन्त इति प्राप्ते ज्येष्ठाश्रविष्ठाधनिष्ठानामिष्ठन्नन्तत्वेनाद्युदात्ते प्राप्ते वचनम् ॥

१९–आब्विषयीभूत अर्थात् आवन्त नक्षत्रवाचक शब्दका अन्त वर्ण उदात्त हो,आश्लेषा और अनुराधा इत्यादि आकारान्त नक्षत्रवाचक शब्दका "लघावन्ते०" अर्थात् लघु वर्ण अन्तमें रहते और दो लघु रहते बहच्क शब्दका गुरु वर्ण उदात्त और ज्येष्ठा, श्रविष्ठा, धनिष्ठा शब्द इष्ठन् प्रत्ययान्त होनेसे उनके आदि वर्णकी उदात्तता प्राप्त हुई थी, किन्तु उसके बाधके निमित्त यह सूत्र कियाहै । (ज्येष्ठः इत्यादि "प्रशस्यस्य श्रः २००९" "ज्य च २०११" इससे प्रशस्य शब्दसे इष्ठन् प्रत्यय परे हुए सन्ते ज्या आदेश । श्रविष्ठा श्रवणं श्रवः सोऽस्त्यस्याः सा श्रवती।धनं विद्यते अस्याः सा धनवती, आतिशयिता श्रवती श्रविष्ठा, धनिष्ठा, इष्ठन् होनेपर "विन्मतोर्लुक्" इससे मतुप्का लोप)॥

२० 'न कुपूर्वस्य कृत्तिकाख्या चेत्' ॥ अन्त उदात्तो न । कृत्तिका नक्षत्रम् । केचित्तु कुपूर्वो य आप् तद्विषयाणामिति व्याख्याय आर्यिका बहुलिका इत्यत्राप्यन्तोदात्तो नेत्याहुः ॥

२०–कृत्तिका अर्थ होनेपर कवर्ग पूर्वक आकारान्त नक्षत्र वाचक शब्दोंका अन्त वर्ण उदात्त न हो, यथा–"कृत्तिका नक्षत्रम्" कोई २ कुपूर्वक जो आप् तदन्त शब्दका अन्त वर्ण उदात्त न हो ऐसा कहते हैं, यथा, "आर्यिका । बहुलिका"॥

२१ 'घृतादीनां च' ॥ अन्त उदात्तः। घृतं मिमिक्षे । आकृतिगणोऽयम् ॥

२१–घृतादि शब्दका अन्त वर्ण उदात्त हो, यथा, "घृतं मिमिक्षे" । यह आकृतिगण है ॥

२२ 'ज्येष्ठकनिष्ठयोर्वयसि' ॥ अन्त उदात्त स्यात् । ज्येष्ठ आह चमसा । कनिष्ठ आह चतुरः । वयसि किम् । ज्येष्ठः श्रेष्ठः । कनिष्ठोऽल्पिकः । इह नित्त्वादाद्युदात्त एव ॥

२२–वयस् अर्थ होनेपर ज्येष्ठ और कनिष्ठ शब्दका अन्त वर्ण उदात्त हो, यथा–"ज्येष्ठ आह चमसा"। " कनिष्ठ आह चतुरः" । वयस् अर्थ न होनेपर ज्येष्ठः–श्रेष्ठः । कनिष्ठः–अल्पिकः । इस स्थलमें नित्त्वके कारण अर्थात् इष्ठन् प्रत्यय होनेके कारण आद्युदात्त ही हुआ । ज्येष्ठः"वृद्धस्य च२०१३" इससे इष्ठन् परे होनेसे ज्या आदेश हुआ,कनिष्ठः "युवाल्पयोः कनन्यतरस्याम् " इससे युवन् शब्दको कन् आदेश हुआ ॥

२३'बिल्वतिष्ययोः स्वरितो वा'॥ अनयोरन्तः स्वरितो वा स्यात् । पक्षे उदात्तः ॥

॥ इति फिट्सूत्रेषु प्रथमः पादः ॥

२३–बिल्व और तिष्य शब्दका अन्त वर्ण विकल्प करके स्वरित हो, विकल्प पक्षमें उदात्त हो ॥

इति फिट्सूत्रेषु प्रथमः पादः ।

२४'अथादिः प्राक् शकटेः'॥अधिकारोऽयम् । शकटिशकट्योरिति यावत् ॥

२४–इसके पश्चात् " शकटिशकट्योः " । इस वक्ष्यमाण सूत्रके पूर्व सूत्र पर्यन्त ' आदिः' इस पदको अधिकार समझना चाहिये ॥

२५'ह्रस्वान्तस्य स्त्रीविषयस्य'॥ आदिरुदात्तः स्यात् । बलिः । तनुः ॥

२५–स्त्रीलिङ्गमें ह्रस्वान्त शब्दका आदि वर्ण उदात्त हो, यथा–बलिः । तनुः ॥

२६ 'नब्विषयस्यानिसन्तस्य'॥वने न वा यः। इसन्तस्य तु सर्पिः । नप् नपुंसकम् ॥

२६–नब्विषयीभूत अर्थात् नपुंसक लिङ्गमें इस् भागान्त शब्दभिन्न अन्य शब्दका आदि वर्ण उदात्त हो, यथा–'वने न वा यः ' इस् भागान्त शब्द यथा–सर्पिः । नप् शब्दसे नपुंसक समझना, सर्पिः='अर्चिशुचि० ' इत्यादिसे इसि हुआ ॥

२७ 'तृणधान्यानां च द्व्यषाम्'॥द्व्यचामित्यर्थः। कुशाः।काशाः।माषाः।तिलाः।बह्वचां तु गोधूमाः॥

२७–दो स्वरयुक्त तृण वाचक और धान्यवाचक शब्दोंका आदि वर्ण उदात्त हो, यथा–कुशाः । काशाः । माषाः । तिलाः । बहु अच् युक्त होनेपर यथा–गोधूमाः ॥

२८ 'त्रः संख्यायाः' ॥ पञ्च । चत्वारः ॥

२८–नकारान्त और रकारान्त संख्यावाचक शब्दोंका आदि वर्ण उदात्त हो, यथा–पञ्च । चत्वारः ॥

२९ 'स्वांगशिटामदन्तानाम्' ॥ शिट् सर्वनाम। कर्णाभ्यां चुबुकादधि। ओष्ठाविव मधु। विश्वो विहायाः ॥

२९–वेदमें आकारान्त स्वाङ्ग वाचक सर्वनाम शब्दोंका आदि वर्ण उदात्त हो, यथा–कर्णाभ्यां चुबुका दधि। ओष्ठा, विव मधु। विश्वो विहायाः ॥

३० 'प्राणिनां कुपूर्वम्' ॥ कवर्गात्पूर्व आदिरुदात्तः। काकः। वृकः। शुकेषु मे। प्राणिनां किम्। क्षीरं सर्पिर्मधूदकम् ॥

३०–कवर्गके पूर्ववर्ती प्राणिवाचक शब्दका आदि वर्ण उदात्त हो, यथा–काकः। वृकः। शुकेषु मे। प्राणिवाचक न होनेपर यथा–क्षीरं सर्पिर्मधूदकम् ॥

३१ 'खय्युवर्णं कृत्रिमाख्या चेत्' ॥ खयि परे उवर्णमुदात्तं स्यात्। कन्दुकः ॥

३१–खय् संज्ञक वर्ण परे रहते और कृत्रिम द्रव्यका नाम होनेपर पूर्ववर्ती उवर्ण उदात्त हो, यथा–कन्दुकः ॥

३२ 'उनर्वन्नन्तानाम्' ॥ उन। वरुणं वो रिशादसम्। ऋ। स्वसारं त्वा कृणवै। वन्। पीवानं मेषम् ॥

३२–उन, ऋ और वन् अन्तमें हो ऐसा पदका आदि वर्ण उदात्त हो, उन यथा–वरुणं वो रिशादसम्। ऋ–स्वसारं त्वा कृणवै। वन्–पीवानं मेषम् ॥

३३ 'वर्णानां तणतिनितान्तानाम्' ॥ आदिरुदात्तः। एतः। हरिणः। शितिः। पृश्निः। हरित् ॥

३३–त, ण, ति, नि, और तकारान्त जो वर्णवाचक शब्द उनका आदि वर्ण उदात्त हो, यथा–एतः। हरिणः। शितिः। पृश्निः। हरित् ॥

३४ 'ह्रस्वान्तस्य ह्रस्वमनृत्ताच्छील्ये' ॥ ऋद्वर्ज्यं ह्रस्वान्तस्यादिभूतं ह्रस्वमुदात्तं स्यात्। मुनिः ॥

३४–ताच्छील्य अर्थ होनेपर ऋकारको छोडकर ह्रस्वान्तका आदिभूत ह्रस्व उदात्त हो, यथा–मुनिः ॥

३५ 'अक्षस्यादेवनस्य' ॥ आदिरुदात्तः। तस्य नाक्षः। देवने तु। अक्षैर्मा दीव्यः ॥

३५–देवन अर्थात् क्रीडा अर्थ न होनेपर अक्ष शब्दका आदि वर्ण उदात्त हो, यथा–तस्य नाक्षः। देवन अर्थ होनेपर–अक्षैर्मा दीव्यः। यहां आदि वर्ण उदात्त न हुआ ॥

३६ 'अर्धस्यासमद्योतने' ॥ अर्धो ग्रामस्य। समेंऽशके तु अर्धं पिप्पल्याः ॥

३६–असमान अर्थ होनेपर अर्द्ध शब्दका आदिवर्ण उदात्त हो, यथा–"अर्द्धो ग्रामस्य"। किन्तु समानांश होनेपर "अर्द्धं पिप्पल्याः" इस प्रकार होगा ॥

३७ 'पीतद्र्वर्थानाम्' ॥ आदिरुदात्तः। पीतद्रुः सरलः ॥

३७–पीतद्रु अर्थात् वृक्षवाचक शब्दका आदि वर्ण उदात्त हो, यथा–पीतद्रुः सरलः ॥

३८ 'ग्रामादीनां च' ॥ ग्रामः। सोमः। यामः ॥

३८–ग्रामादि शब्दोंका आदि वर्ण उदात्त हो, यथा–ग्रामः। सोमः। यामः ॥

३९ 'लुबन्तस्योपमेयनामधेयस्य' ॥ चञ्चेव चञ्चा। स्फिगन्तस्येति पाठान्तरम्। स्फिगिति लुपः प्राचां संज्ञा ॥

३९–उपमेय जो नामवाचक लुबन्त शब्द उसका आदि वर्ण उदात्त हो, यथा–चञ्चेव चञ्चा। "स्फिगन्तस्य"। ऐसा पाठान्तर भी है। स्फिक् यह लुप्की प्राचीन सम्मत संज्ञा है ॥

४० 'न वृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम्' ॥ एषामुपमेयनाम्नामादिरुदात्तो न। ताल इव तालः। मेरुरिव मेरुः। व्याघ्रः। सिंहः। महिषः ॥

४०–वृक्ष, पर्वत, व्याघ्र, सिंह और महिष ये जो उपमेयवाचक शब्द हैं इनका आदिवर्ण उदात्त न हो, यथा–ताल इव तालः। मेरुरिव मेरुः। व्याघ्रः। सिंहः। महिषः ॥

४१ 'राजविशेषस्य यमन्वा चेत्' ॥ यमन्वा वृद्धः। आङ्ग उदाहरणम्। अङ्गाः प्रत्युदाहरणम् ॥

४१–यमन्वा अर्थात् वृद्ध अर्थ होनेपर राजविशेषवाचक शब्दका आदि वर्ण उदात्त हो, उदाहरण यथा–आंगः। प्रत्युदाहरण–अंगाः ॥

४२ 'लघावन्ते द्वयोश्च बह्वषो गुरुः' ॥ अन्ते लघौ द्वयोश्च लघ्वोः सतोर्बह्वचकस्य गुरुरुदात्तः। कल्याणः। कोलाहलः ॥

४२–लघु वर्ण अन्तमें रहते और दो लघु रहते बहु अच्विशिष्ट शब्दका गुरु वर्ण उदात्त हो, यथा–कल्याणः। कोलाहलः ॥

४३ 'स्त्रीविषयवर्णाक्षुपूर्वाणाम्' ॥ एषां त्रयाणामाद्युदात्तः। स्त्रीविषयः। मल्लिका। वर्णः। श्येनी। हरिणी। अक्षुशब्दात्पूर्वोऽस्त्येषां ते अक्षुपूर्वाः। तरक्षुः ॥

४३–स्त्रीवाचक, वर्णवाचक और विद्यमानपूर्वक अक्षु शब्दका आदि वर्ण उदात्त हो, स्त्रीवाचक यथा–मल्लिका। वर्ण यथा–श्येनी। हरिणी। जिन शब्दोंके परे अक्षु शब्द रहे वह अक्षुपूर्व हैं। अक्षुपूर्व यथा–तरक्षुः ॥

४४ 'शकुनीनां च लघु पूर्वम्' ॥ पूर्वं लघु उदात्तं स्यात्। कुक्कुटः। तित्तिरिः। खंजरीटः ॥

४४–शकुनी अर्थात् पक्षिवाचक शब्दका आदि लघु वर्ण उदात्त हो, यथा–कुक्कुटः। तित्तिरिः। खञ्जरीटः ॥

४५ 'नर्तुप्राण्याख्यायाम्'॥ यथालक्षणं प्राप्तमुदात्तत्वं न । वसन्तः । कृकलासः ॥

४५-ऋतु और प्राणीवाचक शब्दका आदि लघु वर्ण उदात्त न हो, यथा-वसन्तः । कृकलासः ॥

४६ 'धान्यानां च वृद्धक्षान्तानाम्' ॥ आदिरुदात्तः । कान्तानाम् । श्यामाकाः । षान्तानाम् । माषाः ॥

४६-वृद्धसंज्ञक कान्त और षकारान्त धान्यवाचक शब्दका आदि उदात्त हो । कान्त यथा-श्यामाकाः । षान्त यथा-राजमाषाः ॥

४७ 'जनपदशब्दानामषान्तानाम्' ॥ आदिरुदात्तः । केकयः ॥

४७-जनपदवाचक अजन्त शब्दका आदि वर्ण उदात्त हो, यथा-केकयः ॥

४८ 'हयादीनामसंयुक्तलान्तानामन्तःपूर्वं वा'॥ हयिति हल्संज्ञा । पललम् । शललम् । हयादीनां किम् । एकलः । असंयुक्तेति किम् । मल्लः॥

४८-हयादि अर्थात् हलादि असंयुक्त लकारान्त शब्दका अन्त्य और आदि दोनों वर्ण विकल्प करके उदात्त हों, यथा-पललम् । शललम् । हलादि न होनेपर । एकलः । असंयुक्त न होनेपर मल्लः ॥

४९ 'इगन्तानां च द्व्यषाम्'॥ आदिरुदात्तः। कृषिः।

॥ इति फिट्सूत्रेषु द्वितीयः पादः ॥

४९-इ, उ, ऋ और ऌकार अन्तमें हो ऐसा दो स्वरयुक्त शब्दका आदि वर्ण उदात्त हो, यथा-कृषिः ॥

इति फिट्सूत्रेषु द्वितीयपादः ।

५० 'अथ द्वितीयं प्रागीषात्' ॥ ईषान्तस्य हलादेरित्यतः प्राक् द्वितीयाधिकारः ॥

५०-"ईषान्तस्य हलादेः" इस वक्ष्यमाण सूत्रके पूर्वपर्यन्त द्वितीयाधिकार जानना चाहिये ॥

५१ 'त्र्यचां प्राङ्मकरात्' ॥ मकरवरूढेत्यतः प्राक् त्र्यचामित्यधिकारः ॥

५१-"मकरवरूढ०" इत्यादि वक्ष्यमाण सूत्रके पूर्वपर्यन्त 'त्र्यचाम्' इस पदका अधिकार जानना ॥

५२ 'स्वाङ्गानामकुर्वादीनाम्' ॥ कवर्गरेफवकारादीनि वर्जयित्वा त्र्यचां स्वाङ्गानां द्वितीयमुदात्तम् । ललाटम् । कुर्वादीनां तु । कपोलः । रसना । वदनम् ॥

५२-कवर्ग, रेफ और वकारादि वर्जन करके तीन स्वरयुक्त स्वाङ्गवाचक शब्दका दूसरा वर्ण उदात्त हो, यथा-ललाटम् । कवर्गादि होनेपर यथा-कपोलः । रसना । वदनम् ॥

५३ 'मादीनां च' ॥ मलयः । मकरः ॥

५३-मकार आदिमें है ऐसे तीन स्वरयुक्त शब्दका द्वितीय वर्ण उदात्त हो, यथा-मलयः । मकरः ॥

५४ 'शादीनां शाकानाम्' ॥ शीतन्या । शतपुष्पा ॥

५४-शाकवाचक तालव्य शकार आदिमें है ऐसे तीन स्वरयुक्त शब्दका द्वितीय वर्ण उदात्त हो, यथा-शीतन्या । शतपुष्पा ॥

५५ 'पान्तानां गुर्वादीनाम्' ॥ पादपः । आतपः । लघ्वादीनां तु । अनूपम् । द्व्यचां तु । नीपम् ॥

५५-जिन शब्दोंके अन्तमें पकार और आदिमें गुरुवर्ण रहै ऐसे जो तीन स्वरयुक्त शब्द उसका द्वितीय वर्ण उदात्त हो, यथा-पादपः । आतपः । आदिमें लघु वर्ण रहते नहीं होगा । यथा-अनूपम् । पूर्ववत् दो स्वरयुक्त शब्दका अन्त वर्ण उदात्त हो, यथा-नीपम् ॥

५६ 'युतान्यण्यन्तानाम्' ॥ युत । अयुतम् । अनि । धमनिः । अणि । विपणिः ॥

५६-युत, अनि और अणि यह भाग अन्तमें हैं ऐसे तीन स्वरयुक्त शब्दका दूसरा वर्ण उदात्त हो, यथा-युत-अयुतम् । अनि-धमनिः । अणि-विपणिः ॥

५७ 'मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा' ॥ एषामादिर्द्वितीयो वोदात्तः । मकरः । वरूढ इत्यादि ॥

५७-मकर, वरूढ, पारेवत, वितस्त, इक्षु, आर्जि, द्राक्षा, कला, उमा, काष्ठा, पेष्ठा और काशीना शब्दका आदि वर्ण और द्वितीय वर्ण उदात्त हो, यथा-मकरः । वरूढः । इत्यादि ॥

५८ 'छन्दसि च' ॥ अमकराद्यर्थ आरम्भः । लक्ष्यानुसारादादिर्द्वितीयश्चोदात्तो ज्ञेयः ॥

५८-वेदमें मकारादि शब्द और अन्य शब्दोंका आदि वर्ण और द्वितीय वर्ण उदात्त हों ॥

५९ 'कर्दमादीनां च' ॥ आदिर्द्वितीयो वोदात्तः ॥

५९-कर्दमा, कुलटा, उदक, गान्धारि इत्यादि शब्दोंका आदि अथवा द्वितीय वर्ण उदात्त हो, यथा-कर्दमा इत्यादि ॥

६० 'सुगन्धितेजनस्य ते वा' ॥ आदिर्द्वितीयस्तेशब्दश्चेति त्रयः पर्यायेणोदात्ताः । सुगन्धितेजनाः ॥

६०-सुगन्धितेजन शब्दका आदि वर्ण द्वितीय वर्ण और ते शब्द यह तीन वर्ण पर्य्याय (क्रम) से उदात्त हों, यथा-सुगन्धितेजनाः ॥

६१ 'नपः फलान्तानाम्' ॥ आदिर्द्वितीयं वोदात्तम् । राजादनफलम् ॥

६१-फल शब्द अन्तमें रहते नप् अर्थात् नपुंसक (क्लीबलिङ्ग) शब्दका आदि और द्वितीय वर्ण उदात्त हो, यथा-राजादनफलम् । नपुंसक न होनेपर दाशीफलो वृक्षः ॥

६२ 'यान्तस्यान्त्यात्पूर्वम्' ॥ कुलायः ॥

६२–यकारान्त शब्दके अन्त वर्णसे पूर्व वर्ण उदात्त हो, यथा–कुलायः ॥

६३ 'थान्तस्य च नालघुनी' ॥ नाशब्दो लघ च उदात्ते स्तः । सनाथा सभा ॥

६३–थकारान्त शब्दके "ना" और लघुसंज्ञक शब्द उदात्त हों, यथा–सनाथा सभा। कोई २ "आन्तस्य च नालघुनी" । ऐसा सूत्रपाठ करके "आकारान्तके नाशब्दके जो अन्त्य वर्णसे पूर्व लघुसंज्ञक वर्ण वह उदात्त हो," इस प्रकार व्याख्या करते हैं और नना, दिवा, मुधा, इस प्रकार उदाहरण देते हैं ॥

६४ 'शिशुमारोदुम्बरबलीवर्दोष्ट्रारपुरूरवसां च' ॥ अन्त्यात्पूर्वमुदात्तं द्वितीयं वा ॥

६४–शिशुमार, उदुम्बर, बलीवर्द, उष्ट्रार (उष्ट्रार) और पुरूरवस् शब्दके अन्त्य वर्णसे पूर्व वर्ण और द्वितीय वर्ण विकल्प करके उदात्त हो ॥

६५ 'सांकाश्यकाम्पिल्यनासिक्यदार्वाघाटानाम्' ॥ द्वितीयमुदात्तं वा ॥

६५–साङ्काश्य, काम्पिल्य, नासिक्य और दार्वाघाट शब्दका द्वितीय वर्ण विकल्प करके उदात्त हो ॥

६६ 'ईषान्तस्य हयादेरादिर्वा' ॥ हलीषा । लाङ्गलीषा ॥

६६–ईषाशब्दान्त हलादि शब्दका आदि वर्ण विकल्प करके उदात्त हो, यथा–हलीषा, लांगलीषा ॥

६७ 'उशीरदाशेरकपालपलालशैवालश्यामाकशारिरशरावहृदयहिरण्यारण्यापत्यदेवराणाम्' ॥ एषामादिरुदात्तः स्यात् ॥

६७–उशीर, दाशेर, कपाल, पलाल, शैवाल, श्यामाक, शारिर, शराव, हृदय, हिरण्य, अरण्य, अपत्य और देवर शब्दका आदि वर्ण उदात्त हो ॥

६८ 'महिष्याषाढयोर्जायेष्टकाख्या चेत्' ॥ आदिरुदात्तः । महिषी जाया । आषाढा उपदधाति ॥

॥ इति फिट्सूत्रेषु तृतीयः पादः ॥

६८–जाया अर्थमें महिषी शब्द और इष्टकार्थमें आषाढा शब्दका आदि वर्ण उदात्त हो, यथा–महिषी जाया । आषाढा उपदधाति ॥

इति फिट्सूत्रेषु तृतीयपादः ।

६९ 'शकटिशकट्योरक्षरमक्षरं पर्यायेण' ॥ उदात्तम् । शकटिः । शकटी ॥

६९–शकटि और शकटी शब्दके प्रत्येक अक्षरको पर्याय (क्रम) से उदात्त स्वर हो, यथा–शकटिः । शकटी ॥

७० 'गोष्ठजस्य ब्राह्मणनामधेयस्य' ॥ अक्षरमक्षरं पर्यायेणोदात्तम् । गोष्ठजो ब्राह्मणः । अन्यत्र गोष्ठजः पशुः । कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः ॥

७०–ब्राह्मणका नाम होनेपर गोष्ठज शब्दके प्रत्येक अक्षरको पर्याय (क्रम) से उदात्त स्वर हो, यथा–गोष्ठजो ब्राह्मणः । ब्राह्मणका नाम न होनेपर उदात्त स्वर नहीं होगा, यथा–गोष्ठजः पशुः । इस स्थलमें कृदुत्तरपदप्रकृतिस्वरसे अन्तमें उदात्त होगा ॥

७१ 'पारावतस्योपोत्तमवर्जम्' ॥ शेषं क्रमेणोदात्तम् । पारावतः ॥

७१–पारावत शब्दका उपोत्तम (अन्तसमीप) वर्ण भिन्न अन्य वर्णोंको क्रमसे उदात्त स्वर हो, यथा–पारावतः ॥

७२ 'धूम्रजानुमुञ्जकेशकालवालस्थालीपाकानामधूजलस्थानाम्' ॥ एषां चतुर्णां धूप्रभृतींश्चतुरो वर्जयित्वा शिष्टानि क्रमेणोदात्तानि । धूम्रजानुः । मुञ्जकेशः । कालवालः । स्थालीपाकः ॥

७२–धूम्रजानु, मुञ्जकेश, कालवाल और स्थालीपाक इन चार शब्दोंके क्रमसे धू, ज, ल और स्थ इन चार वर्णको छोड़कर अवशिष्ट वर्णोंको क्रमसे उदात्त स्वर हो, यथा–धूम्रजानुः । मुञ्जकेशः । कालवालः । स्थालीपाकः ॥

७३ 'कपिकेशहरिकेशयोश्छन्दसि' ॥ कपिकेशः । हरिकेशः ॥

७३––वेदमें कपिकेश और हरिकेश इन दो शब्दोंके क्रमसे सम्पूर्ण अक्षरोंको उदात्त स्वर हो, यथा–कपिकेशः । हरिकेशः ॥

७४ 'न्यङ्स्वरौ स्वरितौ' ॥ स्पष्टम् । न्यङ्ङुत्तानः । व्यचक्षयत्स्वः ॥

७४–न्यङ् और स्वर शब्दके सम्पूर्ण वर्णोंको स्वरित स्वर हो, यथा–न्यङ्ङुत्तानः । व्यचक्षयत्स्वः ॥

७५ 'न्यर्बुदव्यल्कशयोरादिः' ॥ स्वरितः स्यात् ॥

७५–न्यर्बुद और व्यल्कश शब्दके आदि वर्णको स्वरित स्वर हो ॥

७६ 'तिल्यशिक्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः' ॥ स्वरितः स्यात् । तिलानां भवनं क्षेत्रं तिल्यम् । यतोऽनाव इति प्राप्ते ॥

७६–तिल्य, शिक्य, काश्मर्य्य, धान्य, कन्या, राजन्य और मनुष्य शब्दके अन्त्य वर्णको स्वरित स्वर हो, यथा–"तिल्यम्" जिस खेतमें तिल उत्पन्न होतेहैं उसको तिल्य कहतेहैं । वैश्वानर्य्यां शिक्यमादत्ते । प्रभिन्नाय मत्यमन्यास्यति । वज्रः काश्मर्य्योंवज्रेण । "यतोऽनावः ३७०१" इस सूत्रसे आद्युदात्तकी प्राप्ति थी किन्तु इस सूत्रसे उसका निषेध होगया ॥

७७ 'बिल्वभक्ष्यवीर्याणि छन्दसि' ॥ अन्तस्वरितानि । ततो बिल्व उदतिष्ठत् ॥

७७–वेदमें बिल्व, भक्ष्य और वीर्य्य शब्दके अन्त वर्णको स्वरित स्वर हो, यथा–ततो बिल्व उदतिष्ठत् ॥

७८ 'त्वत्त्वसमसिमेत्यनुच्चानि' ॥ स्तरीरु त्वत् । उत त्वः पश्यन् । नभन्तामन्यके समे । सिमस्मै ॥

७८-त्वत्, त्व, सम और सिम शब्दके अन्त वर्णको अनुदात्त स्वर हो, यथा-स्तरी रुत्वत् । उत त्वः पश्यन् । नभन्तामन्युके समे । सिमस्मै ॥

७९ 'सिमस्याथर्वणेऽन्त उदात्तः' ॥ अथर्वण इति प्रायिकम् । तत्र दृष्टस्येत्येवं परं वा । तेन वासस्तनुते सिमस्मै इत्यृग्वेदेऽपि भवत्येव ॥

७९-अथर्व वेदमें सिम शब्दके अन्त वर्णको उदात्त स्वर हो, अथर्वणका ग्रहण प्रायिक है अन्यमें भी हो, यथा-वासस्तनुते सिमस्मै । ऋग्वेदमें भी इसी प्रकार अनुदात्त स्वर हो ॥

८० 'निपाता आद्युदात्ताः' ॥ स्वाहा ॥

८०-निपातसंज्ञक स्वाहा और स्वधा आदि शब्दोंके आदि वर्णको उदात्त स्वर हो, यथा-स्वाहा ॥

८१ 'उपसर्गाश्चाभिवर्जम्' ॥

८१-अभिभिन्न अन्य समस्त उपसर्गोंके आदि वर्णको उदात्त स्वर हो ॥

८२ 'एवादीनामन्तः' ॥ एवमादीनामिति पाठान्तरम् । एव । एवम् । नूनम् । सह । ते मित्र सूरिभिः सह । षष्ठस्य तृतीये सहस्य स इति प्रकरणे सहशब्द आद्युदात्त इति तु प्राञ्चः, तच्चिन्त्यम् ॥

८२-एव (पाठन्तरमें एवम्) आदि शब्दोंके अन्त्य वर्णको उदात्त स्वर हो, यथा-एव । एवम् । नूनम् । सह । सहते मित्र सूरिभिः । " षष्ठस्य तृतीये " इस स्थलमें " सहस्य सः १००९ " इस प्रकरणमें जो सह शब्द है वह आद्युदात्त है, यह प्राचीनोंका मत है । किन्तु वह विवेच्य है । कहीं [सहते पुत्र सूरिभिः] पाठ है ॥

८३ 'वाचादीनामुभावुदात्तौ' ॥ उभौ ग्रहणमनुदात्तं पदमेकवर्जमित्यस्य बाधाय ॥

८३-वाचाआदि शब्दोंके दोनों वर्ण उदात्त हों । दोनों शब्दोंका ग्रहण करनेसे "अनुदात्तं पदमेकवर्ज्यम् " । इस सूत्रके द्वारा विहित अनुदात्त स्वरका बाध होताहै ॥

८४ 'चादयोऽनुदात्ताः' ॥ स्पष्टम् ॥

८४-च वा इत्यादि शब्दोंका अनुदात्त स्वर हो ॥

८५ 'यथेति पादान्ते' ॥ तन्नेमिमृभवो यथा । पादान्ते किम् । यथानो अदितिः करत् ॥

८५-पादके अन्तमें रहते " यथा " शब्दको अनुदात्त स्वर हो, तन्नेमिमृभवो यथा । पादान्तमें न होनेपर उदात्त होगा । यथा-यथा नो अदितिः करत् ॥

८६ 'प्रकारादिद्विरुक्तौ' ॥परस्यान्त उदात्तः॥ पटुपटुः ॥

८६-"प्रकारे गुणवचनस्य २१४७ " इत्यादि सूत्रसे द्वित्व होनेपर परवर्त्ती भागके अन्त वर्णको उदात्त स्वर हो, यथा, पटुपटुः ॥

८७ 'शेषं सर्वमनुदात्तम्' ॥ शेषं नित्यादिद्विरुक्तस्य परमित्यर्थः । प्रप्रायम् । दिवेदिवे ॥

॥ इति शान्तनवाचार्यप्रणीतेषु फिट्सूत्रेषु तुरीयः पादः ॥

८७-नित्यादि अर्थमें द्वित्व होनेपर परके समस्त वर्णको अनुदात्त स्वर हो, यथा-प्रप्रायम् । दिवेदिवे ॥

॥ इति फिट्सूत्रेषु तुरीयपादः ॥

३७०८ आद्युदात्तश्च । ३ । १ । ३ ॥

प्रत्ययः आद्युदात्तः स्यात् । अग्निः कर्तव्यम् ॥

३७०८-प्रत्ययके आदि वर्णको उदात्त स्वर हो, यथा-अग्निः कर्तव्यम् । अङ्गके नकारका लोप और नि प्रत्यय=अग्निः । कृ-तव्य=कर्त्तव्यम् । इत्यादि ॥

३७०९ अनुदात्तौ सुप्पितौ । ३।१।४ ॥

पूर्वस्यापवादः । यज्ञस्य । न यो युच्छति । शप्तिपोरनुदात्तत्वे स्वरितप्रचयौ ॥

३७०९-सुप् अर्थात् सु औ जस् इत्यादि विभक्ति और पित्संज्ञक प्रत्ययके आदि वर्णको अनुदात्त स्वर हो, यह सूत्र पूर्व सूत्रका अपवाद है । यथा, यज्ञस्य न यो युच्छति । प्रमादार्थक युच्छ धातुको " धातोः " इस सूत्रसे अन्तोदात्त और शप् "उदात्तादनुदात्तस्य ३६६० " इस सूत्रसे स्वरित हुआ । "स्वरितात्संहितायामनुदात्तानाम् " इस सूत्रसे तिप्के प्रचय हुआ ॥

३७१० चितः । ६ । १ । १६३ ॥

अन्त उदात्तः स्यात् ॥ चितः सप्रकृतेर्बह्वकजर्थम् ॥ * ॥ चिति प्रत्यये सति प्रकृतिप्रत्ययसमुदायस्यान्त उदात्तो वाच्य इत्यर्थः ॥ नभन्तामन्यके समे । यके सरस्वति । तकत्सु ते ॥

३७१०-चित् प्रत्ययान्त समुदायके अन्त वर्णको उदात्त स्वर हो,

चित् प्रत्यय होनेपर प्रकृति प्रत्ययसमुदायके अन्त वर्णको उदात्त स्वर हो, ऐसा कहना चाहिये * यथा, नभन्तामन्यके समे । यके सरस्वति । तकत्सु ते ॥

३७११ तद्धितस्य । ६ । १ । १६४ ॥

चितस्तद्धितस्यान्त उदात्तः । पूर्वेण सिद्धे ञित्स्वरबाधनार्थमिदम् । कौञ्जायनाः ॥

३७११-चित् तद्धित प्रत्ययान्त शब्दके अन्त वर्णको उदात्त स्वर हो, पूर्व सूत्रसे वह सिद्ध होनेपर भी ञित्स्वरके बाधनार्थ पुनः इस सूत्रका विधान हुआहै, यथा-कौञ्जायनाः । कुञ्ज (१०९९) शब्दके उत्तर अपत्यार्थमें च्फञ् । (११००) इससे आयन् । (२०७२) (११९३) ॥

३७१२ कितः । ६ । १ । १६५ ॥

कितस्तद्धितस्यान्त उदात्तः । यदाग्नेयः ॥

३७१२-कित् तद्धित प्रत्ययान्त शब्दका अन्त वर्ण उदात्त हो, यथा, यदाग्नेयः । (अग्नि+ढक्) ॥

३७१३ तिसृभ्यो जसः । ६ । १ । १६६ ॥

अन्त उदात्तः । तिस्रो द्यावः सवितुः ॥

३७१३–तिसृ शब्दके उत्तर जस् विभक्तिका अन्त वर्ण उदात्त हो, यथा, तिस्रो द्यावः सवितुः । अन्तोदान्त त्रिशब्दके स्थानमें तिसृ आदेश हुआ । पाहिले स्थानिवद्भावके कारण अन्तोदात्त हुआ । पश्चात् "अनुदात्तौ सुप्पितौ ३७०९" इस सूत्रसे जस् अनुदात्त हुआ । और "अचि र ऋतः २९९"इस सूत्रसे रकारादेश करनेपर "उदात्तस्वरितयोर्यणः० ३६५७" इस सूत्रसे जस को स्वरितत्व प्राप्त हुआ था, किन्तु वर्तमान सूत्रसे उसका निषेध होगया ॥

३७१४ सावेकाचस्तृतीयादिर्विभक्तिः । ६ । १ । १६८ ॥

साविति सप्तमीबहुवचनम् । तत्र य एकाच् ततः परा तृतीयादिर्विभक्तिरुदात्ता । वाचा विरूपः । सौ किम् । राज्ञेत्यादौ एकाचोऽपि राजशब्दात्परस्य मा भूत् ॥ राज्ञो नु ते । एकाचः किम् । विधत्ते राजनि त्वे । तृतीयादिः किम् । न ददर्श वाचम् ॥

३७१४–"सु" यह सप्तमीका बहुवचन है, प्रथमाका एक वचन नहीं है । सप्तमीके बहुवचनमें जो एकाच् शब्द उसके उत्तर तृतीयादि विभक्तिको उदात्त स्वर हो, यथा, वाचा विरूपः । सु परे न होनेपर राज्ञा इत्यादि स्थलमें एकाच् होने पर भी राज शब्दके उत्तर तृतीयादि विभक्तिको उदात्त स्वर नहीं हुआ । राज्ञो नु ते । एकाच् क्यों कहा तो ऐसा न कहनेपर 'विधत्ते राजनि त्वे' इसमें भी होता । तृतीयादि क्यों कहा ऐसा न कहनेपर 'न ददर्श वाचम्' में पूर्वोक्त स्वर होजाता ॥

३७१५ अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे । ६ । १ । १६९ ॥

नित्याधिकारविहितसमासादन्यत्र यदुत्तरपदमन्तोदात्तमेकाच् ततः परा तृतीयाविभक्तिरन्तोदात्ता वा स्यात् । परमवाचा ॥

३७१५–नित्याधिकारविहित समासभिन्न स्थलमें जो उत्तरपद वह अन्तोदात्त और एकाच् हो, उसके उत्तर तृतीयादि विभक्तिके अन्त वर्णको विकल्प करके उदात्त स्वर हो, यथा–परमवाचा ॥

३७१६ अञ्चेश्छन्दस्यसर्वनामस्थानम् । ६ । १ । १७० ॥

अञ्चेः परा विभक्तिरुदात्ता । इन्द्रो दधीचः । चाविति पूर्वपदान्तोदात्तत्वं प्राप्तं तृतीयादिरित्यनुवर्तमाने सर्वनामस्थानग्रहणं शस्परिग्रहार्थम् । प्रतीचो बाहून् ॥

३७१६–अञ्च धातुके उत्तर असर्वनामस्थान अर्थात् सर्वनामस्थानसे भिन्न विभक्ति उदात्त हो, यथा–इन्द्रो दधीचः । "चौ" इस सूत्रसे पूर्व पदान्तको उदात्तत्व प्राप्त हुआ । "तृतीयादि" इस पदकी अनुवृत्ति करके कार्य सिद्ध होनेपर असर्वनामस्थानका ग्रहण, शस् विभक्तिके परिग्रहणके निमित्त है, यथा–प्रतीचो बाहून् । दधीच=दधि अञ्चतीति "ऋत्विक्० ३७३" इससे क्विन् "अनिदिताम्० ४१५" इससे नलोप "अचः ४१६" इससे अकारका लोप "चौ ४१७" इससे दीर्घ ॥

३७१७ ऊडिदंपदाद्यप्पुम्रैद्युभ्यः । ६ । १ । १७१ ॥

एभ्योऽसर्वनामस्थानविभक्तिरुदात्ता। प्रष्ठौहः । प्रष्ठौहा ॥ ऊठ्युपधाग्रहणं कर्तव्यम् ॥ * ॥ इह मा भूत् । अक्षद्युवा । अक्षद्युवे । इदम् । एभिर्नृभिर्नृतमः । अन्वादेशे न । अन्तोदात्तादित्यनुवृत्तेः । न च तत्रान्तोदात्तताऽप्यस्तीति वाच्यम् । इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादाविति सूत्रेणानुदात्तस्य अशो विधानात् । प्र ते बभ्रू । माभ्यां गा अनु । पद्दन्नोमासहृन्निश् इति षट्पदादयः । पद्भ्यां भूमिः । दद्भिर्नजिह्वा । अहरहर्जायते मासिमासि । मनश्चिन्मे हृद आ । अप् । अपां फेनेन । पुम् । अभ्रातेव पुंसः । रै । राया वयम् । रायो धर्ता विवस्वतः । दिव् । उप त्वाग्ने दिवेदिवे ॥

३७१७–ऊठ्, इदम्, पदादि अर्थात् पद, दत्, नस्, मास् हृत्, निश्, इत्यादि अप्, पुम्, रै और दिव् इन सम्पूर्ण शब्दोंके उत्तर असर्वनामस्थान विभक्तिको उदात्त स्वर हो, यथा–प्रष्ठौहः । "छन्दसि सहः" "वहश्च" इससे ण्विः । "वाह ऊठ्" प्रष्ठौहा ॥

ऊठ् विषयमें उपधाभूत ऊठ्का ग्रहण कर्त्तव्य है, किन्तु उस स्थलमें नहीं होगा, अक्षद्युवा । अक्षद्युवे । इदम् । एभिर्नृभिर्नृतमः । अन्वादेश अर्थमें विभक्तिको उदात्त स्वर नहीं होगा, क्यों कि, "अन्तोदात्तात्" इस भागकी अनुवृत्ति होती है, अन्वादेश अर्थमें इदम् शब्द अन्तोदात्त नहीं है । क्यों कि "इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ३५०" इस सूत्र से अनुदात्तविशिष्ट अश्का विधान करते हैं, "प्र ते बभ्रू । माभ्यां गा अनु (यजु० ३११३) । पद्भ्यां भूमिः । दद्भिर्नजिह्वा । अहरहर्जायते मासिमासि । मनश्चिन्मे हृद आ । अप् । (यजु० १९७१) अपां फेनेन । पुम् । अभ्रातेव पुंसः । रै । राया वयम् । रायो धर्ता विवस्वतः । दिव् । उप त्वाग्ने दिवेदिवे ॥

३७१८ अष्टनो दीर्घात् । ६ । १ । १७२ ॥

शसादिर्विभक्तिरुदात्ता । अष्टाभिर्दशभिः ॥

३७१८–दीर्घ स्वरान्त अष्टन् शब्दके उत्तर शसादि असर्वनामस्थान विभक्तिको उदात्त स्वर हो, यथा–अष्टाभिर्दशभिः ॥

३७१९ शतुरनुमो नद्यजादी। ६।१।१७३॥

अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्तात्परा नदी अजादिश्च शसादिर्विभक्तिरुदात्ता स्यात्। अच्छा रवं प्रथमा जानती। कृण्वते। अन्तोदात्तात्किम्। दधती। अभ्यस्तानामादिरित्याद्युदात्तः। अनुमः किम्। तुदन्ती। एकादेशोऽत्र उदात्तः। अदुपदेशात्परत्वाच्छतुर्लसार्वधातुक इति निघातः॥

३७१९-अनुम् अर्थात् नुमागम न हो ऐसा जो शतृ प्रत्यय तदन्त अन्तोदात्तके उत्तर नदी और अजादि शसादि विभक्तिको उदात्त स्वर हो, यथा-अच्छा रवं प्रथमा जानती। कृण्वते। अन्तोदात्तके परे शसादि विभक्ति न होनेपर, दधती। इस स्थलमें "अभ्यस्तानामादिः ३६७३" इस सूत्रसे आद्युदात्त हुआ। नुम् आगम होनेपर तुदन्ती तुद्+शतृ+नुम् इस स्थलमें एकादेश उदात्त हुआहै। अकारोपदेशके परत्वके कारण शतृ प्रत्ययको "तास्यनुदा०" इत्यादि सूत्रसे निघात स्वर हुआ॥

३७२० उदात्तयणो हल्पूर्वात्। ६।१।१७४॥

उदात्तस्थाने यो यण् हल्पूर्वस्तस्मात्परा नदी शसादिर्विभक्तिश्च उदात्ता स्यात्। चोदयित्री सूनृतानाम्। एषा नेत्री। ऋतं देवाय कृण्वते सवित्रे॥

३७२०-उदात्तके स्थानमें जो यण् हल् पूर्वक उसके उत्तर नदी और शसादि विभक्तिको उदात्त स्वर हो, यथा-"चोदयित्री सूनृतानाम्"। एषा नेत्री। ऋतं देवाय कृण्वते सवित्रे॥

३७२१ नोङ्धात्वोः। ६।१।१७५॥

अनयोर्यणः परे शसादय उदात्ता न स्युः। ब्रह्मबन्ध्वा। सेतृभिः सुभ्वे॥

३७२१-ऊङ् प्रत्ययके स्थानमें और धातुके स्थानमें जो यण् उसके उत्तर शसादि विभक्तिको उदात्त स्वर न हो, यथा-ब्रह्मबन्ध्वा। सेतृभिः सुभ्वे॥

३७२२ ह्रस्वनुड्भ्यां मतुप्। ६।१।१७६॥

ह्रस्वान्तादन्तोदात्तान्नुटश्च परो मतुबुदात्तः। यो अब्दिमाँ उदनिमाँ इयर्ति। नुटः। अक्षण्वन्तः कर्णवन्तः सखायः। अन्तोदात्तात्किम्। मा त्वा विदद्दिषुमान्। स्वरविधौ व्यञ्जनमविद्यमानवदित्येतदत्र न। मरुत्वानिंद्र नियुत्वान्वा यवागहि॥ रेशब्दाच्च॥ *॥ रेवाँ इद्रेवतः॥

३७२२-ह्रस्वान्त अन्तोदात्त और नुट्के उत्तर जो मतुप् प्रत्यय वह उदात्त हो, ह्रस्वान्त यथा-"यो अब्दिमाँ उदनिमाँ इयर्ति" नुट् यथा-अक्षण्वन्तः कर्णवन्तः सखायः। अन्तोदात्तके उत्तर न होनेपर, मात्वा विदद्दिषुमान्। स्वरविधिमें व्यञ्जन वर्ण अविद्यमानवत् हो, अत एव इस स्थलमें वह ईप्सित नहीं हुआ। "मरुत्वानिन्द्र। नियुत्वान्वा यवागहि"॥

रे शब्दके उत्तर मतु प्रत्ययको उदात्त स्वर हो, यथा-"रेवाँ इद्रेवतः"। अब्दिमान् आपो दीयन्तेऽस्मिन्निति "कर्मण्यधिकरणे च" इससे कि। अक्षण्वन्तः अक्षि+मतुप् "अस्थि दधि० ३२२" "छन्दस्यपि दृश्यते" इससे अनङ्, "अनो नुट्" इसके असिद्ध होनेपर पहले नकारका लोप। भूतपूर्व गतिसे मतुप्को नुट् "मादुपधाया० २८९७" इससे वत्व। रेवाँ रयिरस्यास्तीति मतुप् "रयेर्मतौ बहुलम्" इससे सम्प्रसारण, पूर्वरूप, आद्गुणः, फिर ह्रस्वाभाव॥

३७२३ नामन्यतरस्याम्। ६।१।१७७॥

मतुपि यो ह्रस्वस्तदन्तादन्तोदात्तात्परो नामुदात्तो वा। चेतन्ती सुमतीनाम्॥

३७२३-मतुप् प्रत्यय परे रहते जो ह्रस्व तदन्त अन्तोदात्त वर्णके उत्तर नाम् विभक्तिको विकल्प करके उदात्त स्वर हो, यथा-चेतन्ती सुमतीनाम्॥

३७२४ ङ्याश्छन्दसि बहुलम्। ६।१।१७८॥

ङ्याः परो नामुदात्तो वा। देवसेनानामभिभञ्जतीनाम्। वेत्युक्तेर्नेह। जयन्तीनां मरुतो यन्तु॥

३७२४-ङीके उत्तर नाम् विभक्तिको विकल्प करके उदात्त स्वर हो, यथा-"देवसेनानामभिभञ्जतीनाम्"। इस सूत्रमें वा शब्दके ग्रहणके कारण "जयन्तीनां मरुतो यन्तु" इस स्थलमें उदात्त स्वर नहीं हुआ॥

३७२५ षट्त्रिचतुर्भ्यो हलादिः। ६।१।१७९॥

एभ्यो हलादिर्विभक्तिरुदात्ता। आ षड्भिर्हूयमानः। त्रिभिष्ट्वं देव॥

३७२५-षट् और त्रि, चतुर् शब्दके उत्तर हलादि विभक्तिको उदात्त स्वर हो, यथा-आषड्भिर्हूयमानः। त्रिभिष्ट्वं देव॥

३७२६ न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः। ६।१।१८२॥

एभ्यः प्रागुक्तं न। गवां शता। गोभ्यो गातुम्। शुनश्चिच्छेपम्। सौ प्रथमैकवचने अवर्णान्तात्। तेभ्यो द्युम्नम्। तेषां पाहि श्रुधी हवम्॥

३७२६-गो, श्वन, सु परे रहते अवर्णान्त, राट्, अङ्, कुङ्, और कृत् इन सम्पूर्ण शब्दोंके उत्तर हलादि विभक्तिको उदात्त स्वर न हो, यथा-गवां शता। गोभ्यो गातुम्। "शुनश्चिच्छेपम्"। सु विभक्ति अर्थात् प्रथमाके

एकवचनमें जो अवर्णान्त शब्द उसको सावर्ण कहते हैं। "तेभ्यो द्युम्नम्" । तेषां पाहि श्रुधीहवम् ॥

३७२७ दिवो झल् । ६ । १ । १८३ ॥

दिवः परा झलादिर्विभक्तिर्नोदात्ता द्युभिरक्तुभिः । झलिति किम् । उप त्वाग्ने दिवेदिवे ॥

३७२७-दिव् शब्दके उत्तर झलादि विभक्तिको उदात्त स्वर न हो, यथा-द्युभिरक्तुभिः । झल् विभक्ति न होनेपर, उप त्वाग्ने दिवेदिवे ॥

३७२८ नृ चान्यतरस्याम् ।६।१।१८४॥

नुः परा झलादिर्विभक्तिर्वोदात्ता।नृभिर्येमानः।

३७२८-नृ शब्दके उत्तर झलादि विभक्तिको विकल्प करके उदात्त स्वर हो, यथा-नृभिर्येमानः ॥

३७२९ तित्स्वरितम् । ६ । १ । १८५॥

निगदव्याख्यातम्। क्व नूनम् ॥

३७२९-तित् को स्वरित स्वर हो, निगदव्याख्यातम्। अर्थात् उच्चारणके द्वारा व्याख्यात । यथा-क्व नूनम् ॥

३७३० तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः ।६।१। १८६ ॥

अस्मात्परं लसार्वधातुकमनुदात्तं स्यात् । तासि । कर्ता । कर्तारौ । कर्तारः । प्रत्ययस्वरापवादोऽयम् । अनुदात्तेत् । य आस्ते । ङितः । अभिचष्टे अनृतेभिः । अदुपदेशात् । पुरुभुजा चनस्यतम् । चित्स्वरोऽप्यनेन बाध्यते । वर्धमानं स्वे दमे । तास्यादिभ्यः किम् । अभि वृधे गृणीतः । उपदेशग्रहणात् नेह । हतो वृत्राण्यार्या । लग्रहणं किम् । कर्तांह निघ्नानाः । सार्वधातुकं किम् । शिश्ये । अह्न्विङोः किम् । हुते । यदधीते ॥ विदीन्धिखिदिभ्यो नेति वक्तव्यम् ॥ * ॥ इन्धे राजा । एतच्चानुदात्तस्य च यत्रेति सूत्रे भाष्ये स्थितम् ॥

३७३०-तासि अनुदात्तेत् और उपदेशमें ङित् अत् अर्थात् उपदेशमें अकारान्त और ङित् इनके उत्तर जो लादेश सार्वधातुक वह अनुदात्त हो, हु और इङ्को न हो, तासि यथा-कर्ता । कर्तारौ । कर्तारः । यह प्रत्यय स्वरका अपवाद है । अनुदात्तेत् यथा-य आस्ते । ङित् यथा-अभिचष्टे अनृतेभिः । अदुपदेश यथा-पुरुभुजा चनस्यतम् । इस सूत्रसे चित् स्वरको भी बाध होताहै । "वर्धमानं स्वे दमे" । तासि आदिके उत्तर न होनेपर यथा-"अभि वृधे गृणीतः" । उपदेशग्रहणके कारण इस स्थलमें नहीं होगा, यथा-"हतो वृत्राण्यार्या" लग्रहण न होनेपर यथा-"कर्तांह निघ्नानाः" । सार्वधातुक न होनेपर शिश्ये । हु और इङ् धातु होनेपर हुते । यदधीते ॥

विदि, इन्धि और खिदि धातुके उत्तर होनेपर नहीं होगा * यथा-इन्धे राजा । यह "अनुदात्तस्य च यत्र ३६५१" इस सूत्रके भाष्यमें गृहीत हुआहै । कर्ता (२१८८) एकवचनमें डित्व होनेसे टिका लोप कर्तारौ "रि च"इससे सकारका लोप । वर्द्धमान वृधु+लट्+शानच् "आने मुक्" इससे मुक् । शिश्ये="एरनेकाचः (२७२)" इससे यणादेश, "लिट् च" से यह आर्धधातुक है ॥

३७३१ आदिः सिचोऽन्यतरस्याम्। ६ । १ । १८७ ॥

सिजन्तस्यादिरुदात्तो वा । यासिष्टं वर्तिरश्विनौ ॥

३७३१-सिच् प्रत्ययान्तका आदि वर्ण विकल्प करके उदात्त हो, यथा-" यासिष्टं वर्तिरश्विनौ " । यासिष्टम्=या+लुङ् थस्को तम् "च्लि लुङि" "च्लेः सिच्" "यमरमनमातां० २३७७ " इससे इट् सक् । " बहुलं छन्दसि " अमाङ् योगमें भी अडभाव ॥

३७३२ थलि च सेटीडन्तो वा । ६ । १ । १९६ ॥

सेटि थलन्ते पदे इडुदात्तः अन्तो वा आदिर्वा स्यात् । यदा नैते त्रयस्तदा लितीति प्रत्ययात्पूर्वमुदात्तम् । लुलविथ । अत्र चत्वारोपि पर्यायेणोदात्ताः ॥

३७३२-इट्युक्त थलन्त पदका इट् उदात्त अन्त उदात्त और आद्युदात्त हो, जब यह तीनों नहीं होंगे, तब " लिति " इस सूत्रसे लित् प्रत्ययका पूर्व उदात्त होगा, यथा-लुलविथ । इस स्थलमें चारों ही क्रमसे उदात्त हुए ॥

३७३३ उपोत्तमं रिति ।६।१ । १२७ ॥

रित्प्रत्ययान्तस्योपोत्तममुदात्तं स्यात् । यदाहवनीये ॥

॥ इति प्रत्ययस्वराः ॥

३७३३-रित् प्रत्ययान्त शब्दका उपोत्तम वर्ण उदात्त हो, यथा-यदाहवनीये ॥

इति प्रत्यय स्वराः ।

३७३४ समासस्य । ६ । १ । २२३ ॥

अन्त उदात्तः स्यात् । यज्ञश्रियम् ॥

३७३४-समासका अन्त वर्ण उदात्त हो, यथा-यज्ञश्रियम् ॥

३७३५ बहुव्रीहौ प्रकृत्या पूर्वपदम् । ६ । २ । १ ॥

उदात्तस्वरितयोगि पूर्वपदं प्रकृत्या स्यात् । सत्यश्चित्रश्रवस्तमः । उदात्तेत्यादि किम् ।

सर्वानुदात्ते पूर्वपदे समासान्तोदात्तत्वमेव यथा स्यात् । समपादः ॥

३७३५-बहुव्रीहि समासमें उदात्त अथवा स्वरित स्वरयोगमें पूर्व पदको प्रकृतिस्वर हो, यथा-" सत्यश्चित्र श्रवस्तमः " । उदात्त स्वरितयुक्त न होनेपर सर्वानुदात्त पूर्व पदमें जिस प्रकार समासको अन्तोदात्त ही होगा । इसी प्रकार होगा, यथा-समपादः । चित्रं श्रवा यस्य सः चित्रश्रवः। श्रूयत इति श्रवः ॥

३७३६ तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ।६।२।२॥

सप्तैते पूर्वपदभूतास्तत्पुरुषे प्रकृत्या । तुल्यश्वेतः । कृत्यतुल्याख्या अजात्येति तत्पुरुषः । किरिणा काणः किरिकाणः । पतयन्मन्दयत्सखम् । मन्दयति मादके इन्द्रे सखेति सप्तमीतत्पुरुषः । शस्त्री श्यामा ॥ अव्यये नञ्कुनिपातानाम् ॥ * ॥ अयज्ञो वा एषः । परिगणनं किम् । स्नात्वाकालकः । मुहूर्तसुखम् । भोज्योष्णम् ॥

३७३६-तुल्यार्थ शब्द तृतीया विभक्त्यन्त पद, सप्तमीविभक्त्यन्त पद, उपमानवाचक शब्द, अव्यय शब्द, द्वितीयाविभक्त्यन्त पद और आकृतिवाचक शब्द यह सात पूर्वमें रहते तत्पुरुष समासमें प्रकृति स्वर हों, तुल्यार्थ यथा-तुल्यश्वेतः । "कृत्यतुल्याख्या अजात्या" इस सूत्रसे तत्पुरुष समास हुआहै। तृतीया,यथा-किरिणा काणः किरिकाणः।"पतयन्मन्दयत्सखम्" । "मन्दयति मादके इन्द्रे सखेति" इस वाक्यमें सप्तमी तत्पुरुष समास हुआहै । शस्त्री श्यामा । "अव्यये नञ् कुनिपातानाम्" अव्ययविषयमें नञ् कु और निपात इन सबके पूर्वपद प्रकृति स्वर हो, ऐसा परिगणन करना चाहिये* "अयज्ञो वा एषः"।परिगणन न होनेपर यथा-स्नात्वा कालकः। मुहूर्तसुखम् । भोज्योष्णम् ॥

३७३७ वर्णो वर्णेष्वनेते । ६ ।२। ३ ॥

वर्णवाचिन्युत्तरपदे एतवर्जिते वर्णवाचि पूर्वपदं प्रकृत्या तत्पुरुषे । कृष्णसारङ्गः । लोहितकल्माषः । कृष्णशब्दो नक्प्रत्ययान्तः । लोहितशब्द इतन्नन्तः । वर्णः किम् । परमकृष्णः । वर्णेषु किम् । कृष्णतिलाः । अनेते किम् । कृष्णैतः ॥

३७३७-एत वर्जित वर्णवाचक पद परे रहते वर्णबोधक पूर्व पदको तत्पुरुष समासमें प्रकृतिस्वर हो, यथा-कृष्णसारङ्गः । लोहितकल्माषः । कृष्ण शब्द नक् प्रत्ययान्त है। लोहित शब्द इतन् प्रत्ययान्त है । वर्ण वाचक पूर्वपद न होनेपर परमकृष्णः । वर्ण वाचक उत्तर पद न होनेपर कृष्णतिलाः । एत शब्द उत्तर पद होनेपर कृष्णैतः । कृष्ण शब्द मृगवाचक होनेसे वेदमें अन्तोदात्त है भाषामें रङ्गवाचक आद्युदात्त है ॥

३७३८ गाधलवणयोः प्रमाणे ।६।२।४॥

एतयोरुत्तरपदयोः प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या स्यात् । अरित्रगाधमुदकम् । तत्प्रमाणमित्यर्थः । गोलवणम् । यावद्गवे दीयते तावदित्यर्थः । अरित्रशब्द इत्रन्नन्तो मध्योदात्तः । प्रमाणमियत्तापरिच्छेदमात्रं न पुनरायाम एव । प्रमाणे किम् । परमगाधम् ॥

३७३८-प्रमाणवाचक गाध और लवण शब्द परे रहते तत्पुरुष समासमें पूर्व पदको प्रकृतिस्वर हो, यथा-" अरित्रगाधमुदकम् " । अर्थात् अरित्र प्रमाण । गोलवणम् । गौको जितना परिमाणविशिष्ट लवण दियाजाताहै उतना परिमाण जानना चाहिये । अरित्र शब्द इत्र प्रत्ययान्त मध्योदात्त है, प्रमाण शब्दसे इयत्ता परिच्छेद मात्र जानना, किन्तु आयाम नहीं । प्रमाणवाचक न होनेपर परमगाधम् । गाधृ प्रतिष्ठायाम् । कर्ममें घञ् ॥

३७३९ दायाद्यं दायादे । ६ । २ । ५ ॥

तत्पुरुषे प्रकृत्या । धनदायादः । धनशब्दः क्युप्रत्ययान्तः प्रत्ययस्वरेणाद्युदात्तः । दायाद्यं किम् । परमदायादः ॥

३७३९-दायाद शब्द परे रहते दायाद्यवाची पूर्व पदको तत्पुरुष समासमें प्रकृतिस्वर हो, यथा-धनदायादः । इस स्थलमें धनशब्दसे ' कृपृवृजिमन्दिनिधाञः क्युः ' इससे क्यु प्रत्यय हुआहै, तो प्रत्यय स्वरद्वारा इसको आद्युदात्त स्वर होगा, दायाद्यवाची पूर्व न होनेपर परमदायादः । ऐसा होगा ॥

३७४० प्रतिबन्धि चिरकृच्छ्रयोः । ६ । २ । ६ ॥

प्रतिबन्धवाचि पूर्वपदं प्रकृत्या एतयोः परतस्तत्पुरुषे । गमनचिरम् । व्याहरणकृच्छ्रम् । गमनं कारणविकलतया चिरकालभावि कृच्छ्रयोगि वा प्रतिबन्धि जायते । प्रतिबन्धि किम्। मूत्रकृच्छ्रम् ॥

३७४०-चिर और कृच्छ्र शब्द परे होनेपर प्रतिबन्धवाचक पूर्वपदको तत्पुरुषसमासमें प्रकृतिस्वर हो, यथा-गमनचिरम् । व्याहरणकृच्छ्रम् । गमन कारणविकलतासे चिरकालभावि कृच्छ्रयोगि होनेसे प्रतिबन्धि होताहै प्रतिबन्धवाचक पद पूर्वमें न होनेपर "मूत्रकृच्छ्रम्" ऐसा होगा । यह षष्ठीसमास है ॥

३७४१ पदेऽपदेशे । ६ । २ । ७ ॥

व्याजवाचिनि पदशब्दे उत्तरपदे पूर्वपदं प्रकृत्या तत्पुरुषे । मूत्रपदेन प्रस्थितः । उच्चारपदेन मूत्रशब्दो घञन्तः । उच्चारशब्दो घञ-

न्तस्थाथादिस्वरेणान्तोदात्तः । अपदेशे किम् । विष्णुपदम् ॥

३७४१–व्याजवाचक पद शब्द उत्तरपद रहते पूर्वपदको तत्पुरुषसमासमें प्रकृतिस्वर हो, यथा–मूत्रपदेन प्रस्थितः । उच्चारपदेन । मूत्र शब्द घञ्प्रत्ययान्त है । उच्चार शब्द घञ्प्रत्ययान्त है अत एव थाथादिस्वरसे अन्तोदात्त हुआहै । अपदेशवाचक न होनेपर विष्णुपदम् । यह षष्ठीसमास है ॥

३७४२ निवाते वातत्राणे । ६ । २ । ८ ॥

निवातशब्दे परे वातत्राणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या । कुटीनिवातम् । कुड्यनिवातम् । कुटीशब्दो गौरादिङीषन्तः । कुड्यशब्दो ड्यगन्तः । यगन्त इत्यन्ये । वातत्राणे किम् । राजनिवाते वसति । निवातशब्दोयं रूढः पार्श्वे ॥

३७४२–तत्पुरुषसमासमें वातत्राणवाचक निवात शब्द परे रहते पूर्ववर्त्ती पदको प्रकृतिस्वर हो,यथा–कुटीनिवातम्।कुड्यनिवातम् । कुटी शब्द गौरादिगणीय होनेके कारण ङीष्प्रत्ययान्त है । कुड्य शब्द ड्यगन्त है । अन्यमतसे यगन्त है । वातत्राणार्थक न होनेपर "राजनिवाते वसति" यहां निवात शब्द पार्श्व अर्थमें रूढ है ॥

३७४३ शारदेऽनार्तवे । ६ । २ । ९ ॥

ऋतौ भवमार्तवम् । तदन्यवाचिनि शारदशब्दे परे तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यात् । रज्जुशारदमुदकम् । शारदशब्दो नूतनार्थः । तस्यास्वपदविग्रहः।रज्ज्वोः सद्य उद्धृतम् । रज्जुशब्दः सृजेरसुम् चेत्याद्युदात्तो व्युत्पादितः । अनार्तवे किम् । उत्तमशारदम् ॥

३७४३–ऋतुमें होनेवालेको आर्त्तव कहतेहैं, उससे भिन्न अर्थमें विद्यमान शारद शब्द परे रहते तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, "रज्जुशारदमुदकम्" इस स्थलमें शारद शब्द नूतनार्थक है, उसका "रज्ज्वोः सद्य उद्धृतम्" ऐसा अस्वपद विग्रह है, रज्जु शब्द "सृजेरसुम्" इस सूत्रसे आद्युदात्त व्युत्पादित है। आर्त्तव होनेपर तो उत्तमशारदम् । (शरदि ऋतौ भवं शारदम्) ॥

३७४४ अध्वर्युकषाययोर्जातौ । ६ । २ । १० ।

एतयोः परतो जातिवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरम् । कठाध्वर्युः । दौवारिककषायम् । कठशब्दः पचाद्यजन्तः तस्माद्वैशम्पायनान्तेवासिभ्यश्चेति णिनेः कठचरकाल्लुगिति लुक् । द्वारि नियुक्त इति ठक्यन्तोदात्तो दौवारिकशब्दः । जातौ किम् । परमाध्वर्युः ॥

३७४४–अध्वर्यु और कषाय शब्द परे रहते जातिवाचक तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–काठध्वर्युः । दौवारिककषायम् । कठ शब्द पचाद्यजन्त है । उससे "वैशम्पायनान्तेवासिभ्यश्च" इस सूत्रसे विहित णिनि प्रत्ययका "कठचरकाल्लुक् १४८७" इस सूत्रसे लुक् हुआ । द्वारि नियुक्तः, इस विग्रहमें ठक् प्रत्यय होनेपर, अन्तोदात्त दौवारिक शब्द हुआ । जातिवाचक तत्पुरुष न होनेपर परमाध्वर्य्युः । (अध्वरं यज्ञं यातीति अध्वर्युः) ॥

३७४५ सदृशप्रतिरूपयोः सादृश्ये । ६ । २ । ११ ॥

अनयोः पूर्वं प्रकृत्या । पितृसदृशः । सादृश्ये किम् । परमसदृशः। समासार्थोऽत्र पूज्यमानता न सादृश्यम् ॥

३७४५–सादृश्यार्थक सदृश और प्रतिरूप शब्द परे रहते तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–पितृसदृशः । सादृश्यार्थ न होनेपर परमसदृशः । समासार्थ इस स्थलमें पूज्यमानता है सादृश्य नहीं ॥

३७४६ द्विगौ प्रमाणे । ६ । २ । १२ ॥

द्विगावुत्तरपदे प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरम् । प्राच्यसप्तसमः । सप्त समाः प्रमाणमस्य । प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लुक् । प्राच्यशब्द आद्युदात्तः । प्राच्यश्चासौ सप्तसमश्च प्राच्यसप्तसमः । द्विगौ किम् । व्रीहिप्रस्थः । प्रमाणे किम् । परमसप्तसमम् ॥

३७४६–द्विगुसंज्ञक प्रमाणवाचक उत्तरपद परे रहते तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–प्राच्यसप्तसमः । सप्त समाः प्रमाणमस्य, इस विग्रहमें "प्रमाणे लो द्विगोर्नित्यम्" इस सूत्रसे मात्रच् प्रत्ययका लुक् हुआ । प्राच्य शब्द आद्युदात्त है । प्राच्यश्चासौ सप्तसमश्च=प्राच्यसप्तसमः । द्विगुसंज्ञक न होनेपर व्रीहिप्रस्थः । प्रमाणवाचक न होनेपर परमसप्तसमम् ॥

३७४७ गन्तव्यपण्यं वाणिजे । ६ । २ । १३ ॥

वाणिजशब्दे परे तत्पुरुषे गन्तव्यवाचि पण्यवाचि च पूर्वपदं प्रकृतिस्वरम् । मद्रवाणिजः। गोवाणिजः । सप्तमीसमासः । मद्रशब्दो रक्प्रत्ययान्तः । गन्तव्येति किम् । परमवाणिजः ॥

३७४७–वाणिज शब्द परे रहते तत्पुरुषसमासमें गन्तव्यवाचक और पण्यवाचक पूर्वपदको प्रकृतिस्वर हो, यथा–मद्रवाणिजः । गोवाणिजः । इस स्थलमें सप्तमीतत्पुरुषसमास हुआहै । मद्र शब्द "स्फायितञ्चि" से रक्प्रत्ययान्त है । गन्तव्यवाचक न होनेपर परमवाणिजः । (मद्रवाणिजः=मद्रेषु गत्वा व्यवहरतीत्यर्थः) ॥

३७४८ मात्रोपज्ञोपक्रमच्छाये नपुंसके । ६ । २ । १४ ॥

मात्रादिषु परतो नपुंसकवाचिनि तत्पुरुषे

तथा । भिक्षायास्तुल्यप्रमाणं भिक्षामात्रम् । भिक्षाशब्दो गुरोश्च हल इत्यप्रत्ययान्तः । पाणिन्युपज्ञम् । पाणिनिशब्द आद्युदात्तः । नन्दोपक्रमम् । नन्दशब्दः पचाद्यजन्तः । इषुच्छायम् । इषुशब्द आद्युदात्तो नित्त्वात् । नपुंसके किम् । कुड्यच्छाया ॥

३७४८–मात्र, उपज्ञ, उपक्रम और छाया शब्द परे रहते नपुंसकवाचक तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा––भिक्षायास्तुल्यप्रमाणं भिक्षामात्रम् । भिक्षा शब्द "गुरोश्च हलः ३२८०"इस सूत्रसे श प्रत्ययान्त है । पाणिन्युपज्ञम् । पाणिनि शब्द आद्युदात्त है । नन्दोपक्रमम् । नन्द शब्द पचाद्यजन्त है । इषुच्छायम् । इषु शब्द नित्त्वके कारण आद्युदात्त है । नपुंसक न होनेपर कुड्यच्छाया ॥

३७४९ सुखप्रिययोर्हिते । ६ । २ । १५ ॥

एतयोः परयोर्हितवाचिनि तत्पुरुषे तथा । गमनप्रियम् । गमनसुखम् । गमनशब्दे लित्स्वरः । हिते किम् । परमसुखम् ॥

३७४९–सुख और प्रिय शब्द परे रहते हितवाचक तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–गमनप्रियम् । गमनसुखम् । गमनशब्दमें लित्स्वर है । हितवाचक तत्पुरुषसमास न होनेपर परमसुखम् ॥

३७५० प्रीतौ च । ६ । २ । १६ ॥

प्रीतौ गम्यायां प्रागुक्तम् । ब्राह्मणसुखं पायसम् । छात्रप्रियोऽनध्यायः । ब्राह्मणच्छात्रशब्दौ प्रत्ययस्वरेणान्तोदात्तौ । प्रीतौ किम् । राजसुखम् ॥

३७५०–प्रीति गम्यमान होनेपर तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–ब्राह्मणसुखम् पायसम् । छात्रप्रियोऽनध्यायः । ब्राह्मण और छात्र शब्द प्रत्ययस्वरसे अन्तोदात्त हैं प्रीति न होनेपर राजसुखम्, यहां प्रकृतिस्वर न हुआ ॥

३७५१ स्वं स्वामिनि । ६ । २ । १७ ॥

स्वामिशब्दे परे स्ववाचि पूर्वपदं तथा । गोस्वामी । स्वं किम् । परमस्वामी ॥

३७५१–स्वामि शब्द परे रहते तत्पुरुषसमासमें स्ववाचक पूर्वपदको प्रकृतिस्वर हो, यथा–गोस्वामी । स्ववाचक न होनेपर परमस्वामी ॥

३७५२ पत्यावैश्वर्ये । ६ । २ । १८ ॥

दमूना गृहपतिर्दमे ॥

३७५२–ऐश्वर्यार्थक पति शब्द परे रहते तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–दमूना गृहपतिर्दमे ॥

३७५३ न भूवाक्चिद्दिधिषु । ६ । २ । १९ ॥

पतिशब्दे परे ऐश्वर्यवाचिनि तत्पुरुषे नैतानि प्रकृत्या । भुवः पतिर्भूपतिः । वाक्पतिः । चित्पतिः । दिधिषुपतिः ॥

३७५३–पति शब्द परे रहते ऐश्वर्यवाचक तत्पुरुषसमासमें पूर्वस्थित भू, वाक्, चित् और दिधिषु शब्दको प्रकृतिस्वर न हो, यथा–भुवः पतिः=भूपतिः । वाक्पतिः । चित्पतिः । दिधिषुपतिः ॥

३७५४ वा भुवनम् । ६ । २ । २० ॥

उक्तविषये भुवनपतिः । भूसूधूभ्रस्जिभ्य इति क्युन्नन्तो भुवनशब्दः ॥

३७५४–पति शब्द परे रहते ऐश्वर्यवाचक तत्पुरुषसमासमें पूर्ववर्ती भुवन शब्दको विकल्प करके प्रकृतिस्वर हो, यथा–भुवनपतिः । "भूसूधूभ्रस्जिभ्यः" इस सूत्रसे भू धातुके उत्तर क्युन् प्रत्यय होकर भुवन शब्द सिद्ध हुआहै ॥

३७५५ आशङ्काऽऽबाधनेदीयस्सु सम्भावने । ६ । २ । २१ ॥

अस्तित्वाध्यवसायः सम्भावनम् । गमनाशङ्कमस्ति । गमनाबाधम् । गमननेदीयः । गमनमाशङ्क्यते आबाध्यते निकटतरमिति वा सम्भाव्यते । सम्भावने किम् । परमनेदीयः ॥

३७५५–अस्तित्वका जो अध्यवसाय, उसको संभावना कहतेहैं । आशङ्क आबाध और नेदीय शब्द परे रहते संभावनावाचक तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–गमनाशङ्कमस्ति । गमनाबाधम् । गमननेदीयः । गमनमाशंक्यते आबाध्यते निकटतरमिति वा सम्भाव्यते । सम्भावनार्थक न होनेपर, परमनेदीयः ॥

३७५६ पूर्वे भूतपूर्वे । ६ । २ । २२ ॥

आढ्यो भूतपूर्वः आढ्यपूर्वः । पूर्वशब्दो वृत्तिविषये भूतपूर्वे वर्त्तते । भूतपूर्वे किम् । परमपूर्वः ॥

३७५६–भूतपूर्वार्थक पूर्व शब्द परे रहते पूर्वपदको प्रकृतिस्वर हो, यथा–आढ्यो भूतपूर्वः, इस विग्रहमें आढ्यपूर्वः । पूर्व शब्द वृत्तिविषयमें भूतपूर्वार्थमें वर्त्तताहै । भूतपूर्वार्थक पूर्व शब्द न होनेपर परमपूर्वः ॥

३७५७ सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये । ६ । २ । २३ ॥

एषु पूर्वं प्रकृत्या । मद्रसविधम् । गान्धारसनीडम् । काश्मीरसमर्यादम् । मद्रसवेशम् । मद्रसदेशम् । सामीप्ये किम् । सह मर्यादया समर्यादं क्षेत्रम् । चैत्रसमर्यादम् ॥

३७५७–समीप्यार्थक सविध, सनीड, समर्य्याद, सवेश और सदेश शब्द परे रहते पूर्वपदको तत्पुरुषसमासमें प्रकृतिस्वर हो, यथा–मद्रसविधम् । गान्धारसनीडम् । काश्मीरसमर्य्यादम् । मद्रसवेशम् । मद्रसदेशम् । सामीप्यार्थक न होनेपर, सह मर्यादया=समर्य्यादं क्षेत्रम् । चैत्रसमर्यादम् ॥

३७५८ विस्पष्टादीनि गुणवचनेषु । ६ । २ । २४ ॥

विस्पष्टकटुकम् । विस्पष्टशब्दो गतिरनन्तर इत्याद्युदात्तः । विस्पष्टेति किम् । परमलवणम् । गुणेति किम् । विस्पष्टब्राह्मणः । विस्पष्ट । विचित्र । व्यक्त । सम्पन्न । पण्डित । कुशल । चपल । निपुण ॥

३७५८-गुणवाचक शब्द परे रहते विस्पष्टादि पूर्वपदको प्रकृतिस्वर हो, यथा-विस्पष्टकटुकम् । विस्पष्ट शब्द "गतिरनन्तर० ३७८३" इस सूत्रसे आद्युदात्त है । विस्पष्टादि न होनेपर परमलवणम् । गुणवाचक शब्द परे न रहते विस्पष्टब्राह्मणः । विस्पष्टादिगण यथा-विस्पष्ट, विचित्र, व्यक्त, सम्पन्न, पण्डित, कुशल, चपल और निपुण ॥

३७५९ श्रज्याऽवमकन्पापवत्सु भावे कर्मधारये । ६ । २ । २५ ॥

श्र ज्य अवम कन् इत्यादेशवति पापवाचिनि चोत्तरपदे भाववाचि पूर्वपदं प्रकृत्या । गमनश्रेष्ठम् । गमनज्यायः । गमनावमम् । गमनकनिष्ठम् । गमनपापिष्ठम् । श्रेत्यादि किम् । गमनशोभनम् । भावे किम् । गम्यतेऽनेनेति गमनम् । गमनं श्रेयो गमनश्रेयः । कर्मेति किम् । षष्ठीसमासे मा भूत् ॥

३७५९-श्र, ज्य, अवम कन् आदेश विशिष्ट शब्द और पापवाचक शब्द परे रहते कर्मधारयसमासमें भाववाचक पूर्वपदको प्रकृतिस्वर हो, यथा-गमनश्रेष्ठम् । गमनज्यायः । गमनावमम् । गमनकनिष्ठम् । गमनपापिष्ठम् । श्र इत्यादि आदेश विशिष्ट शब्द और पापवाचक शब्द परे न होनेपर गमनशोभनम् । पूर्वपद भाववाचक न होनेपर गम्यतेऽनेनेति=गमनं=गमनं श्रेयो गमनश्रेयः।'कर्मधारये' क्यों कहा? तो षष्ठीतत्पुरुष समास होनेपर नहीं हो ॥

३७६० कुमारश्च । ६ । २ । २६ ॥

कर्मधारये । कुमारश्रमणा । कुमारशब्दोऽन्तोदात्तः ॥

३७६०-कर्म्मधारय समासमें कुमार पूर्वपदको प्रकृतिस्वर हो, यथा-कुमारश्रमणा । कुमार शब्द अन्तोदात्त है ॥

३७६१ आदिः प्रत्येनसि । ६ । २ । २७ ॥

कुमारस्यादिरुदात्तः प्रत्येनसि परे कर्मधारये । प्रतिगतमेनोऽस्य प्रत्येनाः । कुमारप्रत्येनाः ॥

३७६१-कर्म्मधारयसमासमें प्रत्येनस् शब्द परे रहते कुमार शब्दके आदिको प्रकृतिस्वर हो, यथा-प्रतिगतमेनोऽस्य=प्रत्येनाः । कुमारप्रत्येनाः ॥

३७६२ पूगेष्वन्यतरस्याम् । ६ । २ । २८ ॥

पूगा गणास्तेषूक्तं वा । कुमारचातकाः । कुमारजीमूताः । आद्युदात्तत्वाभावे कुमारश्चेत्येव भवति ॥

३७६२-पूग अर्थात् गणवाचक शब्द परे रहते कर्म्मधारयसमासमें पूर्ववर्त्ती कुमारशब्दका आदि वर्ण विकल्प करके उदात्त हो, यथा-कुमारचातकाः । कुमारजीमूताः । आद्युदात्तत्वाभाव होनेपर " कुमारश्च ३७६० " इससे प्रकृतिस्वर होगा ॥

३७६३ इगन्तकालकपालभगालशरावेषु द्विगौ । ६ । २ । २९ ॥

एषु परेषु पूर्वं प्रकृत्या । पञ्चारत्नयः प्रमाणमस्य पञ्चारत्निः । दश मासान् भूतो दशमास्यः । पंच मासान् भूतः पंचमास्यः । तमधीष्ट इत्यधिकारे द्विगोर्यप् पञ्चकपालः । पञ्चभगालः । पञ्चशरावः । त्रः संख्याया इति पञ्चन्शब्द आद्युदात्तः । इगन्तादिषु किम् । पञ्चाश्वः । द्विगौ किम् । परमारत्निः ॥

३७६३-द्विगु समासमें इगन्त शब्द, कालवाचक, कपाल, भगाल और शराव शब्द परे रहते पूर्वपदको प्रकृतिस्वर हो, यथा-पञ्च अरत्नयः प्रमाणमस्य, इस विग्रहमें पञ्चारत्निः । दश मासान् भूतो दशमास्यः । पञ्च मासान् भूतः पञ्चमास्यः । यहां " तमधीष्ट० १७४४ " इस अधिकारमें "द्विगोर्यप्" इससे यप् प्रत्यय हुआ । पञ्चकपालः । पञ्चभगालः । पञ्चशरावः । " त्रः संख्यायाः " इस सूत्रसे पञ्चन् शब्द आद्युदात्त है । इगन्तादि शब्द परे न रहते कैसा होगा ? तो, पञ्चाश्वः । द्विगुसमास न होनेपर कैसा होगा ? तो, परमारत्निः ॥

३७६४ बह्वन्यतरस्याम् । ६ । २ । ३० ॥

बहुशब्दस्तथा वा । बह्वरत्निः । बहुमास्यः । बहुकपालः । बहुशब्दोऽन्तोदात्तः । तस्य यणि सत्युदात्तस्वरितयोरिति भवति ॥

३७६४-इगन्तादि शब्द परे रहते द्विगुसमासमें पूर्ववर्त्ती बहु शब्दको विकल्प करके प्रकृतिस्वर हो, यथा-बह्वरत्निः । बाहुमास्यः । बहुकपालः । बहु शब्द अन्तोदात्त है, उसको यण् होनेपर " उदात्तस्वरितयोः० ३६५७ " इस सूत्रसे अरत्नि शब्दके आदिको स्वरित हुआ ॥

३७६५ दिष्टिवितस्त्योश्च । ६ । २ । ३१ ॥

एतयोः परतः पूर्वपदं प्रकृत्या वा द्विगौ । पञ्चदिष्टिः । पञ्चवितस्तिः ॥

३७६५-द्विगुसमासमें दिष्टि और वितस्ति शब्द परे रहते पूर्वपदको विकल्प करके प्रकृतिस्वर हो, यथा-पञ्चदिष्टिः पञ्चवितस्तिः ॥

३७६६ सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात् । ६ । २ । ३२ ॥

अकालवाचि सप्तम्यन्तं प्रकृत्या सिद्धादिषु । साङ्काश्यसिद्धः । साङ्काश्येति ण्यान्तः । आतपशुष्कः । भ्राष्ट्रपक्वः । भ्राष्ट्रेति ष्ट्रन्नन्तः । चक्रबन्धः । चक्रशब्दोऽन्तोदात्तः।अकालात्किम् । पूर्वाह्णसिद्धः । कृत्स्वरेण बाधितः सप्तमीस्वरः प्रतिप्रसूयते ॥

३७६६-तत्पुरुषसमासमें सिद्ध, शुष्क, पक्व और बन्ध शब्द परे रहते अकालवाचक सप्तम्यन्त पदको प्रकृतिस्वर हो, यथा-साङ्काश्यसिद्धः । साङ्काश्य शब्द "वुञ्छण्०" इससे ण्य प्रत्ययान्त है । आतपशुष्कः । भ्राष्ट्रपक्वः । भ्राष्ट्र पद ष्ट्रन्प्रत्ययान्त है । चक्रबन्धः । चक्र शब्द अन्तोदात्त है । कालवाचक सप्तम्यन्त होनेपर कैसा होगा ? तो, पूर्वाह्णसिद्धः । इस सूत्रसे कृत्प्रत्ययके स्वरसे बाधित सप्तमीस्वर प्रतिप्रसूत होता है ॥

३७६७ परिप्रत्युपाऽपावर्ज्यमानाऽहोरात्रावयवेषु । ६ । २ । ३३ ॥

एते प्रकृत्या वर्ज्यमानवाचिनि अहोरात्रावयववाचिनि चोत्तरपदे । परित्रिगर्तं वृष्टो देवः । प्रतिपूर्वाह्णम् । प्रत्यपररात्रम् । उपपूर्वरात्रम् । अपत्रिगर्तम् । उपसर्गा आद्युदात्ताः । बहुव्रीहितत्पुरुषयोः सिद्धत्वादव्ययीभावार्थमिदम् । अपपर्योरेव वर्ज्यमानमुत्तरपदम् । तयोरेव वर्ज्यमानार्थत्वात् । अहोरात्रावयवा अपि वर्ज्यमाना एव । तयोर्भवन्ति । वर्ज्येति किम् । अग्निं प्रति प्रत्यग्नि ॥

३७६७-तत्पुरुषसमासमें वर्ज्यमानवाचक और अहोरात्रिका अवयववाचक पद उत्तर पद रहते पूर्ववर्त्ती परि, प्रति, उप और अपको प्रकृतिस्वर हो, यथा-परित्रिगर्त्तं वृष्टो देवः । प्रतिपूर्वाह्णम् । प्रत्यपररात्रम् । उपपूर्वरात्रम् । अपत्रिगर्त्तम् । उपसर्ग आद्युदात्त है । बहुव्रीहि और तत्पुरुषसमासमें सिद्ध होनेपर भी यह सूत्र अव्ययीभावसमासार्थ है । अप और परिशब्दका ही उत्तरपद वर्ज्यमानवाचक होगा, कारण कि, उन दोनोंका ही वर्ज्यमानार्थत्व है । अहोरात्रावयव भी उनका वर्ज्यमानही होता है । वर्ज्यमान न होनेपर कैसा होगा ? तो, अग्निं प्रति=प्रत्यग्नि ॥

३७६८ राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु । ६ । २ । ३४ ॥

राजन्यवाचिनां बहुवचनान्तानामन्धकवृष्णिषु वर्तमाने द्वन्द्वे पूर्वपदं प्रकृत्या । श्वाफल्कचैत्रकाः । शिनिवासुदेवाः । शिनिराद्युदात्तो लक्षणया तदपत्ये वर्तते । राजन्येति किम् । द्वैप्यभैमायनाः।द्वीपे भवा द्वैप्याः।भैमेरपत्यं युवा भैमायनः । अन्धकवृष्णय एते न तु राजन्याः । राजन्यग्रहणमिहाभिषिक्तवंश्यानां क्षत्रियाणां ग्रहणार्थम् । नैते तथा । बहुवचनं किम् । संकर्षणवासुदेवौ । द्वन्द्वे किम् । वृष्णीनां कुमाराः वृष्णिकुमाराः । अन्धकवृष्णिषु किम् । कुरुपञ्चालाः ॥

३७६८-राजन्यवाचक बहुवचनान्तपदके अन्धक और वृष्णिमें वर्त्तमान द्वन्द्वसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा-श्वाफल्कचैत्रकाः । शिनिवासुदेवाः । शिनि शब्द आद्युदात्त है, वह लक्षणावृत्तिसे शिनिके अपत्यको कहता है । राजन्यवाचक न होनेपर कैसा होगा? तो, द्वैप्यभैमायनाः द्वीपे भवाः, इस विग्रहमें द्वैप्याः । भैमेरपत्यं युवा, इस विग्रहमें भैमायनः । यह अन्धक और वृष्णि हैं, किन्तु राजन्य नहीं हैं, कारण कि, इस स्थलमें राजन्य शब्द अभिषिक्तवंश्यक क्षत्रियका ग्रहणार्थ है, वैसा यह नहीं है । बहुवचनान्त न होनेपर कैसा होगा ? तो, संकर्षणवासुदेवौ । द्वन्द्व न होनेपर वृष्णीनां कुमाराः, इस विग्रहमें वृष्णिकुमाराः । अन्धक और वृष्णि न होनेपर कैसा होगा ? तो कुरुपञ्चालाः ॥

३७६९ संख्या । ६ । २ । ३५ ॥

संख्यावाचि पूर्वपदं प्रकृत्या द्वन्द्वे । द्वादश । त्रयोदश । त्रेस्त्रयसादेश आद्युदात्तो निपात्यते ॥

३७६९-द्वन्द्वसमासमें संख्यावाचक पूर्वपदको प्रकृतिस्वर हो, यथा-द्वादश । 'त्रयोदश' इस स्थलमें त्रि शब्दके स्थानमें निपातनसे आद्युदात्त त्रयस् आदेश हुआ है ॥

३७७० आचार्योपसर्जनश्चान्तेवासी । ६ । २ । ३६ ॥

आचार्योपसर्जनान्तेवासिनां द्वन्द्वे पूर्वपदं प्रकृत्या । पाणिनीयरौढीयाः । छस्वरेण मध्योदात्तावेतौ । आचार्योपसर्जनग्रहणं द्वन्द्वविशेषणम् । सकलो द्वन्द्व आचार्योपसर्जनो यथा विज्ञायते । तेनेह न । पाणिनीयदेवदत्तौ । आचार्येति किम् । छान्दसवैयाकरणाः ॥ अन्तेवासी किम् । आपिशलपाणिनीये शास्त्रे ॥

३७७०-आचार्योपसर्जन अन्तेवासियोंके द्वन्द्वसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा-पाणिनीयरौढीयाः । यह दानों छस्वरसे मध्योदात्त हैं । 'आचार्योपसर्जन' शब्द द्वन्द्वका विशेषण है, जिससे समस्त द्वन्द्व आचार्योपसर्जन (जाना जाय,) इस कारण "पाणिनीयदेवदत्तौ" इस स्थलमें प्रकृतिस्वर नहीं हुआ । आचार्योपसर्जन अन्तेवासियोंका द्वन्द्व न होनेपर कैसा होगा? तो, छान्दसवैयाकरणाः । अन्तेवासिओंका द्वन्द्व न होनेपर कैसा होगा ? तो आपिशलपाणिनीये शास्त्रे ॥

३७७१ कार्तकौजपादयश्च ।६।२।३७॥

एषां द्वंद्वे पूर्वपदं प्रकृत्या । कार्तकौजपौ । कृतस्येदं कुजपस्येदमित्यण्णन्तावेतौ । सावर्णिमाण्डूकेयौ ॥

३७७१–कार्त्तकौजपादि शब्दोंके द्वन्द्वसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–कार्त्तकौजपौ । कृतस्य इदं कुजपस्य इदम्, इस विग्रहमें कृत और कुजप शब्दके उत्तर अण् प्रत्यय हुआ है । सावर्णिमाण्डूकेयौ । (कुर्भूमिः तत्र जाताः कुजाः तान् पातीति कुजपः । कृतकुजपाभ्यामपत्ये ऋष्यण् । माण्डूकेय-मण्डूक शब्दसे ढक्) ॥

३७७२ महान् व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु ।६।२।३८॥

महच्छब्दः प्रकृत्या व्रीह्यादिषु दशसु । महाव्रीहिः । महापराह्णः । महागृष्टिः । महेष्वासः । महाहैलिहिलः । महारौरवः । महाप्रवृद्धः । महच्छब्दोन्तोदात्तः । सन्महदिति प्रतिपदोक्तसमास एवायं स्वरः । नेह । महतो व्रीहिर्महद्व्रीहिः ॥

३७७२–व्रीहि, अपराह्ण, गृष्टि, इष्वास, जाबाल, भार, भारत, हैलिहिल, रौरव और प्रवृद्ध शब्द परे रहते पूर्ववर्त्ती महत् शब्दको प्रकृतिस्वर हो, यथा–महाव्रीहिः । महापराह्णः । महागृष्टिः । महेष्वासः । महाजाबालः । महाभारः । महाभारतः । महाहैलिहिलः । महारौरवः । महाप्रवृद्धः । महत् शब्द अन्तोदात्त है । यह स्वर " सन्महत् ७४० " इस सूत्रसे प्रतिपदोक्त समासमें ही होगा, इस कारण महतो व्रीहिः, इस विग्रहमें महद्व्रीहिः यहां महत् शब्दको प्रकृतिस्वर न हुआ ॥

३७७३ क्षुल्लकश्च वैश्वदेवे ।६।२।३९॥

चान्महान् । क्षुल्लकवैश्वदेवम् । महावैश्वदेवम् । क्षुधं लातीति क्षुल्लः । तस्मादज्ञातादिषु केऽन्तोदात्तः ॥

३७७३–वैश्वदेव शब्द परे रहते पूर्ववर्त्ती क्षुल्लक शब्दको और चकारसे महत् शब्दको प्रकृतिस्वर हो, यथा–क्षुल्लकवैश्वदेवम् । महावैश्वदेवम् । क्षुधं लातीति क्षुल्लः, इसके उत्तर अज्ञानादि अर्थमें क प्रत्यय होनेपर क्षुल्लक शब्द अन्तोदात्त हुआ ॥

३७७४ उष्ट्रः सादिवाम्योः ।६।२।४०॥

उष्ट्रसादी । उष्ट्रवामी । उषेः ष्ट्रन् उष्ट्रशब्द आद्युदात्तः ॥

३७७४–सादि और वामि शब्द परे रहते पूर्ववर्त्ती उष्ट्र शब्दको प्रकृतिस्वर हो, यथा–उष्ट्रसादी । उष्ट्रवामी । उष धातुके उत्तर ष्ट्रन् प्रत्यय होनेपर उष्ट्र शब्द आद्युदात्त हुआ ॥

३७७५ गौः सादसादिसारथिषु ।६।२।४१॥

गोसादः । गोसादिः । गोसारथिः ॥

३७७५–साद, सादि और सारथि शब्द परे रहते पूर्ववर्ती गो शब्दको प्रकृतिस्वर हो, यथा–गोसादः । गोसादिः गोसारथिः ॥

३७७६ कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च ।६।२।४२।

एषां सप्तानां समासानां दासीभारादेश्च पूर्वपदं प्रकृत्या । कुरूणां गार्हपतं कुरुगार्हपतम् । उप्रत्ययान्तः कुरुः ॥ वृजेरिति वाच्यम् ॥ * ॥ वृजिगार्हपतम् । वृजिराद्युदात्तः । रिक्तो गुरुः रिक्तगुरुः। रिक्ते विभाषेति रिक्तशब्द आद्युदात्तः। असूता जरती असूतजरती । अश्लीला दृढरूपा अश्लीलदृढरूपा । अश्लीलशब्दो नञ्समासत्वादाद्युदात्तः । श्रीर्यस्याऽस्ति तत् श्लीलम् । सिध्मादित्वाल्लच् । कपिलकादित्वाल्लत्वम् । पारे वडवेव पारेवडवा । निपातनादिवार्थे समासो विभक्त्यलोपश्च । पारशब्दो घृतादित्वादन्तोदात्तः । तैतिलानां कद्रूः तैतिलकद्रूः । तितिलिनोऽपत्यं छात्रो वा इत्यण्णन्तः । पण्यशब्दो यदन्तत्वादाद्युदात्तः । पण्यकम्बलः । संज्ञायामिति वक्तव्यम् ॥ * ॥ अन्यत्र पणितव्ये कंबले समासान्तोदात्तत्वमेव।प्रतिपदोक्ते समासे कृत्या इत्येष स्वरो विहितः । दास्या भारो दासीभारः। देवहूतिः । यस्य तत्पुरुषस्य पूर्वपदप्रकृतिस्वरत्वमिष्यते न विशिष्यवचनं विहितं स सर्वोपि दासीभारादिषु द्रष्टव्यः ॥ स राये सपुरन्ध्याम् । पुरं शरीरं ध्रियतेऽस्यामिति कर्मण्यधिकरणे चेति किप्रत्ययः । अलुक् छान्दसः । नब्विषयस्येत्याद्युदात्तः पुरशब्दः ॥

३७७६–कुरुगार्हपत, रिक्तगुरु, असूतजरती, अश्लीलदृढरूपा, पारेवडवा, तैतिलकद्रू, और पण्यकम्बल, यह सात समस्त पदोंके और दासीभारादि शब्दोंके पूर्ववर्त्ती पदको प्रकृतिस्वर हो, यथा–कुरूणां गार्हपतम् इस विग्रहमें कुरुगार्हपतम् । कुरु शब्द उप्रत्ययान्त है । वृजि शब्दको गार्हपत शब्द परे रहते प्रकृतिस्वर हो, ऐसा कहना चाहिये* वृजिगार्हपतम् । वृजि शब्द आद्युदात्त है । रिक्तो गुरुः, इस विग्रहमें रिक्तगुरुः । " रिक्ते विभाषा ३६९६ " इस सूत्रसे रिक्त शब्द आद्युदात्त है । असूता जरती, इस विग्रहमें असूतजरती । अश्लीला दृढरूपा, इस विग्रहमें अश्लीलदृढरूपा । अश्लील शब्द नञ्समासत्वके कारण आद्युदात्त है । श्रीर्यस्यास्ति, इस वाक्यमें सिध्मादित्वके कारण लच्

प्रत्यय, और कपिलकादिगणमें पाठके कारण लत्व होकर 'श्लीलम्' पद हुआ है। पारे वडवा इव, इस वाक्यमें "पारे वडवा" यह निपातनके कारण स्वार्थमें समास और विभक्तिका अलोप हुआ। पार शब्द घृतादि होनेके कारण अन्तोदात्त है। तैतिलानां कद्रूः, इस विग्रहमें तैतिलकद्रूः। तितिलिनोऽपत्यं छात्रो वा, इस विग्रहमें तितिलिन् शब्दके उत्तर अण् प्रत्यय हुआहै। पण्य शब्द यत् प्रत्ययान्त होनेके कारण आद्युदात्त है। पण्यकम्बलः ॥

संज्ञा होनेपर पण्यकम्बल शब्दके पूर्वपदको प्रकृतिस्वर हो, ऐसा कहना चाहिये* अन्यत्र पणितव्य कम्बल अर्थ होनेपर समासान्तोदात्त ही होगा, कारण कि, प्रतिपदोक्त समासमें "कृत्याः २८३१" इससे स्वर विहित है। दास्याः भारः, इस विग्रहमें दासीभारः। देवहूतिः। जिस तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर इष्ट है, परन्तु विशेष करके कोई वचन विहित नहीं है, उसको दासीभारादिमें समझना। स राये सपुरन्ध्याम्। पुरं शरीरं ध्रियते अस्याम्, इस विग्रहमें "कर्मण्यधिकरणे च ३२७१" इस सूत्रसे कि प्रत्यय होकर पुरन्ध्रि शब्द सिद्ध हुआहै। छान्दसत्वके कारण इस स्थलमें पुरं पदकी विभक्तिका लोप नहीं हुआ। "नञ् विषयस्य" इस सूत्रसे पुर शब्द आद्युदात्त है ॥

३७७७ चतुर्थी तदर्थे । ६ । २ । ४३ ॥

चतुर्थ्यन्तार्थाय यत्तद्वाचिन्युत्तरपदे चतुर्थ्यन्तं प्रकृत्या । यूपाय दारु यूपदारु ॥

३७७७-चतुर्थी विभक्त्यन्तके निमित्त जो हो, तद्वाचक पद परे रहते पूर्ववर्त्ती चतुर्थी विभक्त्यन्त पदको प्रकृतिस्वर हो, यथा यूपाय दारु, इस विग्रहमें यूपदारु ॥

३७७८ अर्थे । ६ । २ । ४४ ॥

अर्थे परे चतुर्थ्यन्तं प्रकृत्या । देवार्थम् ॥

३७७८-अर्थ शब्द परे रहते पूर्ववर्त्ती चतुर्थ्यन्त पदको प्रकृति स्वर हो, यथा-देवाय इदम्, इस वाक्यमें देवार्थम् ॥

३७७९ क्ते च । ६ । २ । ४५ ॥

क्तान्ते परे चतुर्थ्यन्तं प्रकृत्या । गोहितम् ॥

३७७९-क्तप्रत्ययान्त पद परे रहते पूर्ववर्त्ती चतुर्थ्यन्त पदको प्रकृतिस्वर हो, यथा-गवे हितम्, इस वाक्यमें गोहितम् ॥

३७८० कर्मधारयेऽनिष्ठा । ६ । २ । ४६ ॥

क्तान्ते परे पूर्वमनिष्ठान्तं प्रकृत्या । श्रेणिकृताः । श्रेणिशब्द आद्युदात्तः । पूगकृताः । पूगशब्दोऽन्तोदात्तः । कर्मधारये किम् । श्रेण्या कृतं श्रेणिकृतम् । अनिष्ठा किम् । कृताकृतम् ॥

३७८०-कर्मधारयसमासमें क्तप्रत्ययान्त पद परे रहते पूर्ववर्त्ती जो अनिष्ठान्त पद (जो क्तक्तवतु प्रत्ययान्त नहीं हो) उसको प्रकृतिस्वर हो, यथा-श्रेणिकृताः। श्रेणि शब्द आद्युदात्त है। पूगकृताः। पूग शब्द अन्तोदात्त है। कर्मधारयसमास न होनेपर कैसा होगा? तो, श्रेण्या कृतम्, इस विग्रहमें श्रेणिकृतम्। निष्ठा प्रत्ययान्त पूर्वपद रहते कैसा होगा? तो, कृताकृतम् ॥

३७८१ अहीने द्वितीया । ६ । २ । ४७ ॥

अहीनवाचिनि समासे क्तान्ते परे द्वितीयान्तं प्रकृत्या । कष्टश्रितः । ग्रामगतः । कष्टशब्दोऽन्तोदात्तः । ग्रामशब्दो नित्स्वरेण । अहीने किम् । कान्तारातीतः ॥ अनुपसर्ग इति वक्तव्यम् ॥ * ॥ नेह । सुखप्राप्तः । थाथेत्यस्यापवादोऽयम् ॥

३७८१-अहीनवाचक समासमें क्तप्रत्ययान्त पद परे रहते पूर्ववर्त्ती द्वितीया विभक्त्यन्त पदको प्रकृतिस्वर हो, यथा-कष्टं श्रितः, इस वाक्यमें कष्टश्रितः। ग्रामं गतः, ग्रामगतः। कष्ट शब्द अन्तोदात्त है। ग्राम शब्द नित्त्वके कारण आद्युदात्त है। अहीनवाचक समास न होनेपर कैसा होगा? तो, कान्तारातीतः। उपसर्ग रहित क्तान्तपद परे रहते पूर्वपदको प्रकृतिस्वर हो, ऐसा कहना चाहिये * इस कारण 'सुखप्राप्तः' इस स्थलमें नहीं हुआ। यह सूत्र थाथादि सूत्रसे विहितस्वरका अपवाद है ॥

३७८२ तृतीया कर्मणि । ६ । २ । ४८ ॥

कर्मवाचके क्तान्ते परे तृतीयान्तं प्रकृत्या । अहिना हतः अहिहतः । रुद्रहतः । महाराजहतः । रुद्रो रगन्तः । कर्मणि किम् । रथेन यातो रथयातः ॥

३७८२-कर्मवाचक क्तप्रत्ययान्त पद परे रहते पूर्ववर्त्ती तृतीया विभक्त्यन्त पदको प्रकृतिस्वर हो, यथा-त्वोतासः। रुद्रेण हतः, इस विग्रहमें, रुद्रहतः। महाराजहतः। रुद्र शब्द रक्प्रत्ययान्त है। कर्म्मवाचक क्त प्रत्ययान्त पद परे न रहते यथा-रथेन यातः, इस वाक्यमें 'रथयातः'। इस स्थलमें प्रकृतिस्वर न हुआ ॥

३७८३ गतिरनन्तरः । ६ । २ । ४९ ॥

कर्मार्थे क्तान्ते परेऽव्यवहितो गतिः प्रकृत्या । थाथेत्यस्यापवादः । पुरोहितम् । अनन्तरः किम् । अभ्युद्धृतः । कारकपूर्वपदस्य तु सतिशिष्टस्वरः थाथादिस्वर एव । दूरादागतः ॥

३७८३-कर्म्मवाचक क्त प्रत्ययान्त पद परे रहते पूर्ववर्त्ती अव्यवहित गतिसंज्ञक शब्दको प्रकृतिस्वर हो, यह सूत्र थाथादि सूत्रका अपवाद है, यथा-पुरोहितम्। अव्यवहित न होनेपर कैसा होगा? तो, अभ्युद्धृतः। कारक पूर्वपदको तो सतिशिष्ट थाथादि स्वर ही होगा, यथा-दूरादागतः ॥

३७८४ तादौ च निति कृत्यतौ । ६ । २ । ५० ॥

तकारादौ निति तुशब्दवर्जिते कृतिपरेऽनन्तरो गतिः प्रकृत्या । अग्ने रायो नृतमस्य प्रभूतौ । सङ्गतिं गोः । कृत्स्वरापवादः । तादौ किम् । प्रजल्पाकः । निति किम् । प्रकर्ता । तृजन्तः । अतौ किम् । आगन्तुः ॥

३७८४-तकारादि, नित् तु शब्द वर्जित कृत् प्रत्यय परे रहते पूर्ववर्त्ती अव्यवहित जो गतिसंज्ञक शब्द उसको प्रकृतिस्वर हो, यथा-अग्ने रायोंनृतमस्य प्रभूतौ । सङ्गितिं गौः । यह कृत्स्वरका अपवाद है । तकारादिप्रत्यय न होनेपर यथा-प्रजल्पाकः । नित् प्रत्यय न होनेपर यथा-प्रकर्ता । प्रकर्ता यह तृच्प्रत्ययान्त है । तु प्रत्यय होनेपर कैसा होगा ? तो, आगन्तुः॥

३७८५ तवै चान्तश्च युगपत्।६।२।५१॥

तवैप्रत्ययान्तस्यान्त उदात्तो गतिश्चानन्तरः प्रकृत्या युगपच्चैतदुभयं स्यात् । अन्वेतवा उ । कृत्स्वरापवादः ॥

३७८५-एककालमें तवैप्रत्ययान्त शब्दके अन्तवर्णको उदात्तस्वर हो, और तवैप्रत्ययान्त पद परे रहते अव्यवहित पूर्ववर्त्ती गतिसंज्ञक शब्दको प्रकृतिस्वर हो,यथा-अन्वेतवा उ । यह कृत्स्वरका अपवाद है । पर्य्यायनिवृत्तिके निमित्त युगपत् शब्दका ग्रहण कियाहै । 'अन्वेतवा उ' यहां अनु शब्द "उपसर्गाश्चादिवर्जम्" इस सूत्रसे आद्युदात्त है ॥

३७८६ अनिगन्तोऽञ्चतौ वप्रत्यये । ६ । २ । ५२ ॥

अनिगन्तो गतिर्वप्रत्ययान्तेऽञ्चतौ परे प्रकृत्या । ये पराञ्चस्तान् । अनिगन्त इति किम् । प्रत्यञ्चो यन्तु । कृत्स्वरात्परत्वादयमेव । जहि वृष्ण्यानि कृणुही पराचः । वप्रत्यये किम् । उदञ्चनम् ॥

३७८६-व प्रत्ययान्त अञ्च् धातु परे रहते पूर्ववर्त्ती अनिगन्त अर्थात् इगन्त (इ-उ-ऋ-लृकारान्त) न हो ऐसा जो गतिसंज्ञक शब्द उसको प्रकृतिस्वर हो, यथा-ये पराञ्चस्तान् । इगन्त गतिसंज्ञक होनेपर कैसा होगा ? तो प्रत्यञ्चो यन्तु । कृत्स्वरसे परत्वके कारण यही स्वर होगा । " जहि वृष्ण्यानि कृणुही पराचः " । व प्रत्ययान्त अञ्च् धातु परे न होनेपर कैसा होगा ? तो उदञ्चनम् । " पराञ्चः " यहां " ऋत्विक्० " इससे क्विन् " उगिदचां सर्वनामस्थाने० " इससे नुम् हुआहै ॥

३७८७ न्यधी च । ६ । २ । ५३ ॥

वप्रत्ययान्तेऽञ्चताविगन्तावपि न्यधी प्रकृत्या । न्यङ्ङुत्तानः । उदात्तस्वरितयोर्यण इति अञ्चतेरकारः स्वरितः । अध्यङ् ॥

३७८७-व प्रत्ययान्त अञ्च् धातु परे रहते पूर्ववर्त्ती नि और अधि शब्दको इकारान्त होनेपर भी प्रकृतिस्वर हो, यथा-न्यङ्ङुत्तानः । यहां " उदात्तस्वरितयोर्यणः३६५७ " इस सूत्रसे अञ्च् धातुके अकारको स्वरितस्वर हुआ । अध्यङ् ॥

३७८८ ईषदन्यतरस्याम् ।६।२।५४ ॥

ईषत्कडारः । ईषदित्ययमन्तोदात्तः । ईषद्भेद इत्यादौ कृत्स्वर एव ॥

३७८८-ईषत् शब्दको प्रकृतिस्वर हो विकल्प करके, यथा-ईषत्कडारः । ईषत् शब्द अन्तोदात्त है । 'ईषद्भेदः' इत्यादि स्थलमें तो परत्वके कारण कृत्स्वर ही होगा ॥

३७८९ हिरण्यपरिमाणं धने।६।२।५५॥

सुवर्णपरिमाणवाचि पूर्वपदं वा प्रकृत्या धने । द्वे सुवर्णे परिमाणमस्येति द्विसुवर्णं तदेव धनं द्विसुवर्णधनम् । बहुव्रीहावपि परत्वाद्विकल्प एव । हिरण्यं किम् । प्रस्थधनम् । परिमाणं किम् । काञ्चनधनम् । धने किम् । निष्कमाला॥

३७८९-धन शब्द परे रहते हिरण्यके परिमाणवाचक पूर्वपदको विकल्प करके प्रकृतिस्वर हो, यथा-द्वे सुवर्णे परिमाणस्य, इस विग्रहमें द्विसुवर्णम्+तदेव धनम्=द्विसुवर्णधनम् । बहुव्रीहिसमासमें भी परत्वके कारण विकल्प करके पूर्वपदप्रकृतिस्वर ही होगा । हिरण्यवाचक न होनेपर कैसा होगा? तो प्रस्थधनम् । परिमाणवाचक न होनेपर कैसा होगा? तो काञ्चनधनम् । धन शब्द परे न होनेपर कैसा होगा? तो निष्कमाला । (पाँच कृष्णलाओंका एक मासा, १६ मासेका एक सुवर्ण, ४सुवर्णका एक पल होताहै ॥

३७९० प्रथमोऽचिरोपसम्पत्तौ । ६ । २ । ५६ ॥

प्रथमशब्दो वा प्रकृत्याऽभिनवत्वे । प्रथमवैयाकरणः । सम्प्रति व्याकरणमध्येतुं प्रवृत्त इत्यर्थः । प्रथमशब्दः प्रथेरमजन्तः । अचिरेति किम् । प्रथमो वैयाकरणः ॥

३७९०-अचिरोपसंपत्ति अर्थात् अभिनवत्व द्योत्य होनेपर प्रथम शब्दको विकल्प करके प्रकृतिस्वर हो, यथा-प्रथमवैयाकरणः । प्रथ धातुके उत्तर अमच् प्रत्यय करके प्रथम शब्द सिद्ध हुआहै । अचिरोपसम्पत्ति न होनेपर कैसा होगा ? तो प्रथमो वैयाकरणः । अर्थात् वैयाकरणोंमें प्रधान । यहां अन्तोदात्त ही होगा ॥

३७९१ कतरकतमौ कर्मधारये।६।२।५७

वा प्रकृत्या । कतरकठः । कर्मधारयग्रहणमुत्तरार्थम् । इह तु प्रतिपदोक्तत्वादेव सिद्धम् ॥

३७९१-कर्म्मधारयसमासमें पूर्ववर्त्ती कतर और कतम शब्दको विकल्प करके प्रकृतिस्वर हो, यथा-कतरकठः । कर्म्मधारय शब्दका ग्रहण उत्तरार्थ है । इस स्थलमें तो प्रतिपदोक्तत्वसे ही प्रकृतिस्वर सिद्ध है ॥

३७९२ आर्यो ब्राह्मणकुमारयोः । ६ । २ । ५८ ॥

आर्यकुमारः । आर्यब्राह्मणः । आर्यो ण्यदन्तत्वादन्तस्वरितः । आर्यः किम् । परमब्राह्मणः । ब्राह्मणादीति किम् । आर्यक्षत्रियः । कर्मधारय इत्येव ॥

३७९२-ब्राह्मण और कुमार शब्द परे रहते पूर्ववर्त्ती आर्य्य शब्दको कर्मधारयसमासमें प्रकृतिस्वर हो, यथा—आर्य्यब्राह्मणः । आर्य्यकुमारः । आर्य्य शब्द ण्यत् प्रत्ययान्त है, अत एव उसका अन्त्यवर्ण स्वरित है । आर्य्य शब्द पूर्वमें न होनेपर कैसा होगा ? तो परमब्राह्मणः । ब्राह्मणादि शब्द परे न होनेपर कैसा होगा? तो आर्य्यक्षत्रियः ॥

३७९३ राजा च । ६ । २ । ५९ ॥

ब्राह्मणकुमारयोः परतो वा प्रकृत्या कर्मधारये । राजब्राह्मणः । राजकुमारः । योगविभाग उत्तरार्थः ॥

३७९३-कर्म्मधारयसमासमें ब्राह्मण और कुमार शब्द परे रहते पूर्ववर्त्ती राजन् शब्दको विकल्प करके प्रकृतिस्वर हो, यथा—राजब्राह्मणः । राजकुमारः । योगविभाग उत्तर-सूत्रमें राजन् शब्दकी अनुवृत्त्यर्थ है ॥

३७९४ षष्ठी प्रत्येनसि । ६ । २ । ६० ॥

षष्ठ्यन्तो राजा प्रत्येनसि परे वा प्रकृत्या । राजप्रत्येनाः । षष्ठी किम् अन्यत्र न ॥

३७९४-कर्म्मधारयसमासमें प्रत्येनस् शब्द परे रहते पूर्ववर्त्ती षष्ठीविभक्त्यन्त राजन् शब्दको विकल्प करके प्रकृतिस्वर हो, यथा—राजप्रत्येनाः । षष्ठीविभक्त्यन्त क्यों कहा ? तो अन्यत्र अर्थात् राजा चासौ प्रत्येनाश्च, इस विग्रहमें "राजप्रत्येनाः" यहां नहीं हो ॥

३७९५ क्ते नित्यार्थे । ६ । २ । ६१ ॥

क्तान्ते परे नित्यार्थे समासे पूर्वं वा प्रकृत्या । नित्यप्रहसितः । काला इति द्वितीयासमासोऽयम् । नित्यशब्दस्त्यबन्त आद्युदात्तः । हसित इति थाथादिस्वरेणान्तोदात्तः । नित्यार्थे किम् । मुहूर्तप्रहसितः ॥

३७९५-नित्यार्थक समासमें क्तप्रत्ययान्त शब्द परे रहते पूर्ववर्त्ती शब्दको विकल्प करके प्रकृतिस्वर हो, यथा—"नित्यप्रहसितः" यहां "कालाः ६९०" इस सूत्रसे द्वितीयातत्पुरुषसमास हुआ । नित्य शब्द त्यप् प्रययान्त है, अत एव आद्युदात्त है । हसित शब्द थाथादिस्वरसे अन्तोदात्त है । नित्यार्थक समास न होनेपर कैसा होगा ? तो मुहूर्त्तप्रहसितः ॥

३७९६ ग्रामः शिल्पिनि । ६ । २ । ६२ ॥

वा प्रकृत्या । ग्रामनापितः । ग्रामशब्दः आद्युदात्तः । ग्रामः किम् । परमनापितः । शिल्पिनि किम् । ग्रामरथ्या ॥

३७९६-शिल्पिवाचक शब्द परे रहते पूर्ववर्त्ती ग्राम शब्दको विकल्प करके प्रकृतिस्वर हो, यथा—ग्रामनापितः । ग्राम शब्द आद्युदात्त है । ग्राम शब्द पूर्वमें न होनेपर तो परमनापितः । शिल्पिवाचक शब्द परे न होनेपर कैसा होगा ? तो ग्रामरथ्या ॥

३७९७ राजा च प्रशंसायाम् । ६ । २ । ६३ ॥

शिल्पिवाचिनि परे प्रशंसार्थं राजपदं वा प्रकृत्या । राजनापितः । राजकुलालः । प्रशंसायां किम् । राजनापितः । शिल्पिनि किम् । राजहस्ती ॥

३७९७-शिल्पिवाचक शब्द परे रहते प्रशंसार्थ पूर्ववर्त्ती राजन् शब्दको विकल्प करके प्रकृतिस्वर हो, यथा—राजनापितः । राजकुलालः । प्रशंसार्थ न होनेपर कैसा होगा ? तो राजनापितः । शिल्पिवाचक शब्द परे न होनेपर कैसा होगा ? तो राजहस्ती ॥

३७९८ आदिरुदात्तः । ६ । २ । ६४ ॥

अधिकारोऽयम् ॥

३७९८--पूर्वपदका आदिवर्ण उदात्त हो, यह अधिकार-सूत्र है । 'पूर्वपदकम्' इसका यहां अर्थात् षष्ठ्यन्तत्वेन विपरिणाम है । इस प्रकरणमें सब जगह पूर्वपदविषयमें षष्ठ्यर्थमें प्रथमा जानना ॥

३७९९ सप्तमीहारिणौ धर्म्येऽहरणे । ६ । २ । ६५ ॥

सप्तम्यन्तं हारिवाचि च आद्युदात्तं धर्म्ये परे । देयं यः स्वीकरोति स हारीत्युच्यते । धर्म्यमित्याचारनियतं देयम् । मुकुटेकार्षापणम् । हलेद्विपदिका । संज्ञायामिति सप्तमीसमासः । कारनाम्नि चेत्यलुक् । याज्ञिकाश्वः । वैयाकरणहस्ती । क्वचिदयमाचारो मुकुटादिषु कार्षापणादि दातव्यं याज्ञिकादीनां त्वश्वादिरिति । धर्म्येति किम् । कर्मकरवर्द्धितकः । अहरणे किम् । वाडवहरणम् । वडवाया अयं वाडवः । तस्य बीजनिषेकादुत्तरकालं शरीरपुष्ट्यर्थं यद्दीयते तद्धरणमित्युच्यते । परोऽपि कृत्स्वरो हारिस्वरेण बाध्यत इत्यहरण इति निषेधेन ज्ञाप्यते । तेन वाडवहार्यमिति हारिस्वरः सिद्ध्यति ॥

३७९९-हरणभिन्न धर्म्यबोधक शब्द परे रहते पूर्ववर्त्ती सप्तम्यन्त और हारिवाचक शब्दोंका आदिवर्ण उदात्त हो, देयं यः स्वीकरोति स हारी, अर्थात् जो व्यक्तिदेय वस्तुको स्वीकार करे उसको हारी कहतेहैं । धर्म्य शब्दसे आचार-नियत देय द्रव्य समझना । यथा—मुकुटेकार्षापणम् । हलेद्विपदिका । यहां "संज्ञायाम् ७२१" इस सूत्रसे सप्तमी-तत्पुरुषसमास हुआ । "कारनाम्नि० ९६८" इस सूत्रसे विभक्तिका अलुक् हुआ । याज्ञिकाश्वः । वैयाकरणहस्ती । किसी २ स्थानमें इस प्रकार आचार है कि, मुकुटादिमें कार्षापण दियाजाताहै और याज्ञिकादिओंको तो अश्वादि देय होताहै । धर्म्यबोधक शब्द परे न होनेपर कैसा होगा ? तो कर्मकरवर्द्धितकः । हरणभिन्न धर्म्यबोधक शब्द परे न होनेपर कैसा होगा ? तो वाडवहरणम् । वडवाया अयं वाडवः ।

वडवा संबन्धिको वाडव कहतेहैं । बीजनिषेकके पश्चात् शरीर-पोषणार्थ घोडीको जो दियाजाय उसको हरण कहतेहैं । कृत्स्वर परवर्त्ती होनेपर भी हारिस्वरके द्वारा बाधित होताहै, यह 'अहरणे' इस निषेधसे जानाजाताहै, इसकारण 'वाडवहार्य्यम्' इस स्थलमें हारिस्वर सिद्ध होताहै ॥

३८०० युक्ते च । ६ । २ । ६६ ॥

युक्तवाचिनि समासे पूर्वमाद्युदात्तम् । गोबल्लवः । कर्तव्ये तत्परो युक्तः ॥

३८००—युक्तवाचक समासमें पूर्वपदको आद्युदात्तस्वर हो, यथा—गोवल्लवः । कर्त्तव्यमें तत्परको युक्त कहतेहैं ॥

३८०१ विभाषाऽध्यक्षे । ६ । २ ।६७॥

गवाध्यक्षः ॥

३८०१—अध्यक्ष शब्द परे रहते समासमें पूर्वपदको आद्युदात्तस्वर हो, यथा—गवाध्यक्षः ॥

३८०२ पापं च शिल्पिनि ।६।२।६८॥

पापनापितः ॥ पापाणके इति प्रतिपदोक्तस्यैव ग्रहणात् षष्ठीसमासे न ॥

३८०२—शिल्पिवाचक शब्द परे रहते पूर्ववर्त्ती पाप शब्दको आद्युदात्तस्वर हो, यथा—पापनापितः । इस सूत्रमें "पापाणके ७३३" इस प्रतिपदोक्तसमासके ही ग्रहणके कारण षष्ठीतत्पुरुषसमासमें नहीं होगा ॥

३८०३ गोत्राऽन्तेवासिमाणवब्राह्मणेषु क्षेपे । ६ । २ । ६९ ॥

भार्यासौश्रुतः । सुश्रुतोऽपत्यस्य भार्याप्रधानतया क्षेपः । अन्तेवासी । कुमारीदाक्षाः । ओदनपाणिनीयाः । कुमार्यादिलाभकामा ये दाक्ष्यादिभिः प्रोक्तानि शास्त्राण्यधीयते ते एवं क्षिप्यन्ते । भिक्षामाणवः । भिक्षां लप्स्येऽहमिति माणवः । भयब्राह्मणः । भयेन ब्राह्मणः सम्पद्यते । गोत्रादिषु किम् । दासीश्रोत्रियः । क्षेपे किम् । परमब्राह्मणः ॥

३८०३—क्षेपवाची समासमें, गोत्रवाचक अन्तेवासिवाचक, माणवक और ब्राह्मण शब्द परे रहते पूर्ववर्त्ती पदको आद्युदात्तस्वर हो, यथा—भार्यासौश्रुतः । सुश्रुतकी सन्तानको भार्याप्रधानत्वके कारण उसकी निन्दा है । अन्तेवासी यथा—कुमारीदाक्षाः । ओदनपाणिनीयाः । अर्थात् कुमारी आदिके लाभके निमित्त जो दाक्ष्यादिसे प्रोक्त शास्त्रको अध्ययन करें, वह इसप्रकारसे निन्दित होतेहैं । भिक्षामाणवः । "भिक्षां लप्स्येऽहम्" ऐसा जो कहै, उसको भिक्षा माणव कहतेहैं । भयब्राह्मणः । भयसे जो ब्राह्मण बनगयाहो । गोत्रादि परे न होनेपर कैसा होगा ? तो दासीश्रोत्रियः । क्षेपार्थक समास न होनेपर कैसा होगा ? तो परमब्राह्मणः । (दाक्षिणा प्रोक्तम्= दाक्षम् तदधीते दाक्षः । सुश्रृणोतीति=सुश्रुत् तस्यापत्यं सौश्रुतः) ॥

३८०४ अङ्गानि मैरेये ।६।२।७०॥

मद्यविशेषो मैरेयः । मधुमैरेयः । मधुविकारस्य तस्य मध्वङ्गम् । अङ्गानि किम् । परममैरेयः । मैरेये किम् । पुष्पासवः ॥

३८०४—मद्यविशेषको मैरेय कहतेहैं, मैरेय शब्द परे रहते पूर्ववर्त्ती मद्यार्थारम्भक वाचक शब्दको आद्युदात्तस्वर हो, यथा—मधुमैरेयः । मधुका विकार मद्य है, अत एव मधु मद्यका अङ्ग आरम्भक होता है । मद्यका आरम्भकवाची न होनेपर कैसा होगा ? तो परममैरेयः । मैरेय शब्द परे न होनेपर कैसा होगा ? तो पुष्पासवः ॥

३८०५ भक्ताख्यास्तदर्थेषु ।६।२।७१॥

भक्तमन्नम् । भिक्षाकंसः । भाजीकंसः । भिक्षादयोऽन्नविशेषाः । भक्ताख्याः किम् । समाशशालयः । समशनं समाश इति क्रियामात्रमुच्यते । तदर्थेषु किम् । भिक्षाप्रियः । बहुव्रीहिरयम् । अत्र पूर्वपदमन्तोदात्तम् ॥

३८०५—भक्तार्थवाचक शब्द परे रहते भक्तवाचक पूर्वपदको अनुदात्तस्वर हो, यथा—भिक्षाकंसः । भाजीकंसः । भिक्षादि शब्दसे अन्नविशेष समझना । भक्तवाचक पूर्वपद न होनेपर कैसा होगा ? तो समाशशालयः । 'समशनम् समाशः' इससे क्रियामात्र कहाजाता है । भक्तार्थवाचक शब्द परे न होनेपर कैसा होगा?तो भिक्षाप्रियः । यह बहुव्रीहिसमासनिष्पन्न है । यहां पूर्वपद अन्तोदात्त है ॥

३८०६ गोबिडालसिंहसैन्धवेषूपमाने । ६ । २ । ७२ ॥

धान्यगवः । गोबिडालः । तृणसिंहः । सक्तुसैन्धवः । धान्यं गौरिवेति विग्रहः । व्याघ्रादिः । गवाकृत्या सन्निवेशितं धान्यं धान्यगवशब्देनोच्यते । उपमाने किम् । परमसिंहः ॥

३८०६—उपमानवाचक गो, बिडाल, सिंह और सैन्धव शब्द परे रहते पूर्ववर्त्ती पदको अनुदात्तस्वर हो, यथा—धान्यगवः । गोबिडालः । तृणसिंहः । सक्तुसैन्धवः । धान्यं गौरिव, इस विग्रहमें धान्यगवः पद सिद्ध हुआ है । यह व्याघ्रादि है । गौकी आकृतिसे राशीकृत धान्यको धान्यगव कहते हैं । उपमानवाचक न होनेपर कैसा होगा ? तो परमसिंहः । इस स्थलमें पूर्वपद अनुदात्त नहीं हुआ ॥

३८०७ अके जीविकार्थे । ६ । २।७३॥

दन्तलेखकः । यस्य दन्तलेखनेन जीविका । नित्यं क्रीडेति समासः । अके किम् । रमणीयकर्ता। जीविकार्थे किम्।इक्षुभक्षिकां मे धारयसि॥

३८०७—अकप्रत्ययान्त जीविकावाचक शब्द परे रहते समासमें पूर्वपद आद्युदात्त हो, यथा—दन्तलेखकः । जिसकी दन्तलेखनद्वारा जीविका हो, वह दन्तलेखक कहाता है । इस स्थलमें " नित्यं क्रीडा ७११ " इस सूत्रसे समास हुआ है ।

अक प्रत्ययान्त पद परे न रहते कैसा होगा ? तो रमणीयकर्त्ता। जीविकार्थक न होनेपर कैसा होगा ? तो इक्षुभक्षिकां मे धारयसि ॥

३८०८ प्राचां क्रीडायाम् । ६ । २ । ७४ ॥

प्राग्देशवर्त्तिनां या क्रीडा तद्वाचिनि समासे अकप्रत्ययान्ते परे पूर्वमाद्युदात्तं स्यात् । उद्दालकपुष्पभञ्जिका । संज्ञायामिति ण्वुल् । प्राचां किम् । जीवपुत्रप्रचायिका । इयमुदीचां क्रीडा । क्रीडायां किम् । तव पुष्पप्रचायिका । पर्याये ण्वुल् ॥

३८०८-पूर्वदेशवर्त्ती लोगोंकी जो क्रीडा, तद्वाचक समासमें अक प्रत्ययान्त पद परे रहते पूर्ववर्त्ती पद आद्युदात्त हो, यथा-उद्दालकपुष्पभञ्जिका । इस स्थलमें " संज्ञायाम् ३२८६ " इस सूत्रसे ण्वुल् प्रत्यय हुआ है । पूर्वदेशवासिओंकी क्रीडा न होनेपर कैसा होगा? तो जीवपुत्रप्रचायिका । यह उत्तरदेशिओंकी क्रीडा है, क्रीडा न होनेपर तो तव पुष्पप्रचायिका यहां पर्यायमें ण्वुल् प्रत्यय हुआ है ॥

३८०९ अणि नियुक्ते । ६ । २ । ७५ ॥

अण्णन्ते परे नियुक्तवाचिनि समासे पूर्वमाद्युदात्तम् । छत्रधारः । नियुक्ते किम् । काण्डलावः ॥

३८०९-अण्प्रत्ययान्त शब्द परे रहते नियुक्तवाचक समासमें पूर्ववर्त्ती पद आद्युदात्त हो, यथा-छत्रधारः । नियुक्तवाचक समास न होनेपर कैसा होगा ? तो काण्डलावः ॥

३८१० शिल्पिनि चाऽकृञः । ६ । २ । ७६ ॥

शिल्पिवाचिनि समासे अण्णन्ते परे पूर्वमाद्युदात्तं स चेदण् कृञः परो न भवति । तन्तुवायः । शिल्पिनि किम् । काण्डलावः । अकृञः किम् । कुम्भकारः ॥

३८१०-शिल्पिवाचक समासमें अण्प्रत्ययान्त शब्द परे रहते पूर्वपद आद्युदात्त हो, वह अण् प्रत्यय यदि कृञ् धातुके उत्तर विहित न हो तो, यथा-तन्तुवायः । शिल्पीवाचक समास न होनेपर कैसा होगा ? तो काण्डलावः । कृञ् धातुके उत्तर अण् प्रत्यय होनेपर कैसा होगा ? तो कुम्भकारः ॥

३८११ संज्ञायां च । ६ । २ । ७७ ॥

अण्णन्ते परे । तन्तुवायो नाम कृमिः । अकृञ इत्येव । रथकारो नाम ब्राह्मणः ॥

३८११-संज्ञा होनेपर अण्प्रत्ययान्त पद परे रहते पूर्वपदको आद्युदात्तस्वर हो, यथा-तन्तुवायो नाम कृमिः । कृञ् धातुके उत्तर अण् प्रत्यय न होनेपर ही होगा, इस कारण " रथकारो नाम ब्राह्मणः " यहां न हुआ ॥

३८१२ गोतन्तियवं पाले । ६ । २ । ७८ ॥

गोपालः । तन्तिपालः । यवपालः । अनियुक्तार्थो योगः । गो इति किम् । वत्सपालः । पाले इति किम् । गोरक्षः ॥

३८१२-पाल शब्द परे रहते पूर्ववर्त्ती गो, तन्ति और यव शब्दको आद्युदात्तस्वर हो, यथा-गोपालः । तन्तिपालः । यवपालः । योग शब्दका अनियुक्त अर्थ जानना । गो शब्द पूर्वमें न रहते कैसा होगा ? तो वत्सपालः । पाल शब्द परे न होनेपर कैसा होगा ? तो गोरक्षः ॥

३८१३ णिनि । ६ । २ । ७९ ॥

पुष्पहारी ॥

३८१३-णिन्प्रत्ययान्त पद परे रहते पूर्ववर्त्ती पद आद्युदात्त हो, यथा-पुष्पहारी ॥

३८१४ उपमानं शब्दार्थप्रकृतावेव । ६ । २ । ८० ॥

उपमानवाचि पूर्वपदं णिन्यन्ते परे आद्युदात्तम् । उष्ट्रक्रोशी । ध्वाङ्क्षरावी । उपमानग्रहणमस्य पूर्वयोगस्य च विषयविभागार्थम् । शब्दार्थप्रकृतौ किम् । वृकवञ्ची । प्रकृतिग्रहणं किम् । प्रकृतिरेव यत्रोपसर्गनिरपेक्षा शब्दार्था तत्रैव यथा स्यात् इह मा भूत् । गर्दभोच्चारी ॥

३८१४-शब्दार्थक धातुप्रकृतिक णिन्प्रत्ययान्त पद परे रहते पूर्ववर्त्ती उपमानवाचक पद आद्युदात्त हो, यथा-उष्ट्रक्रोशी । ध्वाङ्क्षरावी । इस स्थलमें उपमान शब्दका ग्रहण इस योगके और पूर्वयोगके विषयविभागार्थ है । शब्दार्थक धातुप्रकृतिक न होनेपर कैसा होगा ? तो वृकवञ्ची । प्रकृतिशब्दका ग्रहण क्यों किया ? तो जिस स्थलमें प्रकृति ही उपसर्गनिरपेक्षक होकर शब्दार्थक हो, उसी स्थलमें हो अन्यत्र नहीं, अत एव " गर्दभोच्चारी " इस स्थलमें आद्युदात्त नहीं हुआ ॥

३८१५ युक्तारोह्यादयश्च । ६ । २ । ८१ ॥

आद्युदात्ताः । युक्तारोही । आगतयोधी । क्षीरहोता ॥

३८१५-युक्तारोही आदि शब्दोंको आद्युदात्तस्वर हो, यथा-युक्तारोही । आगतयोधी । क्षीर होता ॥

३८१६ दीर्घकाशतुषभ्राष्ट्रवटं जे । ६ । २ । ८२ ॥

कुटीजः । काशजः । तुषजः । भ्राष्ट्रजः वटजः ॥

३८१६-ज शब्द परे रहते दीर्घान्त पूर्वपद और काश, तुष, भ्राष्ट्र और वट शब्द आद्युदात्त हों, यथा-कुटीजः । काशजः । तुषजः । भ्राष्ट्रजः । वटजः ॥

३८१७ अन्त्यात्पूर्वं बह्वचः । ६ । २ । ८३ ॥

बह्वचः पूर्वस्यान्त्यात्पूर्वपदमुदात्तं जे उत्तर-

पदे। उपसरजः। आमलकीजः। बह्वचः किम्। दग्धजानि तृणानि ॥

३८१७-ज शब्द परे रहते पूर्ववर्त्ती बहुस्वरविशिष्ट शब्दका अन्त्यसे पूर्व जो पद वह उदात्त हो, यथा-उपसरजः। आमलकीजः। बहुस्वरविशिष्ट न होनेपर कैसा होगा ? तो दग्धजानि तृणानि। स्त्रीगवादिमें गर्भाधानके निमित्त जो बलीवर्दोंका प्रथम गमन, उसको उपसर कहते हैं 'प्रजने सर्तेः' इससे अप्, तत्र जातः उपसरजः॥

३८१८ ग्रामेऽनिवसन्तः।६।२।८४॥

ग्रामे परे पूर्वपदमुदात्तम्। तच्चेन्निवसद्वाचि न। मल्लग्रामः। ग्रामशब्दोऽत्र समूहवाची। देवग्रामः। देवस्वामिकः। अनिवसन्तः किम्। दाक्षिग्रामः। दाक्षिनिवासः॥

३८१८-ग्राम शब्द परे रहते पूर्वपद उदात्त हो ग्राम शब्द यदि निवासार्थक न हो, यथा-मल्लग्रामः। इस स्थलमें ग्राम शब्दसे समूह समझना। देवग्रामः,अर्थात् देवस्वामिकः। निवासार्थक होनेपर कैसा होगा ? तो दाक्षिग्रामः, अर्थात् दाक्षिनिवासः॥

३८१९ घोषादिषु च।६।२।८५॥

दाक्षिघोषः। दाक्षिकटः। दाक्षिह्रदः॥

३८१९-घोषादि शब्द परे रहते पूर्वपद आद्युदात्त हो, यथा-दाक्षिघोषः। दाक्षिकटः। दाक्षिह्रदः॥

३८२० छात्र्यादयः शालायाम्। ६।२।८६॥

छात्रिशाला। व्याडिशाला। यदापि शालान्तः समासो नपुंसकलिङ्गो भवति तदापि तत्पुरुषे शालायां नपुंसक इत्येतस्मात्पूर्वविप्रतिषेधेनाऽयमेव स्वरः। छात्रिशालम्॥

३८२०-शाला शब्द परे रहते पूर्ववर्त्ती छात्रि आदि शब्द आद्युदात्त हो, यथा-छात्रिशाला। व्याडिशाला। जब भी शाला शब्दान्त समास क्लीबलिङ्ग होता है तबभी "तत्पुरुषे शालायां नपुंसके ३८५७" इस सूत्रसे पूर्वप्रतिषेधके कारण यह आद्युदात्तस्वर ही होगा, यथा-छात्रिशालम्॥

३८२१ प्रस्थेऽवृद्धमकर्क्यादीनाम्। ६।२।८७॥

प्रस्थशब्दे उत्तरपदे कर्क्यादिवर्जितमवृद्धं पूर्वपदमाद्युदात्तं स्यात्। इन्द्रप्रस्थः। अवृद्धं किम्। दाक्षिप्रस्थः। अकर्क्यादीनामिति किम्। कर्कीप्रस्थः। मकरीप्रस्थः॥

३८२१-प्रस्थ शब्द परे रहते कर्क्यादि शब्दभिन्न अवृद्ध अर्थात् वृद्धसंज्ञक न हो ऐसे पूर्वपदको आद्युदात्तस्वर हो, यथा-इन्द्रप्रस्थः। वृद्धसंज्ञक होनेपर कैसा होगा ? तो दाक्षिप्रस्थः। कर्क्यादि शब्द होनेपर कैसा होगा ? तो कर्कीप्रस्थः। मकरीप्रस्थः॥

३८२२ मालादीनां च।६।२।८८॥

वृद्धार्थमिदम्। मालाप्रस्थः। शोणाप्रस्थः॥

३८२२-प्रस्थ शब्द परे रहते पूर्ववर्त्ती मालादि शब्दोंको आद्युदात्तस्वर हो, यह वृद्धार्थ सूत्र है। यथा-मालाप्रस्थः। शोणाप्रस्थः "एङ् प्राचां देशे" इससे शोण शब्दको वृद्धत्व हुआ॥

३८२३ अमहन्नवन्नगरेऽनुदीचाम्।६।२।८९॥

नगरे परे महन्नवन्वर्जितं पूर्वमाद्युदात्तं स्यात् तच्चेदुदीचां न। ब्रह्मनगरम्। अमेति किम्। महानगरम्। नवनगरम्। अनुदीचां किम्। कार्त्तिनगरम्॥

३८२३-नगर शब्द परे रहते महत् और नवन् शब्द भिन्न पूर्ववर्त्ती शब्द आद्युदात्त हो वह यदि उत्तरदेशवासिओं का न हो तो, यथा-ब्रह्मनगरम्। महदादि पूर्वपद होनेपर कैसा होगा ? तो महानगरम्। नवनगरम्। उत्तरदेशवासिओंका होनेपर यथा-कार्त्तिनगरम्॥

३८२४ अर्मे चाऽवर्णं द्व्यच् त्र्यच्। ६।२।९०॥

अर्मे परे द्व्यच् त्र्यच् पूर्वमवर्णान्तमाद्युदात्तम्। गुप्तार्मम्। कुक्कुटार्मम्। अवर्णं किम्। बृहदर्मम्। द्व्यच् त्र्यच् किम्। कपिञ्जलार्मम्। अमहन्नवन्नित्येव। महार्मम्। नवार्मम्॥

३८२४-अर्म्म शब्द परे रहते पूर्ववर्त्ती द्विस्वर और त्रिस्वरविशिष्ट पूर्ववर्त्ती अवर्णान्त पद आद्युदात्त हो, यथा-गुप्तार्मम्। कुक्कुटार्मम्। अवर्णान्त न होनेपर यथा-बृहदर्मम्। द्व्यच् त्र्यच् न होनेपर यथा-कपिञ्जलार्मम्। महत् और नवन् शब्द भिन्न ही अवर्णान्त पूर्वपद आद्युदात्त होगा इससे "महार्मम्। नवार्मम्" यहां आद्युदात्तस्वर नहीं हुआ॥

३८२५ न भूताधिकसञ्जीवमद्राश्मकज्जलम्।६।२।९१॥

अर्मे परे नैतान्याद्युदात्तानि। भूतार्मम्। अधिकार्मम्। सञ्जीवार्मम्। मद्राश्मग्रहणं सङ्घातविगृहीतार्थम्। मद्रार्मम्। अश्मार्मम्। मद्राश्मार्मम्। कज्जलार्मम्॥ आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम्॥ * ॥ दिवोदासाय दाशुषे॥

३८२५-अर्म्म शब्द परे रहते पूर्ववर्त्ती भूत, अधिक, सञ्जीव, मद्र, अश्म और कज्जल शब्दको आद्युदात्त स्वर न हो, यथा-भूतार्म्मम्। अधिकार्म्मम्। सञ्जीवार्म्मम्। मद्राश्म शब्दका ग्रहण संघातार्थ और विगृहीतार्थ है, यथा-मद्रार्म्मम्। अश्मार्म्मम्। मद्राश्मार्म्मम्। कज्जलार्म्मम्।

आद्युदात्त प्रकरणमें दिवोदासादि शब्दोंके आद्युदात्तका उपसंख्यान करना चाहिये * यथा-दिवो॑दासाय दाशुषे॑ ॥

३८२६ अन्तः । ६ । २ । ९२ ॥

अधिकारोऽयम् । प्रागुत्तरपदादिग्रहणात् ॥

३८२६-यह अधिकारसूत्र है, इसका उत्तरपदादिग्रहणके पूर्वपर्य्यन्त अधिकार चलेगा-॥

३८२७ सर्वं गुणकात्स्न्र्ये । ६ ।२।९३॥

सर्वशब्दः पूर्वपदमन्तोदात्तम् । सर्वश्वेतः । सर्वमहान् । सर्वं किम् । परमश्वेतः । आश्रयव्याप्त्या परमत्वं श्वेतस्येति गुणकात्स्न्र्ये वर्तते । गुणेति किम् । सर्वसौवर्णः । कात्स्न्र्ये किम् । सर्वेषां श्वेततरः सर्वश्वेतः ॥

३८२७-गुणकात्स्न्र्यमें वर्त्तमान पूर्ववर्त्ती सर्व शब्द अन्तोदात्त हो, यथा-सर्वश्वेतः । सर्वमहान् । सर्व शब्द पूर्वमें न होनेपर यथा-परमश्वेतः । आश्रयव्याप्तिसे श्वेतको परमत्व है, अत एव गुणकात्स्न्र्यमें वर्तमान है । गुणकात्स्न्र्यबोधक सर्व शब्द न होनेपर यथा-सर्वसौवर्णः । कात्स्न्र्यबोधक न होनेपर यथा-सर्वेषां श्वेततरः=सर्वश्वेतः ॥

३८२८ संज्ञायां गिरिनिकाययोः । ६ । २ । ९४ ॥

एतयोः परतः पूर्वमन्तोदात्तम् । अञ्जनागिरिः । मौण्डनिकायः । संज्ञायां किम् । परमगिरिः । ब्राह्मणनिकायः ॥

३८२८-संज्ञा होनेपर गिरि और निकाय शब्द परे रहते पूर्ववर्त्ती पदको आद्युदात्तस्वर हो, यथा-अञ्जनागिरिः । मौण्डनिकायः । संज्ञा न होनेपर यथा-परमगिरिः । ब्राह्मणनिकायः । " अञ्जनागिरिः " इसमें " वनगिर्योः संज्ञायाम्० " इससे दीर्घ हुआहै ॥

३८२९ कुमार्यां वयसि । ६ । २ ।९५॥

पूर्वपदमन्तोदात्तम् । वृद्धकुमारी । कुमारीशब्दः पुंसा सहासम्प्रयोगमात्रं प्रवृत्तिनिमित्तमुपादाय प्रयुक्तो वृद्धादिभिः समानाधिकरणः । तच्च वय इह गृह्यते न कुमारत्वमेव । वयसि किम् । परमकुमारी ॥

३८२९-कुमारी शब्द परे रहते वयस्में वर्तमान पूर्ववर्त्ती शब्दका अन्तवर्ण उदात्त हो, यथा-वृद्धकुमारी । कुमारी शब्द पुरुषके साथ असम्प्रयोगरूप प्रवृत्तिनिमित्तको लेकर प्रयुक्त हुआहै, इसलिये वृद्धादि शब्दोंके साथ समानाधिकरण होताहै । वह वयःक्रम इस स्थलमें वृद्धत्व गृहीत है, कुमारत्वही नहीं, इससे 'वयसि' यह पूर्वपदका विशेषण है, यह सूचित हुआ है, अवस्थावाचक न होनेपर परमकुमारी ॥

३८३० उदकेऽकेवले । ६ । २।९६॥

अकेवलं मिश्रं तद्वाचिनि समासे उदके परे पूर्वमन्तोदात्तम् । गुडोदकम् । स्वरे कृतेऽत्र एकादेशः । स्वरितो वाऽनुदात्ते पदादाविति पक्षे स्वरितः । अकेवले किम् । शीतोदकम् ॥

३८३०-अकेवल अर्थात् मिश्रवाचक समासमें उदक शब्द परे रहते पूर्वपद अन्तोदात्त हो, यथा-गुडोदकम् । स्वर करनेपर इस स्थलमें एकादेश होगा, " स्वरितो वानुदात्ते पदादौ ३६५९ " इस सूत्रसे विकल्पपक्षमें स्वरित स्वर होगा । केवलार्थमें यथा-शीतोदकम् । गुडमिश्रमुदकम्-गुडोदकम् ॥

३८३१ द्विगौ क्रतौ । ६ । २ । ९७ ॥

द्विगावुत्तरपदे क्रतुवाचिनि समासे पूर्वमन्तोदात्तम् । गर्गत्रिरात्रः । द्विगौ किम् । अतिरात्रः । क्रतौ किम् । बिल्वहोमस्य सप्तरात्रो बिल्वसप्तरात्रः ॥

३८३१-उत्तर पद द्विगु समास क्रतुवाचक परे रहते पूर्व पद अन्तोदात्त हो, यथा-गर्गत्रिरात्रः । द्विगु समास न होनेपर अतिरात्रः । क्रतु न होनेपर यथा-बिल्वहोमस्य सप्तरात्रो बिल्वसप्तरात्रः । तिसृणां रात्रीणां समाहारस्त्रिरात्रम् । "अहस्सर्वैकदेश० ७८७ " इससे अच् समासान्त, ' संख्यापूर्वं रात्रं क्लीबम् ' इससे नपुंसक । रात्रिमतिक्रान्तः अतिरात्रः॥

३८३२ सभायां नपुंसके । ६ । २।९८॥

सभायां परतो नपुंसकलिङ्गे समासे पूर्वमन्तोदात्तम् । गोपालसभम् । स्त्रीसभम् । सभायां किम् । ब्राह्मणसेनम् । नपुंसके किम् । राजसभा । प्रतिपदोक्तनपुंसकग्रहणान्नेह । रमणीयसभम् । ब्राह्मणकुलम् ॥

३८३२-नपुंसकलिङ्ग समासमें सभा शब्द परे रहते पूर्व पद अन्तोदात्त हो, यथा-गोपालसभम् । स्त्रीसभम् । सभा शब्द परे न होनेपर ब्राह्मणसेनम् । नपुंसक न होनेपर यथा-राजसभा । इस स्थलमें प्रतिपदोक्त नपुंसकके ग्रहणके कारण रमणीयसभम्, ब्राह्मणकुलम्, इन पदोंमें पूर्वपदको अन्तोदात्त न हुआ । रमणीया सभा यस्येति रमणीयसभम्-बहुव्रीहिः ॥

३८३३ पुरे प्राचाम् । ६ । २ । ९९ ॥

देवदत्तपुरम् । नान्दीपुरम् । प्राचां किम् । शिवपुरम् ॥

३८३३-पूर्व देश होनेपर समासमें पुर शब्द परे रहते पूर्व पदको अन्तोदात्त स्वर हो, यथा-देवदत्तपुरम् । नान्दीपुरम् । पूर्व देश न होनेपर शिवपुरम् ॥

३८३४ अरिष्टगौडपूर्वे च । ६।२।१००॥

पुरे परे अरिष्टगौडपूर्वे समासे पूर्वमन्तोदात्तम् । अरिष्टपुरम् । गौडपुरम् । पूर्वग्रहणं किम् । इहापि यथा स्यात् । अरिष्टाश्रितपुरम् । गौडभृत्यपुरम् ॥

३८३४-पुर शब्द परे रहते अरिष्ट, गौड पूर्वक समासमें पूर्व पद अन्तोदात्त हो, यथा-अरिष्टपुरम् । गौडपुरम् । पूर्व शब्दके ग्रहणके कारण अरिष्टाश्रितपुरम् । गौडभृत्यपुरम् । इस स्थलमें भी पूर्वपद अन्तोदात्त हुआ ॥

३८३५ न हास्तिनफलकमार्देयाः । ६ । २ । १०१ ॥

पुरे परे नैतान्यन्तोदात्तानि । हास्तिनपुरम् । फलकपुरम् । मार्देयपुरम् । मृदेरपत्यमिति शुभ्रादित्वात् ढक् ॥

३८३५-पुर शब्द परे रहते पूर्ववर्त्ती हास्तिन, फलक और मार्देय शब्दको अन्तोदात्त स्वर हो, यथा-हास्तिनपुरम् । फलकपुरम् । मार्देयपुरम् । " मृदेरपत्यम् " इस विग्रहमें शुभ्रादित्वके कारण ढक् प्रत्यय हुआहै । (११४२) इससे उकारका लोप हुआहै ॥

३८३६ कुसूलकूपकुम्भशालं बिले । ६ । २ । १०२ ॥

एतान्यन्तोदात्तानि बिले परे । कुसूलबिलम् । कूपबिलम् । कुम्भबिलम् । शालबिलम् । कुसूलादि किम् । सर्पबिलम् । बिलेति किम् । कुसूलस्वामी ॥

३८३६-बिल शब्द परे रहते पूर्ववर्त्ती कुसूल, कूप, कुम्भ और शाल शब्दको अन्तोदात्तस्वर हो, यथा-कुसूलबिलम् । कूपबिलम् । कुम्भबिलम् । शालबिलम् । कुसूलादि पूर्वमें न होनेपर कैसा होगा ? तो सर्पबिलम् । बिल शब्द परे न होनेपर यथा-कुसूलस्वामी ॥

३८३७ दिक्छब्दा ग्रामजनपदाख्यानचानराटेषु । ६ । २ । १०३ ॥

दिक्छब्दा अन्तोदात्ता भवन्त्येषु । पूर्वेषुकामशमी । अपरकृष्णमृत्तिका । जनपदे । पूर्वपञ्चालाः । आख्याने । पूर्वयायातम् । पूर्वचानराटम् । शब्दग्रहणं कालवाचिदिक्छब्दस्य परिग्रहार्थम् ॥

३८३७-ग्रामवाचक, जनपदवाचक, आख्यानवाचक और चानराट शब्द परे रहते पूर्ववर्त्ती दिक्वाचक शब्द अन्तोदात्त हो, यथा-पूर्वेषुकामशमी । अपरकृष्णमृत्तिका । जनपद शब्दसे देश समझना, यथा-पूर्वपञ्चालाः । आख्यानका उदाहरण यथा-पूर्वयायातम् । पूर्वचानराटम् । शब्दका ग्रहण कालवाचक दिक् शब्दके परिग्रहार्थ है ॥

३८३८ आचार्योपसर्जनश्चाऽन्तेवासिनि । ६ । २ । १०४ ॥

आचार्योपसर्जनान्तेवासिनि परे दिक्छब्दा अन्तोदात्ता भवन्ति । पूर्वपाणिनीयाः । आचार्येति किम् । पूर्वान्तेवासी । अन्तेवासिनि किम् । पूर्वपाणिनीयं शास्त्रम् ॥

३८३८-आचार्य्योपसर्जन अन्तेवासिवाचक शब्द परे रहते दिक्वाचक शब्दको अन्तोदात्तस्वर हो, यथा-पूर्वपाणिनीयाः । आचार्य्योपसर्जन अन्तेवासिन् शब्द न होनेपर कैसा होगा ? तो पूर्वान्तेवासी । अन्तेवासिवाचक शब्द परे न होनेपर यथा-पूर्वपाणिनीयं शास्त्रम् ॥

३८३९ उत्तरपदवृद्धौ सर्वं च । ६ । २ । १०५ ॥

उत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता तद्वत्युत्तरपदे परे सर्वशब्दो दिक्छब्दाश्चान्तोदान्ता भवन्ति । सर्वपाञ्चालकः । अपरपाञ्चालकः ॥ अधिकारग्रहणं किम् । सर्वभासः । सर्वकारकः ॥

३८३९-" उत्तरपदस्य " इस सूत्रके अधिकार करके विहित जो वृद्धि, तद्विशिष्ट उत्तरपद परे रहते सर्व शब्द और दिक्वाचक शब्द अन्तोदात्त हो, यथा-सर्वपाञ्चालकः । अधिकारशब्दका ग्रहण करनेसे " सर्वभासः, सर्वकारकः " यहां न हुआ ॥

३८४० बहुव्रीहौ विश्वं संज्ञायाम् । ६ । २ । १०६ ॥

बहुव्रीहौ विश्वशब्दः पूर्वपदभूतः संज्ञायामन्तोदात्तः स्यात् । पूर्वपदप्रकृतिस्वरेण प्राप्तस्याद्युदात्तस्यापवादः । विश्वकर्मा । विश्वदेवः । आविश्वदेवं सत्पतिम् । बहुव्रीहौ किम् । विश्वे च ते देवाश्च विश्वदेवाः । संज्ञायां किम् । विश्वदेवः । प्रागव्ययीभावाद्बहुव्रीह्यधिकारः ॥

३८४०-बहुव्रीहिसमासमें संज्ञा होनेपर पूर्वपदभूत विश्व शब्द अन्तोदात्त हो, यह सूत्र पूर्वपद प्रकृतिस्वरसे प्राप्त आद्युदात्तस्वरका विशेषक है । यथा-विश्वकर्म्मा । विश्वदेवः । आविश्वदेवं सत्पतिम् । बहुव्रीहि न होनेपर कैसा होगा ? तो विश्वे च ते देवाश्च=विश्वदेवाः । संज्ञा न होनेपर कैसा होगा ? तो विश्वदेवः । अव्ययीभावके पूर्वपर्यन्त बहुव्रीहिका अधिकार है ॥

३८४१ उदराऽश्वेषुषु । ६ । २ । १०७ ॥

संज्ञायामितिवर्तते । वृकोदरः । हर्यश्वः । महेषुः ॥

३८४१-बहुव्रीहि समासमें उदर, अश्व और इषु शब्द परे रहते पूर्वपदभूत शब्दको अन्तोदात्त स्वर हो, यथा-वृकोदरः । हर्य्यश्वः । महेषुः ॥

३८४२ क्षेपे । ६ । २ । १०८ ॥

उदराश्वेषुषु पूर्वमन्तोदात्तं बहुव्रीहौ निन्दायाम् । घटोदरः । कन्दुकाश्वः । चलाचलेषुः । अनुदरः इत्यत्र नञ्सुभ्यामिति भवति विप्रतिषेधेन ॥

३८४२-क्षेप अर्थात् निन्दा होनेपर बहुव्रीहिसमासमें उदर, अश्व और इषु शब्द परे रहते पूर्वपद अन्तोदात्त हो, यथा-घटोदरः । कन्दुकाश्वः चलाचलेषुः । "अनुदरः" इस स्थलमें तो विप्रतिषेधसे "नञ्सुभ्याम् (३९०६)" इस सूत्रसे उत्तरपदको अन्तोदात्त होताहै ॥

३८४३ नदी बन्धुनि । ६ । २।१०९ ॥

बन्धुशब्दे परे नद्यन्तं पूर्वमन्तोदात्तं बहुव्रीहौ । गार्गीबन्धुः । नदी किम् । ब्रह्मबन्धुः । ब्रह्मशब्द आद्युदात्तः । बन्धुनि किम् । गार्गीप्रियः ॥

३८४३-बहुव्रीहिसमासमें बन्धु शब्द परे रहते नद्यन्त पूर्वपद अन्तोदात्त हो, यथा-गार्गीबन्धुः । नद्यन्त पूर्वपद न होनेपर कैसा होगा ? तो, ब्रह्मबन्धुः यहाँ ब्रह्मन् शब्द आद्युदात्त है । बन्धु शब्द परे न होनेपर कैसा होगा ? तो गार्गीप्रियः ॥

३८४४ निष्ठोपसर्गपूर्वमन्यतरस्याम् । ६ । २ । ११० ॥

निष्ठान्तं पूर्वपदमन्तोदात्तं वा । प्रधौतपादः । निष्ठा किम् । प्रसेवकमुखः । उपसर्गपूर्वं किम् । शुष्कमुखः ॥

३८४४-बहुव्रीहिसमासमें उपसर्गपूर्वक निष्ठाप्रत्ययान्त पद विकल्प करके अन्तोदात्त हो, यथा-प्रधौतपादः । निष्ठाप्रत्ययान्त न होनेपर कैसा होगा ? तो प्रसेवकमुखः । उपसर्गपूर्वक न होनेपर कैसा होगा ? तो शुष्कमुखः ॥

३८४५ उत्तरपदाऽऽदिः ।६।२।१११ ॥

उत्तरपदाधिकार आपादान्तम् । आद्यधिकारस्तु प्रकृत्या भगालमित्यवधिकः ॥

३८४५--पादसमाप्तिपर्य्यन्त उत्तरपदका अधिकार चलेगा । आदिका अधिकार तो"प्रकृत्या भगालम् ३८७१" इस सूत्रतक चलेगा ॥

३८४६ कर्णो वर्णलक्षणात् ।६।२।११२॥

वर्णवाचिनो लक्षणवाचिनश्च परः कर्णशब्द आद्युदात्तो बहुव्रीहौ । शुक्लकर्णः । शंकुकर्णः । कर्णः किम् । श्वेतपादः । वर्णलक्षणात्किम् । शोभनकर्णः ॥

३८४६-बहुव्रीहिसमासमें वर्णवाचक और लक्षणवाचक शब्दके परवर्त्ती कर्ण शब्द आद्युदात्त हो, यथा-शुक्लकर्णः । शंकुकर्णः । कर्ण शब्द परे न होनेपर कैसा होगा ? तो श्वेतपादः । वर्ण और लक्षणवाचक शब्दके परे न होनेपर कैसा होगा ? तो शोभनकर्णः । (शङ्कुः कर्णे यस्य, इस विग्रहमें " सप्तमीविशेषणे० " इससे सप्तम्यन्तके पूर्वनिपातकी प्राप्ति होनेपर " गड्वादेः परा सप्तमी" इससे परनिपात, " कर्णे लक्षणस्या० १०३६ " इससे दीर्घ होकर-शंकुकर्णः)॥

३८४७ संज्ञौपम्ययोश्च । ६।२।११३ ॥

कर्ण आद्युदात्तः । मणिकर्णः । औपम्ये । गोकर्णः ॥

३८४७-संज्ञा और औपम्यमें जो बहुव्रीहि उसमें उत्तरपदभूत कर्ण शब्द आद्युदात्त हो, संज्ञामें यथा-मणिकर्णः । औपम्यमें यथा-गोकर्णः ॥

३८४८ कण्ठपृष्ठग्रीवाजङ्घं च । ६ । २ । ११४ ॥

संज्ञौपम्ययोर्बहुव्रीहौ । शितिकण्ठः । काण्डपृष्ठः । सुग्रीवः । नाडीजंघः । औपम्ये । खरकण्ठः । गोपृष्ठः । अश्वग्रीवः । गोजंघः ॥

३८४८-संज्ञा और औपम्यमें जो बहुव्रीहि उसमें उत्तरपदभूत कण्ठ, पृष्ठ, ग्रीवा और जंघा शब्दको आद्युदात्त स्वर हो, संज्ञामें यथा-शितिकण्ठः । काण्डपृष्ठः । सुग्रीवः । नाडीजंघः । औपम्यमें यथा-खरकण्ठः । गोपृष्ठः । अश्वग्रीवः । गोजंघः ॥

३८४९ शृङ्गमवस्थायां च।६।२।११५॥

शृङ्गशब्दोऽवस्थायां संज्ञौपम्ययोश्चाद्युदात्तो बहुव्रीहौ । उद्गतशृंगः । द्व्यङ्गुलशृंगः । अत्र शृंगोद्गमनादिकृतो गवादेर्वयोविशेषोऽवस्था । संज्ञायाम् । ऋष्यशृंगः । उपमायाम् । मेषशृंगः। अवस्थेति किम् । स्थूलशृंगः ॥

३८४९-बहुव्रीहिसमासमें अवस्था, संज्ञा और औपम्यमें उत्तरपदभूत शृङ्ग शब्द आद्युदात्त हो, यथा-उद्गतशृङ्गः । द्व्यंगुलशृङ्गः । इस स्थलमें शृङ्गोद्गमनादि कृत गोप्रभृति पशुओंकी वयोविशेष अवस्था है । संज्ञामें यथा-ऋष्यशृङ्गः । औपम्यमें यथा-मेषशृङ्गः । अवस्था न होनेपर यथा—स्थूलशृङ्गः ॥

३८५० नञो जरमरमित्रमृताः । ६ । २ । ११६ ॥

नञः पर एते आद्युदात्ता बहुव्रीहौ । ता मे जरायवजरम् । अमरम् । अमित्रमर्दय । श्रवो देवेष्वमृतम् । नञः किम् । ब्राह्मणमित्रः । जेति किम् । अशत्रुः ॥

३८५०-बहुव्रीहि समासमें नञ्के परवर्त्ती जर, मर, मित्र और मृत शब्दको आद्युदात्त स्वर हो, यथा-ता मे जरायवजरम् । अमरम् । अमित्रमर्दय । श्रवो देवेष्वमृतम् । नञ्के उत्तर न होनेपर यथा-ब्राह्मणमित्रः । जरादि शब्द न होनेपर यथा-अशत्रुः । (जरणं जरः " ऋदोरप् " । मरणं मरः न मरणम्=अमरम्, इसी निपातनसे अप् । मित्रम् ञिमिदा धातुसे " अमिचिमिदिशसिभ्यः क्त्रः " " मृतम् " यहां " नपुंसके भावे क्तः"। सूत्रमें शब्द परत्व होनेसे पुँल्लिंग पढा है)॥

३८५१ सोर्मनसी अलोमोषसी । ६ । २ । ११७ ॥

सोः परं लोमोषसी वर्जयित्वा मन्नन्तमसन्तं चाद्युदात्तं स्यात् । नञ्सुभ्यामित्यस्यापवादः । सुकर्माणः सुयुजः । स नो वक्षदनिमानः सुवत्मा । शिवा पशुभ्यः सुमनाः सुवर्चाः । सुपेशस्करति । सोः किम् । कृतकर्मा । मनसी किम् । सुराजा । अलोमोषसी किम् । सुलोमा। सुषाः । कपि तु परत्वात्कपि पूर्वमिति भवति । सुकर्मकः । सुस्रोतस्कः ॥

३८५१–बहुव्रीहि समासमें सु शब्दके परवर्त्ती लोमन् और उषस् शब्दभिन्न मन्नन्त और असन्त शब्दको आद्युदात्त स्वर हो, यह सूत्र " नञ्सुभ्याम् ३९०६ " सूत्रका बाधक है, यथा–सुकर्म्माणः सुयुजः । स नो वक्षदनिमानः सुवत्मा शिवा पशुभ्यः सुमनाः सुवर्चाः।सुपेशस्करति। सु शब्दके उत्तर न होनेपर कैसा होगा ? तो कृतकर्मा । 'मनसी' क्योंकहा ? तो "सुराजा" यहां न हो लोमन् और उषस् शब्द होनेपर कैसा होगा, तो सुलोमा । सुषाः । कप् प्रत्यय परे रहते तो परत्वके कारण "कपि पूर्वम् " इस सूत्रसे पूर्वपदको आद्युदात्त होगा, यथा–सुकर्म्मकः । सुस्रोतस्कः ॥

३८५२ क्रत्वादयश्च । ६ । २ । ११८ ॥

सोः परे आद्युदात्ताः स्युः । साम्राज्याय सुक्रतुः । सुप्रतीकः । सुहव्यः।सुप्रतूर्तिमनेहसम्॥

३८५२–बहुव्रीहिसमासमें सु शब्दके परवर्त्ती क्रतुआदि शब्द आद्युदात्त हो, यथा–साम्राज्याय सुक्रतुः । सुप्रतीकः । सुहव्यः । सुप्रतूर्त्तिमनेहसम् ॥

३८५३ आद्युदात्तं द्व्यच् छन्दसि । ६ । २ । ११९ ॥

यदाद्युदात्तं द्व्यच् तत्सोरुत्तरं बहुव्रीहावाद्युदात्तम् । अधा स्वश्वाः । सुरथाँ आतिथिग्वे । नित्स्वरेणाश्वरथावाद्युदात्तौ । आद्युदात्तं किम् । यासुबाहुः । द्व्यच् किम् । सुगुरसत्सुहिरण्यः । हिरण्यशब्दस्त्र्यच् ॥

३८५३–वेदमें सु शब्दके परवर्त्ती जो द्विस्वरयुक्त आद्युदात्त शब्द उसको बहुव्रीहि समासमें आद्युदात्त स्वर हो, यथा–अधा स्वश्वाः । सुरथाँ आतिथिग्वे । नित्स्वरसे अश्व और रथ शब्द आद्युदात्त है । आद्युदात्त न होनेपर यथा–या सुबाहुः । द्व्यच् न होनेपर कैसा होगा ? तो 'सुगुरसत्सुहिरण्यः' इस स्थलमें हिरण्य तीन स्वरसे युक्त है ॥

३८५४ वीरवीर्यौ च । ६ । २ । १२० ॥

सोः परौ बहुव्रीहौ छन्दस्याद्युदात्तौ । सुवीरेण रयिणा । सुवीर्यस्य गोमतः । वीर्यशब्दो यत्प्रत्ययान्तः । तत्र यतोऽनाव इत्याद्युदात्तत्वं नेति वीर्यग्रहणं ज्ञापकम् । तत्र हि सति पूर्वेणैव सिद्धं स्यात् ॥

३८५४–बहुव्रीहिसमासमें सु शब्दके परवर्त्ती वीर और वीर्य्य शब्दको आद्युदात्त स्वर हो,वेदमें यथा–सुवीरेण रयिणा। सुवीर्य्यस्य गोमतः । वीर्य्य शब्द यत् प्रत्ययान्त है, इस स्थलमें " यतोऽनावः ३७०१ " इस सूत्रसे आद्युदात्तस्वर नहीं हो, यह ज्ञापनके लिये वीर्य्य शब्दका ग्रहण है, नहीं तो पूर्व सूत्रसे ही सिद्ध होनेपर वीर्य्यग्रहण व्यर्थ ही होजाता ॥

३८५५ कूलतीरतूलमूलशालाऽक्षसममव्ययीभावे । ६ । २ । १२१ ॥

उपकूलम् । उपतीरम् । उपतूलम् । उपमूलम् । उपशालम् । उपाक्षम् । सुषमम् । निःषमम् । तिष्ठद्गुप्रभृतिष्वेते । कूलादिग्रहणं किम्। उपकुम्भम् । अव्ययीभावे किम् । परमकूलम् ॥

३८५५–अव्ययीभाव समासमें उत्तरपदभूत कूल, तीर, तूल, मूल, शाल, अक्ष और सम शब्दको आद्युदात्त स्वर हो, यथा–उपकूलम् । उपतीरम् । उपतूलम् । उपमूलम् । उपशालम् । उपाक्षम् । सुषमम् । निःषमम् । तिष्ठद्गुप्रभृतिमें उपकूलादि शब्द पठित हैं । कूलादि शब्द परे न रहते यथा–उपकुम्भम् । अव्ययीभाव समास न होनेपर यथा–परमकूलम् ॥

३८५६ कंसमन्थशूर्पपाय्यकाण्डं द्विगौ । ६ । २ । १२२ ॥

द्विकंसः । द्विमन्थः । द्विशूर्पः । द्विपाय्यम् । द्विकाण्डम् । द्विगौ किम् । परमकंसः ॥

३८५६–द्विगु समासमें उत्तरपदभूत कंस, मन्थ, शूर्प, पाय्य और काण्ड शब्दको आद्युदात्त स्वर हो, यथा–द्विकंसः । द्विमन्थः । द्विशूर्पः । द्विपाय्यम् । द्विकाण्डम् । द्विगु समास न होनेपर यथा–परमकंसः । 'द्विकंसः' यहां द्वाभ्यां कंसाभ्यां क्रीतः, इस विग्रहमें " कंसाट्टिठन् " इससे टिठन् प्रत्यय, " अध्यर्द्धपूर्व० " इससे लुक् । " द्विशूर्पः " यहां "शूर्पादञन्यतरस्याम् " इससे अञ् । द्विकाण्डम् द्वे काण्डे प्रमाणमस्य, इस विग्रहमें "प्रमाणे द्वयसच्० १८३८ " इससे मात्रच् "प्रमाणे लो द्विगोर्नित्यम् " इससे लुक् ॥

३८५७ तत्पुरुषे शालायां नपुंसके । ६ । २ । १२३ ॥

शालाशब्दान्ते तत्पुरुषे नपुंसकलिंगे उत्तरपदमाद्युदात्तम् । ब्राह्मणशालम् । तत्पुरुषे किम्। दृढशालं ब्राह्मणकुलम् । शालायां किम् । ब्राह्मणसेनम् । नपुंसके किम् । ब्राह्मणशाला ॥

३८५७–शाला शब्द अन्तमें है, ऐसा क्लीबलिङ्गक तत्पुरुषसमासमें उत्तरपद आद्युदात्त हो, यथा–ब्राह्मणशालम्। तत्पुरुष न होनेपर यथा–दृढशालम्, ब्राह्मणकुलम् । शाला

शब्द अन्तमें न होनेपर यथा—ब्राह्मणसेनम् । क्लीबलिङ्गक न होनेपर यथा—ब्राह्मणशाला ॥

३८५८ कन्था च । ६ । २ । १२४ ॥

तत्पुरुषे नपुंसकलिंगे कन्थाशब्द उत्तरपदमाद्युदात्तम् । सौशमिकन्थम् । आह्वरकन्थम् । नपुंसके किम् । दाक्षिकन्था ॥

३८५८—कन्था शब्दान्त क्लीबलिङ्गक तत्पुरुषसमासमें उत्तरपद आदायुत्त हो, यथा—सौशमिकन्थम् । आह्वरकन्थम् । क्लीबलिङ्गक न होनेपर यथा—दाक्षिकन्था ॥

३८५९ आदिश्चिहणादीनाम् ६।२।१२५।

कन्थान्ते तत्पुरुषे नपुंसकलिंगे चिहणादीनामादिरुदात्तः । चिहणकन्थम् । मदुरकन्थम् । आदिरिति वर्तमाने पुनर्ग्रहणं पूर्वपदस्याद्युदात्तार्थम् ॥

३८५९—कन्था शब्दान्त क्लीबलिङ्गक तत्पुरुषसमासमें चिहणादि शब्दका आदि उदात्त हो, यथा—चिहणकन्थम् । मदुरकन्थम् । पूर्व सूत्रसे आदि शब्दकी अनुवृत्ति आनेपर भी पुनर्वार आदि शब्दका ग्रहण पूर्वपदके आद्युदात्तार्थ है ॥

३८६० चेलखेटकटुककाण्डं गर्हायाम् । ६ । २ । १२६ ॥

चेलादीन्युत्तरपदान्याद्युदात्तानि । पुत्रचेलम् । नगरखेटम् । दधिकटुकम् । प्रजाकाण्डम् । चेलादिसादृश्येन पुत्रादीनां गर्हा । व्याघ्रादित्वात्समासः । गर्हायां किम् । परमचेलम् ॥

३८६०—तत्पुरुषसमासमें निन्दा गम्य होनेपर उत्तरपदभूत चेलादि अर्थात् चेल, खेट, कटुक और काण्ड शब्दका आदि उदात्त हो, यथा—पुत्रचेलम् । नगरखेटम् । दधिकटुकम् । प्रजाकाण्डम् । चेलादिका सादृश्यसे पुत्रादिकी गर्हा (निन्दा) होती है । इस स्थलमें व्याघ्रादित्वके कारण समास हुआहै । गर्हा न होनेपर यथा—परमचेलम् ॥

३८६१ चीरमुपमानम् । ६।२ । १२७ ॥

वस्त्रं चीरमिव वस्त्रचीरम् । कम्बलचीरम् । उपमानं किम् । परमचीरम् ॥

३८६१—तत्पुरुषमें उपमानवाचक उत्तरपदभूत चीर शब्दका आदि उदात्त हो, यथा—वस्त्रं चीरमिव=वस्त्रचीरम् । कम्बलचीरम् । उपमानवाचक न होनेपर कैसा होगा ? तो परमचीरम् ॥

३८६२ पललसूपशाकं मिश्रे । ६ । २ । १२८ ॥

घृतपललम् । घृतसूपः । घृतशाकम् । भक्ष्येण मिश्रीकरणमिति समासः । मिश्रे किम् परमपललम् ॥

३८६२—मिश्रवाची तत्पुरुषसमासमें उत्तरपदभूत पलल, सूप और शाक शब्दका आदि उदात्त हो, यथा—घृतपललम् । घृतसूपः । घृतशाकम् । इस स्थलमें "भक्ष्येण मिश्रीकरणम् ६९७" इससे समास हुआहै । मिश्रवाचक न होनेपर यथा—परमपललम् । (घृतेन मिश्रं पललम्=घृतपललम् । इत्यादि) ॥

३८६३ कूलसूदस्थलकर्षाः संज्ञायाम् । ६ । २ । १२९ ॥

आद्युदात्तास्तत्पुरुषे । दाक्षिकूलम् । शाण्डिसूदम् । दाण्डायनस्थलम् । दाक्षिकर्षः । ग्रामसंज्ञा एताः । संज्ञायां किम् । परमकूलम् ॥

३८६३—तत्पुरुषसमासमें संज्ञा होनेपर उत्तरपदभूत कूल, सूद, स्थल और कर्ष शब्दका आदि उदात्त हो, यथा—दाक्षिकूलम् । शाण्डिसूदम् । दाण्डायनस्थलम् । दाक्षिकर्षः । यह सब ग्रामवाची हैं । संज्ञा न होनेपर यथा—परमकूलम् ॥

३८६४ अकर्मधारये राज्यम् । ६ । २ । १३० ॥

कर्मधारयवर्जिते तत्पुरुषे राज्यमुत्तरपदमाद्युदात्तम् । ब्राह्मणराज्यम् । अकेति किम् । परमराज्यम् ॥ चेलराज्यादिस्वरादव्ययस्वरः पूर्वविप्रतिषेधेन ॥ * ॥ कुचेलम् । कुराज्यम् ॥

३८६४—कर्मधारयवर्जित तत्पुरुषसमासमें उत्तरपदभूत राज्य शब्दका आदि उदात्त हो, यथा—ब्राह्मणराज्यम् । कर्मधारय होनेपर कैसा होगा ? तो परमराज्यम् ॥

चेलराज्यादिस्वरको बाधकर पूर्वविप्रतिषेधसे अव्ययस्वर हो* कुचेलम् । कुराज्यम् ॥

३८६५ वर्ग्यादयश्च । ६ ।२ । १३१ ॥

अर्जुनवर्ग्यः । वासुदेवपक्ष्यः । अकर्मधारय इत्येव । परमवर्ग्यः । वर्ग्यादिर्दिगाद्यन्तर्गणः ॥

३८६५—तत्पुरुषसमासमें उत्तरपदभूत वर्ग्य आदि शब्दोंका आदि उदात्त हो, यथा—अर्जुनवर्ग्यः । वासुदेवपक्ष्यः । कर्म्मधारय भिन्न ही तत्पुरुषसमासमें होगा, इससे यहां न हुआ, यथा—परमवर्ग्यः । वर्ग्यादि दिगाद्यन्तर्गण है ॥

३८६६ पुत्रः पुम्भ्यः । ६ । २ । १३२ ॥

पुम्शब्देभ्यः परः पुत्रशब्द आद्युदात्तस्तत्पुरुषे । दाशकिपुत्रः । माहिषपुत्रः । पुत्रः किम् । कौनटिमातुलः । पुम्भ्यः किम् । दाक्षीपुत्रः ॥

३८६६—तत्पुरुषसमासमें पुम् शब्दके परवर्त्ती पुत्र शब्दका आदि उदात्त हो, यथा—दाशकिपुत्रः । माहिषपुत्रः । पुत्र शब्द परे न होनेपर कैसा होगा? तो कौनटिमातुलः । पुम् शब्दके परे न होनेपर यथा—दाक्षीपुत्रः ॥

३८६७ नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः । ६ । २ । १३३ ॥

एभ्यः पुत्रो नाद्युदात्तः । आख्याग्रहणात्पर्यायाणां तद्विशेषाणां च ग्रहणम् । आचार्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः । राजपुत्रः । ईश्वरपुत्रः । नन्दपुत्रः । ऋत्विक्पुत्रः । याजकपुत्रः । होतुःपुत्रः । संयुक्ताः सम्बन्धिनः । श्यालपुत्रः। ज्ञातयो मातापितृसम्बन्धेन बान्धवाः । ज्ञातिपुत्रः । भ्रातुष्पुत्रः ॥

३८६७–तत्पुरुष समासमें आचार्य्य, राज, ऋत्विक् संयुक्त और ज्ञातिवाचक शब्दोंके उत्तर स्थित पुत्र शब्दका आदि वर्ण उदात्त न हो, सूत्रमें आख्या शब्दका ग्रहण करनेसे आचार्य्यादि शब्द और तत्पर्य्यायवाचक शब्द और तद्विशेष सबहीका ग्रहण होताहै, यथा–आचार्य्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः । राजपुत्रः । ईश्वरपुत्रः । नन्दपुत्रः । ऋत्विक्पुत्रः । याजकपुत्रः । होतुःपुत्रः । संयुक्त शब्दसे संबन्धी समझना, यथा–श्यालपुत्रः । ज्ञाति शब्दसे पितृ और मातृसंबन्धीय बान्धव समझना । ज्ञातिपुत्रः । भ्रातुष्पुत्रः । कस्कादिमें पाठ होनेसे षत्व ॥

३८६८ चूर्णादीन्यप्राणिषष्ठ्याः । ६ । २ । १३४ ॥

एतानि प्राणिभिन्नषष्ठ्यन्तात्पराण्याद्युदात्तानि तत्पुरुषे । मुद्गचूर्णम् । अप्रेति किम् । मत्स्यचूर्णम् ॥

३८६८तत्पुरुष समासमें अप्राणिवाचक षष्ठ्यन्त पदके उत्तर स्थित चूर्णादि शब्दोंका आदि वर्ण उदात्त हो, मुद्गचूर्णम् । अप्राणिवाचक शब्द न होनेपर यथा–मत्स्यचूर्णम् । चूर्ण=पचाद्यच् ॥

३८६९ षट् च काण्डादीनि।६।२।१३५॥

अप्राणिषष्ठ्या आद्युदात्तानि । दर्भकाण्डम् । दर्भचीरम् । तिलपललम् । मुद्गसूपः । मूलकशाकम् । नदीकूलम् । षट् किम् । राजसूदः । अप्रेति किम् । दत्तकाण्डम् ॥

३८६९–तत्पुरुष समासमें अप्राणीवाचक षष्ठ्यन्त पदके उत्तर स्थित काण्डादि छः शब्दोंका आदि वर्ण उदात्त हो, यथा–दर्भकाण्डम् । दर्भचीरम् । तिलपललम् । मुद्गसूपः । मूलकशाकम् । नदीकूलम् । ''चेलखेट०'' सूत्रसे ''कूलसूद०'' इत्यादि सूत्रस्थ कूल शब्दपर्य्यन्त छः शब्द न होनेपर राजसूदः। प्राणिवाचक होनेपर यथा–दत्तकाण्डम् ॥

३८७० कुण्डं वनम् । ६ । २ । १३६ ॥

कुण्डमाद्युदात्तं वनवाचिनि तत्पुरुषे । दर्भकुण्डम् । कुण्डशब्दोऽत्र सादृश्ये । वनं किम् । मृत्कुण्डम् ॥

३८७०–वनवाचक तत्पुरुष समासमें कुण्ड शब्द आद्युदात्त हो, यथा–दर्भकुण्डम् । इस स्थलमें कुण्ड शब्दसे सादृश्य समझना । वनवाचक न होनेपर, यथा–मृत्कुण्डम् (भाजनविशेष) ॥

३८७१ प्रकृत्या भगालम् ।६।२।१३७॥

भगालवाच्युत्तरपदं तत्पुरुषे प्रकृत्या । कुम्भीभगालम्।कुम्भीनदालम्। कुम्भीकपालम् । मध्योदात्ता एते प्रकृत्येत्यधिकृतमन्त इति यावत् ॥

३८७१–तत्पुरुष समासमें भगाल अर्थात् नरकपालवाचक उत्तर पदको प्रकृतिस्वर हो, यथा–कुम्भीभगालम् । कुम्भीनदालम् । कुम्भकिपालम् । यह मध्योदात्त हैं, इस सूत्रसे (३८७७) अन्तः सूत्रतक प्रकृतिस्वराधिकार जानना अर्थात् प्रकृतिस्वर होगा ॥

३८७२ शितेर्नित्याऽबह्वज्बहुव्रीहावभसत् । ६ । २ । १३८ ॥

शितेः परं नित्याबह्वच्कं प्रकृत्या । शितिपादः । शित्यंसः।पादशब्दो वृषादित्वादाद्युदात्तः अंसशब्दः प्रत्ययस्य नित्वात् । शितेः किम्।दर्शनीयपादः । अभसत्किम् । शितिभसत् । शितिराद्युदात्तः।पूर्वपदप्रकृतिस्वरापवादोयं योगः॥

३८७२–बहुव्रीहि समासमें शिति शब्दके उत्तर स्थित नित्यबहुस्वरविशिष्ट न हो ऐसे (एकस्वरविशिष्ट) शब्दको प्रकृतिस्वर हो, भसत् शब्दको न हो, यथा–शितिपादः । शित्यंशः । पाद शब्द वृषादित्वके कारण आद्युदात्त हुआ । अंस शब्द प्रत्ययके नित्वके कारण आद्युदात्त है । शिति शब्दके उत्तर न होनेपर यथा–दर्शनीयपादः । भसत् शब्द होनेपर यथा–शितिभसत् । शिति शब्द आद्युदात्त है । पूर्वपदप्रकृतिस्वरापवाद यह सूत्र है । अस्+सन् । अंसः ॥

३८७३ गतिकारकोपपदात्कृत् । ६ । २ । १३९ ॥

एभ्यः कृदन्तं प्रकृतिस्वरं स्यात्तत्पुरुषे । प्रकारकः । प्रहरणम् । शोणा धृष्णू नृवाहसा । इध्मप्रव्रश्चनः । उपपदात्। उच्चैःकारम्।ईषत्करः। गतीति किम् । देवस्य कारकः । शेषे षष्ठी । कृद्ग्रहणं स्पष्टार्थम्। प्रपचतितरामित्यत्र तरबाद्यन्तेन समासे कृते आम्। तत्र सतिशिष्टत्वादामस्स्वरो भवतीत्येके । प्रपचतिदेश्यार्थं तु कृद्ग्रहणमित्यन्ये ॥

३८७३–तत्पुरुष समासमें गतिसंज्ञक शब्द, कारक औ उपपदके उत्तर कृत्प्रत्ययान्त पदको प्रकृतिस्वर हो, यथा–प्रकारकः । प्रहरणम् । ''शोणाधृष्णू नृवाहसा''। इध्मप्रव्रश्चनः (ल्युट) उपपद यथा– उच्चैःकारम् (णमुल) ईषत्करः ।

(३३०५) इससे खल् गतिसंज्ञकके उत्तर न होनेपर यथा-देवस्य कारकः। शेषे षष्ठी इस स्थलमें कृत् पदका ग्रहण स्पष्टार्थ है, प्रपचतितराम्। इस स्थलमें तरबादि प्रत्ययान्त पदके साथ समास करनेपर आम् हुआ है। उस स्थलमें सतिशिष्टत्वके कारण आम् प्रत्ययको स्वर होता है, ऐसा कोई २ कहते हैं॥

३८७४ उभे वनस्पत्यादिषु युगपत्। ६।२।१४०॥

एषु पूर्वोत्तरपदे युगपत्प्रकृत्या। वनस्पतिं वन आ। बृहस्पतिं यः। बृहच्छब्दोऽत्राद्युदात्तो निपात्यते। हर्षया शचीपतिम्। शार्ङ्गरवादित्वादाद्युदात्तः शचीशब्दः। शचीभिर्न इति दर्शनात्। तनूनपादुच्यते। नराशंसं वाजिनम्। निपातनाद्दीर्घः। शुनःशेपम्॥

३८७४-तत्पुरुष समासमें वनस्पति आदि शब्दोंमें पूर्व पद और उत्तरपद दोनोंको ही एक कालमें प्रकृतिस्वर हो, यथा-वनस्पतिं वन आ। बृहस्पतिं यः। इस स्थलमें बृहत् शब्द निपातनसे आद्युदात्त होगा। हर्षया शचीपतिम्। शार्ङ्गरवादित्वके कारण शची शब्द आद्युदात्त है, कारण कि, शचीभिर्न ऐसा प्रयोग दीखता है। तनूनपात्। नराशंसं वाजिनम्। निपातनसे दीर्घ हुआ है। शुनःशेपम्। पति=पा+डति नराशंसम् नरा एनं शंसन्ति, नृ+कर्ममें घञ्। शुनःशेपम् शुन इव शेपोस्येति बहुव्रीहिः "शेपपुच्छलाङ्गूलेषु शुनः"। इससे षष्ठीका अलुक्॥

३८७५ देवताद्वन्द्वे च। ६।२।१४१॥

उभे युगपत्प्रकृत्या स्तः। आप इन्द्रावरुणौ। इन्द्राबृहस्पती वयम्। देवता किम्। प्लक्षन्यग्रोधौ। द्वन्द्वे किम्। अग्निष्टोमः॥

३८७५-देवतावाचक शब्दोंके द्वन्द्व समासमें पूर्व और उत्तर दोनों पदोंको एक कालमें प्रकृतिस्वर हो, यथा-आप इन्द्रावरुणौ। इन्द्रा बृहस्पती वयम्। देवतावाचक न होनेपर यथा-प्लक्षन्यग्रोधौ। द्वन्द्व न होनेपर यथा-अग्निष्टोमः (९२४)। वरुणः "कृवृदारिभ्य उनन्" इससे वृ+उनन्। "देवताद्वन्द्वे च" इससे पूर्व पदको आनङ्॥

३८७६ नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु। ६।२।१४२॥

पृथिव्यादिवर्जितेऽनुदात्तादावुत्तरपदे प्रागुक्तं न। इन्द्राग्निभ्यां कंवृषणः। अपृथिव्यादौ किम्। द्यावापृथिवी जनयत्। आद्युदात्तो द्यावा निपात्यते। पृथिवीत्यन्तोदात्तः। रुद्रसोमौ। रौदेर्णिलुक्चेति रगन्तो रुद्रशब्दः। इन्द्रापूषणौ। श्वन्नुक्षन्पूषन्निति पूषा अन्तोदात्तो निपात्यते। शुक्रामन्थिनौ। मन्थिन्निन्नन्तत्वादन्तोदात्तः। उत्तरपदग्रहणमनुदात्तादावित्युत्तरपदविशेषणं यथा स्यात् द्वन्द्वविशेषणं मा भूत्। अनुदात्तादाविति विधिप्रतिषेधयोर्विषयविभागार्थम्॥

३८७६-देवतावाचक शब्दके द्वन्द्व समासमें पृथिवी, रुद्र, पूष और मन्थि शब्दभिन्न अन्य अनुदात्त स्वर आदिमें है जिसके ऐसा पद परे रहते प्रागुक्त कार्य न हो, यथा-इन्द्राग्निभ्यां कंवृषणः। पृथिव्यादि शब्द अन्तमें होनेपर यथा-(ऋ० ८।२।१३) द्यावापृथिवी जनयन्। द्यावा शब्द निपातनसिद्ध आद्युदात्त है, पृथिवी शब्द अन्तोदात्त है, रुद्रसोमौ "रोदेर्णिलुक् च" इस सूत्रसे रक् प्रत्यय हुआ है। इन्द्रापूषणौ। 'श्वन्नुक्षन्पूषन्'इस सूत्रसे पूषन् शब्द अन्तोदात्त निपातित है, शुक्रामन्थिनौ अन्नन्त होनेसे अन्तोदात्त है। उत्तर पदका ग्रहण 'अनुदात्तादौ'इस उत्तर पदका विशेषण हो। द्वन्द्वका विशेषण न हो, इस लिये है। उसी प्रकार इस प्रयोगसे विधि और प्रतिषेध दोनों विषयका ही विभाग हो इस लिये है॥

३८७७ अन्तः। ६।२।१४३॥

अधिकारोऽयम्॥

३८७७-" अन्तः " यह अधिकारसूत्र है, अर्थात् इस सूत्रसे अन्तोदात्त स्वरका अधिकार चलेगा॥

३८७८ थाऽथघञ्क्ताऽजऽबित्रकाणाम्। ६।२।१४४॥

थ अथ घञ् क्त अच् अप् इत्र क एतदन्तानां गतिकारकोपपदात्परेषामन्त उदात्तः। प्रभृथस्यायोः। आवसथः। घञ्। प्रभेदः। क्त। धर्ता वज्री पुरुष्टुतः। पुरुषु बहुप्रदेशेषु स्तुत इति विग्रहः। अच्। प्रक्षयः। अप्। प्रलवः। इत्र। प्रलवित्रम्। क। गोवृषः। मूलविभुजादित्वात्कः। गतिकारकोपपदादित्येव। सुस्तुतं भवता॥

३८७८-गतिकारक और उपपदके उत्तर स्थित थ, अथ, घञ्, क्त, अच्, अप्, इत्र, क शब्द अन्तमें है ऐसे शब्दका अन्त वर्ण उदात्त हो, यथा-प्रभृथस्यायोः। थ-आवसथः। घञ्-प्रभेदः। क्त-धर्ता वज्री पुरुष्टुतः। पुरुषु अर्थात् बहुप्रदेशेषु स्तुत इस विग्रहमें पुरुष्टुतः पद सिद्ध हुआ है। अच्-प्रक्षयः। अप्-प्रलवः। इत्र-प्रलवित्रम्। क-गोवृषः। इस स्थलमें मूलविभुजादित्वके कारण क प्रत्यय हुआ है। गतिकारकोपपदके उत्तर ही होगा, अन्यत्र नहीं होगा, यथा-सुस्तुतं भवता॥

३८७९ सूपमानात् क्तः। ६।२।१४५॥

सोरुपमानाच्च परं क्तान्तमन्तोदात्तम्। ऋतस्य योनौ सुकृतस्य। शशप्लुतः॥

३८७९-सु शब्द और उपमानवाचक शब्दके उत्तर क्त प्रत्ययान्त पदका अन्त वर्ण उदात्त हो, यथा-ऋतस्य योनौ सुकृतस्य, शशप्लुतः। शश इव प्लुतः=शशप्लुतः॥

३८८० संज्ञायामनाचितादीनाम् । ६ । २ । १४६ ॥

गतिकारकोपपदात् क्तान्तमन्तोदात्तमाचितादीन्वर्जयित्वा । उपहूतः शाकल्यः । परिजग्धः । कौण्डिन्यः । अनेति किम् । आचितम् । आस्थापितम् ॥

३८८०–गतिकारकोपपदके उत्तर क्तप्रत्ययान्त पदका अन्त वर्ण उदात्त हो आचितादि शब्दोंको न हो, यथा–उपहूतः । शाकल्यः । परिजग्धः । कौण्डिन्यः । अनाचितादीनाम् इस पदको सूत्रमें क्यों किया ? आचितम् । आस्थापितम् । यहां भी अन्तोदात्त होजायगा। परिजग्धः=अदको जग्धादेश। आचितम्=चिञ्+क्त । आस्थापितम्=ष्ठा+णिच्+क्त ॥

३८८१ प्रवृद्धादीनां च । ६ ।२।१४७॥

एषां क्तान्तमुत्तरपदमन्तोदात्तम् । प्रवृद्धः । प्रयुक्तः।असंज्ञार्थोऽयमारम्भः।आकृतिगणोऽयम्॥

३८८१–प्रवृद्धादिशब्दोंके क्त प्रत्ययान्तका अन्त वर्ण उदात्त हो, यथा–प्रवृद्धः । प्रयुक्तः । असंज्ञार्थ यह सूत्र है । प्रवृद्धादि आकृतिगण है ॥

३८८२ कारकाद्दत्तश्रुतयोरेवाशिषि। ६ । २ । १४८ ॥

संज्ञायामन्त उदात्तः । देवदत्तः । विष्णुश्रुतः । कारकात्किम् । संभूतो रामायणः । दत्तश्रुतयोः किम् । देवपालितः । अस्मान्नियमादत्र संज्ञायामनेति न । तृतीयाकर्मणीति तु भवति । एव किम् । कारकावधारणं यथा स्याद् दत्तश्रुतावधारणं मा भूत् । अकारकादपि दत्तश्रुतयोरन्त उदात्तो भवति । संश्रुतः । आशिषि किम् । देवैः खाता देवखाता । आशिष्येवेत्येवमत्रेष्टो नियमः । तेनानाहतो नदति देवदत्त इत्यत्र न । शङ्खविशेषस्य संज्ञेयम् । तृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरत्वमेव भवति ।

३८८२–तत्पुरुष समासमें आशीर्वादार्थमें संज्ञा होनेपर कारकके उत्तर दत्त और श्रुत शब्दका अन्त वर्ण उदात्त हो, यथा–देवदत्तः । विष्णुश्रुतः । कारकके उत्तर न होनेपर यथा–संभूतो रामायणः । दत्त और श्रुत शब्द न होनेपर यथा–देवपालितः। इस नियमके कारण इस स्थलमें "संज्ञायामनाचिता० ३८८० ,, इत्यादि पूर्ववर्त्ती सूत्रसे नहीं होगा । तो " तृतीया कर्म्मणि ३७८२" इस सूत्रसे होगा, एव ग्रहण क्यों किया ऐसा कहो तो कारकावधारण हो, दत्तश्रुतावधारण न हो, इसलिये है। कारक उत्तर न होनेपर भी दत्त और श्रुत शब्दका अन्त वर्ण उदात्त हो, यथा–संश्रुतः। आशीर्वाद न होनेपर यथा–देवैः खाता देवखाता । इस स्थलमें आशीर्वादार्थमें ही होगा, ऐसा ही नियम इष्ट अर्थात् अभिप्रेत है, इस कारण अनानाहतो नदति देवदत्तः । इस स्थलमें नहीं हुआ । देवदत्त शब्दसे शंखविशेषकी संज्ञा अर्थात् नाम जानना । " तृतीया कर्म्मणि ३७८२ " इस सूत्रसे पूर्वपद प्रकृतिस्वर ही होता है । देवदत्तः=देवा एनं देयासुरित्येवं प्रार्थितैर्देवैर्दत्तो देवदत्तः "आशिषि लिङ्लोटौ" " क्तिच्क्तौ च संज्ञायाम् " इससे क्त, " दो दद्घोः" इससे दथ्आदेश । विष्णुश्रुतः=विष्णुरेनं श्रूयादित्येवं प्रार्थिते विष्णुना श्रुतः विष्णुश्रुतः ॥

३८८३ इत्थम्भूतेन कृतमिति च । ६ । २ । १४९ ॥

इत्थम्भूतेन कृतमित्येतस्मिन्नर्थे यः समासस्तत्र क्तान्तमुत्तरपदमन्तोदात्तं स्यात् । सुप्तप्रलपितम् । प्रमत्तगीतम् । कृतमिति क्रियासामान्ये करोतिर्नाभूतप्रादुर्भाव एव । तेन प्रलपिताद्यपि कृतं भवति । तृतीया कर्मणीत्यस्यापवादः ॥

३८८३–" इत्थंभूतेन कृतम् " इस अर्थमें जो समास हो, उस समासमें क्तप्रत्ययान्त जो उत्तर पद उसका अन्त वर्ण उदात्त हो, सुप्तप्रलपितम् । प्रमत्तगीतम् । कृत पद क्रियासामान्यमें है, करोति अभूतप्रादुर्भावार्थमें ही नहीं है । इसी कारण प्रलपितादि भी कृत हुए हैं । यह " तृतीया कर्म्मणि (३७८३) " इस सूत्रका अपवाद है ॥

३८८४ अनो भावकर्मवचनः । ६ । २ । १५० ॥

कारकात्परमनप्रत्ययान्तं भाववचनं कर्मवचनं चान्तोदात्तम् । पयःपानं सुखम् । राजभोजनाः शालयः । अनः किम् । हस्तादायः । भेति किम् । दन्तधावनम् । करणे ल्युट् । कारकात्किम् । निदर्शनम् ॥

३८८४–तत्पुरुष समासमें कारकके उत्तर भाववचन और कर्म्मवचन अनप्रत्ययान्त शब्दका अन्त वर्ण उदात्त हो, यथा–पयःपानम् सुखम् । राजभोजनाः शालयः । अन प्रत्ययान्त न होनेपर यथा–हस्तादायः। भाववचन और कर्मवचन न होनेपर यथा–दन्तधावनम् इस स्थलमें करणमें ल्युट् अर्थात् अन हुआ है । कारकके उत्तर न होनेपर यथा–निदर्शनम् ॥

३८८५ मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः ६।२।१५१॥

कारकात्पराणि एतान्युत्तरपदान्यन्तोदात्तानि तत्पुरुषे । कृत्स्वरापवादः । रथवर्त्म । पाणिनिकृतिः । छन्दोव्याख्यानम् । राजशयनम् । राजासनम् । अश्वस्थानम् । ब्राह्मण-

याजकः। गोक्रीतः। कारकात्किम्। प्रभूतौ सङ्गतिम्। अत्र तादौ च नितीति स्वरः॥

३८८५-तत्पुरुष समासमें कारकके उत्तर मन और क्तिन्प्रत्ययान्त शब्द व्याख्यान, शयन, आसन, स्थान और याजकादि गण और क्रीत शब्दके अन्त वर्णको उदात्त स्वर हो, यह कृत् स्वरका अपवाद है यथा-रथवर्त्म। पाणिनिकृतिः। छन्दोव्याख्यानम्। राजशयनम्। राजासनम्। अश्वस्थानम्। ब्राह्मणयाजकः। गोक्रीतः। कारकके उत्तर न होनेपर यथा-प्रभूतौ सङ्गतिम्। इस स्थलमें "तादौ च निति ३७८४" इस सूत्रसे प्रकृतिस्वर होगा। व्याख्यानम=करणमें ल्युट् हुआ। कृति+कृ+क्तिन्॥

३८८६ सप्तम्याः पुण्यम्। ६।२।१५२॥

अन्तोदात्तम्। अध्ययनपुण्यम्। तत्पुरुषे तुल्यार्थे इति प्राप्तम्। सप्तम्याः किम्। वेदेन पुण्यं वेदपुण्यम्॥

३८८६-सप्तमी तत्पुरुष समासमें पुण्य शब्दका अन्त वर्ण उदात्त हो, यथा-अध्ययनपुण्यम् (३७३६) की प्राप्ति है, सप्तमी तत्पुरुष न होनेपर यथा-वेदेन पुण्यम्, इस विग्रहमें वेदपुण्यम् ऐसा होगा॥

३८८७ ऊनार्थकलहं तृतीयायाः। ६।२।१५३॥

माषोनम्। माषविकलम्। वाक्कलहः। तृतीयापूर्वपदप्रकृतिस्वरापवादोऽयम्। अत्र केचिदर्थेति स्वरूपग्रहणमिच्छन्ति। धान्यार्थः। ऊनशब्देन त्वर्थनिर्देशार्थेन तदर्थानां ग्रहणमिति प्रतिपदोक्तत्वादेव सिद्धे तृतीयाग्रहणं स्पष्टार्थम्॥

३८८७-तृतीयान्तके उत्तर तत्पुरुष समासमें ऊनार्थ शब्द और कलह शब्दका अन्त वर्ण उदात्त हो, यथा-माषोनम्। माषविकलम्। वाक्कलहः। यह सूत्र तृतीया पूर्वपद प्रकृति स्वरका अपवाद है। इस सूत्रमें कोई २ अर्थ शब्दसे स्वरूप ग्रहण करतेहैं। यथा, धान्यार्थः। ऊन शब्दद्वारा अर्थ निर्देश-के कारण तदर्थकका ही ग्रहण होगा। इस सूत्रसे प्रतिपदोक्तत्वके कारण तृतीयान्तके ऊनार्थादि शब्दोंके अन्त वर्ण का उदात्त सिद्ध होनपर सूत्रमें तृतीयाग्रहण स्पष्टार्थ है॥

३८८८ मिश्रं चानुपसर्गमसन्धौ। ६।२।१५४॥

पणबन्धेनैकार्थ्यं सन्धिः। तिलमिश्राः। सर्पिर्मिश्राः। मिश्रं किम्। गुडधानाः। अनुपसर्गं किम्। तिलसंमिश्राः। मिश्रग्रहणे सोपसर्गग्रहणस्येदमेव ज्ञापकम्। असन्धौ किम्। ब्राह्मणमिश्रो राजा। ब्राह्मणैः सह संहित ऐकार्थ्यमापन्नः॥

३८८८-तृतीयान्तके उत्तर संधि अर्थात् पणबन्धद्वारा एकार्थ न होनेपर उपसर्ग पूर्वमें नहीं अर्थात् उपसर्गके उत्तर न होकर अन्य शब्दके उत्तर होनेपर मिश्र शब्दका अन्त वर्ण उदात्त हो, (पणबन्धन द्वारा ऐकार्थ्य अर्थात् जो आप मेरा यह कार्य करोगे तो मैं आपका यह कार्य करूंगा यह पणबन्ध है इसको सन्धि कहते हैं)। यथा-तिलमिश्राः(६९३) सर्पिर्मिश्राः। मिश्र होनेपर गुडधानाः (६९७) ऐसा होगा, उपसर्ग होनेपर तिलसंमिश्राः ऐसा होगा। मिश्र शब्दका ग्रहण करनेसे सोपसर्गका भी ग्रहण होताहै। संधि होनेपर यथा-ब्राह्मणमिश्रो राजा ब्राह्मणैः सह संहित ऐकार्थ्यमापन्नः। ब्राह्मण-मिश्रो राजा=जो आप मेरा यह कार्य करोगे तो मैं आपका यह कार्य करूंगा इस पणबन्ध करके ब्राह्मणोंके साथ मिलाहुआ दूसरे लोग तो स्वरूपभेदग्रहण करनेको संधि कहते हैं ब्राह्मण-मिश्रः इस प्रयोगमें ब्राह्मणोंमें एकीभावको प्राप्त हुआ भी राजा स्वरूपसे जानाजाताहै॥ गुडमिश्रः इस प्रयोगमें गुडसे एकीभूत होनेसे स्वरूपका भेद न होगा॥

३८८९ नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः। ६।२।१५५॥

सम्पाद्याद्यर्थतद्धितान्तान्नञो गुणप्रतिषेधे वर्तमानात्परेऽन्तोदात्ताः। कर्णवेष्टकाभ्यां संपादि कार्णवेष्टकिकम्। न कार्णवेष्टकिकमकार्णवेष्टकिकम्। छेदमर्हति छैदिकः। न छैदिकोऽच्छैदिकः। न वत्सेभ्यो हितोऽवत्सीयः। न सन्तापाय प्रभवति असन्तापिकः। नञः किम्। गर्दभरथमर्हति गार्दभरथिकः। विगार्दभरथिकः। गुणप्रतिषेधे किम्। गार्दभरथिकादन्योऽगार्दभरथिकः। गुणो हि तद्धितार्थे प्रवृत्तिनिमित्तं सम्पादितत्वाद्युच्यते। तत्प्रतिषेधो यत्रोच्यते तत्रायं विधिः। कर्णवेष्टकाभ्यां न सम्पादि मुखमिति। संपेति किम्। पाणिनीयमधीते पाणिनीयः। न पाणिनीयः अपाणिनीयः। तद्धिताः किम्। वोढुमर्हति वोढा। न वोढाऽवोढा॥

३८८९-सम्पादिन् अर्थात् सम्पादन, अर्ह अर्थात् योग्यतार्थमें हित और अलमर्थमें विद्यमान जो तद्धितप्रत्ययान्त शब्द वह गुणप्रतिषेधार्थमें वर्त्तमान जो नञ् उसके उत्तर होनेपर उसका अन्त वर्ण उदात्त हो, यथा-कर्णवेष्टकाभ्यां सम्पादि कार्णवेष्टकिकम्। न कार्णवेष्टकिकमकार्णवेष्टकिकम्। छेदमर्हति छैदिकः। न छैदिकोऽच्छैदिकः। न वत्सेभ्यो हितोऽवत्सीयः। न संतापाय प्रभवति असान्तापिकः। नञ्के उत्तर न होनेपर गर्दभरथमर्हति गार्दभरथिकः। विगार्दभरथिकः। गुण-प्रतिषेध न होनेपर गार्दभरथिकादन्योऽगार्दभरथिकः। सम्पादित्वादि तद्धितार्थमें प्रवृत्ति निमित्त गुण शब्द करके कहा हुआहै। जिस स्थलमें उसका प्रतिषेध होगा उस स्थानमें ही यह विधि जानना चाहिये। कर्णवेष्टकाभ्यां न सम्पादि मुखमिति। [illegible]दित अर्थ न होनेपर यथा-पाणिनीयमधीते

पाणिनीयः। न पाणिनीयः अपाणिनीयः। तद्धितप्रत्ययान्त न होनेपर यथा-वोढुं अर्हति वोढा। न वोढाऽवोढा इत्यादि। वोढा (२८२२) इससे 'तृच्' "सहिवहोरोदवर्णस्य" इससे ओत्॥

३८९० ययतोश्चाऽतदर्थे ।६।२।१५६॥

ययतौ यौ तद्धितौ तदन्तस्योत्तरपदस्य नञो गुणप्रतिषेधविषयात्परस्यान्त उदात्तः स्यात्। पाशानां समूहः पाश्या। न पाश्या अपाश्या। अदन्त्यम्। अतदर्थे किम्। अपाद्यम्। तद्धितः किम्। अदेयम्। गुणप्रतिषेधे किम्। दन्त्यादन्यददन्त्यम्। तदनुबन्धग्रहणे नातदनुबन्धकस्येति नेह। अवामदेव्यम्॥

३८९०-य और यत् जो तद्धित तदन्त जो उत्तर पद गुणप्रतिषेधविषयीभूत नञ्के उत्तर उसका अन्त वर्ण उदात्त हो, यथा-पाशानां समूहः पाश्या। न पाश्या अपाश्या। अदन्त्यम्। तदर्थ न होनेपर यथा-अपाद्यम्। तद्धित न होनेपर यथा-अदेयम् (२८४२) (२८४३) इत्व होनेसे गुण। गुणप्रतिषेध न होनेपर यथा-दन्त्यादन्यददन्त्यम्। तदनुबन्धक शब्दका ग्रहण करनेसे तदनुबन्धकभिन्नका ग्रहण नहीं होगा, यथा- अवामदेव्यम्॥

३८९१ अच्कावशक्तौ ।६।२।१५७॥

अजन्तं कान्तं च नञः परमन्तोदात्तमशक्तौ गम्यायाम्। अपचः। पक्तुमशक्तः। अविलिखः। अशक्तौ किम्। अपचो दीक्षितः। गुणप्रतिषेधे इत्येव। अन्योऽयं पचादपचः॥

३८९१-अशक्ति अर्थ गम्यमान होनेपर नञ्के परे रहते अजन्त और ककारान्त पदका अन्त वर्ण उदात्त हो, यथा-अपचः अर्थात् जो व्यक्ति पाककरनेमें शक्त न हो। अविलिखः। अशक्ति न होनेपर यथा-अपचो दीक्षितः। गुणप्रतिषेधमें ही होगा, यथा-अन्योऽयं पचादपचः। अपचः=पचाद्यच्। अपचो दीक्षितः=इसमें दीक्षित शास्त्रसे विरोध होनेके कारण नहीं पकाता न कि अशक्त होनेसे॥

३८९२ आक्रोशे च।६।२।१५८॥

नञः परावच्कावन्तोदात्तावाक्रोशे। अपचो जाल्मः। पक्तुं न शक्नोतीत्येवमाक्रोश्यते। अविक्षिपः॥

३८९२-आक्रोशार्थमें नञ्के उत्तर अजन्त और कान्त शब्दका अन्त वर्ण उदात्त हो, यथा-अपचो जाल्मः अर्थात् यह व्यक्ति पाक नहीं करसकता इस प्रकार अपमानित होताहै। अविक्षिपः॥

३८९३ संज्ञायाम्।६।२।१५९॥

नञः परमन्तोदात्तं संज्ञायामाक्रोशे। अदेवदत्तः॥

३८९३-आक्रोशार्थमें संज्ञा होनेपर नञ्के उत्तर शब्दका अन्त वर्ण उदात्त हो, यथा-अदेवदत्तः। देवदत्त होनेपर भी अपने योग्य कर्म नहीं करता यह आक्षेप है॥

३८९४ कृत्योकेष्णुच्चार्वादयश्च ।६।२।१६०॥

नञः परेऽन्तोदात्ताः स्युः। अकर्तव्यः। उक। अनागामुकः। इष्णुच्। अनलंकरिष्णुः। इष्णुज्ग्रहणे खिष्णुचो ह्यनुबन्धकस्यापि ग्रहणमिकारादेर्विधानसामर्थ्यात्। अनाढ्यम्भविष्णुः। चार्वादिः। अचारुः। असाधुः॥ राजाह्नोश्छन्दसि॥ अराजा। अनहः। भाषायां नञः स्वर एव॥

३८९४-कृत्यप्रत्ययान्त उक प्रत्ययान्त और इष्णुच् प्रत्ययान्त शब्द और चारु आदि गण नञ्के परे रहते अन्तोदात्त हों, यथा, अकर्त्तव्यः। उक यथा-अनागामुकः। इष्णुच्=अनलंकरिष्णुः। इष्णुच् प्रत्ययका ग्रहण करनेसे दो अनुबन्धविशिष्ट खिष्णुच् प्रत्ययका भी ग्रहण होगा, क्यों कि,इकारादि विधान सामर्थ्यसे खिष्णुच् प्रत्ययका भी ग्रहण होगा। अनाढ्यम्भ विष्णुः। चार्वादि यथा-अचारुः। असाधुः। 'राजाह्नोश्छन्दसि' इस सूत्रसे अराजा। अनहः। भाषामें नञ्का जो स्वर वही होगा। साधु कृवापाजि० (उण्)॥

३८९५ विभाषा तृन्नन्नतीक्ष्णशुचि।६।२।१६१॥

तृन्। अकर्त्ता। अन्न। अनन्नम्। अतीक्ष्णम्। अशुचि। पक्षे अव्ययस्वरः॥

३८९५-नञ्के परे रहते तृन्प्रत्ययान्त शब्द अन्न, तीक्ष्ण और शुचि शब्दका अन्त वर्ण विकल्प करके उदात्त हो, यथा-तृन्-अकर्त्ता। अन्न-अनन्नम्। अतीक्ष्णम्। अशुचि। विकल्प पक्षमें अव्ययस्वर होगा॥

३८९६ बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने।६।२।१६२॥

एभ्योऽनयोरन्त उदात्तः। इदं प्रथममस्य स इदंप्रथमः। एतद्द्वितीयः। तत्पञ्चमः। बहुव्रीहौ किम्। अनेन प्रथम इदंप्रथमः। तृतीयेति योगविभागात्समासः। इदमेतत्तद्भ्यः किम्। यत्प्रथमः। प्रथमपूरणयोः किम्। तानि बहून्यस्य तद्बहुः। क्रियागणने किम्। अयं प्रथमः प्रधानं येषां ते इदंप्रथमाः। द्रव्यगणनमिदम्। गणने किम्। अयं प्रथम एषां ते इदम्प्रथमाः। इदम्प्रधाना इत्यर्थः। उत्तरपदस्य कार्यित्वात्कपि पूर्वमन्तोदात्तम्। इदम्प्रथमकाः॥

बहुव्रीहावित्यधिकारो वनं समास इत्यतः प्राग्बोध्यः ॥

३८९६-क्रियागणनार्थमें बहुव्रीहि समासमें इदम् एतत् और तत् शब्दके उत्तर प्रथम और पूरणवाचक शब्दका अन्त वर्ण उदात्त हो, यथा-"इदं प्रथममस्य" इस विग्रहमें (गणनामें) सः इदं प्रथमः । एतद्द्वितीयः । तत्पञ्चमः । बहुव्रीहि न होनेपर यथा-अनेन प्रथम इदंप्रथमः । इस स्थलमें, "तृतीया० (६९२)" इस भिन्न सूत्रसे तृतीया-तत्पुरुष समासमें सिद्ध हुआहै । इदम् एतत् और तत् शब्दके उत्तर न होनेपर यथा-यत्प्रथमः । प्रथम और पूरणार्थ न होनेपर यथा-तानि बहूनि अस्य इस विग्रहमें तद्बहुः । क्रियागणन न होनेपर यथा-अयंप्रथमः प्रधानं येषां ते इदंप्रथमाः । यह द्रव्यगणन है, क्रियागणन नहीं है।गणनार्थ न होनेपर यथा-अयं प्रथम एषां ते इदंप्रथमाः।अर्थात् यह व्यक्ति इनका प्रधान है, उत्तर पदके कार्यित्वके कारण "कपि पूर्वम्" इस वक्ष्यमाणसूत्रसे वह अन्तोदात्त होगा, यथा-इदंप्रथमकाः । यहांसे "वनं समासे ३९१२" इस सूत्रतक बहुव्रीहिसमासाधिकार चलैगा ॥

३८९७ संख्यायास्तनः।६।२।१६३ ॥

बहुव्रीहावन्तोदात्तः । द्विस्तना । चतुःस्तना । संख्यायाः किम् । दर्शनीयस्तना । स्तनः किम् । द्विशिराः ॥

३८९७-बहुव्रीहि समासमें संख्यावाचक शब्दके उत्तर स्तन शब्दका अन्त वर्ण उदात्त हो, यथा-द्विस्तना । चतुःस्तना । संख्यावाचक न होनेपर यथा-दर्शनीयस्तना । स्तन शब्द न होनेपर यथा-द्विशिराः ॥

३८९८ विभाषा छन्दसि ।६।२।१६४॥

द्विस्तनीं करोति वामदेवः । चतुःस्तनां करोति द्यावापृथिव्योर्दोहनाय ॥

३८९८-वेदमें बहुव्रीहि समासमें संख्यावाचक शब्दके उत्तर स्तन शब्दके अन्त वर्णको विकल्प करके उदात्त स्वर हो, यथा-द्विस्तनीं करोति वामदेवः,।चतुःस्तनां करोति द्यावापृथिव्योर्दोहनाय ॥

३८९९ संज्ञायां मित्राजिनयोः । ६ । २ । १६५ ॥

देवमित्रः । कृष्णाजिनम् । संज्ञायां किम् । प्रियमित्रः ॥ ऋषिप्रतिषेधोऽत्र मित्रे ॥ * ॥ विश्वामित्र ऋषिः ॥

३८९९बहुव्रीहि समासमें संज्ञा होनेपर उत्तरपद जो मित्र और अजिन शब्द उनका अन्त वर्ण उदात्त हो, यथा-देवमित्रः । कृष्णाजिनम् । संज्ञा न होनेपर यथा-प्रियमित्रः ॥

मित्र शब्द परे रहते ऋषि अर्थमें उक्त स्वर नहीं होगा * यथा-विश्वामित्र ऋषिः ॥

३९०० व्यवायिनोऽन्तरम् ।६।२।१६६॥

व्यवधानवाचकात्परमन्तरमन्तोदात्तम् । वस्त्रमन्तरं व्यवधायकं यस्य स वस्त्रान्तरः । व्यवधायिनः किम् । आत्मान्तरः । अन्यस्वभाव इत्यर्थः ॥

३९००-बहुव्रीहि समासमें व्यवधानवाचक शब्दके उत्तर शब्दका अन्त वर्ण उदात्त हो, यथा-वस्त्रमन्तरं व्यवधायकं यस्य इस विग्रहमें वस्त्रान्तरः । व्यवधानवाचक न होनेपर यथा-आत्मान्तरः । अन्यस्वभाव इत्यर्थः ॥

३९०१ मुखं स्वांगम् ।६।२। १६७॥

गौरमुखः । स्वाङ्गं किम् । दीर्घमुखा शाला॥

३९०१-बहुव्रीहि समासमें स्वाङ्गवाचक उत्तरपद मुख शब्दका अन्त वर्ण उदात्त हो, यथा-गौरमुखः । स्वाङ्ग न होनेपर, यथा-दीर्घमुखा शाला । अर्थात् चौडेद्वारवाली ॥

३९०२ नाऽव्ययदिक्छब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः ।६।२।१६८ ॥

उच्चैर्मुखः । प्राङ्मुखः । गोमुखः । महामुखः।स्थूलमुखः।मुष्टिमुखः।पृथुमुखः वत्समुखः। पूर्वपदप्रकृतिस्वरोऽत्र । गोमुष्टिवत्सपूर्वपदस्योपमानलक्षणोपि विकल्पोऽनेन बाध्यते ॥

३९०२-बहुव्रीहि समासमें अव्यय शब्द, दिग्वाचक शब्द गो, महत्, स्थूल, मुष्टि, पृथु और वत्स शब्दके उत्तर जो मुख शब्द उसका अन्त वर्ण उदात्त हो, यथा-उच्चैर्मुखः । प्राङ्मुखः । गोमुखः । महामुखः । स्थूलमुखः । मुष्टिमुखः । पृथुमुखः । वत्समुखः । इस स्थलमें पूर्व पदको प्रकृतिस्वर हुआहै । पूर्ववर्त्ती गो, मुष्टि और वत्स शब्दके उपमानलक्षण विहित जो विकल्प वह भी इस सूत्रसे बाधित होताहै । मुष्टिः= मुष्+क्तिच् । पृथुः='प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च' इससे प्रथसे कु प्रत्यय करके पृथुः । वत्सः=वद+सः। गोमुखः गौर्मुखमिव मुखं यस्य सः ॥

३९०३ निष्ठोपमानादन्यतरस्याम् । ६ । २ । १६९ ॥

निष्ठान्तादुपमानवाचिनश्च परं मुखं स्वाङ्गं वाऽन्तोदात्तं बहुव्रीहौ । प्रक्षालितमुखः । पक्षे निष्ठोपसर्गेति पूर्वपदान्तोदात्तत्वम् । पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरोऽपि भवति । उपमानम् । सिंहमुखः ॥

३९०३-बहुव्रीहि समासमें निष्ठाप्रत्ययान्त शब्द और उपमानवाचक शब्दके उत्तर स्वांगवाचक मुख शब्दको विकल्प करके अन्तोदात्त स्वर हो, यथा-प्रक्षालितमुखः । विकल्प पक्षमें "निष्ठोपसर्ग०" इत्यादि सूत्रसे पूर्वपदका अन्त वर्ण उदात्त होगा, पूर्व पदको प्रकृतिपरत्वके कारण गतिस्वर भी होगा । उपमान यथा-सिंहमुखः ॥

३९०४ जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः। ६। २। १७०॥

सारंगजग्धः। मासजातः। सुखजातः। दुःखजातः। जातिकालेति किम्। पुत्रजातः। अनाच्छादनात्किम्। वस्त्रच्छन्नः। अकृतेति किम्। कुण्डकृतः। कुण्डमितः। कुण्डप्रतिपन्नः। अस्माज्ज्ञापकान्निष्ठान्तस्य परनिपातः॥

३९०४-बहुव्रीहि समासमें जातिवाचक शब्द कालवाचक शब्द और सुखादि शब्दोंके उत्तर आच्छादनवाचक शब्दके उत्तर न होनेपर क्तप्रत्ययान्त शब्दका अन्त वर्ण उदात्त हो, कृत मित और प्रतिपन्न शब्दको न हो, यथा-सारङ्गजग्धः। मासजातः। सुखजातः। दुःखजातः। जाति और काल वाचक शब्दके परे न होनेपर यथा-पुत्रजातः। आच्छादनार्थ शब्दके उत्तर होनेपर यथा-वस्त्रच्छन्नः। कृतादि शब्दोंका यथा-कुण्डकृतः। कुण्डमितः। कुण्डप्रतिपन्नः ऐसे प्रयोगमें निष्ठान्तपद परे रहते अन्तोदात्त विधानसे क्तान्तका परनिपात जानना चाहिये। सारंगजग्धः=सारंगः पक्षिविशेषः स जग्धो भक्षितो येनेति विग्रहः।वस्त्रः=वस्+ष्ट्रन्॥

३९०५ वा जाते। ६। २। १७१॥

जातिकालसुखादिभ्यः परो जातशब्दो वान्तोदात्तः। दन्तजातः। मासजातः॥

३९०५-बहुव्रीहि समासमें जातिवाचक और कालवाचक और सुखादि शब्दोंके उत्तर जो जात शब्द वह विकल्प करके अन्तोदात्त हो, यथा-दन्तजातः। मासजातः॥

३९०६ नञ्सुभ्याम्। ६। २। १७२॥

बहुव्रीहावुत्तरपदमन्तोदात्तम्। अव्रीहिः। सुमाषः॥

३९०६-बहुव्रीहि समासमें नञ् और सु शब्दके उत्तर जो उत्तरपद उसका अन्तवर्ण उदात्त हो, यथा-अव्रीहिः। सुमाषः॥

३९०७ कपि पूर्वम्। ६। २। १७३॥

नञ्सुभ्यां परं यदुत्तरपदं तदन्तस्य समासस्य पूर्वमुदात्तं कपि परे। अब्रह्मबन्धुकः। सुकुमारीकः॥

३९०७-बहुव्रीहि समासमें नञ् और सु शब्दके उत्तर जो उत्तरपद तदन्तसमासका पूर्ववर्ण कप् प्रत्यय परे रहते उदात्त हो, यथा-अब्रह्मबन्धुकः सुकुमारीकः॥

३९०८ ह्रस्वान्तेऽन्त्यात्पूर्वम्। ६। २। १७४॥

ह्रस्वान्ते उत्तरपदे समासे चान्त्यात्पूर्वमुदात्तं कपि नञ्सुभ्यां परं बहुव्रीहौ। अव्रीहिकः। सुमाषकः। पूर्वमित्यनुवर्तमाने पुनः पूर्वग्रहणं प्रवृत्तिभेदेन नियमार्थम्। ह्रस्वान्तेन्त्यादेव पूर्वपदमुदात्तं न कपि पूर्वमिति। अज्ञकः। कबन्तस्यैवान्तोदात्तत्वम्॥

३९०८-बहुव्रीहि समासमें ह्रस्वान्त उत्तरपद परे रहते नञ् और सु शब्दके उत्तर कप् प्रत्यय परे रहते अन्त्यवर्णसे पूर्व वर्ण उदात्त हो, यथा-अव्रीहिकः। सुमाषकः। पूर्वसूत्रसे पूर्वपदकी अनुवृत्ति होसकती है, तथापि पुनर्वार उस शब्दका ग्रहण वाक्यभेदसे नियमार्थ जानना चाहिये एक वाक्यसे। ह्रस्वान्त उत्तरपद परे रहते अन्त्यवर्णसे पूर्व वर्णको उदात्तत्व होगा। द्वितीय वाक्यसे ह्रस्वान्त उत्तर पद परे रहते अन्त्यवर्णसे ही पूर्व वर्ण उदात्त हो, कप् प्रत्यय परे रहते पूर्व वर्ण उदात्त न हो, ऐसा नियम होगा, यथा-अज्ञकः। इस स्थलमें कप् प्रत्ययान्तशब्दका ही अन्तवर्ण उदात्त हुआ॥

३९०९ बहोर्नञ्वदुत्तरपदभूम्नि। ६। २। १७५॥

उत्तरपदार्थबहुत्ववाचिनो बहोः परस्य पदस्य नञः परस्येव स्वरः स्यात्। बहुव्रीहिकः। बहुमित्रकः। उत्तरपदेति किम्। बहुषु मानोऽस्य स बहुमानः॥

३९०९-बहुव्रीहि समासमें उत्तर पदार्थमें बहुत्ववाचक बहु शब्दके परवर्ती पदको नञ्के स्वरके समान स्वर हो, यथा-बहुव्रीहिकः। बहुमित्रकः। उत्तरपदार्थमें बहुत्ववाचक न होनेपर यथा-बहुषु मानोऽस्य स बहुमानः॥

३९१० न गुणादयोऽवयवाः। ६। २। १७६॥

अवयववाचिनो बहोः परे गुणादयो नान्तोदात्ता बहुव्रीहौ। बहुगुणा रज्जुः। बह्वक्षरं पदम्। बह्वध्यायः। गुणादिराकृतिगणः। अवयवाः किम्। बहुगुणो द्विजः। अध्ययनश्रुतसदाचारादयो गुणाः॥

३९१०-बहुव्रीहि समासमें बहु शब्दके उत्तर अवयववाचक गुणादि शब्द अन्तोदात्त न हो, यथा-बहुगुणा रज्जुः। बह्वक्षरं पदम्। बह्वध्यायः। गुणादि आकृतिगण है। अवयववाचक न होनेपर यथा-बहुगुणो द्विजः। गुण शब्दसे अध्ययन श्रुत और सदाचारादि समझना॥

३९११ उपसर्गात्स्वांगं ध्रुवमपर्शु। ६। २। १७७॥

प्रपृष्ठः। प्रललाटः। ध्रुवमेकरूपम्। उपसर्गात्किम्। दर्शनीयपृष्ठः। स्वांगं किम्। प्रशाखो वृक्षः। ध्रुवं किम्। उद्बाहुः। अपर्शु किम्। विपर्शुः॥

३९११-बहुव्रीहि समासमें उपसर्गके उत्तर स्वाङ्गवाचक ध्रुवार्थक शब्दको अन्तोदात्त स्वर, हो, पर्शु शब्दको न हो, यथा-प्रपृष्ठः। प्रललाटः। ध्रुव शब्दसे एकरूप समझना। उपसर्गके उत्तर न होनेपर यथा-दर्शनीयपृष्ठः। स्वाङ्गवाचक न होनेपर यथा-प्रशाखो वृक्षः। ध्रुवार्थ न होनेपर यथा-उद्बाहुः। पर्शु शब्द होनेपर यथा-विपर्शुः॥

३९१२ वनं समासे। ६।२।१७८॥

समासमात्रे उपसर्गादुत्तरपदं वनमन्तोदात्तम्। तस्येदिमे प्रवणे॥

३९१२-समासमात्रमें उपसर्गके उत्तर जो उत्तर पद वन शब्द वह अन्तोदात्त हो, यथा-तस्येदिमे प्रवणे। प्रवण-(प्रनिरन्तः णत्व)॥

३९१३ अन्तः। ६।२।१७९॥

अस्मात्परं वनमन्तोदात्तम् अन्तर्वणो देशः। अनुपसर्गार्थमिदम्॥

३९१३-समासमात्रमें अन्तःशब्दके उत्तर वन शब्दका अन्तवर्ण उदात्त हो, यथा-अन्तर्वणो देशः। यह सूत्र अनुपसर्गार्थ अर्थात् उपसर्ग पूर्वमें न रहते भी अन्तोदात्तार्थ है॥

३९१४ अन्तश्च। ६।२।१८०॥

उपसर्गादन्तःशब्दोन्तोदात्तः। पर्यन्तः। समन्तः॥

३९१४-समासमात्रमें उपसर्गके उत्तर अन्तःशब्दका अन्त वर्ण उदात्त हो, यथा-पर्यन्तः। समन्तः॥

३९१५ न निविभ्याम्। ६।२।१८१॥

न्यन्तः। व्यन्तः। पूर्वपदप्रकृतिस्वरे यणि च कृते उदात्तस्वरितयोर्यण इति स्वरितः॥

३९१५-समासमात्रमें नि और वि शब्दके उत्तर अन्तःशब्दका अन्त वर्ण उदात्त न हो, यथा-न्यन्तः। व्यन्तः। पूर्वपदको प्रकृतिस्वर और यण् करनेपर "उदात्तस्वरितयोर्यणः ३६५७" इस सूत्रसे स्वरित होगा॥

३९१६ परेरभितोभावि मण्डलम्। ६।२।१८२॥

परेः परमभित उभयतो भावो यस्यास्ति तत्कूलादि मण्डलं चान्तोदात्तम्। परिकूलम्। परिमण्डलम्॥

३९१६-समासमात्रमें परिशब्दके उत्तर अभितोभाविवाचक मण्डल अन्तोदात्त हो, यथा-परिकूलम्। परिमण्डलम्॥

३९१७ प्रादस्वांगं संज्ञायाम्। ६।२।१८३॥

प्रगृहम्। अस्वांगं किम्। प्रपदम्॥

३९१७-समासमात्रमें संज्ञा होनेपर प्र शब्दके उत्तर अस्वाङ्गवाचक शब्द अन्तोदात्त हो, यथा-प्रगृहम्। स्वाङ्गवाचक होनेपर यथा-प्रपदम्॥

३९१८ निरुदकादीनि च। ६।२।१८४॥

अन्तोदात्तानि। निरुदकम्। निरुपलम्॥

३९१८-समासमात्रमें निरुदकादि शब्दोंका अन्त वर्ण उदात्त हो, यथा-निरुदकम्। निरुपलम्॥

३९१९ अभेर्मुखम्। ६।२।१८५॥

अभिमुखम्। उपसर्गात्स्वांगमितिसिद्धे बहुव्रीह्यर्थमध्रुवार्थमस्वांगार्थं च। अभिमुखा शाला॥

३९१९-समासमात्रमें अभिपूर्वक मुख शब्दका अन्त वर्ण उदात्त हो, यथा-आभिमुखम्। "उपसर्गात्स्वांगम्०" इस सूत्रसे सिद्ध होनेपर भी बहुव्रीहिके निमित्त अध्रुवार्थ और अस्वाङ्गार्थ यह सूत्र जानना चाहिये। अत एव अभिमुखा शाला। इस स्थलमें भी हुआ॥

३९२० अपाच्च। ६।२।१८६॥

अपमुखम्। योगविभाग उत्तरार्थः॥

३९२०-बहुव्रीहि समासमें अपपूर्वक मुख शब्दका अन्त वर्ण उदात्त हो, यथा-अपमुखम्। उत्तरसूत्रमें अनुवृत्तिके निमित्त भिन्न सूत्र कियाहै॥

३९२१ स्फिगपूतवीणाऽञ्जोऽध्वकुक्षिसीरनामनाम च। ६।२।१८७॥

अपादिमान्यन्तोदात्तानि। अपस्फिगम्। अपपूतम्। अपवीणम्। अञ्जस्। अपाञ्जः। अध्वन्। अपाध्वम्। उपसर्गादध्वन इत्यस्याभावे इदम्। एतदेव च ज्ञापकं समासान्ताऽनित्यत्वे। अपकुक्षि। सीरनाम। अपसीरम्। अपहलम्। नाम। अपनाम॥ स्फिगपूतवीणाकुक्षिग्रहणमबहुव्रीह्यर्थमध्रुवार्थमस्वांगार्थं च॥

३९२१-समासमें अपके उत्तर स्फिग, पूत, वीणा, अञ्जस्, अध्वन्, कुक्षि, सीरनाम और नामन् शब्दका अन्त वर्ण उदात्त हो, यथा-अपस्फिगम्। अपपूतम्। अपवीणम्। अञ्जस्-अपाञ्जः। अध्वन्-अपाध्वम्। "उपसर्गादध्वनः ९५३" इस सूत्रके अभावमें "स्फिगपूत०" इस सूत्रसे उदात्त होताहै। यह सूत्र समासान्तके अनित्यत्वका ज्ञापक है, अपकुक्षि। सीरनाम अर्थात् हलादिका नाम यथा-अपसीरम्। अपहलम्। नामन् यथा-अपनाम। स्फिग, पूत, वीणा और कुक्षि शब्दका ग्रहण अबहुव्रीह्यर्थ और अध्रुवार्थ और अस्वाङ्गार्थ है॥

३९२२ अधेरुपरिस्थम्। ६।२।१८८॥

अध्यारूढो दन्तोऽधिदन्तः। दन्तस्योपरि जातो दन्तः। उपरिस्थं किम्। अधिकरणम्॥

३९२२-अधिके उत्तर उपरिस्थलवाची अन्तोदात्त हो, यथा-अध्यारूढो दन्तः अधिदन्तः। दन्तके ऊपर उत्पन्न हुए दाँतोंको उपरिस्थ कहतेहैं। उपरिस्थ न होनेपर यथा, अधिकरणम्॥

३९२३ अनोप्रमप्रधानकनीयसी । ६ । २ । १८९ ॥

अनोः परमप्रधानवाचि कनीयश्चान्तोदात्तम्। अनुगतो ज्येष्ठमनुज्येष्ठः । पूर्वपदार्थप्रधानः प्रादिसमासः । अनुगतः कनीयाननुकनीयान् । उत्तरपदार्थप्रधानः । प्रधानार्थं च कनीयोग्रहणम् । अप्रेति किम् । अनुगतो ज्येष्ठोऽनुज्येष्ठः ॥

३९२३-अनु शब्दके उत्तर अप्रधानवाचक और कनीयस् शब्द अन्तोदात्त हो, यथा-अनुगतो ज्येष्ठम् अनुज्येष्ठः । इस स्थलमें पूर्व पदार्थ प्रधान और प्रादिसमास हुआहै।अनुगतः कनीयाननुकनीयान् । इस स्थलमें उत्तर पदार्थ प्रधान हुआहै। और इस स्थलमें प्रधानार्थ कनीयस् शब्दका ग्रहण हुआहै । प्रधानवाचक होनेपर यथा--अनुगतो ज्येष्ठोऽनुज्येष्ठः ॥

३९२४पुरुषश्चाऽन्वादिष्टः।६।२।१९०॥

अनोः परोऽन्वादिष्टवाची पुरुषोऽन्तोदात्तः । अन्वादिष्टः पुरुषोऽनुपुरुषः । अन्वादिष्टः किम् । अनुगतः पुरुषोऽनुपुरुषः ॥

३९२४-अनु शब्दके उत्तर अन्वादिष्टवाचक पुरुष शब्दका अन्त वर्ण उदात्त हो, यथा-अन्वादिष्टः पुरुषोऽनुपुरुषः । अन्वादिष्टवाचक न होनेपर यथा-अनुगतः पुरुषोऽनुपुरुषः । अनु पश्चादादिष्टः कथितः ॥

३९२५ अतेरकृत्पदे । ६ । २ । १९१ ॥

अतेः परमकृदन्तं पदशब्दश्चान्तोदात्तः। अत्यङ्कुशो नागः। अतिपदा गायत्री । अकृत्पदे किम् । अतिकारकः ॥ अतेर्धातुलोप इति वाच्यम् ॥ * ॥ इह मा भूत् । शोभनो गार्ग्योऽतिगार्ग्यः । इह च स्यात् । अतिक्रान्तः कारुमतिकारुकः ॥

३९२५-अति शब्दके उत्तर अकृदन्त अर्थात् कृत्प्रत्यान्त न हो ऐसा जो शब्द और पद शब्द अन्तोदात्त हो, यथा-अत्यंकुशो नागः । अतिपदा गायत्री । अकृदन्त पद होनेपर यथा-अतिकारकः ॥

अतिके उत्तर शब्द धातुका लोप होनेपर अन्तोदात्त हो* इस स्थलमें धातुका लोप नहीं हुआहै । शोभनो गार्ग्योऽतिगार्ग्यः । अतिक्रान्तः कारुमतिकारुकः इस स्थलमें हुआहै । अत्यंकुशः=अंकुशमतिक्रान्तः । अतिकारकः=शोभनः कारकः ॥

३९२६ नेरनिधाने । ६ । २ । १९२ ॥

निधानमप्रकाशता । ततोऽन्यदनिधानं प्रकाशनमित्यर्थः । निमूलम् । न्यक्षम् । अनिधाने किम् । निहितो दण्डो निदण्डः ॥

३९२६-निधान-अप्रकाश।तद्भिन्न अर्थात् प्रकाश अर्थ होनेपर नि शब्दके उत्तर जो उत्तर पद उसका अन्त वर्ण उदात्त हो, यथा-निमूलम् । न्यक्षम् । निधानार्थमें यथा-निहितो दण्डो निदण्डः । निर्गतं मूलमस्य, निर्गतं वा मूलम् निमूलम् ॥

३९२७प्रतेरंश्वादयस्तत्पुरुषे६।२।१९३॥

प्रतेः परेंश्वादयोऽन्तोदात्ताः । प्रतिगतोंशुः प्रत्यंशुः । प्रतिजनः । प्रतिराजा । समासान्तस्यानित्यत्वान्न टच् ॥

३९२७-प्रति शब्दके उत्तर अंशु आदि शब्द अन्तोदात्त हों, यथा-प्रतिगतः-अंशुः प्रत्यंशुः । प्रतिजनः । प्रतिराजा । इस स्थलमें समासान्तके अनित्यत्वके कारण टच् प्रत्यय नहीं हुआ ॥

३९२८ उपाद् द्व्यजजिनमगौरादयः। ६ । २ । १९४ ॥

उपात्परं यद् द्व्यच्कमजिनं चान्तोदात्तं तत्पुरुषे गौरादीन्वर्जयित्वा । उपदेवः । उपेन्द्रः। उपाजिनम् । अगौरादयः किम् । उपगौरः । उपतैषः । तत्पुरुषे किम् । उपगतः सोमोऽस्य स उपसोमः ॥

३९२८-तत्पुरुष समासमें उप शब्दके उत्तर जो दोस्वरविशिष्ट शब्द और अजिन शब्द उसका अन्त वर्ण उदात्त हो, गौरादि शब्दोंको न हो, यथा-उपदेवः । उपेन्द्रः । उपाजिनम् । गौरादि होनेपर यथा-उपगौरः । उपतैषः । तत्पुरुष समास न होनेपर यथा-उपगतः सोमोऽस्य स उपसोमः ॥

३९२९ सोरवक्षेपणे । ६ । २ । १९६ ॥

सुप्रत्यवसितः । सुरत्र पूजायामेव । वाक्यार्थस्त्वत्र निन्दा असूयया तथाभिधानात् । सोः किम् । कुब्राह्मणः । अवक्षेपणे किम् । सुवृषणम् ॥

३९२९-अवक्षेपणार्थमें सुके उत्तर जो उत्तरपद उसका अन्त वर्ण उदात्त हो, यथा-सुप्रत्यवसितः । इस स्थलमें सु शब्दसे पूजा समझना, वाक्यार्थ तो यहां निन्दा है, कारण कि, असूयासे निन्दा अभिहित होतीहै । सु शब्दके उत्तर न होनेपर यथा-कुब्राह्मणः । अवक्षेपणार्थ न होनेपर यथा-सुवृषणम् ॥

३९३० विभाषोत्पुच्छे।६ । २।१९६ ॥

तत्पुरुषे । उत्क्रान्तः पुच्छादुत्पुच्छः । यदा तु पुच्छमुदस्यति उत्पुच्छयते एरच् उत्पुच्छस्तदा थाथादिस्वरेण नित्यमन्तोदात्तत्वे प्राप्ते विकल्पोऽयम् । सेयमुभयत्र विभाषा । तत्पुरुषे किम् । उदस्तं पुच्छं येन स उत्पुच्छः ॥

३९३०-उत्पूर्वक पुच्छ शब्दका अन्तवर्ण उदात्त हो विकल्प करके तत्पुरुषसें, यथा-उत्क्रान्तः पुच्छादुत्पुच्छः । जब तो-पुच्छमुदस्यति उत्पुच्छयते, इस विग्रहमें " एरच् ३२३१ " इस सूत्रसे अच् होकर-' उत्पुच्छः ' होगा तब

थाथादि स्वरसे नित्य अन्तोदात्तता प्राप्त होनेपर विकल्प-विधानके निमित्त यह सूत्र है। यह उभयत्र विभाषा है। तत्पुरुष न होनेपर यथा-उदस्तं पुच्छं येन सः=उत्पुच्छः॥

३९३१ द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ। ६। २। १९७॥

आभ्यां परेष्वेष्वन्तोदात्तो वा। द्विपाच्चतुष्पाच्च रथाय। त्रिपादूर्ध्वः। द्विदन्। त्रिमूर्धानं सप्तरश्मिम्। मूर्धन्नित्यकृतसमासान्त एव मूर्धशब्दः। तस्यैतत्प्रयोजनमसत्यपि समासान्ते अन्तोदात्तत्वं यथा स्यात्। एतदेव ज्ञापकमनित्यः समासान्तो भवतीति। यद्यपि च समासान्तः क्रियते तथापि बहुव्रीहिकार्यत्वात्तदेकदेशत्वाच्च समासान्तोदात्तत्वं पक्षे भवत्येव। द्विमूर्धः। त्रिमूर्धः। द्वित्रिभ्यां किम्। कल्याणमूर्धा। बहुव्रीहौ किम्। द्वयोर्मूर्धा द्विमूर्धा॥

३९३१-बहुव्रीहिसमासमें द्वि और त्रि शब्दके परे पाद, दत् और मूर्द्धन् शब्दको अन्तोदात्तस्वर हो, द्विपाच्चतुष्पाच रथाय। त्रिपादूर्ध्वः। द्विदन्। त्रिमूर्धानं सुप्तरश्मिम्। मूर्द्धन् यह अकृतसमासान्तही मूर्ध शब्द है, इसका यह प्रयोजन है कि, समासान्त प्रत्यय न होनेपर भी अन्तोदात्त हो। यही निर्देश ज्ञापन करताहै कि, समासान्तविधि अनित्य होताहै। यद्यपि समासान्त कियाजाताहै तथापि बहुव्रीहिकार्य्यत्वके कारण और बहुव्रीहिके एकदेशत्वके कारण पक्षमें समासान्तोदात्तत्व होताही है, यथा-द्विमूर्द्धः+त्रिमूर्द्धः। द्वि और त्रिशब्दके उत्तर न होनेपर यथा-कल्याणमूर्द्धा। बहुव्रीहि न होनेपर यथा-द्वयोर्मूर्द्धा=द्विमूर्द्धा॥

३९३२ सक्थं चाऽक्रान्तात्। ६। २। १९८॥

गौरसक्थः। श्लक्ष्णसक्थः। अक्रान्तात्किम्। चक्रसक्थः। समासान्तस्य षचश्चित्त्वान्नित्यमेवान्तोदात्तत्वं भवति॥

३९३२-क्रशब्दान्तपदके उत्तर न होनेपर बहुव्रीहिसमासमें सक्थ शब्दका अन्तवर्ण उदात्त हो, यथा-गौरसक्थः। श्लक्ष्णसक्थः। क्रशब्दान्तपदके उत्तर होनेपर यथा-"चक्रसक्थः"। इस स्थलमें समासान्त षच् प्रत्ययके चित्त्व (च् इत्) के कारण नित्य ही अन्तोदात्तत्व होताहै॥

३९३३ परादिश्छन्दसि बहुलम्। ६। २। १९९॥

छन्दसि परस्य सक्थशब्दस्यादिरुदात्तो वा। अजिसक्थमालभेत। अत्र वार्त्तिकम्॥

परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते॥
पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः॥*॥

इति। परादिः। तु विजाता उरुक्षया। परान्तः। नियेन मुष्टिहत्यया। यस्त्रिचक्रः। पूर्वान्तः। विश्वायुर्धेहि॥

॥ इति समासस्वराः॥

३९३३-वेदमें परवर्ती सक्थ शब्दका आदिवर्ण विकल्प करके उदात्त हो, यथा-अजिसक्थमालभेत। इस स्थलमें वार्त्तिक ऐसा है, कि-परादि, परान्त पूर्वान्त और पूर्वादि बहुतसे स्थलोंमें उदात्त देखे जातेहैं, परन्तु वह बहुल ग्रहण लभ्य-व्यत्ययसे होताहै। अत एव बहुलग्रहणचरितार्थ हुआ, नहीं तो पूर्वसूत्रसे ही विभाषापदकी अनुवृत्ति करके विकल्प सिद्ध होनेपर बहुलग्रहण व्यर्थ ही होजाता। परादि यथा-भविजाता उरुक्षया। परान्त यथा-नियेन मुष्टिहत्यया। यस्त्रिचक्रः। पूर्वान्त यथा-विश्वायुर्धेहि॥

इति समासस्वराः।

३९३४ तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः। ८। १। २७॥

तिङन्तात्पदाद्गोत्रादीन्यनुदात्तान्येतयोः। पचति गोत्रम्। पचतिपचति गोत्रम्। एवं प्रवचनप्रहसनप्रकथनप्रत्यायनादयः। कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणम्। तेनान्यत्रापि गोत्रादिग्रहणे कुत्सनादावेव कार्यं ज्ञेयम्। गोत्रादीति किम्। पचति पापम्। कुत्सेति किम्। खनति गोत्रं समेत्य कूपम्॥

३९३४-कुत्सन अर्थात् निन्दा और आभीक्ष्ण्य अर्थात् पौनःपुन्य अर्थ होनेपर तिङन्त पदके उत्तर गोत्रादि शब्द अनुदात्त हों। गोत्रादि यथा-गोत्र, ब्रुव, प्रवचन, प्रयतन, पवन, यजन, प्रहसन, प्रकथन, प्रत्यायन, प्रचक्षण, विचक्षण, अवचक्षण, स्वाध्याय, भूयिष्ठ और वानाम। उदाहरण यथा-"पचति गोत्रम्। पचतिपचति गोत्रम्"। इस स्थलमें पौनःपुन्य है अर्थात् विवाहादिमें गोत्र वारंवार सुखी करताहै। इसी प्रकार ब्रुव आदि शब्द अनुदात्त होंगे। कुत्सन और आभीक्ष्ण्य शब्द पाठका विशेषण है। इस कारण अन्य सूत्रमें भी गोत्रादिका ग्रहण करनेसे कुत्सन और आभीक्ष्ण्यार्थमें ही कार्य होगा। गोत्रादिभिन्न शब्द होनेपर "पचति पापम्" इस स्थलमें पाप शब्द क्रियाका विशेषण है, इस कारण अनुदात्त नहीं हुआ। कुत्सनादि अर्थ न होनेपर "खनति गोत्रम् समेत्य कूपम्" अर्थात् गोत्रके सब मिलकर कूप खोदते हैं। इस स्थलमें भी अनुदात्त नहीं हुआ॥

३९३५ तिङ्ङतिङः। ८। १। २८॥

अतिङन्तात्पदात्परं तिङन्तं निहन्यते। अग्निमीळे॥

३९३५-अतिङन्त पदके उत्तर स्थित तिङन्त पद अनुदात्त हो अर्थात् यदि पूर्व पद तिङन्त न हो, तो तत्परवर्ती तिङन्त पद अनुदात्त हो, और यदि पूर्व पद तिङन्त हो, तो परवर्ती तिङन्त पद अनुदात्त न हो, यथा-अग्निमीळे।

सूत्रमें अतिङ् पदका ग्रहण करना निष्प्रयोजन है, कारण कि, एकवाक्यमें केवल दो तिङन्त पद नहीं रह सकते इस कारण पूर्व पद सुबन्त ही होगा, पूर्वमें तिन्त पद न होनेपर "पचति भवति" इस स्थलमें पर पद अनुदात्त नहीं हुआ ॥

३९३६ न लुट् । ८ । १ । २९ ॥

लुडन्तं न निहन्यते । श्वःकर्ता ॥

३९३६–ल्युट्विभक्त्यन्त पद अनुदात्त न हो, यहांसे अनुदात्तके निषेधसूत्र हैं यथा–"श्वःकर्त्ता" । इस स्थलमें एकवचनमें टिका लोप होनेपर उदात्तनिवृत्तिस्वरसे डा प्रत्ययको उदात्त स्वर हुआहै ॥

३९३७ निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् । ८ । १ । ३० ॥

एतैर्निपातैर्युक्तं न निहन्यते । यदग्ने स्यामहं त्वम् । युवां यदीकृथः । कुविदङ्ग आसन् । अचित्तिभिश्चकृमा कच्चित् । पुत्रासो यत्र पितरो भवन्ति ॥

३९३७–यत्, यदि, हन्त, कुवित्, नेत्, चेत्, चण्, कच्चित् और यत्र इन संपूर्ण निपातोंसे युक्त जो तिङन्तपद वह अनुदात्त न हो, यथा–"यदग्ने स्यामहं त्वम्" । (अस्–विधिलिङ्+अम्=स्याम्) । "युवां यदीकृथः" "कुविदङ्ग आसन्" । "अचित्तिभिश्चकृमा कच्चित्" । इस स्थलमें 'चकृमा' यहां लिट् प्रत्ययस्वरके कारण अन्तोदात्त होताहै । "पुत्रासो यत्र पितरो भवन्ति" यदादि निपातका योग न होनेपर अर्थात् जब यत् आदिकी निपात संज्ञा नहीं है, तब कैसा होगा ? तो यत् कूजति शकटम् ॥

३९३८ नह प्रत्यारम्भे । ८ । १ । ३१ ॥

नहेत्यनेन युक्तं तिङन्तं नानुदात्तम् । प्रतिषेधयुक्त आरम्भः प्रत्यारम्भः । नह भोक्ष्यसे । प्रत्यारम्भे किम् । नह वै तस्मिन् लोके दक्षिणमिच्छन्ति ॥

३९३८–प्रत्यारम्भ होनेपर नह शब्दसे युक्त जो तिङन्तपद वह अनुदात्त न हो । नह शब्द निपातसमुदाय है, यह निषेधार्थक है । प्रतिषेधयुक्त जो आरम्भ, उसको प्रत्यारम्भ कहतेहैं, यथा–"नह भोक्ष्यसे" प्रत्यारम्भ न होनेपर कैसा होगा ? तो "नह वै तस्मिन् लोके दक्षिणमिच्छन्ति" ॥

३९३९ सत्यं प्रश्ने । ८ । १ । ३२ ॥

सत्ययुक्तं तिङन्तं नानुदात्तं प्रश्ने । सत्यं भोक्ष्यसे । प्रश्ने किम् । सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम ॥

१ यत् आदिका अर्थ यह है, यथा–"यद्यदार्थे च हेतौ च विचारे यदि चेच्चणः । हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः । कच्चित् प्रश्ने नेत्प्रिषेधे प्रशंसायां कुवित्स्मृतम् । "यत्रेत्याधारे" अर्थात् यत्–पदार्थ और हेतुमें, यदि, चेत् और चण–विचारमें, हन्त–हर्ष, अनुकम्पा, वाक्यारम्भ और विषादमें, कच्चित्–प्रश्नमें, निषेधमें, कुवित्–प्रशंसामें तथा यत्र आधार अर्थमें वर्तता है ॥

३९३९–प्रश्न गम्य होनेपर सत्य शब्दसे युक्त जो तिङन्तपद वह अनुदात्त न हो, यथा–"सत्यं भोक्ष्यसे" । प्रश्न गम्य न होनेपर न होगा, यथा–"सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम" ॥

३९४० अङ्गाऽप्रातिलोम्ये । ८ । १ । ३३ ॥

अङ्गेत्यनेन युक्तं तिङन्तं नानुदात्तम् । अङ्ग कुरु । अप्रातिलोम्ये किम् । अंग कूजसि वृषल इदानीं ज्ञास्यसि जाल्म । अनभिप्रेतमसौ कुर्वन्प्रतिलोमो भवति ॥

३९४०–अप्रातिलोम्य अर्थात् अभिमतकारित्व होनेपर अङ्ग शब्दसे युक्त तिङन्तपद अनुदात्त न हो, यथा–"अंग कुरु" प्रातिलोम्य अर्थात् प्रतिकूलकारित्व होनेपर कैसा होगा ? तो अंग कूजसि वृषल इदानीं ज्ञास्यसि जाल्म । यह अनभिप्रेत काम करनेसे प्रतिलोम है ॥

३९४१ हि च । ८ । १ । ३४ ॥

हियुक्तं तिङन्तं नानुदात्तम् । आ हि ष्मा याति । आ हि रुहन्तम् ॥

३९४१–अप्रातिलोम्यमें हिशब्दयुक्त तिङन्तपद अनुदात्त न हो, यथा–आ हि ष्मायाति । आ हि रुहन्तम् ॥

३९४२ छन्दस्यनेकमपि साकाङ्क्षम् । ८ । १ । ३५ ॥

हीत्यनेनयुक्तं साकाङ्क्षमनेकमपि नानुदात्तम् । अनृतं हि मत्तो वदति पाप्मा चैनं पुनाति । तिङन्तद्वयमपि न निहन्यते ॥

३९४२–वेदमें हि शब्दसे युक्त साकाङ्क्ष अर्थात् परस्पर आकांक्षा युक्त अनेक तिङन्तपद भी अनुदात्त न हों । यथा–"अनृतं हि मत्तो वदति पाप्मा चैनं पुनाति" यहां दोनों तिङन्तपद अनुदात्त न हुए ॥

३९४३ यावद्यथाभ्याम् । ८ । १ । ३६ ॥

आभ्यां योगे तिङन्तं नानुदात्तम् । यथा चित्कण्वमावतम् ॥

३९४३–यावत् और यथा शब्दके योगमें तिङन्तपद अनुदात्त न हो, यथा–यथा चित्कण्वमावतम् ॥

३९४४ पूजायां नानन्तरम् । ८ । १ । ३७ ॥

यावद्यथाभ्यां युक्तमनन्तरं तिङन्तं पूजायां नानुदात्तम् । यावत्पचति शोभनम् । यथा पचति शोभनम् । पूजायां किम् । यावद्भुङ्क्ते । अनन्तरं किम् । यावद्देवदत्तः पचति शोभनम् । पूर्वेणात्र निघातः प्रतिषिध्यते ॥

३९४४–यदि, यावत् और यथा शब्दसे युक्त तिङन्तपदके मध्यमें अन्य कोई शब्द व्यवधान न हो तो तिङन्तपद पूजामें अनुदात्त न हो, यथा–यावत् पचति शोभनम् । पूजाभिन्नार्थमें यथा–यावद्भुङ्क्ते । अनन्तर अर्थात् अव्यवधान

न होनेपर कैसा होगा ? तो "यावद्देवदत्तः पचति शोभनम्" इस स्थलमें पूर्वसूत्रसे प्राप्त अनुदात्त प्रतिषिद्धि होता है ॥

३९४५ उपसर्गव्यपेतं च । ८ । १ । ३८ ॥

पूर्वेणानन्तरमित्युक्तम् । उपसर्गव्यवधानार्थं वचनम् । यावत्प्रपचति शोभनम् । अनन्तरमित्येव । यावद्देवदत्तः प्रपचति शोभनम् ॥

३९४५-पूजामें यावत् और यथा शब्दसे युक्त और उपसर्गसे व्यवहित जो तिङन्तपद वह अनुदात्त न हो, पूर्व सूत्रसे अव्यवहित तिङन्तपदको अनुदात्तका निषेध होता है । यह सूत्र उपसर्ग व्यवधानमें भी निषेधार्थ है । यथा-यावत् प्रपचति शोभनम् । यावत् और यथा शब्दसे युक्त अव्यवहित ही सोपसर्ग तिङन्तपदके अनुदात्तका निषेध होगा, इस कारण यहां न हुआ, यथा-यावद्देवदत्तः प्रपचति शोभनम् ॥

३९४६ तुपश्यपश्यताऽहैः पूजायाम् । ८ । १ । ३९ ॥

एभिर्युक्तं तिङन्तं न निहन्यते पूजायाम् । आदह स्वधामनु पुनर्गर्भत्वमेरिरे ॥

३९४६-पूजामें तु, पश्य, पश्यत और अह शब्दसे युक्त तिङन्तपद अनुदात्त न हो, यथा-" आदह स्वधामनु पुनर्गर्भत्वमेरिरे" ॥

३९४७ अहो च । ८ । १ । ४० ॥

एतद्योगेनानुदात्तं पूजायाम् । अहो देवदत्तः पचति शोभनम् ॥

३९४७-पूजामें अहो शब्दसे युक्त तिङन्तपद अनुदात्त न हो, यथा-" अहो देवदत्तः पचति शोभनम्" । योगविभाग उत्तरार्थ है । नहीं तो तु प्रभृतिके योगमें भी उत्तरसूत्रकी प्रवृत्ति होजाती ॥

३९४८ शेषे विभाषा । ८ । १ । ४१ ॥

अहो इत्यनेन युक्तं तिङन्तं वानुदात्तमपूजायाम् । अहो कटं करिष्यति ॥

३९४८-पूजाभिन्नार्थमें अहो शब्दसे युक्त तिङन्तपद विकल्प करके अनुदात्त हो, यथा-" अहो कटं करिष्यति" ॥

३९४९ पुरा च परीप्सायाम् । ८ । १ । ४२ ॥

पुरेत्यनेन युक्तं वानुदात्तं त्वरायाम् । अधीष्व माणवक पुरा विद्योतते विद्युत् । निकटागामिन्यत्र पुराशब्दः । परीप्सायां किम् । न तेन स्म पुरा धीयते । चिरातीतेऽत्र पुरा ॥

३९४९-परीप्सा अर्थात् त्वरा होनेपर पुरा शब्दसे युक्त तिङन्तपद अनुदात्त विकल्प करके हो, यथा-" अधीष्व माणवक पुरा विद्योतते विद्युत् " अर्थात् शीघ्र पाठ करो बिजली चमकती है।इस स्थलमें पुरा शब्द निकटागामी अर्थमें समझना।परीप्सा न होनेपर यथा-" न तेन स्म पुरा धीयते " इस स्थलमें पुरा शब्दसे चिरातीत काल समझना ॥

३९५० नन्वित्यनुज्ञैषणायाम् । ८ । १ । ४३ ॥

ननु इत्यनेन युक्तं तिङन्तं नानुदात्तमनुज्ञाप्रार्थनायाम् । ननु गच्छामि भोः । अनुजानीहि मां गच्छन्तमित्यर्थः । अन्विति किम् । अकार्षीः कटं त्वम् । ननु करोमि । पृष्टप्रतिवचनमेतत् ॥

३९५०-अनुज्ञाकी प्रार्थना होनेपर ननु शब्दसे युक्त तिङन्तपद अनुदात्त न हो, यथा-"ननु गच्छामि भोः" अर्थात् मुझको जानेकी अनुमति दो । अनुज्ञा प्रार्थना न होनेपर कैसा होगा ? तो अकार्षीः कटं त्वम् । ननु करोमि, अर्थात् तुमने चटाई बनाया ? महाशय ! बनाता हूं, यह पृष्टप्रतिवचन है ॥

३९५१ किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् । ८ । १ । ४४ ॥

क्रियाप्रश्ने वर्तमानेन किंशब्देन युक्तं तिङन्तं नानुदात्तम् । किं द्विजः पचत्याहोस्विद्गच्छति । क्रियेति किम् । साधनप्रश्ने मा भूत् । किं भक्तं पचत्यपूपान्वा । प्रश्ने किम् । किं पठति । क्षेपोयम् । अनुपसर्गं किम् । किं प्रपचति उत प्रकरोति । अप्रतिषिद्धं किम् । किं द्विजो न पचति ॥

३९५१-क्रियाप्रश्नमें वर्त्तमान किं शब्दसे युक्त अनुपसर्ग अप्रतिषिद्धार्थक तिङन्तपद अनुदात्त न हो, किं द्विजः पचत्याहोस्विद्गच्छति । क्रियाप्रश्न न होकर साधनप्रश्न होनेपर अनुदात्त न होगा यथा-किं भक्तं पचत्यपूपान्वा । प्रश्नभिन्नमें कैसा होगा ? तो " किं पठति " यह क्षेप अर्थात् निन्दा है । अनुपसर्ग न होनेपर कैसा होगा ? तो किं प्रपचति उत प्रकरोति । अप्रतिषिद्धार्थक न होनेपर यथा-किं द्विजो न पचति ॥

३९५२ लोपे विभाषा । ८ । १ । ४५ ॥

किमोऽप्रयोगे उक्तं वा । देवदत्तः पचत्याहोस्वित्पठति ॥

३९५२-क्रियाप्रश्नमें विद्यमान किं शब्दका लोप अर्थात् प्रयोग न होनेपर अनुपसर्ग अप्रतिषिद्धार्थक तिङन्तपद विकल्प करके अनुदात्त न हो, यथा-देवदत्तः पचत्याहो-स्वित्पठति ॥

३९५३ एहिमन्ये प्रहासे लृट् । ८ । १ । ४६ ॥

एहिमन्ये इत्यनेन युक्तं लडन्तं नानुदात्तं क्रीडायाम् । एहि मन्ये भक्तं भोक्ष्यसे भुक्तं तत्त्वतिथिभिः । प्रहासे किम् । एहि मन्यसे ओदनं भोक्ष्ये इति सुष्ठु मन्यसे । गत्यर्थलोटा लडित्यनेनैव सिद्धे नियमार्थोऽयमारम्भः । एहि-

मन्येयुक्ते प्रहास एव नान्यत्र । एहि मन्यसे ओदनं भोक्ष्ये ॥

३९५३–प्रहास अर्थात् क्रीडा होनेपर 'एहिमन्ये' इस पदसे युक्त लृट् प्रत्ययान्तपद अनुदात्त न हो, यथा–एहि मन्ये भक्तं भोक्ष्यसे भुक्तं तत्त्वतिथिभिः । प्रहासे क्यों कहा ? तो "एहि मन्यसे ओदनं भोक्ष्ये इति सुष्ठु मन्यसे" यहां न हो "गत्यर्थलोटा लृट्० ३९५८" इस वक्ष्यमाण सूत्रसे सिद्ध होनेपर नियमार्थ इस सूत्रका आरम्भ है कि प्रहासार्थमें ही 'एहि मन्ये' इस पदसे युक्त तिङन्त अनुदात्त न हो, अन्यत्र नहीं, यथा–एहि मन्यसे ओदनं भोक्ष्ये ॥

३९५४ जात्वपूर्वम् । ८ । १ । ४७ ॥

अविद्यमानपूर्वं यज्जातु तेन युक्तं तिङन्तं नानुदात्तम् । जातु भोक्ष्यसे । अपूर्वं किम् । कटं जातु करिष्यसि ॥

३९५४–पूर्वमें कोई पद न हो ऐसे जातु शब्दसे युक्त तिङन्तपद अनुदात्त न हो, यथा–जातु भोक्ष्यसे। पूर्वमें कोई पद होनेपर कैसा होगा ? तो कटं जातु करिष्यसि ॥

३९५५ किंवृत्तं च चिदुत्तरम् । ८ । १ । ४८ ॥

अविद्यमानपूर्वं चिदुत्तरं यत्किंवृत्तम् तेन युक्तं तिङन्तं नानुदात्तम् । विभक्त्यन्तं डतरडतमान्तं किमो रूपं किंवृत्तम् । कश्चिद्भुंक्ते । कतरश्चित् । कतमश्चिद्वा । चिदुत्तरं किम् । को भुंक्ते । अपूर्वमित्येव । रामः किंचित्पठति ॥

३९५५–पूर्वमें कोई पद न हो और चित् शब्द परे हो ऐसा जो किंवृत्त शब्द उससे युक्त तिङन्तपद अनुदात्त न हो, विभक्त्यन्त, डतर और डतम प्रत्ययान्त किंशब्दके रूपको किंवृत्त कहतेहैं, यथा–कश्चिद्भुंक्ते । कतरश्चित् । कतमश्चिद्वा । चित् शब्द परे न रहते किस प्रकार होगा ? तो को भुंक्ते। पूर्वमें कोई पद न होनेपर ही होगा, इससे "रामः किंचित् पठति" यहां अनुदात्तनिषेध न हुआ ॥

३९५६ आहो उताहो चाऽनन्तरम् । ८ । १ । ४९ ॥

आहो उताहो इत्याभ्यां युक्तं तिङन्तं नानुदात्तम् । आहो उताहो वा भुंक्ते । अनन्तरमित्येव । शेषे विभाषां वक्ष्यति । अपूर्वेति किम् । देव आहो भुंक्ते ॥

३९५६–पूर्वमें कोई पद न रहते आहो और उताहो इन दो पदोंसे युक्त तिङन्तपद अनुदात्त न हो, यथा–आहो उताहो वा भुंक्ते । अनन्तर अर्थात् आहो, उताहो इन दो पदोंको और धातुके मध्यमें व्यवधान न रहनेपर ही अनुदात्त नहीं होगा, कारण कि, शेषमें विकल्प करके कहेंगे। पूर्वमें कोई पद होनेपर कैसा होगा ? तो देव आहो भुंक्ते ॥

३९५७ शेषे विभाषा । ८ । १ । ५० ॥

आभ्यां युक्तं व्यवहितं तिङन्तं वानुदात्तम् । आहो देवः पचति ॥

३९५७–आहो और उताहो इन दो पदोंसे युक्त व्यवहित तिङन्तपद विकल्प करके अनुदात्त हो, यथा–आहो देवः पचति ॥

३९५८ गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् । ८ । १ । ५१ ॥

गत्यर्थानां लोटा युक्तं तिङन्तं नानुदात्तम् यत्रैव कारके लोट् तत्रैव लडपि चेत् । आगच्छ देव ग्रामं द्रक्ष्यसि । उह्यन्तां देवदत्तेन शालयो रामेण भोक्ष्यन्ते । गत्यर्थे किम् । पच देव ओदनं भोक्ष्यसेऽन्नम् । लोटा किम् । आगच्छेर्देव ग्रामं द्रक्ष्यस्येनम् । लृट् किम् । आगच्छ देव ग्रामं पश्यस्येनम् । न चेदिति किम् । आगच्छ देव ग्रामं पिता ते ओदनं भोक्ष्यते । सर्वं किम् । आगच्छ देव ग्रामं त्वं चाहं च द्रक्ष्याव एनमित्यत्राऽपि निघातनिषेधो यथा स्यात् । यल्लोडन्तस्य कारकं तच्चान्यच्च लडन्तेनोच्यते ॥

३९५८–जिसी कारकमें लोट् हो, यदि उसी कारकमें लृट् भी हो तो गत्यर्थ प्रकृतिक लोडन्तसे युक्त लृट्स्थानिक तिङन्तपद अनुदात्त न हो, यथा–आगच्छ देव ग्रामं द्रक्ष्यसि उह्यन्तां देवदत्तेन शालयो रामेण भोक्ष्यन्ते । गत्यर्थ प्रकृतिक लोट् न होनेपर कैसा होगा ? तो पच देव ओदनं भोक्ष्यसेऽन्नम्। लोडन्तसे युक्त न होनेपर आगच्छेर्देव ग्रामं द्रक्ष्यस्येनम्। लृट् न होनेपर कैसा होगा ? तो आगच्छ देव ग्रामं पश्यस्येनम् । 'न चेत्'यह क्यों कहा? तो"आगच्छ देव ग्रामं पिता ते ओदनं भोक्ष्यते यहां निषेध न हो । सर्व शब्दका ग्रहण क्यों किया ? तो "आगच्छ देव ग्रामं त्वं चाहं च द्रक्ष्याव एनम्" इस स्थलमें भी निघातस्वरका निषेध हो, यहां लोडन्तका जो कारक वह और अन्यकारक भी लृडन्तसे उक्त होताहै ॥

३९५९ लोट् च । ८ । १ । ५२ ॥

लोडन्तं गत्यर्थलोटा युक्तं नानुदात्तम् । आगच्छ देव ग्रामं पश्य । गत्यर्थेति किम् । पच देवौदनं भुङ्क्ष्वैनम् । लोट् किम् । आगच्छ देव ग्रामं पश्यसि । न चेत्कारकं सर्वान्यदित्येव । आगच्छ देव ग्रामं पश्यत्वेनं रामः । सर्वग्रहणात्विह स्यादेव । आगच्छ देव ग्रामं त्वं चाहं च पश्यावः । योगविभाग उत्तरार्थः ॥

३९५९–लोडन्त पद यदि गत्यर्थ प्रकृतिक लोडन्तसे युक्त हो तो अनुदात्त न हो, यथा–आगच्छ देव ग्रामं पश्य । गत्यर्थ प्रकृतिक लोडन्तसे युक्त न होनेपर कैसा होगा ? तो

पच देवौदनं भुङ्क्ष्वैनम् । लोडन्त न होनेपर कैसा होगा ? तो आगच्छ देव ग्रामं पश्यसि । सब कारक अन्य न होनेपर ही होगा, इससे यहां न हुआ, यथा–आगच्छ देव ग्रामं त्वयैनं रामः । सर्व शब्दका ग्रहण करनेसे इस स्थलमें ही होगा, यथा–आगच्छ देव ग्रामं त्वं चाहं च पश्यावः । योगविभाग उत्तरार्थ है ॥

३९६० विभाषितं सोपसर्गमनुत्तमम् । ८ । १ । ५३ ॥

लोडन्तं गत्यर्थलोटा युक्तं तिङन्तं वानुदात्तम्। आगच्छ देव ग्रामं प्रविश । सोपसर्गं किम् । आगच्छ देव ग्रामं पश्य । अनुत्तमं किम् । आगच्छानि देव ग्रामं प्रविशानि ॥

३९६०–गत्यर्थ प्रकृतिक लोडन्तसे युक्त सोपसर्ग अनुत्तम लोडादेशान्तपद विकल्प करके अनुदात्त हो, यथा–आगच्छ देव ग्रामं प्रविश । उपसर्गयुक्त न होनेपर कैसा होगा ? तो आगच्छ देव ग्रामं पश्य । उत्तम संज्ञक लोट्स्थानिकादेश न होनेपर यथा–आगच्छानि देव ग्रामं प्रविशानि ॥

३९६१ हन्त च । ८ । १ । ५४ ॥

हन्तेत्यनेन युक्तमनुत्तमं लोडन्तं वानुदात्तम् । हन्त प्रविश । सोपसर्गमित्येव । हन्त कुरु । निपातैर्यद्यदीति निघातप्रतिषेधः । अनुत्तमं किम् । हन्त प्रभुनजावहै ॥

३९६१–हन्त शब्दसे युक्त उपसर्गपूर्वक उत्तमभिन्न लोडादेशान्त पद विकल्प करके अनुदात्त हो, यथा–हन्त प्रविश । उपसर्गपूर्वक न होनेपर न होगा, यथा–"हन्त कुरु" यहां "निपातैर्यद्यदि३९३७" इस सूत्रसे निघातस्वरका निषेध हुआ। उत्तम पुरुषमें कैसा होगा ? तो "हन्त प्रभुनजावहै" यह भुज् धातुके उत्तर लोट्, "भुजोऽनवने" इस सूत्रसे आत्मनेपद हुआहै ॥

३९६२ आम एकान्तरमामन्त्रितमनन्तिके । ८ । १ । ५५ ॥

आमः परमेकपदान्तरितमामन्त्रितं नानुदात्तम् । आम् पचसि देवदत्त ३ । एकान्तरं किम् । आम् प्रपचसि देवदत्त ३ । आमन्त्रितं किम् । आम् पचति देवदत्तः । अनन्तिके किम्। आम् पचसि देवदत्त ॥

३९६२–आम्से परे एकपदसे व्यवहित आमंत्रितपद अनुदात्त न हो समीप गम्य न होनेपर यथा–आम् पचसि देवदत्त ३ । एकान्तर न होनेपर–आम् प्रपचसि देवदत्त ३ आमंत्रितपद न होनेपर कैसा होगा? तो आम् पचति देवदत्तः अन्तिक गम्य होनेपर यथा–आम् पचसि देवदत्त ॥

३९६३ यद्धितुपरं छन्दसि । ८ । १ । ५६ ॥

तिङन्तं नानुदात्तम् । उदसृजो यदङ्गिरः । उशन्ति हि । आख्यास्यामि तु ते । निपातैर्यदिति हि चेति तु पश्येति च सिद्धे नियमार्थमिदम् । एतैरेव परभूतैर्योगे नान्यैरिति । जाये स्वारोहावेहि । एहीति गत्यर्थलोटा युक्तस्य लोडन्तस्य निघातो भवति ॥

३९६३–वेदमें यत् हि और तु शब्द परे रहते तिङन्तपद अनुदात्त न हो, यथा–उदसृजो यदङ्गिरः । उशन्ति हि । आख्यास्यामि तु ते । "निपातैर्यत्० ३९३७, हि च३९४१" और "तु पश्य० ३९४६" इन तीन सूत्रोंसे पूर्वोक्त कार्य्यकी सिद्धि होनेपर यह सूत्र नियमार्थ है कि, परस्थित यही संपूर्ण शब्दके योगमें अनुदात्तका निषेध हो अन्यशब्दके योगमें नहीं, इससे "जायेस्वारोहावेहि" इस स्थलमें गत्यर्थक इण् धातु प्रकृतिक लोडन्तसे युक्त लोडन्त रोहाव पदको "लोट् च" से प्राप्त निघातस्वरका प्रतिषेध न हुआ ॥

३९६४ चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः । ८ । १ । ५७ ॥

एषु षट्सु परतस्तिङन्तं नानुदात्तम् । देवः पचति चन । देवः पचति चित् । देवः पचतीव । देवः पचति गोत्रम् । देवः पचतिकल्पम् । देवः पचतिपचति । अगतेः किम् । देवः प्रपचति चन ॥

३९६४–गतिसंज्ञकसे परे न होनेपर चन, चित्, इव, गोत्रादि तद्धित प्रत्यय और आम्रेडित संज्ञक शब्द परे रहते तिङन्तपद अनुदात्त न हो, यथा–देवः पचति चन । देवः पचति चित् । देवः पचतीव । देवः पचति गोत्रम् । देवः पचतिकल्पम् । देवः पचतिपचति । गतिसंज्ञकसे परे होनेपर यथा–देवः प्रपचति चन ॥

३९६५ चादिषु च । ८ । १ । ५८ ॥

चवाहाहैवेषु परेषु तिङन्तं नानुदात्तम् । देवः पचति च खादति च । अगतेरित्येव । देवः प्रपचति च प्रखादति च । प्रथमस्य चवायोग इति निघातः प्रतिषिध्यते द्वितीयं तु निहन्यत एव ॥

३९६५–गतिसंज्ञकसे परे न होनेपर च, वा, ह, अह, एव इतने शब्द परे रहते तिङन्तपद अनुदात्त न हो, "देवः पचति च खादति च" इस स्थलमें "चवायोगे० ३९६६" इस सूत्रसे प्रथमतिङन्तपदको निघातस्वर प्रतिषिद्ध होताहै, दूसरेको तो निघातस्वर होहीगा ॥

३९६६ चवायोगे प्रथमा । ८ । १ । ५९ ॥

चवेत्याभ्यां योगे प्रथमा तिङ्विभक्तिर्नानुदात्ता । गाश्च चारयति वीणां वा वादयति । इतो वा सातिमीमहे । उत्तरवाक्ययोरनुषज्यमानतिङन्तापेक्षयेयं प्राथमिकी । योगे किम् ।

पूर्वभूतयोरपि योगे निघातार्थम्। प्रथमाग्रहणं द्वितीयादेस्तिङन्तस्य मा भूत् ॥

३९६६-च, वा इन दो निपातोंके योगमें प्रथमा तिङ्विभक्ति अनुदात्त न हो, गाश्च चारयति वीणां वा वादयति। इतो वा सातिमीमहे। यहां उत्तरके दोनों वाक्योंमें अर्थात् देवो वा पार्थिवादधि, इन्द्रं महो वा रजस इन दोनों वाक्योंमें अनुषज्जनीय तिङन्तकी अपेक्षासे यह तिङ्विभक्ति प्राथमिकी है। योगग्रहण क्यों किया ? तो पूर्वस्थित भी उन दोनोंके योगमें निघातस्वर हो। प्रथमा शब्दका ग्रहण द्वितीयादि तिङन्तके अनुदात्तका निषेध न हो, इसके निमित्त है ॥

३९६७ हेति क्षियायाम् ।८।१।६०॥

हयुक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता धर्मव्यतिक्रमे। स्वयं ह रथेन याति ३। उपाध्यायं पदातिं गमयति। क्षियाशीरिति प्लुतः ॥

३९६७-धर्म्मव्यतिक्रममें ह युक्त प्रथमा तिङ्विभक्ति अनुदात्त न हो, यथा-स्वयं ह रथेन याति ३। उपाध्यायं पदातिं गमयति। "क्षियाशीः ३६३०" इससे प्लुत हुआ है। शिष्यका रथमें बैठकर जाना उपाध्यायका पैदल जाना आचारविरुद्ध है ॥

३९६८ अहेति विनियोगे च ।८।१।६१॥

अहयुक्ता प्रथमा तिङ्भक्तिर्नानुदात्ता नानाप्रयोजने नियोगे क्षियायां च। त्वमह ग्रामं गच्छ। त्वमह रथेनारण्यं गच्छ। क्षियायां स्वयमह रथेन याति ३। उपाध्यायं पदातिं नयति ॥

३९६८-नानाप्रयोजनक नियोग और क्षिया अर्थात् धर्म्मव्यतिक्रमार्थमें अहयुक्त प्रथमा तिङ्विभक्ति अनुदात्त न हो, यथा-त्वमह ग्रामं गच्छ। त्वमह रथेनारण्यं गच्छ। क्षियामें यथा-स्वयमह रथेन याति ३। उपाध्यायं पदातिं नयति ॥

३९६९ चाहलोप एवेत्यवधारणम् ।८।१।६२॥

च अह एतयोर्लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता। देव एव ग्रामं गच्छतु। देव एवारण्यं गच्छतु। ग्राममरण्यं च गच्छत्वित्यर्थः। देव एव ग्रामं गच्छतु। राम एवारण्यं गच्छतु। ग्रामं केवलमरण्यं केवलं गच्छत्वित्यर्थः। इहाहलोपः स च केवलार्थः। अवधारणं किम्। देव क्व भोक्ष्यसे। न क्वचिदित्यर्थः। अनवक्लृप्तावेव ॥

३९६९-अवधारणार्थक एव शब्दप्रयोगमें च और अह यह दोनों निपातका लोप होनेपर प्रथमा तिङ्विभक्ति अनुदात्त न हो, यथा-देव एव ग्रामं गच्छतु। देव एवारण्यं गच्छतु अर्थात् ग्राम और अरण्यको जायँ। देव एव ग्रामं गच्छतु। राम एवारण्यं गच्छतु। अर्थात् केवल ग्राम और केवल अरण्यको जायँ। इस स्थलमें अह शब्दका लोप है, वह केवलार्थक है। अवधारणार्थ न होनेपर कैसा होगा ? तो देव क्व भोक्ष्यसे, अर्थात् देव कहां भोजन करोगे ? कहीं नहीं। इस स्थलमें अनवक्लृप्ति अर्थमें एव शब्द प्रयुक्त है ॥

३९७० चादिलोपे विभाषा ।८।१।६३॥

चवाहाहैवानां लोपे प्रथमातिङ्विभक्तिर्नानुदात्ता। चलोपे। इन्द्र वाजेषु नोऽव। शुक्ला व्रीहयो भवन्ति। श्वेता गा आज्याय दुहन्ति। वालोपे। व्रीहिभिर्यजेत। यवैर्यजेत ॥

३९७०-च, वा, ह, अह और एव शब्दके लोपमें प्रथमा तिङ्विभक्ति विकल्प करके अनुदात्त न हो, चलोपमें यथा-इन्द्र वाजेषु नोऽव। शुक्ला व्रीहयो भवन्ति। श्वेता गा आज्याय दुहन्ति। वा शब्दका लोप होनेपर यथा-व्रीहिभिर्यजेत। यवैर्यजेत ॥

३९७१ वैवावेति च च्छन्दसि ।८।१।६४॥

अहवै देवानामासीत्। अयं वाव हस्त आसीत् ॥

३९७१-वेदमें वै और वाव शब्दके योगमें प्रथमा तिङ्विभक्ति विकल्प करके अनुदात्त न हो, यथा-अहवै देवानामासीत्। अयं वाव हस्त आसीत् ॥

३९७२ एकान्याभ्यां समर्थाभ्याम् ।८।१।६५॥

आभ्यां युक्ता प्रथमा तिङ्भक्तिर्नानुदात्ता छन्दसि। अजामेकां जिन्वति। प्रजामेकां रक्षति। तयोरन्यः पिप्पलं स्वाद्वत्ति। समर्थाभ्यां किम्। एको देवानुपातिष्ठत्। एक इति संख्यापरं नान्यार्थम् ॥

३९७२-वेदमें तुल्यार्थवाचक एक और अन्य शब्दोंके योगमें प्रथम तिङन्त पद विकल्प करके अनुदात्त न हो, यथा-"अजामेकां जिन्वति"। "प्रजामेकां रक्षति"। तयोरन्यः पिप्पलं स्वाद्वत्ति (ऋ० २।३।१७) समर्थन होनेपर यथा-"एको देवानुपातिष्ठत्"। इस स्थलमें एक शब्द संख्यावाचक है। अन्यार्थक नहीं है। जिन्वति= जिवि=इदित् होनेसे नुम्, लट्, तिप्, शप्, ॥

३९७३ यद्वृत्तान्नित्यम् ।८।१।६६॥

यत्र पदे यच्छब्दस्ततः परं तिङन्तं नानुदात्तम्। यो भुङ्क्ते। यद्वयङ्ङायुर्वाति। अत्र व्यवहिते कार्यमिष्यते ॥

३९७३-जिस पदमें यद् शब्द है उसके उत्तर तिङन्त पद अनुदात्त न हो, यथा-यो भुङ्क्ते। यद्वयङ्ङायुर्वाति। इस स्थलमें यत् पदके और तिङन्त पदके मध्यमें कोई

पदका व्यवधान रहते अनुदात्त इष्ट है। यद्रयङ् यद्+अञ्च्+क्विन् " विष्वग्देवयोश्च " इससे टिको अद्रि आदेश हुआ ॥

३९७४ पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः । ८ । १ । ६७ ॥

पूजनेभ्यः काष्ठादिभ्यः पूजितवचनमनुदात्तम् । काष्ठाध्यापकः । मलोपश्च वक्तव्यः ॥*॥ दारुणाध्यापकः । अज्ञाताध्यापकः ॥ समासान्तोदात्तत्वापवादः । एतत्समास इष्यते ॥ नेह । दारुणमध्यापक इति वृत्तिमतम् । पूजनादित्येव पूजितग्रहणे सिद्धे पूजितग्रहणमनन्तरपूजितलाभार्थम् । एतदेव ज्ञापकमत्र प्रकरणे पञ्चमीनिर्देशेपि नानन्तर्यमाश्रीयत इति ॥

३९७४-पूजनार्थक काष्ठादि शब्दोंके उत्तर पूजितवाचक शब्द अनुदात्त हो, यथा-काष्ठाध्यापकः मकारका लोप हो * दारुणाध्यापकः । अज्ञाताध्यापकः । यह समासान्तोदात्तका अपवाद है । यह समासमें ही होगा । दारुणमध्यापकः इस स्थलमें नहीं होगा,यह वृत्तिकारका अभिप्राय है । "पूजनात्" इस पदके द्वारा पूजित शब्दका ग्रहण होजाता, फिर किस कारण पुनर्वार पूजितग्रहण किया ? अनन्तर पूजित शब्दकी प्राप्तिके निमित्त ऐसा ग्रहण किया है । यह ज्ञापक है कि, इस प्रकरणमें पञ्चमी निर्देश रहते भी आनन्तर्य्य आश्रित नहीं होगा । काष्ठादि शब्द यथा-काष्ठ, दारुण, कल्याण, अनुक्त, इत्यादि हैं ॥

३९७५ सगतिरपि तिङ् । ८ । १ । ६८ ॥

पूजनेभ्यः काष्ठादिभ्यस्तिङन्तं पूजितमनुदात्तम् । यत्काष्ठं प्रपचति । तिङ्ङतिङ इति निघातस्य निपातैर्यदिति निषेधे प्राप्ते विधिरयम् । सगतिग्रहणाच्च गतिरपि निहन्यते ॥ गतिग्रहणे उपसर्गग्रहणमिष्यते ॥ * ॥ नेह । यत्काष्ठं शुक्लीकरोति ॥

३९७५-पूजनार्थक काष्ठादि शब्दोंके उत्तर गतिसहित तिङन्त पूजित पद अनुदात्त हो, यथा-यत्काष्ठं प्रपचति । " तिङ्ङतिङः (३९३५)" इस सूत्रसे विहित निघात स्वरको " निपातैर्यत्० (३९३७) " इस सूत्रसे निषेधकी प्राप्ति होनेपर यह विधि जानना चाहिये । सगति पदका ग्रहण करनेसे केवल गतिसंज्ञकको भी निघात स्वर हो ।

गति शब्दका ग्रहण करनेसे उपसर्गका ग्रहण इष्ट है*अत एव " यत्काष्ठं शुक्ली करोति " इस स्थलमें अनुदात्त नहीं हुआ । जिस स्थलमें तुल्य योगमें सह शब्द है उस स्थलमें दोनोंको ही कार्य होता है, यथा-सपुत्रो भोज्यताम् । ऐसा कहनेसे पिता और पुत्र दोनोंका भोजन समझना । अपि शब्दका ग्रहण करनेसे जिस स्थलमें गति संज्ञकका योग नहीं होता, उस स्थलमें केवल तिङन्तको ही होगा । गतिसंज्ञक शब्दका प्रयोग होनेपर दोनोंके साथ ही होगा । तिङ्ग्रहणसे पूर्वयोगका अतिङ्विषयत्व ज्ञापित होता है ॥

३९७६ कुत्सने च सुप्यगोत्रादौ । ८ । १ । ६९ ॥

कुत्सने च सुबन्ते परे सगतिरगतिरपि तिङनुदात्तः । पचति पूति । प्रपचति पूति । पचति मिथ्या । कुत्सने किम् । प्रपचति शोभनम् । सुपि किम् । पचति क्लिश्नाति । अगोत्रादौ किम् । पचति गोत्रम् ॥ क्रियाकुत्सन इति वाच्यम् ॥*॥ कर्तुः कुत्सने मा भूत् । पचति पूतिर्देवदत्तः ॥ पूति श्चानुबन्ध इति वाच्यम् ॥ * ॥ तेनायं चकारानुबन्धत्वादन्तोदात्तः ॥ वाबह्वर्थमनुदात्तमिति वाच्यम् ॥ * ॥ पचन्तिपूति ॥

३९७६-कुत्सनार्थ गोत्रादिभिन्न सुबन्त पद परे रहते सगति और अगति अर्थात् गतिसंज्ञक शब्द करके युक्त अथवा अयुक्त जो तिङन्त पद वह अनुदात्त हो, यथा-पचति पूति । प्रपचति पूति । पचति मिथ्या । प्रपचति मिथ्या । कुत्सनार्थ न होनेपर प्रपचति शोभनम् । सुबन्त पद परे न होनेपर पचति क्लिश्नाति । गोत्रादि होनेपर पचति गोत्रम् ।

क्रियाके कुत्सन अर्थमें तिङन्त अनुदात्त हो, ऐसा कहना चाहिये * कर्त्ताके कुत्सन अर्थ होनेपर नहीं होगा । यथा-" पचति पूतिर्देवदत्तः " ।

अनुबन्धसहित पूति शब्द रहते तिङन्त अनुदात्त हो ऐसा कहना चाहिये* चकारानुबन्धसे यह अन्तोदात्त है, तिबन्त पूति शब्द आद्युदात्त है अत एव चकारानुबन्धत्वके कारण वह अन्तोदात्त होगा ।

बहुवचनान्त तिङन्त पद विकल्प करके अनुदात्त हो * जब तिङन्तको निघात स्वर हो, तबपूति शब्द अन्तोदात्त है अन्य स्थलमें आद्युदात्त है, यथा-पचन्ति पूति ॥

३९७७ गतिर्गतौ । ८ । १ । ७० ॥

अनुदात्तः । अभ्युद्धरति । गतिः । किम् । दत्तः पचति । गतौ किम् । आमन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ॥

३९७७-गतिसंज्ञक परे रहते गतिसंज्ञक अनुदात्त हो । यथा-अभ्युद्धरति । गतिसंज्ञक न होनेपर यथा-दत्तः पचति । गति परे न रहते यथा-" आमन्द्रैरिन्द्र " । हरिभिर्याहि मयूररोमभिः ॥

३९७८ तिङि चोदात्तवति । ८ । १ । ७१ ॥

गतिरनुदात्तः यत्प्रपचति । तिङ्ग्रहणमुदात्तवतः परिमाणार्थम् । अन्यथा हि यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गतिस्तत्र धातावेवोदात्तवति स्यात् प्रत्यये न स्यात् । उदात्तवति किम् । प्रपचति ॥

॥ इति तिङन्तस्वराः ॥

३९७८-उदात्त स्वर विशिष्ट तिङन्त पद परे रहते गतिसंज्ञक शब्द उदात्त हो, यह सूत्र " निपाता आद्युदात्ताः "

इस सूत्रका अपवाद है । यथा–यत्प्रपचति "निपातैर्यद्यादि०" इस सूत्रसे निघात स्वरके प्रतिषेधके कारण तिङन्त पदको उदात्त स्वर होगा। उदात्त विशिष्टके परिमाणार्थ तिङ् शब्दका ग्रहण हुआ है । अन्यथा 'यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा' इस वचनबलसे उदात्त स्वर विशिष्ट धातु परे रहते गतिसंज्ञक उदात्त होंगे, उदात्त स्वर विशिष्ट प्रत्यय परे रहते न होंगे, उदात्त स्वर न होनेपर यथा–प्रपचति ॥

इति तिङन्तस्वर प्रकरणम् ।

अथ वैदिकवाक्येषु स्वरसञ्चारप्रकारः कथ्यते । अग्निमीळ इति प्रथमा ऋक् । तत्राग्निशब्दोऽव्युत्पत्तिपक्षे फिष इत्यन्तोदात्त इति माधवः । वस्तुतस्तु घृतादित्वात् । व्युत्पत्तौ तु निप्रत्ययस्वरेण । अम् सुप्त्वादनुदात्तः । अमि पूर्व इत्येकादेशस्त्वेकादेश उदात्तेनेत्युदात्तः । ईळे । तिङ्ङतिङ इति निघातः । संहितायां तूदात्तादनुदात्तस्येतीकारः स्वरितः । स्वरितात्संहितायामिति ळे इत्यस्य प्रचयापरपर्यायो एकश्रुतिः। पुरःशब्दोन्तोदात्तः पूर्वाधरावराणामित्यसिप्रत्ययस्वरात् । हितशब्दोपि धाञो निष्ठायां दधातेर्हिरिति ह्यादेशे प्रत्ययस्वरेणान्तोदात्तः । पुरोऽव्ययमिति गतिसंज्ञायां कुगतीति समासे समासान्तोदात्तेतत्पुरुषे तुल्यार्थेत्यव्ययपूर्वपदप्रकृतिस्वरे गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरे थाथादिस्वरे च पूर्वपूर्वोपमर्देन प्राप्ते गतिरनन्तर इति पूर्वपदप्रकृतिस्वरः । पुरःशब्दोकारस्य संहितायां प्रचये प्राप्ते उदात्तस्वरितपरस्य सन्नतर इत्यनुदात्ततरः । यज्ञस्य । नङः प्रत्ययस्वरः । विभक्तेः सुप्त्वादनुदात्तत्वे स्वरितत्वम् । देवम् । पचाद्यच् । फिट्स्वरेण प्रत्ययस्वरेण चित्स्वरेण वान्तोदात्तः । ऋत्विक्छब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । होतृशब्दस्तृन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः । रत्नशब्दो नब्विषयस्येत्याद्युदात्तः । रत्नानि दधातीति रत्नधाः । समासस्वरेण कृदुत्तरपदप्रकृतिस्वरेण वान्तोदात्तः । तमपः पित्त्वादनुदात्तत्वे स्वरितप्रचयावित्यादि यथाशास्त्रमुन्नेयम् ॥

इत्थं वैदिकशब्दानां दिङ्मात्रमिह दर्शितम् ॥
तदस्तु प्रीतये श्रीमद्भवानीविश्वनाथयोः ॥१॥

इति सिद्धान्तकौमुद्यां श्रीभट्टोजिदीक्षितविरचितायां वैदिकस्वरप्रक्रिया ॥

अब वैदिक प्रकरणमें स्वरसमूहकी संचारप्रणाली कही जातीहै । अग्निमीळेपुरोहितं यज्ञस्य देवमृत्विजम् होतारं रत्नधातमम्" यह ऋग्वेदका प्रथम ऋक् अर्थात् मंत्र है । इस स्थानमें अग्नि शब्द अव्युत्पत्ति पक्षमें "फिष०" इस सूत्रसे अन्तोदात्त होगा, यह माधव कहतेहैं । वास्तवमें घृतादित्वके कारण अन्तोदात्त है किन्तु व्युत्पत्तिविषयमें नि प्रत्ययस्वरसे अम् सुप् होनेके कारण अनुदात्त है । "अमि पूर्वः" इस सूत्रसे एकादेश तो "एकादेश उदात्तेन० ३६५८" इस सूत्रसे उदात्त स्वर हुआ । ईळे[1] इससे "तिङ्ङतिङः ३९३५" इस सूत्रसे निघात हुआ । किन्तु संहितामें "उदात्तानुदात्तस्य० (३६६०)" अर्थात् उदात्तके परे अनुदात्त स्वरित हो, इस सूत्रसे ईकारको स्वरित स्वर हुआ । "स्वरितात्संहितायाम् ३६६८" इस सूत्रसे "ळे" इस भागको प्रचयापरपर्याय एकश्रुतिस्वर हुआ । पुरः शब्द अन्तोदात्त है "पूर्वाधरावरा०" इस सूत्रसे जो असि प्रत्यय हुआहै उसके स्वरसे इस स्थलमें पुरः शब्द अन्तोदात्त है । हित शब्द धा धातुके उत्तर क्त प्रत्यय और धातुके स्थानमें हि आदेश करके निष्पन्न हुआहै । यह प्रत्यय स्वरसे अन्तोदात्त है । "पुरोऽव्ययम् (७६८)" इस सूत्रसे गतिसंज्ञा सिद्ध होनेपर और "कुगति० ७६१" इस सूत्रसे समास होनेपर समासान्तोदात्त और "तत्पुरुषे तुल्यार्थ० ३७३६" इस सूत्रसे अव्यय पूर्वपद प्रकृतिस्वर "गतिकारकोपपदात्कृत् ३८७३" इस सूत्रसे कृदुत्तर पद प्रकृतिस्वर और थाथादिस्वर पूर्वपूर्वके उपमर्दद्वारा प्राप्त होनेपर "गतिरनन्तरः ३७८३" इस सूत्रसे पूर्वपद प्रकृतिस्वर हुआ । पुरःशब्दोकारके संहिता होनेपर प्रचय प्राप्त होनेपर "उदात्त स्वरित परस्य सन्नतरः ३६६९" इस सूत्रसे अनुदात्ततर स्वर होता है । यज्ञस्य । इस पदके नङ्को प्रत्ययस्वर हुआ । विभक्तिको सुप्त्वके कारण अनुदात्तत्व होनेपर स्वरित हुआ । देवम् । इस स्थलमें पचादित्वके कारण अच्, फिट्स्वर, प्रत्ययस्वर, और चित्स्वरद्वारा अन्तोदात्त है । ऋत्विक् शब्द कृदुत्तरपद प्रकृतिस्वरसे अन्तोदात्त है । होतृ शब्द तृन्प्रत्ययान्त है, यह नित्स्वरसे आद्युदात्त है । रत्न शब्द "नब्विषयस्य २६" इस सूत्रसे आद्युदात्त है । रत्नानि दधाति इस विग्रहमें रत्नधाः । समासस्वरसे अथवा कृदुत्तर पद प्रकृतिस्वरसे अन्तोदात्त है । तमप्का पकार इत्संज्ञक होनेके कारण अनुदात्त होनेपर स्वरित और प्रचय इत्यादि यथाशास्त्र जानने, इस प्रकारसे वैदिक प्रयोगोंके समूहोंका सम्पूर्णांश दिखाया गया ॥

इति श्रीमत्कान्यकुब्जवंशोद्भवपण्डितसुखानन्दमिश्रात्मज–ज्वालाप्रसादमिश्रकृत–भाषाटीकायां सिद्धान्तकौमुद्यां स्वरप्रकरणं समाप्तम् ॥

---

१ ईळे–ईड स्तुतौ लट् उत्तम पुरुषका एकवचन इट् टिको एत्व । 'द्वयोश्चास्यस्वरयोः' इस प्रातिशाख्य सूत्रसे ळः, यज्ञस्य= यज इसको "यजयाच०" इससे नङ् । ऋत्विजम्=ऋतु+यज+क्विन्, "वचिस्वपि०" इससे सम्प्रसारण, "नब्विषयस्य०," इससे इसन्त वर्जित नित्य नपुंसकको आदि उदात्त होताहै ॥

लिङ्गानुशासनम्।

अथ स्त्र्यधिकारः।

१ 'लिङ्गम्' ॥

१-लिंगम् ॥

२ 'स्त्री' ॥ अधिकारसूत्रे एते ॥

२-स्त्री, यह दोनों अधिकार सूत्र हैं, परन्तु दोनोंको अधिकारसूत्रत्व होनेपर भी 'लिङ्गम्' इसका शास्त्रसमाप्तिपर्य्यन्त और 'स्त्री' इसका "ताराधारा" इस सूत्रपर्य्यन्त अधिकार चलेगा, यह पार्थक्य है ॥

३ 'ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः' ॥ ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः। स्वस्रादिपञ्चकस्यैव ङीब्निषेधेन कर्त्रीत्यादेर्ङीपा ईकारान्तत्वात्। तिसृचतस्रोस्तु स्त्रियामादेशतया विधानेपि प्रकृत्योस्त्रिचतुरोरृदन्तत्वाभावात् ॥

३-ऋकारान्त मातृ, दुहितृ, स्वसृ, यातृ और ननान्द (ननान्द) यह पांच ही शब्द स्त्रीलिङ्ग हैं, कारण कि, स्वस्रादि पांच ही शब्दोंके उत्तर स्त्रीलिङ्गमें विहित ङीप्के निषेधके कारण, कर्त्री इत्यादि पदोंको ङीप्के योगसे ईकारान्तत्व होजाताहै और स्त्रीलिङ्गमें तिसृ, चतसृ आदेश होनेके कारण उनको ऋकारान्त होनेपर भी त्रि और चतुर शब्दको ऋदन्तत्व नहीं है ॥

४ 'अन्यूप्रत्ययान्तो धातुः' ॥ अनिप्रत्ययान्त ऊप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। अवनिः। चमूः। प्रत्ययग्रहणं किम्। देवयतेः क्विप्। द्यूः। विशेष्यलिङ्गः ॥

४-अनिप्रत्ययान्त और ऊप्रत्ययान्त धातुजात शब्द स्त्रीलिङ्ग हों, यथा-अवनिः। चमूः। प्रत्यय ग्रहणका प्रयोजन क्या है ? तो दिव् धातुके उत्तर क्विप् करके 'द्यू' यह पद स्त्रीलिङ्ग न हो, यह विशेष्यलिङ्ग है ॥

५ 'अशनिभरण्यरणयः पुंसि च' ॥ इयमयं वा अशनिः ॥

५-अशनि, भरणि, अरणि शब्द पुंलिङ्गमें और स्त्रीलिङ्गमें प्रयुक्त हों, यथा-इयमयं वा अशनिः ॥

६ 'मिन्यन्तः' ॥ मिप्रत्ययान्तो निप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। भूमिः। ग्लानिः ॥

६-मि प्रत्ययान्त और नि प्रत्ययान्त धातुजात शब्द स्त्रीलिङ्गमें प्रयुक्त हों, यथा-भूमिः ग्लानिः ॥

७ 'वह्निवृष्ण्यग्नयः पुंसि' ॥ पूर्वस्यापवादः ॥

७-वह्नि, वृष्णि और अग्नि शब्द पुँल्लिङ्गमें प्रयुक्त हों, यह सूत्र पूर्वसूत्रका अपवाद है ॥

८ 'श्रोणियोन्यूर्मयः पुंसि च' ॥ इयमयं वा श्रोणिः ॥

८-श्रोणि, योनि और ऊर्मि शब्द पुँल्लिङ्ग और स्त्रीलिङ्गमें प्रयुक्त हों, यथा-इयमयं वा श्रोणिः ॥

९ 'क्तिन्नन्तः' ॥ स्पष्टम्। कृतिरित्यादि ॥

९-क्तिन् प्रत्ययान्त शब्दका स्त्रीलिङ्गमें प्रयोग हो, यथा-कृतिः इत्यादि ॥

१० 'ईकारान्तश्च' ॥ ईप्रत्ययान्तः स्त्री स्यात्। लक्ष्मीः ॥

१०-ई प्रत्ययान्त शब्द स्त्रीलिंगमें प्रयुक्त हो, यथा-लक्ष्मीः ॥

११ 'ऊङाबन्तश्च' ॥ कुरूः। विद्या ॥

११-ऊङ् प्रत्ययान्त और आबन्त शब्दोंका स्त्रीलिंगमें प्रयोग हो, यथा--कुरूः। विद्या ॥

१२ 'य्वन्तमेकाक्षरम्' ॥ श्रीः। भूः। एकाक्षरं किम्। पृथुश्रीः ॥

१२-ईकारान्त, ऊकारान्त एकाक्षर शब्दका स्त्रीलिंगमें प्रयोग हो, यथा-श्रीः। भूः। एकाक्षर न होनेपर कैसा होगा ? तो 'पृथुश्रीः' यह शब्द पुँल्लिंग है ॥

१३ 'विंशत्यादिरानवतेः' ॥ इयं विंशतिः। त्रिंशत्। चत्वारिंशत्। पञ्चाशत्। षष्टिः। सप्ततिः। अशीतिः। नवतिः ॥

१३-विंशतिसे नवतिपर्यन्त संख्यावाचक शब्दोंका स्त्रीलिङ्गमें प्रयोग हो, यथा-इयं विंशतिः। इयं त्रिंशत्। इयं चत्वारिंशत्। पञ्चाशत्। षष्टिः। सप्ततिः। अशीतिः। नवतिः ॥

१४ 'दुन्दुभिरक्षेषु' ॥ इयं दुन्दुभिः। अक्षेषु किम्। अयं दुन्दुभिर्वाद्यविशेषोऽसुरो वेत्यर्थः ॥

१४-अक्ष अर्थमें दुन्दुभि शब्दका स्त्रीलिङ्गमें प्रयोग हो, यथा-इयं दुन्दुभिः। अक्ष अर्थ न होनेपर पुँल्लिङ्ग होगा, यथा-अयं दुन्दुभिः, । अर्थात् वाद्यविशेष वा असुर ॥

१५ 'नाभिरक्षत्रिये' ॥ इयं नाभिः ॥

१५-अक्षत्रिय अर्थमें नाभि शब्दका स्त्रीलिङ्गमें प्रयोग हो, यथा-इयं नाभिः ॥

१६ 'उभावप्यन्यत्र पुंसि' ॥ दुन्दुभिर्नाभिश्चोक्तविषयादन्यत्र पुंसि स्तः। नाभिः क्षत्रियः। कथं तर्हि-"समुल्लसत्पंकजपत्रकोमलैरुपाहितश्रीण्युपनीविनाभिभिः" इति भारविः उच्यते। दृढभक्तिरित्यादाविव कोमलैरिति सामान्ये नपुंसकं बोध्यम्। वस्तुतस्तु। लिङ्गमशिष्यं लोकाश्रयत्वाल्लिंगस्येति भाष्यात्पुंस्त्वमपीह साधु। अत एव-"नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्। द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामदे" इति मेदिनी। रभसोऽप्याह-"मुख्यराट् क्षत्रिये नाभिः पुंसि प्राण्यंगके द्वयोः। चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे" इति। एवमेवंविधेऽन्यत्रापि बोध्यम् ॥

१६-दुन्दभि और नाभि शब्द पूर्वोक्तार्थसे भिन्न अर्थमें पुँल्लिङ्ग हों, यथा-नाभिः क्षत्रियः अक्षत्रिय वाच्यमें स्त्रीलिङ्ग होनेसे भारविका " समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रीण्युपनीवि नाभिभिः " ऐसा प्रयोग किस प्रकार सिद्ध हुआ ? इस विषयमें कहते हैं कि, दृढभक्तिः इत्यादि प्रयोगोंकी समान कोमलैः इस स्थलमें सामान्यमें नपुंसकलिङ्ग है। वास्तविक तो "लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य" इस भाष्यके अनुसार इस स्थलमें पुँल्लिङ्ग भी साधु है, अत एव " नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्। द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामदे " ऐसा मेदिनीमें लिखा है। रभसने भी कहा है कि, "मुख्यराट् क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः। चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे " । इसी प्रकार अन्यत्र भी ऐसे जगहमें समझना ॥

१७ 'तलन्तः' ॥ अयं स्त्रियां स्यात् । शुक्लस्य भावः शुक्लता । ब्राह्मणस्य कर्म ब्राह्मणता । ग्रामस्य समूहो ग्रामता । देव एव देवता ॥

१७-तल्प्रत्ययान्त शब्द स्त्रीलिङ्गमें प्रयुक्त हों, यथा-शुक्लस्य भावः=शुक्लता । ब्राह्मणस्य कर्म्म=ब्राह्मणता । ग्रामस्य समूहः=ग्रामता । देव एव=देवता ॥

१८ 'भूमिविद्युत्सरिल्लतावनिताभिधानानि'॥ भूमिर्भूः । विद्युत्सौदामनी । सरिन्निम्नगा । लता वल्ली । वनिता योषित् ॥

१८-भूमि, विद्युत्, सरित्, लता और वनितावाचक शब्द स्त्रीलिङ्गमें प्रयुक्त हों, यथा-भूमिः-भूः । विद्युत्-सौदामनी । सरिन्निम्नगा । लता-वल्ली । वनिता-योषित् ॥

१९ 'यादो नपुंसकम्' ॥ यादःशब्दः सरिद्वाचकोपि क्लीबं स्यात् ॥

१९-यादस् शब्द नदीवाचक होनेपर भी स्त्रीलिङ्ग न होकर क्लीबलिङ्गमें प्रयुक्त हो ॥

२० 'भाःस्रुक्स्रग्दिगुष्णिगुपानहः' ॥ एते स्त्रियां स्युः । इयं भाः इत्यादि ॥

२०-भास्, स्रुच्, स्रज्, दिश्, उष्णिह्, उपानह् शब्द स्त्रीलिङ्गमें प्रयुक्त हों, यथा-इयं भाः । इत्यादि ॥

२१ 'स्थूणोर्णे नपुंसके च' ॥ एते स्त्रियां क्लीबे च स्तः । स्थूणा-स्थूणम् । ऊर्णा-ऊर्णम् । तत्र स्थूणा काष्ठमयी द्विकर्णिका । ऊर्णा तु मेषादिलोम ॥

२१-स्थूणा और ऊर्ण शब्द क्लीबलिङ्ग और स्त्रीलिङ्गमें प्रयुक्त हों, यथा-स्थूणा, स्थूणम् । ऊर्णा, ऊर्णम् । स्थूणा शब्दसे काष्ठमयी द्विकर्णिका (खूँटी) समझना । ऊर्णा शब्दसे मेषका लोम समझना ॥

२२ 'गृहशशाभ्यां क्लीबे' ॥ नियमार्थमिदम् । गृहशशपूर्वे स्थूणोर्णे यथासंख्यं नपुंसके स्तः । गृहस्थूणम् । "शशोर्णं शशलोमनि" इत्यमरः ॥

२२-क्रमसे गृह और शश शब्दके परे स्थित स्थूणा और ऊर्णा शब्द क्लीब हों, यह सूत्र नियमार्थक है कि, गृह और शश शब्दके परे ही क्रमसे स्थूणा और ऊर्णा शब्द नपुंसक हो, यथा-गृहस्थूणम् । शशोर्णम्, अर्थात् शशलोम । "शशोर्णं शशलोमनि " ऐसा अमरकोश है ॥

२३ 'प्रावृड्विप्रुड्रुट्तृड्विट्त्विषः' ॥ एते स्त्रियां स्युः ॥

२३-प्रावृष्, विप्रुष्, रुष्, तृष्, विष्, और त्विष् शब्दका स्त्रीलिंङ्गमें प्रयोग हो ॥

२४ 'दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्योषधिकट्यङ्गुलयः' ॥ एते स्त्रियां स्युः । पक्षे ङीष् । दर्वी-दर्विरित्यादि ॥

२४-दर्वि, विदि, वेदि, खनि, शानि, अश्रि, वेशि, कृषि, ओषधि, कटि, और अङ्गुलि शब्दोंका स्त्रीलिङ्गमें प्रयोग हो, विकल्प करके ङीष् प्रत्यय भी होकर यथा-दर्वी, दर्विः । इत्यादि ॥

२५ 'तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छविरात्र्यादयः' ॥ एते प्राग्वत् । इयं तिथिरित्यादि । अमरस्त्वाह—"तिथयो द्वयोः" इति । तथा च भारविः-"तस्य भुवि बहुतिथास्तिथयः" इति । स्त्रीत्वे हि बहुतिथ्य इति स्यात् । श्रीहर्षश्च-"निखिलान्निशि पौर्णिमातिथीन्" इति ॥

२५-तिथि, नाडि, रुचि, वीचि, नालि, धूलि, किकि, केलि, छवि, रात्रि आदि शब्दोंका स्त्रीलिङ्गमें प्रयोग हो, यथा-इयं तिथिः । अमरसिंहने तो " तिथयो द्वयोः " ऐसा कहा है और भारविने " तस्य भुवि बहुतिथास्तिथयः " ऐसा प्रयोग किया है । स्त्रीत्व होनेपर तो "बहुतिथ्यः" ऐसा प्रयोग होजाता । श्रीहर्षनेभी " निखिलान्निशि पौर्णिमातिथीन् " ऐसे प्रयोग किया है ॥

२६ 'शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रुटिवलिपंक्तयः' ॥ एतेऽपि स्त्रियां स्युः । इयं शष्कुलिः ॥

२६-शष्कुलि, राजि, कुटि, अशनि, वर्त्ति, भ्रुकुटि, त्रुटि, वलि, पंक्ति शब्द स्त्रीलिङ्गमें प्रयुक्त हों, यथा-इयं शष्कुलिः ॥

२७ 'प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः' ॥ इयं प्रतिपदित्यादि । उषा उच्छन्ती । उषाः प्रातरधिष्ठात्री देवता ॥

२७-प्रतिपद्, आपद्, विपद्, सम्पद्, शरद्, संसद्, परिषद्, उषस्, संवित्, क्षुत्, पुत्, मुत्, समिध्, शब्द स्त्रीलिङ्गमें प्रयुक्त हों, यथा-इयं प्रतिपद् । उषाः उच्छन्ती । उषाः अर्थात् प्रातरधिष्ठात्री देवता ॥

२८ 'आशीर्धूःपूर्गीर्द्वारः' ॥ इयमाशीरित्यादि ॥

२८-आशिष्, धुर्, पुर्, गिर्, और द्वार् शब्दका स्त्रीलिङ्गमें प्रयोग हो, यथा-इयमाशीः इत्यादि ॥

२९ 'अप्सुमनस्समासिकतावर्षाणां बहुत्वं च' ॥ अबादीनां पञ्चानां स्त्रीत्वं स्याद्बहुत्वं च । आप इमाः । "स्त्रियः सुमनसः पुष्पम्" "सुमना मालती जातिः" । देववाची तु पुंस्येव । "सुपर्वाणः सुमनसः" बहुत्वं प्रायिकम् । एका च सिकता तैलदाने असमर्थेति अर्थवत्सूत्रे भाष्यप्रयोगात् । समांसमां विजायत इत्यत्र समायांसमायामिति भाष्याच्च । विभाषाग्राधे· डिति सूत्रे अग्रासातां सुमनसाविति वृत्तिव्या· ख्यायां हरदत्तोऽप्येवम् ॥

२९-अप्, सुमनस्, समा, सिकता, वर्षा यह पांच शब्द स्त्रीलिङ्गमें और बहुवचनमें प्रयुक्त हों, यथा-आपः इमाः । "स्त्रियः सुमनसः पुष्पम्" । "सुमना मालती जातिः" । देवतावाचक सुमनस् शब्द तो पुँल्लिङ्ग ही है, यथा-"सुपर्वाणः सुमनसः" । इनका बहुत्वविधान प्रायिक है कारण कि, "एका च सिकता तैलदानेऽसमर्था" ऐसा अर्थवत् सूत्रमें भाष्य प्रयोग है और "समांसमां विजायते" इस स्थलमें "समायांसमायाम्" ऐसा भाष्यमें वर्णित है । और "विभाषाग्राधेट्० " इस सूत्रमें "अग्रासातां सुमनसौ " ऐसा वृत्तिव्याख्यामें हरदत्तने भी कहा है ॥

३० 'स्रक्त्वग्ज्योग्वाग्यवागूनौस्फिजः' ॥ इयं स्रक् त्वक् ज्योक् वाक् यवागूः नौः स्फिक् ॥

३०-स्रज्, त्वच्, ज्योक्, वाच्, यवागू, नौ और स्फिच् शब्दका स्त्रीलिङ्गमें प्रयोग हो, यथा-इयं स्रक् । त्वक् । ज्योक् । वाक् । यवागूः । नौः । स्फिक् ॥

३१ 'तृटिसीमासंबध्याः' ॥ इयं तृटिः । सीमा । सम्बध्या ॥

३१-तृटि, सीमा और संबध्या शब्द स्त्रीलिङ्गमें प्रयुक्त हों, यथा-इयं तृटिः । सीमा । संबध्या ॥

३२ 'चुल्लिवेणिखार्यश्च' ॥ स्पष्टम् ॥

३२-चुल्लि, वेणि, खारि शब्द स्त्रीलिङ्गमें प्रयुक्त हों ॥

३३ 'ताराधाराज्योत्स्नादयश्च' ॥

३३-तारा, धारा, ज्योत्स्ना आदि शब्द स्त्रीलिङ्गमें प्रयुक्त हों ॥

३४ 'शलाका स्त्रियां नित्यम्' ॥ नित्यग्रहण- मन्येषां क्वचिद्व्यभिचारं ज्ञापयति ॥

॥ इति स्त्र्यधिकारः ॥

३४-शलाका शब्द नित्य स्त्रीलिङ्ग हो, नित्य शब्द ग्रहण अन्य शब्दोंके स्त्रीत्वका कहीं २ व्यभिचार ज्ञापन करता है । जिस २ स्थानमें व्यभिचार होता है, वह पहिले ही कह- दिया है ॥

इति स्त्रीलिङ्गप्रकरणम् ।

अथ पुँल्लिंगाधिकारः ।

३५ 'पुमान्' ॥ अधिकारोयम् ॥

३५-यहांसे पुँल्लिङ्गका अधिकार है ॥

३६ 'घञबन्तः' ॥ पाकः । त्यागः । करः । गरः । भावार्थ एवेदम् । नपुंसकत्वविशिष्टे भावे क्तल्युड्भ्यां स्त्रीत्वविशिष्टे तु क्तिन्नादिभि- र्बाधेन परिशेषात् । कर्मादौ तु घञाद्यन्तमपि विशेष्यलिङ्गम् । तथा च भाष्यम् । सम्बन्धम· नुवर्तिष्यत इति ॥

३६-घञ् और अप्प्रत्ययान्त शब्द पुँल्लिंग हों, यथा- पाकः । त्यागः । अप् यथा-करः । गरः । भाववाच्यमें विहित जो घञ् और अप् तदन्तमें ही यह सूत्र प्रवृत्त होगा, कारण कि, नपुंसकत्वविशिष्टभावमें क्त और ल्युट् प्रत्यय और स्त्रीत्वविशिष्टभावमें क्तिन् आदि प्रत्यय बाधक होजाता· है कर्म्मादिवाच्यमें घञ् आदि प्रत्ययान्त शब्द भी विशेष्य- लिंग होंगे, अत एव भाष्यकारने " सम्बन्धमनुवर्तिष्यते " यहां कर्मवाच्यमें घञ् करके क्लीबलिंगका प्रयोग किया है ॥

३७ 'घाजन्तश्च' ॥ विस्तरः । गोचरः । चयः । जयः । इत्यादि ॥

३७-घ और अच्प्रत्ययान्त पद पुँल्लिङ्गमें प्रयुक्त हों, विस्तरः । गोचरः । चयः । जयः । इत्यादि ॥

३८ 'भयलिङ्गभगपदानि नपुंसके ॥ एतानि नपुंसके स्युः । भयम् । लिङ्गम् । भगम् । पदम् ॥

३८-भय, लिङ्ग, भग और पद शब्द क्लीबलिङ्गमें प्रयुक्त हों, यथा-भयम् । लिङ्गम् । भगम् । पदम् ॥

३९ 'नङन्तः' ॥ नङ्प्रत्यान्तः पुंसि स्यात् । यज्ञः । यत्नः ॥

३९-नङ्प्रत्ययान्त शब्दका पुँल्लिङ्गमें प्रयोग हो, यथा- यज्ञः । यत्नः ॥

४० 'याच्ञा स्त्रियाम्' ॥ पूर्वस्यापवादः ॥

४०-याञ्चा शब्द स्त्रीलिङ्गमें प्रयुक्त हो, यह सूत्र पूर्वसूत्रका अपवाद है ॥

४१ 'क्यन्तो घुः' ॥ किप्रत्ययान्तो घुः पुंसि स्यात् । आधिः । निधिः । उदधिः । क्यन्तः किम् । दानम् । घुः किम् । जज्ञिर्बीजम् ॥

४१-किप्रत्ययान्त घुसंज्ञक धातुनिष्पन्न शब्द अर्थात् दा और धा धातुनिष्पन्न शब्द पुँल्लिङ्ग हों,यथा-आधिः । निधिः। उदधिः । किप्रत्ययान्त न होनेपर न होगा, यथा-दानम् । घुसंज्ञक न होनेपर यथा-जज्ञिर्बीजम् ॥

४२ 'इषुधिः स्त्री च' ॥ इषुधिशब्दः स्त्रियां पुंसि च ॥ पूर्वस्यापवादः ॥

४२-इषुधि शब्द स्त्रीलिङ्ग और पुँल्लिङ्गमें प्रयुक्त हो, यह पूर्वसूत्रका अपवाद है ॥

४३ 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपंकाभिधानानि' ॥ एतानि पुंसि स्युः। देवाः सुराः। असुरा दैत्याः। आत्मा क्षेत्रज्ञः। स्वर्गो नाकः। गिरिः पर्वतः। समुद्रोऽब्धिः। नखः कररुहः। केशः शिरोरुहः। दन्तो दशनः। स्तनः कुचः। भुजो दोः। कण्ठो गलः। खड्गः करवालः। शरो मार्गणः। पंकः कर्दम इत्यादि ॥

४३–देव, असुर, आत्मन्, स्वर्ग, गिरि, समुद्र, नख, केश, दन्त, स्तन, भुज, कण्ठ, खड्ग, शर और पंक-वाचक शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–देवाः सुराः। असुरा दैत्याः। आत्मा क्षेत्रज्ञः। स्वर्गो नाकः। गिरिः पर्वतः। समुद्रोऽब्धिः। नखः कररुहः। केशः शिरोरुहः। दन्तो दशनः। स्तनः कुचः। भुजः दोः। कण्ठो गलः। खड्गो करवालः। शरो मार्गणः। पंकः कर्दमः। इत्यादि ॥

४४ 'त्रिविष्टपत्रिभुवने नपुंसके' ॥ स्पष्टम्। तृतीयं विष्टपं त्रिविष्टपम्। स्वर्गाभिधानतया पुंस्त्वे प्राप्ते अयमारम्भः ॥

४४–त्रिविष्टप और त्रिभुवन शब्द क्लीबलिंग हों, तृतीयं विष्टपम्=त्रिविष्टपम्। स्वर्ग पर्याय होनेसे पुंस्त्व प्राप्त होनेपर, उसके निवारणके निमित्त यह सूत्र कियाहै ॥

४५ 'द्यौः स्त्रियाम्' ॥ द्योदिवोस्तन्त्रेणोपादानमिदम् ॥

४५–द्यो और दिव् शब्द स्त्रीलिंगमें प्रयुक्त हों, यहां द्यो और दिव् शब्दका तन्त्रसे उपादान है। (स्वर्गवाचक होनेके कारण पुँल्लिंगत्व प्राप्त था उसके निषेध करनेके लिये यह सूत्र कियाहै) ॥

४६ 'इषुबाहू स्त्रियां च' ॥ चात्पुंसि ॥

४६–इषु और बाहु शब्द स्त्रीलिंगमें प्रयुक्त हों, चकार-निर्देशके कारण पुँल्लिंगमें भी प्रयुक्त हों ॥

४७ 'बाणकाण्डौ नपुंसके च' ॥ चात्पुंसि। त्रिविष्टपेत्यादिचतुःसूत्री देवासुरेत्यस्यापवादः॥

४७–बाण और काण्ड शब्द नपुंसक और चकारसे पुँल्लिंगमें प्रयुक्त हों "त्रिविष्टप" इत्यादि चार सूत्र "देवासुर०" इस सूत्रके अपवाद हैं ॥

४८ 'नान्तः' ॥ अयं पुंसि। राजा। तक्षा। मन्प्रत्ययान्तः चर्मवर्मादिष्वतिव्याप्तिः। मन्द्व्यच्कोऽन च चर्मवर्मादिष्वतिव्याप्तिः। मन्द्व्यच्कोऽकर्तरीति नपुंसकप्रकरणे वक्ष्यमाणत्वात् ॥

४८–नकारान्त शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–राजा। तक्षा। ऐसे होनेपर चर्मन् और वर्म्मन् आदि शब्दोंमें अतिव्याप्ति तो नहीं कहसकते हो, क्यों कि,मन्प्रत्ययान्त दो अच् विशिष्ट शब्द क्लीबलिंगमें प्रयुक्त हों कर्तृवाच्यमें नहीं ऐसा नपुंसक प्रकरणमें वक्ष्यमाण है ॥

४९ 'क्रतुपुरुषकपोलगुल्फमेघाभिधानानि' ॥ क्रतुरध्वरः। पुरुषो नरः। कपोलो गण्डः। गुल्फः प्रपदः। मेघो नीरदः ॥

४९–क्रतु, पुरुष, कपोल, गुल्फ और मेघवाचक शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–क्रतुरध्वरः। पुरुषो नरः। कपोलो गण्डः। गुल्फः प्रपदः। मेघो नीरदः ॥

५० 'अभ्रं नपुंसकम्' ॥ पूर्वस्यापवादः ॥

५०–अभ्र शब्द नपुंसकलिंगमें प्रयुक्त हो, यह सूत्र पूर्व-सूत्रका अपवाद है ॥

५१ 'उकारान्तः' ॥ अयं पुंसि स्यात्। प्रभुः। इक्षुः। "हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम् ॥ द्वयोः कपोलावयवे" इति मेदिनिः। "करेणुरिभ्यां स्त्री नेभे" इत्यमरः। एवं जातीयकविशेषवचनानाक्रान्तस्तु प्रकृतसूत्रस्य विषयः। उक्तंच–"लिंगशेषविधिर्व्यापी विशेषैर्यद्यबाधितः" इति। एवमन्यत्रापि ॥

५१–उकारान्त शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–प्रभुः। इक्षुः। "हट्टविलासिनी नृत्यारम्भ और रोगार्थमें हनु शब्द स्त्रीलिंग है" कपोलोंके अवयवार्थमें पुँल्लिंग और स्त्रीलिंग है" स्त्रीलिंग है ऐसा मेदिनी है करेणु शब्द हस्तिनी अर्थमें हस्ती होनेपर पुँल्लिंग है, इस प्रकार विशेष वचन से अनाक्रान्त जो हो, वह प्रकृत सूत्रका विषयीभूत है, कहा है कि, यदि विशेषसूत्र बाधक न हो तो लिंगका शेषविधि ग्राह्य होताहै इस प्रकार अन्यत्र भी समझना ॥

५२ 'धेनुरज्जुकुहूसरयुतनुरेणुप्रियंगवः' ॥ स्त्रियाम् ॥

५२–धेनु, रज्जु,कुहु, सरयु, तनु, रेणु और प्रियंगु शब्द स्त्रीलिंगमें प्रयुक्त हों ॥

५३ 'समासे रज्जुः पुंसि च' ॥ कर्कटरज्जुना-कर्कटरज्ज्वा ॥

५३–समासमें रज्जु शब्द पुँल्लिंगमें भी प्रयुक्त हो, कर्कटरज्जुना, कर्कटरज्ज्वा ॥

५४ 'श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके' ॥

५४–श्मश्रु, जानु, वसु, स्वादु, अश्रु, जतु, त्रपु और तालु शब्द क्लीबलिंगमें प्रयुक्त हों ॥

५५ 'वसु चार्थवाचि' ॥ अर्थवाचीति किम्। "वसुर्मयूखाग्निधनाधिपेषु" ॥

५५–धनवाचक वसु शब्द नपुंसकलिंगमें प्रयुक्त हो, धनवाचक न होनेपर यथा–"वसुर्मयूखाग्निधनाधिपेषु" ॥

५६ 'मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च' ॥ चात्पुंसि। अयं मद्गुः इदं मद्गु ॥

५६–मद्गु, मधु, सीधु, शीधु, सानु, कमण्डलु शब्द नपुंसक और चकारसे पुल्लिंगमें प्रयुक्त हों, यथा–अयम् मद्गुः, इदम् मद्गु ॥

५७ 'रुत्वंतः' ॥ मेरुः। सेतुः ॥

५७–रु और तु शब्दान्त शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–मेरुः। सेतुः ॥

५८ 'दारुकसेरुजतुवस्तुमस्तूनि नपुंसके' ॥ रुत्वंत इति पुंस्त्वस्यापवादः । इदं दारु ॥

५८-दारु, कसेरु, जतु, वस्तु और मस्तु शब्द नपुंसकलिंगमें प्रयुक्त हों, यह सूत्र "रुत्वन्तः" इस पूर्वोक्त सूत्रसे प्राप्त पुंस्त्वका अपवाद है, यथा-इदं दारु ॥

५९ 'सक्तुर्नपुंसके च' ॥ चात्पुंसि । सक्तुः-सक्तु ॥

५९-सक्तु शब्द नपुंसक और चकारसे पुँल्लिंगमें प्रयुक्त हो, यथा-सक्तुः, सक्तु ॥

६० 'प्राग्रश्मेरकारान्तः' ॥ रश्मिदिवसाभिधानमिति वक्ष्यति प्रागेतस्मादकारान्त इत्यधिक्रियते ॥

६०-" रश्मिदिवसाभिधानम् " इस सूत्रके पूर्वपर्यन्त "अकारान्त" शब्दका अधिकार है-॥

६१ 'कोपधः' ॥ कोपधोऽकारान्तः पुंसि स्यात् । स्तवकः । कल्कः ॥

६१-ककारोपध अकारान्त शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-स्तवकः । कल्कः ॥

६२ 'चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके' ॥ पूर्वसूत्रापवादः ॥

६२-ककारोपध अकारान्त चिबुक, शालूक, प्रातिपदिक, अंशुक, उल्मुक शब्द नपुंसकलिंगमें प्रयुक्त हों, यह सूत्र पूर्वसूत्रका अपवाद है ॥

६३ 'कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलाकानि नपुंसके च' ॥ चात्पुंसि । अयं कण्टकः । इदं कण्टकमित्यादि ॥

६३-ककारोपध अकारान्त कण्टक, अनीक, सरक, मोदक, चषक, मस्तक, पुस्तक, तडाक, निष्क, शुष्क, वर्चस्क, पिनाक, भाण्डक, पिण्डक, कटक, शण्डक, पिटक, तालक, फलक और पुलाक शब्द नपुंसक और पुँल्लिंगमें प्रयुक्त हों, यथा-अयं कण्टकः, इदं कण्टकम् । इत्यादि ॥

६४ 'टोपधः' ॥ टोपधोऽकारान्तः पुंसि स्यात् । घटः । पटः ॥

६४-अकारान्त टकारोपध शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-घटः । पटः । इत्यादि ॥

६५ 'किरीटमुकुटललाटवटवीटशृङ्गाटकराटलोष्टानि नपुंसके' ॥ किरीटमित्यादि ॥

६५-अकारान्त टकारोपध किरीट, मुकुट, ललाट, वट, वीट, शृंगाट, कराट और लोष्ट शब्द नपुंसकलिंगमें प्रयुक्त हों, यथा-किरीटम् । इत्यादि ॥

६६ 'कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च' ॥ चात्पुंसि । कुटः-कुटमित्यादि ॥

६६-अकारान्त टकारोपध, कुट, कूट, कपट, कवाट, कर्पट, नट, निकट, कीट और कट शब्द क्लीबलिंग और पुँल्लिंगमें प्रयुक्त हों, यथा कुटः, कुटम् । इत्यादि ॥

६७ 'णोपधः' ॥ णोपधोऽकारान्तः पुंसि स्यात् । गुणः । गणः । पाषाणः ॥

६७-अकारान्त णकारोपध शब्द पुँल्लिंग में प्रयुक्त हों, यथा-गुणः । गणः । पाषाणः । इत्यादि ॥

६८ 'ऋणलवणपर्णतोरणरणोष्णानि नपुंसके' ॥ पूर्वसूत्रापवादः ॥

६८-अकारान्त णकारोपध ऋण, लवण, पर्ण, तोरण, रण और उष्ण शब्द नपुंसकलिंगमें प्रयुक्त हों, यह पूर्वसूत्रका अपवाद है ॥

६९ 'कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च' ॥ चात्पुंसि ॥

६९-अकारान्त णकारोपध कार्षापण, स्वर्ण, सुवर्ण, व्रण, चरण, वृषण, विषाण, चूर्ण और तृण शब्द नपुंसक और पुँल्लिंगमें प्रयुक्त हों, यथा-कार्षापणः, कार्षापणम् । इत्यादि ॥

७० 'थोपधः' ॥ रथः ॥

७०-अकारान्त थकारोपध शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-रथः ॥

७१ 'काष्ठपृष्ठसिक्थोक्थानि नपुंसके' ॥ इदं काष्ठमित्यादि ॥

७१-अकारान्त काष्ठ, पृष्ठ, सिक्थ, और उक्थ शब्द नपुंसकलिंगमें प्रयुक्त हों, इदं काष्ठम् इत्यादि ॥

७२ 'काष्ठा दिगर्था स्त्रियाम्' ॥ इमाः काष्ठाः ॥

७२-काष्ठा शब्द दिग्वाचक होनेपर स्त्रीलिंगमें प्रयुक्त हो, यथा-इमाः काष्ठाः ॥

७३ 'तीर्थप्रोथयूथगाथानि नपुंसके च' ॥ चात्पुंसि । अयं तीर्थः । इदं तीर्थम् ॥

७३-अकारान्त थकारोपध तीर्थ, प्रोथ, यूथ और गाथ शब्द पुँल्लिंग और नपुंसकलिंगमें प्रयुक्त हों, यथा-अयं तीर्थः, इदं तीर्थम् ॥

७४ 'नोपधः' ॥ अदन्तः पुंसि । इनः । फेनः ॥

७४-अकारान्त नकारोपध शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-इनः । फेनः ॥

७५ 'जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके' ॥ पूर्वस्यापवादः ॥

७५-अकारान्त नकारोपध जघन, अजिन, तुहिन, कानन, वन वृजिन, विपिन, वेतन, शासन, सोपान, मिथुन, श्मशान, रत्न, निम्न, और चिह्न शब्द नपुंसकलिंगमें प्रयुक्त हों, यह पूर्वसूत्रका अपवाद है ॥

७६ 'मानयानाऽभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसमानभवनवसनसम्भावनविभावनविमानानि नपुंसके च' ॥

चात्पुंसि। अयं मानः । इदं मानम् ॥

७६–अकारान्त नकारोपध, मान, यान, अभिधान, नलिन, पुलिन, उद्यान, शयन, आसन, स्थान, चन्दन, आलान, सम्मान, भवन, वसन, संभावन, विभावन और विमान शब्द नपुंसक और चकारसे पुँल्लिगमें प्रयुक्त हों, यथा–अयं मानः, इदं मानम् । इत्यादि ॥

७७ 'पोपधः'॥अदन्तः पुंसि । यूपः । दीपः । सर्पः ॥

७७–अकारान्त पकारोपध शब्द पुँल्लिगमें प्रयुक्त हों, यथा–यूपः । दीपः । सर्पः ॥

७८ 'पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके' ॥ इदं पापमित्यादि ॥

७८–अकारान्त पकारोपध, पाप, रूप, उडुप, तल्प, शिल्प, पुष्प, शष्प, समीप और अन्तरीप शब्द नपुंसकलिंगमें प्रयुक्त हों, यथा–इदं पापम् ॥

७९ 'शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च' ॥ अयं शूर्पः । इदं शूर्पमित्यादि ॥

७९–अकारान्त पकारोपध, शूर्प, कुतप, कुणप, द्वीप और विटप शब्द नपुंसक और चकारसे पुँल्लिगमें प्रयुक्त हों, यथा–अयं शूर्पः । इदं शूर्पम् इत्यादि ॥

८० 'भोपधः' ॥ स्तम्भः । कुम्भः ॥

८०–अकारान्त भकारोपध शब्द पुँल्लिगमें प्रयुक्त हों, यथा–स्तम्भः । कुम्भः ॥

८१ 'तलभं नपुंसकम्' ॥ पूर्वस्यापवादः ॥

८१–अकारान्त तलभ शब्द नपुंसकलिंगमें प्रयुक्त हो, यह सूत्र पूर्वसूत्रका अपवाद है ॥

८२ 'जृम्भं नपुंसके च'॥ जृंभम् । जृम्भः ॥

८२–अकारान्त जृम्भ शब्द नपुंसक और चकारसे पुँल्लिगमें प्रयुक्त हो, यथा–जृम्भम् , जृम्भः ॥

८३ 'मोपधः' ॥ सोमः । भीमः ॥

८३–अकारान्त मकारोपध शब्द पुँल्लिगमें प्रयुक्त हों, यथा–सोमः । भीमः ॥

८४ 'रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके' ॥ इदं रुक्ममित्यादि ॥

८४–अकारान्त मकारोपध, रुक्म, सिध्म, युग्म, इध्म, गुल्म, अध्यात्म और कुंकुम शब्द नपुंसकलिंगमें प्रयुक्त हों, यथा–इदं रुक्मम् । इत्यादि ॥

८५ 'संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च' ॥ चात्पुंसि । अयं संग्रामः। इदं संग्रामम् ॥

८५–अकारान्त मकारोपध, संग्राम, दाडिम, कुसुम, आश्रम, क्षेम, क्षौम, होम और उद्दाम शब्द नपुंसक और चकारसे पुँल्लिगमें प्रयुक्त हों, यथा–अयं संग्रामः, इदं संग्रामम् । इत्यादि ॥

८६ 'योपधः' ॥ समयः । हयः ॥

८६–अकारान्त यकारोपध शब्द पुँल्लिगमें प्रयुक्त हों, यथा–हयः । समयः ॥

८७'किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके'॥ स्पष्टम् ॥

८७–अकारान्त यकारोपध, किसलय, हृदय, इन्द्रिय और उत्तरीय शब्द नपुंसकलिंगमें प्रयुक्त हों ॥

८८ 'गोमयकषायमलयान्वयाव्ययानि नपुंसके च' ॥ गोमयः । गोमयम् ॥

८८–अकारान्त यकारोपध, गोमय, कषाय, मलय, अन्वय और अव्यय शब्द नपुंसक और चकारसे पुँल्लिगमें प्रयुक्त हों, यथा–गोमयः, गोमयम् । इत्यादि ॥

८९ 'रोपधः' ॥ क्षुरः । अङ्कुरः ॥

८९–अकारान्त रकारोपध शब्द पुँल्लिगमें प्रयुक्त हों, यथा–क्षुरः । अंकुरः ॥

९० 'द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनीरतीरदूरकृच्छ्ररंध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदराजस्रशरीरकन्दरमन्दारपञ्जराजरजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रक्षत्रक्षेत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रास्त्रशस्त्रशास्त्रवस्त्रपत्रपात्रच्छत्राणि नपुंसके' ॥ इदं द्वारमित्यादि ॥

९०–अकारान्त रकारोपध द्वार, अग्र, स्फार, तक्र, वक्र, वप्र, क्षिप्र, क्षुद्र नीर, तीर, दूर, कृच्छ्र, रन्ध्र, अश्र, श्वभ्र, भीर, गभीर, क्रूर, विचित्र, केयूर, केदार, उदर, अजस्र, शरीर, कन्दर, मन्दार, पञ्जर, अजर, जठर, अजिर, वैर, चामर, पुष्कर, गह्वर, कुहर, कुटीर, कुलीर, चत्वर, काश्मीर, नीर, अम्बर, शिशिर, तंत्र, यंत्र, क्षत्र, क्षेत्र मित्र, कलत्र, चित्र, मूत्र, सूत्र, वक्त्र, नेत्र, गोत्र, अंगुलित्र, भलत्र, अस्त्र, शस्त्र, शास्त्र, वस्त्र, पत्र, पात्र और छत्र शब्द नपुंसकलिंगमें प्रयुक्त हों, यथा–इदं द्वारम् । इत्यादि ॥

९१ 'शुक्रमदेवतायाम्' ॥ इदं शुक्रं रेतः ॥

९१–अकारान्त रकारोपध शुक्र शब्द देवताभिन्नार्थमें नपुंसकलिंग हो, यथा–इदं शुक्रम्, अर्थात् रेतः । (देवतार्थमें पुँल्लिग होगा यथा–शुक्रो दैत्यगुरुः) ॥

९२ 'चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृंगारभृंगारमन्दारोशीरतिमिरशिशिराणि नपुंसके च' ॥ चात्पुंसि । चक्रः–चक्रमित्यादि ॥

९२–अकारान्त रकारोपध चक्र, वज्र, अन्धकार, सार, आवार, पार, क्षीर, तोमर, शृंगार, भृङ्गार, मन्दार, उशीर, तिमिर और शिशिर, शब्द नपुंसक और पुँल्लिङ्गमें प्रयुक्त हों, यथा–चक्रः, चक्रम् । इत्यादि ॥